शब्दतत्त्वम्

(तत्सम्बन्धि) आधुनिकविज्ञानञ्च

Element of Sound & Modern Science related to it

SREE SANKARACHARYA UNIVERSITY OF SANSKRIT
LIBRARY
KALADY

लेखकः

डॉ० रामनारायणदासः

(उपनाम–रामआसरे द्विवेदी)

नव्यव्याकरणाचार्यः (लब्धस्वर्णपदकः)

विद्यावारिधिः (पीएच० डी०), वाचस्पतिः (डी० लिट्)

प्रवाचकः (रीडर) एवम् अध्यक्षः, व्याकरणविभागस्य,

गुरुवायूरकेन्द्रीयसंस्कृतविद्यापीठम्,

पुरनाट्टुकरा, त्रिचूर (केरल)

सितम्बर १९९० ई०] वाराणसी [२०४७ वि० भाद्रपदशुक्लपक्षः

प्रकाशक :
डॉ० रामनारायणदास
ग्रा०—देवरी (तप्पा छानवे)
पो०—विरोही
जि०—मिर्जापुर (उ० प्र०)

Publisher :
Dr. R. N. Das
V. Deuri (Tappa Chanawai)
P. O. Virohi.
Distt.—Mirzapur. (U. P.)

•

द्वितीय संस्करण : १९९०

Second Edition. 1990

SREE SANKARACHARYA UNIVERSITY OF SANSKRIT KALADY LIBRARY 4750

215 RAM/S

मूल्य : ८०/=
(अस्सी रुपया मात्र)

Price : Rs. 80/=
(Eighty Rupees only)

•

[पुनर्मुद्रणादयः सर्वेऽधिकारा लेखकेन स्वायत्तीकृताः]

•

मुद्रक : आनन्द प्रिंटिंग प्रेस, जगतगंज, वाराणसी

Printer : **Anand Printing Press, Jagataganj, Varanasi.**

चत्वारि वाक्परिमिता पदानि
तानि विदुर्ब्राह्मणा ये मनीषिणः।
गुहा त्रीणि निहिता नेङ्गयन्ति
तुरीयं वाचो मनुष्या वदन्ति॥

× × × ×

चत्वारि शृङ्गा त्रयो अस्य पादाः
द्वे शीर्षे सप्त हस्तासो अस्य।
त्रिधा बद्धो वृषभो रोरवीति,
महो देवो मर्त्यां आविवेश॥

—ऋग्वेदः

SREE SANKARACHARYA UNIVERSITY OF SANSKRIT KALADY LIBRARY

PREFACE

"Shabda Tattvam (Tatsambandhi) Ādhunik Vijñānanch"

"Element of Sound and Modern Science related to it"

In this work, the author has taken help from Sanskrit books Pāṇiniya Vyākaraṇa, Nyāya Shāstra, Shikshā, Nirukta, Prātisākhya, Vedas, Shabda Sakti Vijñāna, Physics, Chemistry Linguistics etc., for propounding the nature of sound (Sabda), Mahābhāshva describes three characteristics of sound—

(i) येनोच्चारितेन सास्नालांगूल ककुद खुर,
पिषाणिनां सम्प्रत्ययो भवति स शब्दः ।

(ii) अथवा प्रतीतपदार्थको लोके ध्वनिः शब्दः ।

(iii) Third characteristic has been described in the Pratyāhārāhmika of Mahābhāsya while explaining Pāṇini's Sūtra, "श्रोत्रोपलब्धिबुंद्धिनिर्ग्राह्य प्रयोगेणाभिज्वलितः आकाशदेशः शब्दः ।"

In the first characteristic, sound is defined as 'Sphoṭa' conceived as etarnal, indivisible and creative sound or sound of 'Praṇava' in the conscience and the same is described as meaningful sound. The external Vaikharī is just echo because internal sphoṭa is manifested through it.

As a crystal, when put in contact with a red flower like Ghaṭ, Paṭa looks red in the same way external sounds enter the conscience through the hearing organ and convert the eternal sound present there in their own form and manifest it. The internal indivisible sound 'Sphoṭa' gives meaning to these external echos.

The second characteristic makes no difference between sound (Sabda) and echo (dhvani). In this way echo is the sound. The term Dhwani has been described in two ways–in form of internal sound as well as in form of external echo. 'Dhvanavati' and 'Dhvanvate yah' are two etymological analyses of the term Dhvani. Thus both Sphoṭa (that which is manifested or indicated) and Vaikhari (that which manifests or indicates) are called sound (Shabda).

The third characteristic is also explained by the grammerians in two ways external and internal. The explaination based on external

sound is scientific and is displayed through the apparatus like tape-recorder.

The Summary of the discussion is that there are two meaningful sounds—Dhvani and Sphoṭa. Bhartrihari in Brahmakāṇḍa of his Vākyapadīyam says the same —

द्वावुपादान शब्देषु शब्दौ शब्दविदो विदुः ।
एकोनिमित्तं शब्दानामपरोऽर्थे प्रयुज्यते ॥

The subtle nature of Sabda (sound) is spread in the whole Universe. This fact has been established by the scientists in their own way. There is a continuous vibration in the atoms of all matters. The atoms of the bricks of the wall, the table, the pen are continuously vibrating. Vibration necessarily produces sound. The subtle nature of sound is spread all over the world. This form of sound is beyond the reach of hearing organ and can not be received by any instrument.

The sound has power to create the substance Chemical, Zoological and Mechanical activities are performed by the para-sound. The Rishis of ancient India had achieved a lot through the power of sound.

Regarding the languages, I have concluded that there is no causal relation among themselves. No sound can be transformed because it is eternal. The sound Karṇa and Kāna have their different entities. There many certain amount of similarity between them and on the basis of such similarity it may be imagined that the former has been transformed in to the latter, but infact no sound is transformed into the other.

So the origin of other language is made possible only through inter-lingual mixture of sounds. Animals and Birds like Cows, Lions and Parrots have their own different language. In the same way gods have their own language which is called Sanskrit or the language of gods. The languages of mankind are Pāli and Prākrit and they are completely different from Sanskrit, the language of gods. It iswrong to say that Pāli and Prākrit are the distortions of Sanskrit or that Sanskrit is modification of Pāli and Prākrit, There are illusory imaginations.

Rishis have brought Sanskrit Language on the Earth. Prior to that men of wisdom used the languages like Prākrit and Pāli.

The incarnation of the language of gods (Sanskrit) is described in the Rigveda : (X Maṇḍala, 71 Richa)

यज्ञेन वाचः पदवीयमभ्यन्तामन्वविन्दिन्नृषिषु प्रविष्टाम् ।
तामाभृत्या व्यदधुः पुरुत्रा तां सप्तरेभिः अभिसन्वन्ते ॥

विदितार्थधीराः पदवीयम्=वेतरथो यत् संज्ञापूर्वकस्य विधेरनित्यत्वाद् गुणाभावः । पदेन यातव्यः पन्थाः पदवीयः तं वाचो मार्ग यज्ञेन अभ्यन्=प्राप्तवन्तः । ऋषिषु अतीन्द्रियार्थदर्शिषु प्रविष्टां तां वाचमविन्दन्=अलभन्त । अनन्तरं तां वाचमाभृत्य आभृत्य पुरुत्रा बहुषु देशेषु व्यदधुः=व्यकार्षुः । सर्वान् मनुष्यान् अध्यापयामासुरित्यर्थः । एतादृशीं वाचं रेभाः शब्दायमानाः पक्षिणः पक्षरूपाणि गायत्र्यादीनि सप्तच्छन्दोभिः अभिसन्वन्ते= अभितः संगच्छन्ते ।

(इति सायण भाष्यम्)

The wise knowers of the meaning invented the path of sound through Yajñas. They invited the Rishis in Yajñas after realizing the sound inherent in the transcendentalist Rishis, they taught it to the whole humanity. They realized this sound through seven metre like Gāyatrī etc.

'Saptarebha' in the above Mantra indicates the divine sound because 7 metre like Gāyatrī etc. are found only in it. So the Mantra of Rigveda describes the incamation of divine sound.

Sounds of other languages are the products of the mixture of Indian sounds in the similar way as a third new colour is produced out of the mixture of two colours. Prakrit, Apabhrnisha, English & Hindi are developments in same process. These languages do'nt have their independent existence. Paspashāhnika of Mahābhāshya says :—

"उपलब्धौ यत्नः क्रियताम् । महान् शब्दस्य प्रयोग विषयः । सप्तद्वीपा वसुमती । त्रयो लोकाः चत्वारो वेदाः । साङ्गा सरहस्याः बहुधा भिन्नाः । एकस्यामध्वर्युः शाखाः सहस्रवर्त्मा सामवेदः । एकविंशति वाह्वृत्त्यम् । नवधा अथर्वणो वेदाः । वाको वाक्यमितिहासः पुराणं वैद्यकमित्येतावच्छब्द प्रयोग विषमनिशम्य सन्त्यप्रयुक्ता इति वचनं साहसमात्रम् ।"

So it is my firm conviction that all the sounds, used or unused have their unmanifested basic existence in the transcendental sound.

According to those who believe that the sound is not eternal (Shabdaintyatvavadius), no language is the mother of the other lang-

uage. In the opinion of Naiyāykas "Suddhi + Upāsyah" is codvered into 'Sudhyupāsyah' etc. because is destroyed and 'y' is born and not that 'i' is converted into 'y'.

Vācya–Vācaka Vicāra (The theory of Meaning) Nagesh says that the word in mind and the meaning in the mind are Vācaka and Vācya respectively. There is nothing out side. Mañjūshā says in the context :—

विप्रपृथ्व्यादि चित्तस्थं न बहिस्थं कदाचन ।
स्वप्नभ्रमप्रमादेषु सर्वैरेवानुभूयते ॥

Bhartrihari says in the second chapter of Vākyapadīya :—

यो कार्यो बुद्धिविषयो बाह्य वस्तु निबन्धनः ।
स बाह्यं वस्तु इति ज्ञातः शब्दार्थं सम्यग् इष्यते ॥१३४॥

These arguments prove that the meaning is in the mind. Actually this Kārikā says that all the objects are in 'Chitta' and so they appear in dreams and awake Had they not been in the 'Chitta' they could not appear. The objects of the the appearance-experience are mental. But this does not mean that external object was nothing to do with the meaning process. At first the external object reaches to the mind through senses, then there is a correspondence between the idea present in mind and the external object received through senses. At last the knowledge of the object originates. This is the system for present life experiences For the experiences of past lives, correspondence between the idea and the object is not necessary. For example the in born child knows the facts of previous lives in the seventh month. Here in this case the object as well as its meaning both are mental.

(1) Varṇe Vijñānam.

(2) Akshar Samāmnāyah.

There are two types of alphabets—(a) Laukika (b) Classical. Latter is also called Akshar Samāmnāya. Alphabets are mainly divided in two types—(a) Wovel (b) Consonets. There are six types of wovels—sparsha, Antastha, Ushma, Anusvār and Visarga. Sparsha is of 5 types कु चु टु तु पु एते उदिताः Sparsha, Antastha and ushma wovels have been named according to the place of their origin.

Linguists divide the original sounds on the grounds of the tongue used in each case. There sounds are of three types (i) Agra-svara (ii) Paschāt-svara (iii) Kendrīya svara. There as another classification of wovels—(i) Samvrit (ii) Ardhsamvrit (iii) Vivrit (iv) Ardhavivrit. There are some other classification in the languages like Apabhvansha. Consonents are divided into Eight types.

Historian lingusit have pointed towards the gradual elimination of some wovels from the Vedic Literature.

According to prāti shākhya Ardhasmvrit wovels and sparsh-sangharshi-alphabets are defective. Due to these defects they were not used in Vedas. Patañ jali has written about some defects in Paspa-shahinka of Mahābhāsya. In the the 14th Chapter of Regveda—Prāti-shākhya, these defects have been described in details. Both defective and pure alphabets are enternal in the Akshar Samāmnaya of Varṇa—Vijñāna these topics have been discussed.

2. Varṇābhivyakti Prakriyā (The process of the manifestation of alphabets)—

In the second prakarana of the second Chapter, the theory of Vamabhivyakti, as propounded by Bhartrihari, has been discussed-In the Brahmakānda of vākyapadīya.

अथायमान्तरो ज्ञाता सूक्ष्म वागात्मना स्थित: ।
व्यक्तये स्वस्य रूपस्य शब्दत्वेन वित्रर्तते ॥११२॥
स मनोभावमापद्य तेजसा पाकमागत: ।
वायुमाविशति प्राणमथासो समुदीर्यते ॥११३॥
अन्त:करण तत्त्वस्य वायुराश्रयतां गर्त: ।
तद्धर्मेण समाविष्टस्तेजसैव विवर्तते ॥११४॥

The subtle knowledge of the conscience is manifested in the form of sound. Subtle sound is passed through internal fire (Tejas) and then through the Air (prāna). Then this air recives the proper place of throat etc. and is manifested in form of audible sound. This function is similar to that of Telephone. In telephones, sound creates vibration in the flux and this vibration is in the same proportion with the vibration of sound. The vibration of flux creates vibration in the electrical current and the energy of sound is converted into the energy of electricity.

Similar action takes place in human body when some sound is produced. When we desire to speak, the subtle sound is passed through the fire in abdomen and then it creates vibration into the electrical current or wave present in abdomen. Then this sound in form of fire (electric wave) reaches to the sound producing parts of body i. e. throat ete. through air (prāṇa). At these paces it plroduces an audible sound. "तद्धर्मेण समाविष्टस्तेजसैव विवर्तते ।" Bhartrihari discribes the same process in these lines. Actually speaking, the subtle sound present in consciousness and air (prāṇa) is manifested into audible sound with the help of throat etc. and it is not produced through some other sources.

There is difference of opinion among the schlors of ancient times and those of modern age regarding the pronouncement of alphabets. Sound is produced by the touch of tongue with palate. Different parts produce different alphabets. 'Ka' (क वर्ग)) is produced by thoat, 'Ta' (त वर्ग) is produced by teeth, and so on—

कण्ठ्यावहापिचुयशास्तालव्या: पा० शि०
जिह्वामूले तु कु: प्रोक्त: । अकुह विसर्जनीयानां कण्ठ: ।

The difference of theories regarding the origin of alphabets can be harmonized in this way. Actually the place of origin of the alphabets cannot be decided by the touch of tongue but by the touch of life air (prāṇa) In pānini's shikshā—

सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य मारुत: ।
वर्णान् जनयते तेषां त्रिभाग: पञ्चधास्मृत: ॥९।

In the Brahmkānda of Vākyapadiya—

लब्धक्रय: प्रयत्नेन वक्तुरिच्छानुवर्तिना ।
स्थानेष्वभिहतोवायु: शब्दत्वं प्रतिपद्यते ॥१०८॥

In this reference, the contradiction of Taitriya prātishākhya regarding the place of alphabets according to the combination of air, has been reconciled.

The combat of air with the palate is not effortless. In this effort, the touch of tongue is with lower palate and air combat is with upper palate. The touch of tongue and air combat cannot occur at the same time and place because the lower part of palate is united with the tongue. Air can not reach this point because there is no vaccum. However, it is possible to touch the power palate with the middle tongue and

the air combat in the upper palate at one the same time. It is just like the touch and air combat in a harmonium This fact has been described indetail in this chapter.

3. Evolution.

Linguists accept the evolution of the alphabets considering them eternal.

This theory is not foolproof. Even if they are not eternal, there can not be a foolproof theory. so the evolution of these alphabets is only partly correct.

III CHAPTER

Vākya pada Vijñānam—

This Chapter is divided into two parts – (1) Vākya Vyākhyā or the explanation of sentences. (2) Pada Vyākhyā or the explanation of words. In the IInd Chapter of Vākyapadīya—the sentences are of a types.

अख्यात शब्दः संघातो जातिः संघातवर्तिनी ।
एकोऽनवयः शब्दः क्रमो बुद्ध्यनसंहृतिः ॥१॥
पदमाद्यं पृथक् सर्वं पदं साकांक्षमित्यपि ।
वाक्यं प्रतिमतिर्भिन्ना बहुधा न्यायवादिनाम् ॥२॥

Translated by :
Dr Jata Shanker,
Lecturer, philosophy Deptt,
University of Allahabad.
ALLAHABAD–211 002.

ग्रन्थकर्तुः परिचयः

अस्ति भारतस्योत्तरप्रदेशे मीरजापुरमण्डलान्तर्गतं विन्ध्यवासिन्या देव्या कृतनिवासं पुण्यतमं शक्तिपीठं नाम्ना विन्ध्याचलनगरम्, विन्ध्यगिरेरधित्यकायां स्थितम् 'अष्टभुजा'मन्दिरञ्च । इतः क्रोशद्वयमूर्ध्वं पश्चिमायां दिशि राजते "तपः स्थानवरम्" (तप्पाछानवै) नाम पवित्रं क्षेत्रम् । क्षेत्रस्यास्य उत्तरस्यां दिशि प्रवहति पुण्यसलिला भगवती भागीरथी । दक्षिणदिग्भागे चात्र विशाला विन्ध्याऽटवी राजते । अत्रैवाग्रे कर्णावत्यास्तटे विरोही गैपुरेति स्थानद्वयमध्ये "देवरी" इत्याख्यो ग्रामो ग्रन्थकर्त्रा स्वजनुषा पवित्रितः ।

ग्रन्थकर्तुरस्य पितामहो नाम्ना श्रीरामरूपद्विवेदी आसीत् । तत्पुत्रौ च श्रीरामनिवासः (श्रीरामनेबाज) द्विवेदी, श्रीहैयङ्गवीन (हिंगु) द्विवेदीत्याख्यावास्ताम् । अस्माकं चरित्रनायक एषामेव श्रीरामनिवासद्विवेदिमहाभागानामुदारचरितानां गृहं पुत्ररूपेणालंकृतवान् । अस्य माता नाम्ना लखराजीति । 'पाठकवरी' ग्रामवास्तव्यः श्रीवासुदेवपाठकश्चास्य मातामहः, श्रीमती सरूपा देवी त्वस्य मातामही ।

ग्रन्थकर्त्ता बाल्ये मातापितृभ्यां "रामआसरे द्विवेदी" इत्याख्ययाऽऽकारितः । परन्तु किशोरावस्थायामेवायम् अयोध्यापुर्यां श्री १०८ श्रीरघुनाथदासजीमहात्मनः "बड़ी छावनी" इत्येतन्नामके वैष्णवमन्दिरे श्री १०८ श्रीकौशलकिशोरदासमहाराजतः श्रीरामतारकमहामन्त्रेण श्रीसम्प्रदायस्य वैष्णवीं दीक्षां गृहीतवान् । तैरेव महाभागैः तदाऽयं "श्रीरामनारायणदास" इति नाम्ना संस्कृतः । ततः प्रभृत्येवाऽयं रामनारायणदासेति मुख्ययाभिधया विद्वद्वर्गे प्रथितोऽभूत् । रामआसरे द्विवेदीत्युपनाम्ना सह मुख्यं नाम व्यवहरति, कदाचिच्च लाघववशात् केवलं डॉ० रामनारायणदासेति मुख्यं नाम ।

"तपःस्वाध्यायनिरतम्" इति श्लोकोक्तिमनुसृत्य श्रीमता महाभागेन अनेन ब्रह्मचर्यं पालयता, श्रीहनूमन्तमाराधयता च तपः पूर्वं व्याकरणशास्त्रमधीतमनेकत्र विद्यालयेषु । अथाप्यस्य व्याकरणविषयिणी जिज्ञासा न शान्ताऽभूदिति काश्यामागत्यानेन वाराणसेयसंस्कृतविश्वविद्यालयस्याचार्यपर्यन्तं सर्वा अपि परीक्षाः प्रथमश्रेण्यामुत्तीर्णाः ।

अस्यैवं वैदुष्येण प्रभावित उत्तरप्रदेशस्य राज्यपालमहोदयः १९६७ तमे खिष्टाब्दे, विश्वविद्यालयीयदीक्षान्तसमारोहे नव्यव्याकरणाचार्योपाधिग्रहणसमये स्वर्णपदकेनेमं पुरस्कृतवान् । अनुपदमेव चास्मै केन्द्रीयशासनेन कनिष्ठानुसन्धानछात्रवृत्ति-(जूनियर रिसर्च फेलोशिप) रपि १ सितम्बर १९६७ ई० तः आवर्षत्रयं प्रदत्ता । अस्मिन्नेवावधौ (१९७० तम ई०) शब्दतत्त्वं (तत्सम्बन्धि) आधुनिकविज्ञानञ्चेत्याख्यः शोधग्रन्थः पूर्णतामगात् । विद्वद्भिः परीक्षितेनानेन शोधग्रन्थेन महाभागोऽयं वा० सं० विश्वविद्यालयतः "विद्यावारिधि" (पीएच० डी०) इति विद्वत्प्रदत्तपदवीं ससम्मानं गृहीतवान् ।

सम्मानेनानेन समुत्साहितोऽयं महाभागो ध्वनितत्त्वाख्यमेकमपरं विशिष्टं शोध-ग्रन्थम् "वाचस्पति" (डी० लिट्०) इत्युपाधिप्राप्त्यर्थमिहैव (सम्पूर्णानन्दसंस्कृत-विश्वविद्यालये) १९७६ तमे ख्रिष्टाब्दे प्रस्तुतवान् । अयमपि ग्रन्थो विशिष्टैर्विद्वद्भिः ससम्मानं स्वीकृतः ।

ततः परमयं महाभागः वाराणस्यां सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य व्याकरण-विभागे १९७७ तम ईस्वीयतः प्रारभ्य १९८७ तम ईस्वीय-अगस्तमासपर्यन्तम् साइण्टिस्ट पूल आफीसर, रिसर्च एसोसियेट, रिसर्चसाइण्टिस्ट (शोध वैज्ञानिक रीडर स्केल, बी क्लास) पदान्यलङ्कृतवान् । ततः परं राष्ट्रियसंस्कृतसंस्थानम् (नई दिल्ली) एतेषां वैदुष्यं सम्यक् परीक्ष्य व्याकरणविषयमध्यापयितुं प्रवाचक-(रीडर)पदे चयनं कृत्वा केरलप्रान्तस्य त्रिचूरनगरसमीपस्थे गुरुवायूरकेन्द्रीयसंस्कृतविद्यापीठे नियुक्तिं प्रदाय एनं महाभागं समतोषयत् । १९८७ ईशाब्दस्य सितम्बरमासे प्रथमतारिकायां कार्यभारं स्वीकृत्य सरस्वतीसमाराधनतत्परोऽयं तत्रैव जीवनं यापयति । स्थानान्तरण (ट्रान्सफर) माध्यमेन भारतस्य सम्पूर्णसंस्कृतिं संस्कृतं, पाण्डुलिपिपुस्तकालयञ्च दिदृक्षया केन्द्रीय-सर्वकारस्य सेवां सहर्षमयं महाभागः स्वीकृतवान् ।

इत्थमयं महाभागस्तपसा, ब्रह्मचर्येण, स्वाध्यायव्यसनेन च जनाँस्तोषयन् भगवत्याः सरस्वत्याश्चार्चनं कुर्वन् मोदमानस्तिष्ठति ।

अनेन कुशलकर्मणाऽस्य विदुषः कुलं पवित्रम्, जननी कृतार्था, वसुन्धरा पुण्यवती च जाता । एतादृशमेव महाभागमधिकृत्य केनचिद्विदुषा सत्यमेवोक्तम्—

जयन्ति ते सुकृतिनो रससिद्धाः कवीश्वराः ।
नास्ति येषां यशःकाये जरामरणजं भयम् ॥

●

मकरसंक्रान्तिः,
२०४७ वि०

वाचस्प्रसादपाठकः, साहित्याचार्यः,
संस्कृतप्रवक्ता, शिव इण्टर कालेज,
मीरजापुर (उ० प्र०)

प्राक्कथनम्

अनाराध्य कालीमनास्वाद्य वीटीम्,
ऋते मन्त्रशक्तिं विनाग्रन्थचौर्यम् ।
प्रबन्धप्रपञ्चं प्रसिद्धं प्रबन्धुम्,
विरिञ्चि प्रपञ्चे मदन्यः कविः कः ॥
—मानवीरः केरलीयः कविः

प्रमाणसहितां युक्तियुक्तां सर्वदा जगति व्यवह्रियमाणां वाचं सर्वग्राह्यां प्रवदन्ति मनीषिणः । गद्यं कवीनां निकषं वदन्तीत्युक्तिमनुसृत्य च सप्रमाणया विशेषरूपेण युक्ति-युक्तया वाचा शब्दतत्त्वं स्वान्तः सुखाय अस्मिन् ग्रन्थे यथाधीतं प्रतिपादितम् ।

शब्दतत्त्वं (तत्सम्बन्धि) आधुनिकविज्ञानञ्च—इत्याख्योऽयं प्रबन्धः आप्तभूतैः पाणिनिपतञ्जल्यादिमहर्षिभिः प्रतिपादितम् प्राचीनकालिकमथ च साम्प्रतिके जगति-प्रतिदिनं प्रवर्द्धमानं भाषाभौतिकादिविज्ञानप्रतिपादितं शब्दविषयकं ज्ञानम्, तत्र युक्ता-युक्तविचारांश्च विदुषां पुरःसरं समुपस्थापयितुं प्रस्तुतः । शब्दतत्त्वं (तत्सम्बन्धि) आधुनिकविज्ञानञ्च—इत्यत्र चत्वारि पदानि सन्ति । शब्दतत्त्वमित्येकम्, तत्सम्बन्धीति द्वितीयम्, आधुनिकविज्ञानमिति तृतीयञ्च समस्तानि पदानि, "च" इति समुच्चयाख्यं चतुर्थम् अव्ययपदम् । इदञ्चतुर्थं पदं शब्दतत्त्वमित्यादेः समुच्चायकम् । शब्दस्य पतञ्जलि-भर्तृहरि-कौण्डभट्ट-नागेशादिभिर्महाभाष्यादिषु प्रतिपादितस्य, अर्थविबोधकशक्तिविशि-ष्टस्य शब्दस्य तत्त्वस्वरूपम्, यद्वा तनोति विस्तारयतीति तत्, ततो भावः कर्म वा तत्त्वम् । पातञ्जलमहाभाष्यादिषु प्रतिपाद्य विषयत्वेन शब्दविस्तारकत्वम् ।

तद्यथा पातञ्जलमहाभाष्यस्य पस्पशाह्निके—

"गौरित्यत्र कः शब्दः ? किं यत्तत् सास्ना-लांगूल-ककुद-विषाण्यर्थरूपं स शब्दः ? नेत्याह, द्रव्यं नाम तत् । यत्तर्हि तदिङ्गितं चेष्टितं निमिषितमिति स शब्दः ? नेत्याह, क्रिया नाम सा । यत्तर्हि तच्छुक्लो नीलः कपिलः कपोत इति स शब्दः ? नेत्याह, गुणो नाम सः । तर्त्तर्हि तद्भिन्नेष्वभिन्नं छिन्नेष्वच्छिन्नं सामान्यभूतं स शब्दः ? नेत्याह, आकृतिर्नाम सा । कस्तर्हि शब्दः ? येनोच्चारितेन सास्नालांगूलककुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्दः ।

"अथवा प्रतीतिपदार्थको लोके ध्वनिः शब्दः । तद्यथा शब्दं कुरु, मा शब्दं कार्षीः, शब्दकार्ययं माणवकः—इति ध्वनिं कुर्वन्नेवमुच्यते । तस्माद् ध्वनिः शब्दः ।"

एवमत्र भगवता पतञ्जलिना शब्दस्य लक्षणद्वयं कृतम् । पुनश्च महाभाष्यस्य प्रत्याहाराह्निके "अ इ उ ण्" इति प्रत्याहारसूत्रव्याख्यावसरे—

"श्रोत्रोपलब्धिर्बुद्धिनिर्ग्राह्यः प्रयोगेणाभिज्वलित आकाशदेशः शब्दः ।"

इत्येवं तृतीयं शब्दतत्त्वं (शब्दस्वरूपम्) व्याचष्ट ।

तत् सम्बध्नातीति तत्सम्बन्धि । यद्वा तस्य सम्बन्ध इति तत्सम्बन्धः, स च अस्मिन्नस्तीति तत्सम्बन्धि । आधुनिकविज्ञानम् = अधुना भवम् आधुनिकम्, आधुनिकञ्च

तद् विज्ञानं भौतिकं भाषाविषयकञ्च विज्ञानम् । तत्सम्बन्धीत्युक्त्या शब्देतरविषयकाणाम् आधुनिकविज्ञानानां व्यावर्तनम् । भौतिकविज्ञाने प्रतिपादितस्य ध्वनिप्रकरणस्य, अथ च भाषाविज्ञानस्य यावानंशो व्याख्यातुमिष्टस्तस्यैव ग्रहणम् ।

तदित्थं व्याख्यानेन अस्य प्रबन्धस्य सम्बन्धचतुष्टयमपि सुस्पष्टं जातम् । १. विषयाः प्राचीना नवीनाश्च शब्दविषयकाः सिद्धान्ताः । २. प्रयोजनं च तयोः साम्य-वैषम्यज्ञानम् । ३. अधिकारी—अधीतपाणिनीयव्याकरणप्रातिशाख्यादिकः, सामान्य-रूपेण भौतिकभाषाविज्ञानविषये समुपलब्धज्ञानः, आंग्लभाषायाञ्च समुपलब्धकिञ्चिद्-बोधः । ४. सम्बन्धश्च प्रतिपाद्यप्रतिपादकभावः ।

शब्दाख्यस्य ब्रह्मणः स्वरूपं तन्महत्त्वञ्च दुरन्ते दुर्ज्ञेये च । अनन्ते खे खगेश-गरुडादिमसकान्ता जन्तवः समुत्पतन्ति, किन्तु तस्यान्तं नालभन्त । एवं पक्षिराड्गरुड-सदृशा अनेके महान्तः समुपलब्धज्ञाननिधयो विद्वांसः, अथ च विद्वद्वर्गैलघुतां भजन्तो लघुमतयः शब्दतत्त्वं व्याचख्युः । किन्तु इदं शब्दविषयकं तत्त्वमित्थमेव विद्यते—इत्य-स्मिन् विषये अद्यावधि पारं न जग्मुः; शब्दतत्त्वस्य दुरन्तत्वात् । शब्दतत्त्वविषयकः कलहः प्रागवदेव अधुनाऽपि विद्यते । नैयायिकाः वैशेषिकाश्च शब्दमनित्यम्, मीमांसका वैयाकरणाश्च शब्दं नित्यं प्रवदन्तीत्येतदेव प्राचीनः कलहः । प्राचीनकालतः परम्परया प्रचलन्नयं कलहोऽद्यतनेऽपि युगे भाषाभौतिकविज्ञानविदुषां मध्ये दृश्यमानः प्रतीयते । विकासवादिनो भाषावैज्ञानिका यथारीति शब्दतत्त्वं प्रतिपादयन्ति, तदनुसारेण शब्दस्या-नित्यत्वं तेषां राद्धान्ते समवतरति, भौतिकविद्वद्भिश्च प्रतिपाद्यमानस्य शब्दतत्त्वस्य यथाव्याख्यानं तेषां दृष्ट्या तस्य नित्यत्वं निश्चेतुं शक्यते । अमेरिकादिदेशेषु शब्दोपयो-गिनां बहूनां यन्त्राणामन्वेषणं तन्निर्माणञ्च जाते । नूतनयन्त्राणां मध्येकिञ्चिदेवमपि यन्त्रं विद्यते यत् कस्यामपि भाषायां कृतं भाषणं श्रोतृविवक्षितभाषयाऽनुवदति । एवम्भूत-मपि यन्त्रम् अन्वेष्टुं निर्मातुञ्च चेष्टन्ते भौतिका यद् अतीतकालिकं ध्वनिमपि गृह्णीयात् । अस्यां दिशि क्रियमाणो यत्नो वैयाकरणानां शब्दनित्यत्वं दृढीकरोति । अयं विषयः शब्दस्वरूपमिति प्रथमपरिच्छेदे "ध्वनिसञ्चारप्रक्रिया" इति स्थले नैयायिकादिमतं विपक्षीकृत्य पक्षे च वैयाकरणसिद्धान्तमङ्गीकृत्य "वक्त्रोच्चरित एव ध्वनिः श्रोत्रा श्रूयते" इति सिद्धान्तं प्रतिपादयन् प्रदर्शितः ।

शब्दानां नित्यताविषयेऽपि कश्चिद् विचारः प्रस्तुतः । मध्यमाद्विवाचामिव अस्यापि वैखर्यात्मकस्य शब्दस्य नित्यत्वं विद्यते । न च सर्वदा सर्वत्र कस्यचिदपि शब्दस्य श्रुतिर्न जायते, तेषां नित्यत्वे तु सर्वदा श्रुतिः स्यादिति वाच्यम् ? तेषां सर्वदाऽभिव्यक्तेर-भावात् । अभिव्यक्तः शब्द एव श्रावणप्रत्यक्षविषयो भवति, नान्यः । यथा काष्ठेषु सर्वत्र व्याप्तोऽप्यग्निर्न चाक्षुषप्रत्यक्षविषयो भवति, अरणिद्वयघर्षणादिनाऽभिव्यक्तौ सत्यां तु काष्ठस्थोऽग्निः प्रत्यक्षीक्रियते । एवं सर्वत्र सर्वदा व्याप्तो नित्यश्च शब्दो न श्रूयते, किन्तु कण्ठताल्वादिव्यापारेण अभिव्यक्तः सन् श्रूयते । उक्तञ्च श्रीभर्तृहरिणा **वाक्यपदीयस्य ब्रह्मकाण्डे**—

> **अजस्रवृत्तिर्यः शब्दः सूक्ष्मत्वान्नोपलभ्यते ।**
> **व्यञ्जनाद् वायुरिव स स्वनिमित्तात् प्रतीयते ॥ ११७ ॥ इति ।**

महाभाष्यकारो भगवान् पतञ्जलिस्तु महाभाष्ये वैखर्यात्मकस्य लौकिकस्य वैदिकस्य च शब्दस्य सर्वत्र नित्यतां प्रोक्तवान् । तद्यथा महाभाष्यस्य द्वितीयाह्निके "अ इ उ ण्" इति प्रत्याहारसूत्रस्य व्याख्यावसरे—

"नैवं शक्यम् । अनित्यत्वमेवं स्यात् । नित्याश्च शब्दाः । नित्येषु च शब्देषु कूटस्थै-रविचालिभिर्वर्णैर्भवितव्यमनपायोपजनविकारिभिः । यदि चायं द इत्यत्र दृष्टोण्ड इत्यत्र दृश्येत, नायं कूटस्थः स्यात्" ।

एवमेव "मुखनासिकावचनोऽनुनासिकः" (१।१।८) इति पाणिनिसूत्रस्य महाभाष्ये—

"सिद्धं तु नित्यशब्दत्वात् । नित्याः शब्दाः, नित्येषु शब्देषु सतोऽनुनासिकसंज्ञा क्रियते, न संज्ञयाऽनुनासिको भाव्यते" ।

एतत्सर्वं महाभाष्यं वैखर्यात्मकस्य शब्दस्य नित्यत्वं प्रतिपादयति । यतो हि महाभाष्यस्य प्रारम्भ एव "अथ शब्दानुशासनम्" इत्युक्त्वा "केषां शब्दानाम् ?" इति पूर्वपक्षे प्रश्न कृतः । ततः "लौकिकानां वैदिकानाम्" इत्येवं समाहितम् । लौकिका वैदिकाश्च शब्दा वैखर्यात्मका एव, तेषामेव अनुशासनं कृतम् । अतो यत्र कुत्रापि शब्दस्य नित्यत्वं प्रोक्तं तत्तु वैखर्यात्मकस्य शब्दस्य ।

यत्तु "परः सन्निकर्षः संहिता" (१।४।१०९) इत्यस्मिन् सूत्रे वर्णानाम् उच्च-रितप्रध्वंसित्वं प्रतिपादितम् । तद्यथा—

"एकैकवर्णवर्तिनी वाक्, न द्वौ युगपदुच्चारयति । गौरिति यावद् गकारे वाग्वर्तते, न औकारे न विसर्जनीये । यावदौकारे, न गकारे न विसर्जनीये । यावद् विसर्जनीये, न गकारे न औकारे; उच्चरितप्रध्वंसित्वात् । उच्चरितप्रध्वंसिनः खल्वपि वर्णाः" इति ।

तत्तु वर्णानामुच्चारण विषये[1], यद्वा तेषामभिव्यक्तिविषये प्रोक्तम् । तथा च "उच्चरितप्रध्वंसिनः" इत्यत्र बहुव्रीहिसमासः । उच्चरितम् उच्चारणम् = अभिव्यक्तिः, प्रध्वंसि येषां ते उच्चरितप्रध्वंसिनः । एवमेव "यावद्गकारे वाग्वर्तते, न तावद् औकारे"—इति भाष्यपंक्तेः यावत्कालं गोघटकगकारस्याभिव्यक्तिर्जायते न तावत्कालम् औकारस्य । अर्थात् "गौः" इत्यत्र सर्वेषां वर्णानां युगपद् अभिव्यक्तिर्न जायते । अतः पदघटकवर्णानां युगपदभिव्यक्तेरभावात् अभिव्यक्तेश्च क्षणावस्थायित्वात् पदकल्पना, पदेषु वर्णानां पौर्वापर्यकल्पना च दुरूहा । एवं शब्दानाम्, अथ च शब्दघटकवर्णानाम-भिव्यक्तेरेवानित्यत्वम्, न तु शब्दानां यद्वा शब्दघटकवर्णानाम् । एवमुपर्युक्तं भाष्यं समाश्रित्य ये शब्दानामनित्यत्वं प्रतिपादयन्ति ते सर्वे परास्ताः ।

पदेषु वर्णानामभिव्यक्तेरनित्यत्वे सति तत्र वर्णानां पौर्वापर्यकल्पना बुद्धौ कर्तव्येत्यत आह भगवान् भाष्यकारः "परः सन्निकर्षः संहिता" (पा० सू० १।४।१०८) इत्यस्मिन् सूत्रे—

---

१. सविशेषणे विधिनिषेधौ विशेषमुपसंक्रामतः सति विशेष्य बाधे ।"

बुद्धौ कृत्वा सर्वाश्चेष्टाः कर्ता धीरस्तत्वन्नीतिः।
शब्देनार्थान् वाच्यान् दृष्ट्वा बुद्धौ कुर्यात् पौर्वापर्यम् ॥

वस्तुतस्तु शब्दो नित्यो वा स्याद्, अनित्यो वा—इत्यत्र नास्ति भाष्यकारस्य आग्रहः, किन्तु शब्दो नित्यो वा स्याद्, अनित्यो वा, उभयथा व्याकरणशास्त्रं प्रवर्तनीयम् । उक्तञ्च महाभाष्यस्य पस्पशाह्निके—

"संग्रह एतत्प्राधान्येन परीक्षितम्—नित्यो वा स्यात्कार्यो वेति । तत्रोक्ता दोषाः, प्रयोजनान्यप्युक्तानि । तत्र त्वेष निर्णयः—यद्येव नित्यः, अथापि कार्यः; उभयथाऽपि लक्षणं प्रवर्त्यम्" इति ।

वस्तुतस्त्विदं तुष्यतुदुर्जनन्यायेन; महाभाष्ये बहुत्र स्थलेषु शब्दनित्यत्वप्रतिपादनात् ।

किञ्च, शब्दविषये ये नवीनमतानुयायिनः, ये च प्राचीनवैयाकरणमतावलम्बिनस्तैः परस्परं स्वसिद्धान्तानामादानप्रदानमपि कर्तव्यम् ।

ये च नूतना रासायनिका (केमेस्ट्रियन) निखिलब्रह्माण्डे प्रत्येकं परमाणुषु सततं परिस्पन्दनमाविष्कृतवन्तः, ते "इयं परा वाक् सर्वत्र व्याप्ता" इतीमं परमं प्राचीनं भारतीयं व्याकरणदर्शनसिद्धान्तं स्वीकुर्युः। ध्वनेः स्पन्दमयत्वात् "यत्र यत्र स्पन्दः तत्र तत्र ध्वनिः (शब्दः)" यद्वा "यत्र यत्र ध्वनिः तत्र तत्र स्पन्दः" इति सिद्धान्तेन स्पन्दस्य ध्वनिसतत्त्वात्, यद्वा ध्वनेः स्पन्दमयत्वात् सर्वत्र परमाणुषु सततं ध्वनिसतत्त्वमेव स्पन्दनं सिद्धान्तसिद्धम् । परमाणुषु स्पन्दपूर्विका या शब्दसत्ता (ध्वनिसत्ता) सा इन्द्रियज्ञानातीताऽतीव सूक्ष्मा ।

ये नूत्नाः भौतिकाः पराश्रव्यध्वनिद्वारा पदार्थनिर्माणम्, पराश्रव्यध्वनेश्च रासायनिकोपयोगं विश्वसन्ति, तैः परमप्राचीनम् "शब्दादेव जगतः सृष्टिः, स भूरिति व्याहरद्, भूमिमसृजत्" इति भारतीयः सिद्धान्तः हृदा सश्रद्धं स्वीकर्तव्यः ।

अथ च ये भारतीयाः परां वाचं सर्वव्याप्तां मन्यन्ते, तैः इदं सर्वं जगत् स्पन्दनमयम्, प्रत्येकं परमाणुमभित ऋणविद्युत्कणाः परिक्रामन्ति, "यत्र यत्र नादः, तत्र तत्र कम्पनम्", यद्वा "यत्र यत्र कम्पनं तत्र तत्र नादः" इत्येवं नवीनं भौतिकं सिद्धान्तं विश्वसनीयम् । एतच्च सर्वं शब्दस्वरूपाख्ये प्रथमपरिच्छेदे "आधुनिकविज्ञानदृष्ट्या पराया वाचस्तत्त्वम्" इत्यत्र यथामति समुपदिष्टम् । या ध्वनिसञ्चारप्रक्रिया विद्युद्द्वारा भौतिकैः क्रियते तस्याः संकेतोऽस्माकम् ऋग्वेदे समुपलभ्यते । इत्येवं ध्वनिसञ्चारप्रक्रियायास्तुलनात्मकमध्ययनं समुपस्थापयन् पातञ्जलयोगदर्शनदृशा दूरध्वनिश्रवणविधिं व्याख्याय भौतिकानां कृते नवीनं तथ्यं ध्वनिसञ्चारप्रक्रिया निरूपणस्थले समुपस्थापितम् ।

पातञ्जलमहाभाष्यस्य द्वितीयाह्निके "अ इ उ ण्" इति प्रत्याहार सूत्रव्याख्यावसरे "शकुनिवत्स्युः" इति वार्त्तिकव्याख्यानेन "तपरस्तत्कालस्य" (पा० सू० १।१।७) इति सूत्रव्याख्यानावसरे "भेर्याहन्ता भेरीमाहत्य कश्चिद् विंशति पदानि, कश्चित्त्रिंशत् पदानि गच्छति, स्फोटस्तावानेव ध्वनिकृता वृद्धिः" इत्यादिभाष्यप्रामाण्येन क्वचिद् वैयाकरणा अपि ध्वनिसञ्चारं मन्यन्ते । अस्याशयो विशदरूपेण व्याख्यातः ।

शब्दस्वरूपाख्येऽस्मिन् प्रथमपरिच्छेदे लोके वैखरी वागेव अर्थबोधकत्वेन स्वीकृता । अयं विषयो भाषाविज्ञानम्, अथ च भौतिकशास्त्रप्रतिपादितं बुद्धिस्थश्रवणकेन्द्रे (मस्तकस्थे श्रवणकेन्द्रे) ध्वनिग्रहणविधिं समाश्रित्य बहुशः पोषितः ।

प्रसङ्गवशाद् अपभ्रंशशब्दानामपि व्याख्यानं कृतम् । पातञ्जले महाभाष्ये असाधुशब्दाः अपभाषितम्लेच्छितापभ्रंशापशब्दैर्व्यवहृताः । तद्यथा पस्पशाह्निके—"तेऽसुराः" इत्यत्र—(१) "तेऽसुरा हेलयो हेलय इति कुर्वन्तः पराबभूवुः । तस्माद् ब्राह्मणेन न म्लेच्छितवै नापभाषितवै । म्लेच्छो ह वा एष यदपशब्दः ।" (२) शब्दानुशासनमिदानीं कर्तव्यम् । तत्कथं कर्तव्यम् ? किं शब्दोपदेशः कर्तव्यः ? आहोश्विदपशब्दोपदेशः ? एकैकस्य शब्दस्य बहवोऽपभ्रंशाः । तद्यथा—गौरित्यस्य शब्दस्य गावी-गोणी-गोता-गोपोतलिकेत्येवमादयोऽपभ्रंशाः ।" इति ।

वाक्यपदीयस्य ब्रह्मकाण्डे—

"एवं साधौ प्रयोक्तव्ये योऽपभ्रंशः प्रयुज्यते" इति ।

एवं पाणिनीयव्याकरणसम्प्रदायस्य ग्रन्थेषु अपभ्रंशशब्दानां चर्चा दृश्यते । तद्विषये विचारः परमावश्यकः । अयं विषयः "अपभ्रंशशब्दानां विचारः" इत्यत्र विशदरूपेण व्याख्यातः । पालिप्राकृताद्यपभ्रंशशब्दानां पृथक् सत्ता विद्यते, साधुशब्दानाञ्च पृथक् सत्ता विद्यते । लौकिकवैदिकसाधुशब्दा एव पालिप्राकृतभाषीयशब्दरूपेण परिवर्त्तिताः, यद्वा विकृतिं जाताः । अत एव "संस्कृतं विश्वभाषाया जननी" इत्येवं ये स्वीकुर्वन्ति, ते सर्वदा शब्दतत्त्वं न जानन्ति । शब्दानां नित्यत्वात् न कापि भाषा कस्याश्चिद्भाषाया जननी । अत एव वैयाकरणैः "सुधी + उपास्यः = सुध्युपास्यः" इत्यादिषु बुद्धिविपरिणामः स्वीक्रियते । "सुधी + उपास्यः" इत्युच्चारणे कर्तव्ये "सुध्युपास्यः" इत्युच्चारणं कर्तव्यम् । "सुधी + उपास्यः, सुध्युपास्यः" इति शब्दद्वयं परस्परं भिन्नं द्वयोश्च पृथक् सत्ता विद्यते, न तु सुधी + उपास्य एव सुध्युपास्य इति रूपेण परिणतः । एवमेव साधुशब्दः "कर्णः", असाधुशब्दश्च "कान" इत्युभयोरनादिकालतः पृथक् सत्ता विद्यते, न तु कर्णशब्द एव कानेत्यपभ्रंशरूपेण परिणतः; शब्दानां नित्यत्वात् । न च कान-गावीत्याद्यपभ्रंशशब्दानां प्रयोगोऽस्माभिर्ज्ञातः; इतः पूर्वं ते शब्दा नासन्, यदि स्युस्तर्हि, अस्मत्प्राचीनैरपि जनैः प्रयोक्तव्या ?" इति वाच्यम्; तेषामपशब्दानां कस्मिंश्चिल्लोके प्रयोगस्य सत्त्वात् । अस्माभिरज्ञातः शब्दः कुत्रचिद् देशे प्रयुज्यत एव । अस्माभिरज्ञातत्वात्ते शब्दा न सन्तीति न वक्तव्यम् । महान् शब्दस्य प्रयोगविषयः । अत एव महाभाष्यस्य पस्पशाह्निके—

"उपलब्धौ यत्नः क्रियताम् । महान् शब्दस्य प्रयोगविषयः—सप्तद्वीपा वसुमती, त्रयो लोकाः, चत्वारो वेदाः साङ्गाः सरहस्या बहुधा भिन्नाः, एकशतमध्वर्युशाखाः, सहस्रवर्त्मा सामवेदः, एकविंशति बाह्वृच्यम्, नवधाऽथर्वणो वेदः, वाकोवाक्यमितिहासः पुराणं वैद्यकमित्येतावान् शब्दस्य प्रयोगविषयः । एतावन्तं शब्दस्य प्रयोगविषयमनिशम्य सन्त्यप्रयुक्ता इति वचनं साहसमात्रम्" ।

तदित्थं गावी, गोणी, कान, नाक इत्यादिशब्दानामनादिकालतः क्वचित् प्रयोगो भवत्येव । अस्माभिरज्ञातत्वात्ते शब्दाः न सन्ति, न वा आसन् इति न मन्येरन् ।

लौकिकवैदिकशब्दा न कदापि अपभ्रंशादिरूपेण विकृताः। उभयेषाञ्च सत्ता पृथक् पृथग् विद्यते। इत्थं न कापि भाषा कस्याश्चिद् भाषाया जननी; शब्दानां नित्यत्वात्। अत एव महाभाष्यस्य द्वितीयाह्निके "ऋलृक्" इति प्रत्याहारसूत्रे ऋतक इति प्रयोक्तव्ये लृतक इत्याह"—इत्यत्र "प्रयोक्तव्ये" इत्युक्तम्।

किञ्च शब्दानित्यत्वपक्षेऽपि न कोऽपि शब्दः शब्दान्तररूपेण विक्रियते, उच्चरितशब्दानामनित्यत्वात्। नैयायिकाः सुधी + उपास्य इत्यत्र सुधीघटक ईकारो नष्टः, तत्स्थाने यकारः उत्पन्नः—इत्येवं मन्यन्ते। न तु ईकार एव विकृतः सन् यकाररूपेण परिणतः। एवं शब्दानां शब्दान्तररूपेण परिवर्तनं सर्वथाऽसम्भवम्।

केचित्तु आभ्यन्तरस्फोटवादिनः वर्णाद्यष्टस्फोटानां व्याख्यानं स्वसिद्धान्तमनुसृत्य प्रणयन्ति। तद्यथा—वर्णेन अभिव्यक्तः स्फोटः वर्णस्फोटः, पदेनाभिव्यक्तः स्फोटः पदस्फोटः एवं वाक्येन अभिव्यक्तः स्फोटः वाक्यस्फोटः इति। अपरश्च पक्षः—वर्णः आत्मा यस्यासौ, पदम् आत्मा यस्यासौ, वाक्यम् आत्मा यस्यासौ स वर्णस्फोटः पदस्फोटः वाक्यस्फोटः—इत्येवं व्याख्यानस्य सरणिमनुसरति। शाकपार्थिवादीनां सिद्धये मध्यमपदलोपो वाच्यः। इतिवाति इत्यनेन अस्य विग्रहस्य साधुत्वमेतत्पक्षानुयायिनो विद्वान्सः प्रतिपादयन्ति। अयमेव पक्षोऽस्मिन् ग्रन्थे प्रथमपरिच्छेदे ऊरीकृतः।

स्वयम्प्रकाशस्वरूपा मध्यमा वाक् तु ऋषिसम्प्रदायेऽर्थावबोधिका, सा वाक् स्वप्रकाशनाय कमपि प्राकृतादिध्वनिं न समपेक्षते। समुपलब्धान्तः स्फोटाख्यप्रकाशा महर्षयस्तु प्राकृतादिध्वनिं बाह्यस्फोटं विनैव पदार्थज्ञानं लभन्ते। उक्तञ्च भर्तृहरिणा **वाक्यपदीयस्य** ब्रह्मकाण्डे—

वैकृतं समतिक्रान्ता मूर्तिव्यापारदर्शनम्।
व्यतीत्यालोकतमसी प्रकाशं यमुपासते ॥ १९ ॥

आविर्भूतप्रकाशानामनुपप्लुतचेतसाम्।
अतीतानागतज्ञानं प्रत्यक्षान्न विशिष्यते ॥ ३७ ॥

एतेन कारिकाद्वयेन "स्फोटाख्यप्रकाशेनैव महर्षीणां सर्वार्थबोधकत्वं प्रतीयते" इति पूर्वोक्तवचनं दृढीभवति। तदित्थमयं शब्दस्वरूपाख्यः प्रथमः परिच्छेदः समाप्तिं गतः।

शब्दस्वरूपाख्यप्रथमपरिच्छेदाद् अवशिष्टो विषयः वर्णविज्ञानम् (अक्षरसमाम्नायः), वाक्यपदविज्ञानम् इति परिच्छेदद्वये विभक्तः।

२. **वर्णविज्ञानम्**—अयं परिच्छेदश्चतुर्षु भागेषु विभक्तः। ते च चतुर्भागाः निम्नाङ्किताः—

१—वर्णमाला, २—वर्णाभिव्यक्तिप्रक्रिया, ३—वर्णविभाजनम्, ४—अकारादिवर्णानां विषये विकासवादः।

यद्यपि वर्णमाला-वर्णाभिव्यक्तिप्रक्रिययोरन्योन्याश्रयरूपदोषो विद्यते। वर्णाभिव्यक्तिज्ञानं विना वर्णमालायाः कल्पना, वर्णज्ञानं विना वर्णाभिव्यक्तिप्रक्रिया ज्ञानं च सुदुष्करम्। तथा च किं प्रकरणं पूर्वम्, किञ्च ततः परं समुपस्थातव्यमिति निश्चेतुमसुकरम्। तथापि पातञ्जलमहाभाष्यादिकमनुसृत्य वर्णमालाख्यं प्रकरणं पूर्वम्, ततः परम् वर्णाभिव्यक्तिप्रक्रिया समुपस्थापिता। यथा पातञ्जलमहाभाष्ये पस्पशाह्निकात् परम् प्रत्याहाराह्निके पाणिनिपठिताक्षरसमाम्नायस्तद्घटकवर्णा व्याख्याताः, तथैवात्रापि प्रकृतनिबन्धे शब्दस्वरूपमिति प्रथमपरिच्छेदात् परं वर्णमाला व्याख्याता। अस्मिन् प्रकरणे भाषाविज्ञानमथ च ऋगादिप्रातिशाख्यं विशेषरूपेण समाश्रितम्।

अथायमान्तरो ज्ञाता सूक्ष्मवागात्मना स्थितः।
व्यक्तये स्वस्य रूपस्य शब्दत्वेन विवर्तते ॥
स मनोभावमापद्य तेजसा पाकमागतः।
वायुमाविशति प्राणमथासौ समुदीर्यते ॥

इत्यादिवाक्यपदीयकारिकाः समाश्रित्य वर्णाभिव्यक्तिप्रक्रियानिरूपणे भौतिकविज्ञानमपि समाश्रयणीयम्। शरीरान्तःप्रदेशे "केन प्रकारेण सूक्ष्मावाक् जठराग्निना समुपलभ्य पाकं मुखाद्बहिरभिव्यज्यते" इत्ययं विषयः भौतिकैः प्रतिपादितं ध्वन्यूर्जसो विद्युद्रूपेण, ध्वनिधर्मसमाविष्टविद्युत ऊर्जसश्च ध्वनिरूपेण परिवर्तनविधिं समुपस्थाप्य मनोरमपद्धत्या विशदरूपेण व्याख्यातः।

वस्तुतस्तु ध्वनिविद्युतोः न परस्परं परिवर्तनम्। उभयोः परस्परं मिश्रणात् तयोः परिवर्तनमिव लक्ष्यते। यथा दुग्धजलयोः परस्परं मिश्रणे सति दुग्धं जलरूपेण परिणतमिव दृश्यते, एवमत्रापि बोद्धव्यम्।

वर्णाभिव्यक्तौ मुखे को व्यापारः सञ्जायते? एतत्सर्वं विशदरूपेण प्रदर्शितम्। अस्मिन् प्रकरणे कवर्गाभिव्यक्तिप्रक्रिया कवर्गस्य स्थानविषये भाषावैज्ञानिकानां यन्मतं तत् पोषयता व्याख्यातम्। भाषावैज्ञानिकैः कवर्गः कोमलतालुजन्यः स्वीक्रियते। एतच्च मतं भट्टोजिदीक्षितादिमतानुयायिभिरपि स्वीकर्तव्यम्। ऋगादिप्रातिशाख्यमवलम्ब्य यथारीति यत् कवर्गस्य कोमलतालुजन्यत्वं प्रतिपादितम्, तदनुसारेण "कवर्गं कोमलतालुजन्यः, इत्ययं विषयो न कोऽपि नवीनः, किन्तु प्राचीनकालिक एव"—इत्येवं भाषाशास्त्रविद्भिः स्वीकर्तव्यम्।

वर्णविभाजनाख्ये प्रकरणे तु वर्णस्थानविषयको मतभेदः समकालिकः—इत्ययं विषयः "वर्णस्थानभेदस्य समकालिकत्वप्रतिपादनम्" इत्यत्र विशदरूपेण स्पष्टीकृतः। भाषावैज्ञानिकैः चवर्गस्य उच्चारणविषयकाश्चत्वारः कालाः (भारोपीयकालः, भारतीयशुद्धतालव्यकालः, घर्षस्पर्शतालव्यकालः, दन्त्यतालव्यघर्षस्पर्शकालः) परिकल्पिताः। अस्मिन् प्रसङ्गे वर्णाभिव्यक्तिप्रक्रियाप्रकरणे "वर्णस्थानभेदस्य समकालिकत्वप्रतिपादनम्" इत्यत्र वर्णमालाख्ये प्रकरणे च "नूतनशब्दशास्त्रिणां मतानुसारेण लौकिकवर्णसमाम्नायस्य कादिमान्तं स्वरूपम्, तत्र सारासारविमर्शः" इत्यत्र—

यथा पुत्रवती स्नेहाच्चुम्बते निजमौरसम्।
एवं वर्णाः प्रयोक्तव्या युञ्जन् इति निदर्शनम्।

इति याज्ञवल्क्यशिक्षामाश्रित्य यः सिद्धान्तो निर्णीतः, स नूतनभाषाशास्त्र-

विद्वद्भिरपि दुराग्रहं विहाय स्वीकर्तव्यः । भाषाशास्त्रिणां कृतेऽयं विषयो नूतनं मार्गं निर्दिशति ।

वर्णविभाजनाख्ये प्रकरणे "आधुनिकध्वनिवैज्ञानिकैः कृतस्य वर्णविभाजनस्य व्याकरणादिदृशा विचारः" इत्यत्र भाषाविज्ञानविद्वद्भिर्मूलभूतायां भारतयोरोपीय-भाषायां गवेषितानां ह्रस्वैकारादीनाम् ऋग्वेदप्रातिशाख्यदृशा, पातञ्जलमहाभाष्य-मनुसृत्य च अर्धकादिदोषग्रस्तत्वं प्रतिपाद्य "को वर्णः केन दोषेण ग्रस्तः ?" इति विशदरूपेण निरूपितम् । मूलभूतभारतयोरोपीयभाषायाम् अर्धकादिदोषग्रस्तवर्णानां विषये "अर्धकादिदोषग्रस्तानां ह्रस्वानामेकारादिवर्णानानाम् ऐतिहासिकं विवरणम्" इत्यत्र यो विचारः प्रस्तुतः स भाषाशास्त्रिभिः सर्वथा सुग्राह्यः । तथा च "ह्रस्वानामेकारादि वर्णानाम् अर्धकादिदोषग्रस्तत्वाद् वेदेषु तेषां प्रयोगाभावः, इत्येवं तैः स्वीकरणीयम्, न तु एतद्विपरीतम् ।

अकारादिवर्णानां विषये विकासवादाख्यं प्रकरणं यद्यपि शब्दनित्यत्वदृष्ट्या सर्वथा त्याज्यम्, तथापि तत्प्रतिपादनप्रक्रियाऽतीव मनोरमा । तदध्ययनञ्च विदुषां मनोहारि । तथाप्येतत् सर्वमविचारितरमणीयमित्येतन्मया आर्षवचनैः प्रमाणीकृतम् प्रकरणान्ते ।

३. वाक्यपदविज्ञानम्—अयं परिच्छेदो द्विधा विभक्तः—१. वाक्यव्याख्या, २. पदव्याख्या च ।

वाक्यपदविज्ञानमिति तृतीयपरिच्छेदस्य वाक्यव्याख्याभिधे प्रथमभागे श्रीभर्तृहरि-कृत**वाक्यपदीयादिषु** वाक्यस्य यल्लक्षणं समुपदिष्टम्, तद् व्याख्याय भाषाविज्ञानसम्मतं यच्चतुर्विधं समासादिप्रधानं वाक्यम्, तस्य समन्वयः आंशिकरूपेण समुपस्थापितः । वाक्यस्य नवीन-प्राचीनोभयविधस्वरूपं यत् प्रतिपादितम्, तेन अस्य प्रबन्धस्य सर्वथा नवीनत्वं प्रतिभाति ।

तृतीयपरिच्छेदस्य पदव्याख्याभिधे द्वितीये प्रकरणे नामाख्यातोपसर्गनिपातानां चतुर्विधपदजातानां तुलनात्मकं स्वरूपं तेषां निष्पत्तेस्तुलनात्मिका प्रक्रिया च विदुषां पुरःसरं समुपस्थापिते । अस्मिन् खण्डे पालि-ग्रीक-संस्कृतप्राकृतेति चतस्रो भाषाः विशेषरूपेण समाश्रिताः, कुत्रचित्तु आंग्ल-अवेस्ता-जर्मन भाषीयशब्दैः सहापि संस्कृत-भाषीयशब्दानां तुलना कृता ।

शब्दस्वरूपाख्ये प्रथमपरिच्छेदे न काऽपि भाषा कस्याश्चिद् भाषाया जनयित्री, सर्वा भाषा मूलतः स्वतंत्ररूपेण प्रादुर्भूताः, नूतनभाषाणां सृष्टिस्तु भाषासु भाषेतरशब्दानां सम्मेलनाज् जायते, न तु कस्याश्चिद् भाषायाः कश्चिच्छब्दः स्वेतररूपेण परिवर्तते । यथा अद्यतनी हिन्दी भाषा । यथा संस्कृतभाषीयं कर्मशब्दं प्राकृतभाषीयञ्च होइशब्दम् अव्यव-हितोत्तरत्वेन समुच्चारणे "कर्म होइ" इति वाक्यं निष्पन्नम्, कर्मशब्दमप्रयुज्य आंग्ल-भाषीयस्य "वाइफ" शब्दस्य प्रयोगे कृते च "वाइफ होइ" इति वाक्यञ्च निष्पद्यते । अनयोर्वाक्ययोः संस्कृतभाषीयः "स्त्री" शब्दः यद्वा "अस्ति" शब्दः स्वेतरशब्दरूपेण परिणतिं न गतः, किन्तु भाषान्तरशब्दाः प्रयुक्ताः—इत्येवं दृढतया प्रतिपादितम् । अतो

वाक्यपदविज्ञानमिति तृतीयपरिच्छेदस्य द्वितीयखण्डे चतुर्विधपदजातस्य तुलनात्म-कमेवाध्ययनम्, न तु ऐतिहासिकमध्ययनं सम्पादितम् ।

व्याकरणनियमनिष्पन्नशब्दानां स्वरूपविश्लेषणमेव वाक्यस्य यद्वा चतुर्विधपद-जातानां तुलनात्मकमध्ययनं प्रोच्यते[1] । कस्याश्चिद् भाषायाः वाक्यपदयोः स्वरूपज्ञानं व्याकरणं विनाऽसम्भवि । अतः "पालि-ग्रीक-संस्कृतादिभाषासु परस्परं कियत् साम्यम्" इति समुपस्थापयितुं व्याकरणग्रन्थानपि साहाय्यरूपेण समाश्रयम् । यद्यपि वाक्यव्याख्या पदव्याख्यायमेवान्तर्भूता । पदव्याख्यानमेव वाक्यविश्लेषणम् । तथापि भाषाविज्ञाने प्रतिपादितानां चतुर्विधसमासादिप्रधानवाक्यानां विशेषरूपेण विश्लेषणार्थं वाक्यव्याख्या, पदव्याख्येति भागद्वयेऽन्तिमः परिच्छेदो विभक्तः ।

इत्थमधुनातनैः शब्दशास्त्रिभिः शब्दतत्त्वस्य वैज्ञानिकदार्शनिकपद्धत्या यद् व्याख्यानं प्रस्तूयते, तत्र च यद् युक्तं स्यात् तत्तु प्राचीनमतानुयायिभिर्भारतीयैः शाब्दिकैः सुग्राह्यम् । अधुनातनैः शब्दशास्त्रिभिरपि शब्दविषये प्राचीन-भारतीयविद्वत्प्रतिपादितं यद् युक्तं प्रतीयेत, तद् सहृदयैरङ्गीकर्तव्यम् । नवीनप्राचीनशाब्दिकयोः परस्परम् आदान-प्रदानव्यवहारशिक्षणमेवास्य ग्रन्थस्य मुख्यमुद्देश्यं विद्यते । इति ।

वाराणसी
१९९० ईस्वीय
विजयदशमी

रामनारायणदासः
नव्यव्याकरणाचार्यः लब्धस्वर्णपदकः

---

१. वाक्य विज्ञान—प्रयोग द्वारा निश्चित पारस्परिक सम्बन्ध के अनुसार वाक्य में शब्दों की व्यवस्था वाक्य रचना है—————————————आज भी भाषाओं के तुलनात्मक व्याकरण के सामान्यतया दो ही भाग होते हैं । + Lautlehre अथवा ध्वनिविचार तथा Formentehre अथवा रूपविचार जैसा कि सोमर हर्ट तथा थम्ब की लैटिन ग्रीक पुस्तिकाओं में है ।

वाक्यरचना पर विचार करने का अभिप्राय है विभिन्न व्याकरणिक शब्दों Parts of Speech की बनावट और इनके कार्यों पर विचार करना ।

—पी०डी० गुणे, अनुवादको भोलानाथ तिवारी
"तुलनात्मक भाषा विज्ञान", पृ०६७ ।

शब्दतत्त्वस्य व्याख्येयभूतानि तथ्यानि

पातञ्जलमहाभाष्ये—

१. श्रोत्रोपलब्धिर्बुद्धिनिर्ग्राह्यः प्रयोगेणाभिज्वलित आकाशदेशः शब्दः ।
(द्वितीयाह्निके अ इ उ ण् इति सूत्रे)

२. येनोच्चारितेन सास्नालांगूलककुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्दः ।

३. अथवा प्रतीतपदार्थको लोके ध्वनिः शब्दः ।

४. चत्वारि वाक्परिमिता पदानि, तानि विदुर्ब्राह्मणा ये मनीषिणः ।
गुहा त्रीणि निहिता नेङ्गयन्ति, तुरीयं वाचो मनुष्या वदन्ति ॥
चत्वारि वाक्परिमिता पदानि=चत्वारि पदजातानि, नामाख्यातोपसर्ग-निपाताश्च । परा, पश्यन्ती, मध्यमा, वैखरी च—इति चतुष्कद्वयी ।

५. चत्वारि शृङ्गाः त्रयो अस्य पादाः, द्वे शीर्षे सप्त हस्तासो अस्य ।
त्रिधा बद्धो वृषभो रोरवीति, महो देवो मर्त्यां आविवेश ॥

६. सिद्धे शब्दार्थसम्बन्धे ।

७. अथ किमर्थो वर्णानामुपदेशः ?

८. आकृत्युपदेशात् सिद्धमिति चेत् ? सम्वृतादीनां प्रतिषेधः ।
(पस्पशाह्निकम्)

९. तुल्यास्यप्रयत्नं सवर्णम् (१।१।९) इति सूत्रस्थाः स्थानप्रयत्नाः ।

१०. अथायमान्तरो ज्ञाता सूक्ष्मवागात्मना स्थितः ।
व्यक्तये स्वस्य रूपस्य शब्दत्वेन विवर्तते ॥

११. स मनोभावमापद्य तेजसा पाकमागतः ।
वायुमाविशति प्राणमथासौ समुदीर्यते ॥
अन्तःकरणतत्त्वस्य वायुराश्रयतां गतः ।
तद्धर्मेण समाविष्टस्तेजसैव विवर्तते" ॥
(वाक्यपदीये ब्रह्मकाण्डे)

१२. वाक्यस्फोटोऽतिनिष्कर्षे तिष्ठतीति मतस्थितिः ।
साधुशब्देऽन्तर्गता हि बोधका न तु तत्स्मृताः ॥
(वैयाकरणभूषणसारः)

१३. आख्यातशब्दः सङ्घातो जातिः सङ्घातवर्तिनी ।
एकोऽनवयवः शब्दः क्रमो बुद्ध्यनुसंहृतिः ॥
पदमाद्यं पृथक् सर्वं पदं साकांक्षमित्यपि ।
वाक्यं प्रति मतिर्भिन्ना बहुधा न्यायवादिनाम् ॥
(वाक्यपदीये द्वितीयकाण्डे)

शब्दतत्त्वं (तत्सम्बन्धि) आधुनिकविज्ञानं च

संक्षिप्तविषयसूची

परिच्छेदः	पृष्ठ सं०
(१) शब्दस्वरूपम्	१–९४
(२) वर्णविज्ञानं (अक्षर समाम्नायः)	९५–२१४
(क) वर्णमाला	९४–१२२
(ख) वर्णाभिव्यक्तिप्रक्रिया	१२३–१५८
(ग) वर्णानां विभाजनम्	१५९–१९९
(घ) अकारादिवर्णानां विकासवादः	२००–२१४
(२) वाक्यपदविज्ञानम्	२१५–३०८
(क) वाक्यव्याख्या	२१५–२३०
(ख) पदव्याख्या	२३१–३०८
ग्रन्थस्य परिशिष्टोंऽशः	३०८–३१४

बृहद्विषय-सूची

१. शब्दस्वरूपम्

प्रथमः परिच्छेदः

पृष्ठसंख्या

१. वैशेषिकादिमतानुसारेण शब्दस्वरूपम् ३
२. नैयायिकाद्यभिमतशब्दविभाजनम् ४
३. वैयाकरणाभिमतशब्दस्वरूपविमर्शः ४
४. अनेकतीर्थभेदायास्त्रय्या वाचः परं पदम् ७
५. परादिशब्दस्य स्वरूपम् ८
६. आधुनिकविज्ञानदृष्टया परायाः वाचस्तत्त्वम् ९
७. मध्यमाया वैखर्याश्च वाचोरभिव्यक्तेरपरा प्रक्रिया १६
८. भौतिकविज्ञानदृशा शब्दस्वरूपविमर्शः १७
९. प्रयोगेणाभिज्वलितः २१
१०. आकाशदेशः २१
११. ध्वनिर्देशाद् देशान्तरं गन्तुं माध्यममपेक्षते २३
१२. ध्वनिमाध्यमस्य स्थानान्तरणाभावः २३
१३. कम्पनतरङ्गयोः सम्बन्धस्तस्य च माध्यमम् २४
१४. ध्वनिसञ्चारप्रक्रिया २४
१५. विभिन्नमाध्यमेषु ध्वनेर्वेगः २८
१६. ध्वनिप्रेषकयन्त्रद्वारा विद्युन्माध्यमेन ध्वनिसञ्चारः ३३
१७. पातञ्जलयोगदर्शनदृशा अत्र विषये सांख्यमतसमन्वितो विचारः ... ३९
१८. भाषाविज्ञानदृष्टया, मनोविज्ञानदृष्ट्या च शब्द-स्वरूपम् ४५
१९. लोकेऽर्थावबोधकं शब्दस्वरूपम् ४९
२०. लोके पदवाच्यार्थ विमर्शः ५५
२१. भाषाविज्ञानदृष्टया लोकेऽर्थावबोधकशब्दस्वरूपस्य, तद्वाच्यार्थस्य च विमर्शः ५८
२२. अत्र युक्तायुक्तत्वविचारः ६०
२३. आधुनिकप्रक्रियाद्वारा बुद्धौ ध्वनेः स्थायिकरणत्व-प्रतिपादनम् ६५
२४. शब्दनित्यतायाः शास्त्रीयो विचारः ६७
२५. लोके बुद्धिमुपारूढस्य शब्दस्य तद्वाच्यार्थस्य च बाह्यनिबन्धनत्वप्रतिपादनम् ७१

२६. अपभ्रंशशब्दानां विचारः ७७
२७. लौकिकवैदिकसंस्कृतशब्दानां भूमाववतरणम् (वेदव्याकरणयोर्दृशा) ८१
२८. दिव्यातिरिक्ता वादाः ८५
२९. बाह्यस्फोटस्य भेदाः ८९
३०. बाह्यस्फोटस्य लक्षणम् ८९
३१. उपांशुबाह्यस्फोटस्य लक्षणम् ९०
३२. मानसबाह्यस्फोटस्य लक्षणम् ९०
३३. ऋषीणां निकायेऽर्थविबोधकशब्दस्वरूपम् ९१
३४. वर्णशब्दयोः सम्बन्धः ९३

●

२. वर्णविज्ञानम् (अक्षरसमाम्नायः)

वर्णमालाभिधं प्रथमं प्रकरणम्

१. वर्णाः (अक्षराणि) ९७
२. वर्णमालापर्यायवाचिशब्दाः ९८
३. वर्णमालायाः पाठस्य विधिः ९८
४. लोकप्रसिद्धवर्णमाला ९८
५. शास्त्रीयप्रक्रियानुसारिणी वर्णमाला ९९
६. लौकिकवर्णमालायाः प्राचीनत्वम्, उपजीव्यत्वञ्च १००
७. उभयविधवर्णमालयोर्वैशिष्टचम् १०१
८. शास्त्रीयप्रक्रियानुसारिवर्णमालाया विशिष्टतरत्वम् १०१
९. लोकप्रसिद्धवर्णमालाया विशिष्टतरत्वम्, तस्याश्च क्रमशो वर्णसन्निवेशस्याधारः १०२
१०. ऋऌवर्णयोः सन्निवेशक्रमः १०४
११. अत्र विषये नूत्नानां शब्दशास्त्रिणां सम्मतं तत्र युक्तायुक्तत्वविचारश्च १०६
१२. लौकिकवर्णमालायाः स्वरूपम् १०७
१३. अत्र तारतम्यस्य पर्यालोचनम् १११
१४. नूतनशब्दशास्त्रिणां मतानुसारं लौकिकवर्णसमाम्नायस्य कादिमान्तं स्वरूपम्, तत्र सारासारविमर्शश्च १११
१५. लौकिक.वर्णमालायां वर्णानां संख्या, तत्र तथ्यातथ्यविवेचनञ्च ... ११५
१६. वैदिकवर्णमाला ११७
१७. अत्र भाषाशास्त्रिणां दृष्टिः ११७
१८. प्राकृतवर्णमाला ११८

१९. पालिवर्णमाला ११८
२०. पालिप्राकृतवर्णमालयोस्तुलना ११९
२१. अपभ्रंशभाषाया वर्णमाला १२०
२२. व्रजेत्याद्याधुनिकभाषासु वर्णमाला १२०
२३. व्रजादिवर्णमालायां ड़कारढ़कारयोर्विचारः १२१
२४. राष्ट्रभाषाया हिन्दीवर्णमाला १२१

●

द्वितीयपरिच्छेदस्य द्वितीयं प्रकरणम्

वर्णाभिव्यक्तिप्रक्रिया

१. वर्णाभिव्यक्तिप्रक्रिया १२३
२. वर्णाभिव्यक्तिजनकस्थानकरणप्रयत्नाः १३५
३. करणम् १३५
४. उदात्तानुदात्तस्वरितानां बाह्यप्रयत्नत्वविचारः १३६
५. कण्ठादिस्थानानामनुनादकत्वप्रतिपादनम् १३७
६. भाषावैज्ञानिकमते वर्णोच्चारणोपयोगीन्यङ्गानि १३७
७. पूर्वोक्ताङ्गानां कण्ठादिष्वन्तर्भावः १३८
८. वायुसंयोगाश्रयस्थाननिरूपणम् १३८
९. करणप्रयत्नयोरभेदत्वप्रतिपादनम् १३९
१०. अकारादिवर्णानां कण्ठादिस्थाननिश्चयस्य प्रक्रमः १४१
११. अत्र विषये युक्तायुक्तत्वविचारः १४२
१२. वायुप्रतिघातानुसारेण वर्णस्थानस्वीकारे पाणिनिसम्मतिः ... १४४
१३. वायुसंयोगानुसारमकारादिवर्णस्थानस्वीकारे तैत्तिरीयप्रातिशाख्यविरोधपरिहारः १४४
१४. जिह्वास्पर्शाद्यनुसारेण स्पृष्टादिप्रयत्ननिश्चये पातञ्जलभाष्यसम्मतिः १४५
१५. स्पृष्टादिप्रयत्नस्य वायुप्रतिघातस्य च विभिन्नाधिकरणत्वप्रतिपादनम् १४५
१६. स्थानेषु जिह्वास्पर्शस्य वायुप्रतिघातस्य च व्यधिकरणत्वनिरूपणम् १४६
१७. ताल्वाद्येकदेशादिषु जिह्वास्पर्शानुसन्धानम् १४७
१८. स्पर्शवर्णानाम् अभिव्यक्तिप्रक्रियायाः सामान्यपरिचयः १४८
१९. मूर्ध्न्यभिहतस्य प्राणवायोस्तालुमार्गेण कण्ठादिस्थानेषु गमनप्रकारः १४८

२०. जिह्वामूले कवर्गस्याभिव्यक्तिप्रक्रिया १४९
२१. कवर्गादिवर्णानां मूर्द्धस्थानत्वप्रतिपादनम्; तत्खण्डनश्च १५०
२२. कवर्गस्य कण्ठस्थानत्वविचारविमर्शः १५०
२३. अत्र विषये सारासारनिर्णयः १५१
२४. कवर्गस्य जिह्वामूलीयत्वपक्षेऽयोगवाहत्वापत्तिनिराकरणम् ... १५२
२५. कवर्गस्य जिह्वामूलीयहनुमूलीयत्वयोश्च पक्षे भाषा-वैज्ञानिकैः सह समन्वयः १५२
२६. चवर्गादेरभिव्यक्तिप्रक्रिया १५४
२७. ङञणनमकाराणामभिव्यक्तिप्रक्रिया १५४
२८. कवर्गाद्यभिव्यक्तौ गलविवरस्य परिस्थितिः १५५
२९. क्लिष्टकोष्ठक-कोमलकोष्ठकवर्णनिर्देशः १५६
३०. यण्-शलोरभिव्यक्तौ गलविवरस्य परिस्थितिः १५६
३१. कोष्ठकभेदकवर्णविचारः १५६
३२. अकारादिस्वराणामभिव्यक्तिः १५७
३३. अकारादिस्वराभिव्यक्तौ गलविवरस्य परिस्थितिः १५८

●

द्वितीयपरिच्छेदस्य तृतीयं प्रकरणम्

वर्णविभाजनम्

१. स्वरव्यञ्जनयोः सामान्यविभागः १५९
२. अकारादिवर्णानां विशेषरूपेण विभाजनम् १५९
३. कालतो विभाजनम् १६०
४. मात्राकालपरिमाणम् १६०
५. स्वरतो विभाजनम् १६१
६. उदात्तादिवर्णधर्माणां वैशिष्ट्यम् १६१
७. कण्ठादिस्थानभेदेन वर्णानां विभागः १६२
८. माल्टादिशब्दे लकारस्य स्थाननिर्णयः १६४
९. वर्णस्थानभेदस्य समकालिकत्वप्रतिपादनम् १६५
१०. स्थानान्तरिता वर्णाक्षराः १६७
११. आभ्यन्तरप्रयत्नभेदेन वर्णानां वर्गीकरणम् १६८
१२. बाह्यप्रयत्नभेदेन वर्णानां विभागः १६९
१३. आधुनिकशब्दशास्त्रिणां मतानुसारं वर्णानां वर्गीकरणस्य रीतिः १७१
१४. ध्वनिविज्ञानदृष्ट्या वैदिकध्वनीनां विभाजनम् १७२
१५. जिह्वाग्रादिभेदेन मूलस्वराणां विभाजनम् १७३
१६. सम्वृतादिभेदेन मूलस्वराणां वर्गीकरणम् १७३

१७. आधुनिकवैज्ञानिकपद्धत्या व्रजावधीत्याद्याधुनिकभाषासु स्वरध्वनीनां वर्गीकरणम् १७४
१८. आधुनिकध्वनिविज्ञानपद्धत्या व्यञ्जनानां विभाजनम् १७९
१९. आधुनिकध्वनिवैज्ञानिकैः कृतस्य वर्णविभाजनस्य व्याकरणादिदृशा विचारः १८०
२०. अर्धकादिदोषग्रस्तानां ह्रस्वानामेकारादिवर्णाना-मैतिहासिकं विवरणम् १८६
२१. पूर्ववैदिकयुगे दोषग्रस्तानां ह्रस्वैकारादीनां समुपलब्धिः १८७
२२. उत्तरवैदिकयुगे अर्द्धकादिदोषग्रस्तानां ह्रस्वैकारादिवर्णानामस्तित्वम् १८९
२३. संस्कृतयुगे (रामायणमहाभारतयोः) दोषग्रस्तवर्णानां समुपलब्धयः १९०–१९३
२४. लौकिकवैदिकसंस्कृते कतिपयशुद्धवर्णानां सेतिहासमुच्चारणम् १९४
१. ऋॢवर्णयोरुच्चारणस्वरूपम्, २. यकारवकारयोरुच्चारणम्,
३. रलयोरुच्चारणम्, ४. षकारोच्चारणम् । १९४–१९९

●

द्वितीयपरिच्छेदस्य चतुर्थं प्रकरणम्

वर्णानां विकासवादः ... ...
१. पातञ्जलमहाभाष्ये विकासवादस्य बीजम्, तत्र तथ्यातथ्य-विचारः २००
२. प्राचीनभारोपीयमूलस्वराः २०१
३. प्राचीनभारोपीयव्यञ्जनवर्णाः २०२
४. अकारादिस्वराणां विकासः २०२
५. ककारादिव्यञ्जनध्वनीनां विकासः २०४
६. इग्यणोर्वैज्ञानिकता २०८
७. अत्र व्याकरणादिदर्शनदृशा विचारविमर्शः २१०

●

३. वाक्यपदविज्ञानमिति तृतीयं प्रकरणम् २१५

वाक्यव्याख्याभिधं प्रथमं प्रकरणम् २१७
१. वाक्यभेदाः २१९
२ वाक्यपदीयकारदृष्ट्या २२१
३. भाषाविज्ञानदृष्ट्या २२३
१. समासप्रधानं वाक्यम २२३
२ व्यासप्रधानं वाक्यम् २२५
३. प्रत्ययप्रधानं वाक्यम् २२६
४. विभक्तिप्रधानं वाक्यम् २२९

तृतीयपरिच्छेदस्य पदव्याख्याभिधं द्वितीयं प्रकरणम् २३१
१ पदविभाजनम् २३१
(क) नामपदानां भेदाः २३२
(ख) विभक्तिप्रयोगः २३४
२. कारकाणां तुलनात्मिका समीक्षा २४०
३. सर्वनाम्नस्तुलनात्मिका समीक्षा २४७
४. लिङ्गं वचनञ्च २४९
५. अत्र वैयाकरणानां (नव्यप्राचीनानां) मतम् २५०
६. नामशब्दानां निष्पत्तिप्रक्रिया २५१
(क) कृत्प्रत्ययेन नामशब्दानां निष्पत्तिप्रक्रिया २५१
(ख) तद्धितसमासप्रक्रियाभ्यां प्रातिपदिकशब्दानां (नामशब्दानां) निष्पत्तिप्रकारः २५६
समासनिष्पन्नशब्दाः २५८
७. आख्यातान्तः २६१
८. विध्यादि भेदेन क्रियाया विवेचनम् २६१
९. सम्भावनावस्था २६३
१०. विध्यवस्था–(लिङ्लकारः=आप्टेटिव) २६४
११. आज्ञार्थिका २६४
१२. असमापिकावस्था २६५
१३. कालः—(वर्तमान-भूत-भविष्यत्कालाः) २६६
१४. वचनम् २७३
१५. क्रियाणां (आख्यातान्तानां) निष्पत्तिप्रक्रियाः २७३
१६. पाणिनिव्याकरणे क्रियान्तप्रत्ययाः २७४
१७. अनुदात्तादिधातूनां गणनां २७५
१८. भाषाशास्त्रीयदृष्ट्या धातूनां विभाजनम् २७६

१९. पालिभाषीयक्रियान्तप्रत्ययाः २७८
२०. आख्यातान्तनिष्पत्तिप्रक्रियाया ग्रीकभाषया (ग्रीकव्याकरणेन) सह तुलना २७९
२१. विकरणानां तुलनात्मकं व्याख्यानम् २८३
२२. भ्वादिगणानुसारेण धातुभेदाः २८६
२३. आगमाः २८८
२४. तिबादिप्रत्ययानामादेशरूपाणि २८९
२५. धातूनामादेशरूपाणि २९३
२६. आख्यातान्तनिष्पत्तौ धातुभिः सह प्रत्ययानां तुलनात्मको योजनप्रकारः २९४

३, ४ उपसर्गाः, निपाताश्च २९९

२७. उपसर्गाणां निपातेष्वन्तर्भावः २९९
२८. निपातस्य भागाः २९९
२९. उपसर्गाणां तुलनात्मकं विवेचनम् २९९
३०. क्रियाविशेषणीभूतनिपाताः ३०१
(क) द्वितीयविभक्त्यन्तक्रियाविशेषणानि ३०१
(ख) तृतीयविभक्त्यन्तक्रियाविशेषणानि ३०१
(ग) चतुर्थविभक्त्यन्तम् ३०१
(घ) पञ्चमविभक्त्यन्तम् ३०२
(ङ) सप्तमविभक्त्यन्तम् सप्रत्ययः, वत्प्रत्ययान्तादि-निपाताः ३०२
३१. पूर्वसर्गख्यनिपाताः ३०३
३२. समुच्चयबोधकः (कंजक्सन) ३०५
३३. विस्मयबोधकः ३०६
३४. यत्तच्छब्दयोर्निपातानिपातत्वविचारः ३०६
३५. सामान्यदृष्ट्या ग्रीकसंस्कृतव्याकरणयोस्तुलना (पाणिनिव्याकरणेन सह) ३०७

इति शं शब्दब्रह्म

प्रबन्धे प्रयुक्तानां संकेतानां विवरणम्

कविता० वाल०	कविताबली, बालकाण्ड
तै० प्रा०	तैत्तिरीयप्रातिशाख्यम्
दो० संख्या	दोहा संख्या
नृसिं० पु० अ०	नृसिंह पुराणम्, अध्यायः
पात० योग०	पातञ्जलयोगदर्शनम्
पा० शि०	पाणिनीयशिक्षा
प्रा० भा० यो०	प्राचीन भारत योरोपीयः
भारत० यो०	भारतयोरोपीयः
म० सू० मं०	मण्डलम्, सूक्तम्, मन्त्रः
पृ० सं०	पृष्ठसंख्या
पा० सू०	पाणिनीयसूत्रम्
ब्र० का०	ब्रह्मकाण्डम्
या० शिक्षा	याज्ञवल्क्यशिक्षा
ले०	लेखकः
वा० रा०, सु० स०	बाल्मीकीयरामायणम्, सुन्दरकाण्डः
वा० प०	वाक्यपदीयम्
वा० प० ब्रह्म० का०	वाक्यपदीयम्, ब्रह्मकाण्डः
श्लो० सं०	श्लोकसंख्या
वै० सि० कौमुदी	वैयाकरणसिद्धान्तकौमुदी
शु० य० प्राति० शा०	शुक्लयुजःप्रातिशाख्यम्
श्रीमद्भा०	श्रीमद्भागवतम्
हे० व्या०	हेमचन्द्रव्याकरणम्
अ० सू० सं०	अध्यायः, सूत्रम्, संख्या
ऋ० वे०	ऋग्वेदः
ऋ० वे० प्राति० पट० सू०	ऋग्वेदप्रातिशाख्यम्, पटलम्, सूत्रम्
ऋ० प्रा०	ऋग्वेदप्रातिशाख्यम्
ऋग्वे० प्रा० शा० प०	,, ,, पटलम्
ऋ० वे० प्रा०	,, ,,
◡, <.	ह्रस्वस्य एकारस्य, ह्रस्वस्य ओकारस्य च संकेतः। द्वितीय परिच्छेदस्य चतुर्थ प्रकरणे, तृतीय परिच्छेदे च

❀ श्रीगणेशाय नमः ❀

मङ्गलाचरणम्

वर्णानां तत्त्वरूपावर्थतत्त्वोद्घाटकावपि ।
वैखरीप्रक्रियानिष्णातावीडे वाग्विनायकौ ॥ १ ॥

ढक्कानादेन भक्तानां शुभेच्छापूरकं खलु ।
शेमुषीप्रेरकं वन्दे साम्बं शम्भुं च सर्वदा ॥ २ ॥

पाणिन्यादींश्च तत्त्वज्ञान्, तथान्याञ्छाब्दिकानपि ।
श्रद्धयाऽहं हृदा वन्दे, शाब्दं तत्त्वं प्रभास्यताम् ॥ ३ ॥

भाषाविज्ञानवेत्तॄणां, विकासज्ञानिनामपि ।
वैखरीज्ञानदक्षाणाम्, सश्रद्धं वच्मि वन्दनम् ॥ ४ ॥

सर्वमानवपूज्यानाम् ध्वनिज्ञानां बुधामपि ।
भौतिकज्ञानदक्षाणाम् भूयो भूयोऽभिवादनम् ॥ ५ ॥

सीतान्वेषी च रामेष्टो जयं महच्चं ददातु वै ।
कल्पवृक्षः सदा पूज्यो रामेष्टानां सतां ध्रुवम् ॥ ६ ॥

रामप्रियः सुरुक्माङ्गो हरीणां पुङ्गवोऽपि च ।
सर्वविद्याधिनाथेन्द्रो वसेन्मम सदा हृदि ॥ ७ ॥

विघ्नास्तन्वन्ति शीघ्रं शं हितेहां शत्रवः खलु ।
यस्य हर्षानुकम्पाभ्यां तं श्रीरामं सदा नुमः ॥ ८ ॥

१

शब्दस्वरूपम्

शब्दतत्त्वविदः शिष्टाः वैज्ञानिकरीतिं[1] दार्शनिकसरणिं च अनुसृत्य अधिकारिभेदेन शब्दस्वरूपस्य विविधं व्याख्यानं चक्रुः। शब्दस्वरूपविषये महर्षीणां यद् विविधं मतं दृश्यते, तद् अधिकारिणाम् ऋजुकुटिलस्वभावानां बुद्धिवैचित्र्यात्, न तु यथार्थरूपेण। अधिकारिणां प्रज्ञाशक्त्यनुसारेणैव महर्षय एकमेव तत्त्वं सौविध्येन अवगमयितुं विभिन्नरीत्या समुपदिष्टवन्तः। तथा चोक्तं भगवता श्रीकृष्णेन श्रीमद्**भगवद्गीता**यास्तृतीयाध्याये—

न बुद्धिभेदं जनयेद् अज्ञानां कर्मसङ्गिनाम्।
जोषयेत् सर्वकर्माणि विद्वान् युक्तः समाचरन्॥ २६॥

अतएव **परमार्थसारे** श्रीपतञ्जलिरपि—

यद् यत् सिद्धान्तागमतर्कादिषु भ्रमन्ति रागान्धाः।
अनुमोदामस्तत्तत् तेषां सर्वात्मवादधिया॥ प० स० ६५॥

श्रीभर्तृहरिश्च **वाक्यपदीयस्य** तृतीयकाण्डे—

रूपणव्यपदेशाभ्यां लौकिके वर्त्मनि स्थितौ।
ज्ञाने प्रत्यभिलापे च सदृशौ बालपण्डितौ॥ ५३॥

इत्येवं प्रोक्तवन्तौ। कणादादयश्च ब्रह्मरूपत्वेन ज्ञातमपि शब्दस्वरूपम् बोधनीयशिष्याधिकारानुसारेण तस्य ब्रह्मरूपत्वमनुपदिश्य स्थूलरूपमेव व्याचख्युः।

वैशेषिकादिमतानुसारेण शब्दस्वरूपम्

(नैयायिकवैशेषिकेत्युभयमतानुसारेण श्रोत्रेन्द्रियेण गृह्यमाणो विषयः शब्दस्वरूपत्वेन स्वीक्रियते। शब्दलक्षणञ्च "श्रोत्रेन्द्रिग्राह्यगुणविभाजकधर्मवत्त्वम्" इति। शब्दः शब्दत्वस्पर्शत्वरूपत्वादयो ये गुणविभाजकधर्मास्तेषां मध्ये शब्दत्वधर्मवान्, श्रोत्रेन्द्रियेण च गृह्यते। श्रोत्रेन्द्रियग्राह्यत्वगुणविभाजकधर्मवत्त्वेत्येतावन्मात्रलक्षणकरणेऽश्रुतशब्देऽस्याव्याप्तेः वैशेषिकैरपरं परिनिष्ठितं लक्षणं क्रियते। तद्यथा—"श्रवणेन्द्रियजन्यलौकिकप्रत्यक्षविषयवृत्तिगुणत्वव्याप्यजातिमत्त्वम्" इति। गुणत्वव्याप्यजातिमत्त्वघटितलक्षणकरणेन "येनेन्द्रियेण योऽर्थो गृह्यते, तन्निष्ठा जातिरपि तेनैवेन्द्रियेण गृह्यते" इति न्यायेनाऽश्रुतशब्देऽव्याप्तिर्न समापतति।)

(नैयायिका अपि वैशेषिकाभिमतमेव शब्दलक्षणमङ्गीकुर्वन्ति, शब्दस्त्वाकाशमात्रवृत्तिर्बाह्ये न श्रोत्रेन्द्रियेण ग्राह्यस्त्रिक्षणावस्थायीति तेषां राद्धान्तः। तथा चोक्तं श्रीविश्वनाथन्यायपञ्चाननभट्टाचार्येण **कारिकावल्याम्**—

---

1. By The Method of Scientific and Philosophical.

"आकाशस्य तु विज्ञेयः शब्दो वैशेषिको गुणः ॥ ४ ॥
इन्द्रियं तु भवेच्छ्रोत्रमेकः सन्नप्युपाधितः ॥" इति ॥

एवं **मीमांसकैरपि** उपर्युक्तमेव शब्दलक्षणं स्वीक्रियते। परन्तु नैयायिकाः शब्दमनित्यं मीमांसकाश्च तद्विपरीतमेव मन्यन्ते इति तेषां सैद्धान्तिको भेदो बोद्धव्यः।

नैयायिकाद्यभिमतशब्दविभाजनम्

एवं नदीघोषतन्त्र्यादिजन्येषु, काकादिवाशितेषु च व्यवहर्तृभिः पदार्थबोधनेच्छया प्रयुक्तेषु च शब्देषु सर्वत्रेदं पूर्वोक्तं लक्षणं समन्वीयते। एतेषां समेषां शब्दानां प्रशस्तपादाचार्यकृतकणादसूत्रभाष्ये वर्णावर्णभेदेन भागद्वयं प्रोक्तम्। अवर्णलक्षणशब्दो भेरीमृदङ्गादौ प्रसिद्धः। द्वितीयश्च संस्कृतभाषादिरूपः पदार्थबोधनेच्छया च मानवेषु व्यवह्रियते।

वैयाकरणाभिमतशब्दस्वरूपविमर्शः

एवं परमाण्वादिभ्यः सृष्टिं स्वीकुर्वाणा वैशेषिकादयः श्रोत्रेन्द्रियग्राह्यत्वम्, आकाशमात्रवृत्तित्वञ्चेति शब्दस्य स्वरूपं तस्य च लक्षणं स्वीकुर्वन्ति। परन्तु इदं लक्षणं शब्दस्य यत्स्थूलं स्वरूपम् तस्यैव। सचराचरात्मकं जगदिदं सर्वं शब्दतत्त्वस्य त्वस्य विवर्तभूतं[1] वदन्तो वैयाकरणा अपि प्रायेण नैयायिकप्रतिपादितमेव स्थूलशब्दस्य यल्लक्षणं तत्स्वीकुर्वन्ति। तथा चोक्तं पातञ्जल**महाभाष्यस्य** प्रत्याहाराह्निके "अ इ उ ण् ॥ १ ॥" इति सूत्रे—

"श्रोत्रोपलब्धिबुद्धिनिर्ग्राह्यः प्रयोगेणाभिज्वलित आकाशदेशः शब्द" इति।

श्रोत्रोपलब्धिः—श्रोत्रेन्द्रियेण उपलब्धिर्यस्य सः। बुद्धिनिर्ग्राह्यः—पूर्वपूर्ववर्णानुभवजन्यसंस्कारसहकृतान्त्यवर्णेन परिपक्वया बुद्ध्या निर्ग्राह्यः निःशेषतया गृहीतुमवगन्तुं योग्यः, प्रयोगेणाभिज्वलितः—वर्णोच्चारणेच्छया प्रयोगेण कण्ठताल्वादिस्थानजिह्वामूलादिकरणानां व्यापारस्य प्रयोगेण प्रज्वलितः प्रादुर्भूतः, आकाशदेशः=आकाशदेशमाश्रितश्च शब्द इति तस्य तात्पर्यं ज्ञेयम्। श्रोत्रोपलब्धिर्बुद्धिनिर्ग्राह्येति भाष्यस्य मदुक्तरीत्या व्याख्यानेन वैशेषिकादिभिः प्रोक्तेन शब्दलक्षणेन सह शाब्दिकानां समन्वयो यथाकथञ्चिद्[2] भवितुमर्हति। नैयायिका अपि शब्दत्वावच्छिन्नस्य श्रोत्रग्राह्यत्वम्, आकाशवृत्तित्वम्, बुद्धिनिर्ग्राह्यत्वञ्च

---

१. अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥ १ ॥
—श्रीभर्तृहरिकृतवाक्यपदीयस्य ब्रह्मकाण्डम्।

२. वैयाकरणाः शब्दं नित्यं तार्किकास्तु कार्यरूपं मन्यन्ते। अतः कथञ्चिदित्युक्तम्।

मन्यन्ते। शब्दः श्रोत्रेन्द्रियजन्या या बुद्धिर्ज्ञानं[1] वा तद्विषयीभूतः। वैशेषिका वर्णलक्षणस्य शब्दस्याभिव्यक्तिं ताल्वादिस्थानवायुसंयोगमपेक्षमाणात् ताल्वादिस्थानाकाशसंयोगेन मन्यन्ते।

उक्तञ्च **वाक्यपदीयस्य** ब्रह्मकाण्डे—

य: संयोगविभागाभ्यां करणैरुपजन्यते।
स स्फोटः शब्दजाः शब्दा ध्वनयोऽन्यैरुदाहृताः ॥ १०२ ॥

कण्ठताल्वादिभिः सह वायुसंयोगविभागाभ्यां, जलवीचितरङ्गन्यायेन शब्दाद् वा शब्द उपजन्यते। अतएव पातञ्जल**महाभाष्ये** 'श्रोत्रोपलब्धिः' इत्येतद्वाक्यघटकस्य 'प्रयोगेणाभिज्वलितः' इत्यस्य "वर्णोच्चारणेच्छया स्थानप्रयत्नकरणादिव्यापारस्य प्रयोगेण प्रादुर्भूतः" इत्यर्थो मया स्वीकृतः। अमुमेवार्थं कौण्डभट्टोऽपि स्वीकुर्वन् प्रतीयते" इत्यग्रेऽर्थविबोधकशब्दस्वरूपविमर्शावसरे निरूपयिष्यते। अवर्णात्मकः शब्दस्तु भेरीदण्डसंयोगे सति वेगस्यापेक्षायां भेर्याकाशसंयोगाद् अभिव्यज्यते। एवं रीत्या शब्दस्वरूपविषये नैयायिकैः सह शाब्दिकानां साम्यं प्रतीयते।

वस्तुतस्तूभयोर्निकाये लक्षणैक्येऽपि तयोः परस्परं सैद्धान्तिको भेदोऽपि दृष्टिपथं समायाति। वैयाकरणाः शब्दस्य नित्यत्वम्, अर्थबोधनेच्छया व्यवहृतेषु पदेषु वाक्येषु च वर्णपदयोरभावमङ्गीकृत्य पदं वाक्यञ्च अखण्डमेव स्वीकुर्वन्ति। तथा चोक्तं श्रीभर्तृहरिकृत**वाक्यपदीयस्य** ब्रह्मकाण्डे—

पदे न वर्णा विद्यन्ते वर्णेष्ववयवा न च।
वाक्यात् पदानामत्यन्तं प्रविवेको न कश्चन ॥ ७३ ॥

नैयायिकास्तु एतद्विपरीतमेव स्वीकुर्वन्तीत्युभयोर्वैषम्यं वेदितव्यम्। परन्त्वेतत् सर्वं शब्दतत्त्वस्य यल्लक्षणं तद् वैज्ञानिकं[2], लौकिकञ्च व्याख्यानरूपं विद्यते। दार्शनिका वैयाकरणास्तु शब्दतत्त्वस्य दार्शनिकमेव व्याख्यानं निष्कर्षतमं मन्यन्ते। शब्दतत्त्वस्य दार्शनिकं स्वरूपं रसायनशास्त्रं, भौतिकविज्ञानञ्च समाश्रित्य विशदरूपेण "आधुनिकविज्ञानदृष्ट्या परायाः वाचस्तत्त्वम्" इत्यत्र निरूपयिष्यते।

---

१. बुद्धिस्तु द्विविधा मता—
अनुभूतिः स्मृतिश्च स्यादनुभूतिश्चतुर्विधा ॥ ५१ ॥
प्रत्यक्षमप्यनुमितिस्तथोपमितिशब्दतः।
घ्राणजादिप्रभेदेन प्रत्यक्षं षड्विधं मतम् ॥ ५२ ॥
—श्रीविश्वनाथन्यायपञ्चाननभट्टाचार्यप्रणीता कारिकावली। घ्राणजादीत्यत्र आदिपदेन श्रोत्रजादेरपि ग्रहणम्। अत एव मूले श्रोत्रेन्द्रियजन्येत्युक्तम्।

२. नागेशकृत उद्योते "चत्वारि शृङ्गाः त्रयो अस्य पादाः" इत्यस्मिन्मन्त्रे तस्यायमंशो द्रष्टव्यः।

एकस्यैव शब्दाख्यतत्त्वस्य परापश्यन्तीत्यादिभेदेन चतुर्विधं स्वरूपं प्रतिपादितं दृष्टिगोचरीभवति । तथा चोक्तं पातञ्जलमहाभाष्ये पस्पशाह्निके—

चत्वारि वाक्परिमिता पदानि, तानि विदुर्ब्राह्मणा ये मनीषिणः ।
गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति ॥

"चत्वारि वाक्परिमिता पदानि—चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्च, तानि विदुर्ब्राह्मणा ये मनीषिणः = मनस ईषिणः मनीषिणः । गुहात्रीणि निहिता नेङ्गयन्ति—गुहायां त्रीणि निहितानि नेङ्गयन्ति = न चेष्टन्ते । न निमिषन्तीत्यर्थः । तुरीयं वाचो मनुष्या वदन्ति—तुरीयं वा एतद्वाचो यन्मनुष्येषु वर्तते । चतुर्थमित्यर्थः ।" इत्येवं महाभाष्यकारः पतञ्जलिस्तन्मन्त्रं व्याचष्ट । पदजातानि—परापश्यन्तीमध्यमावैखरीरूपाणीत्यप्यर्थः । अत एव अग्रे 'निपाताश्च' इत्यत्र चकारः संगच्छते । नामाख्यातेत्यत्र नामशब्देन सुबन्तम्, नमति आख्यातार्थं प्रति विशेषणीभवतीति व्युत्पत्तिः । आख्यातं तिङन्तम् । उपसर्गनिपातयोः पृथगुपादानं गोवलीवर्दन्यायेन । अत्र मन्त्रे "गुहात्रीणि निहिता नेङ्गयन्ति" इत्यनेन परापश्यन्तीमध्यमेतिशब्दत्रयस्य "तुरीयं वाचः" इत्यनेन स्थानकरणादिव्यापाराभिव्यक्ताया वैखर्या वाचः सङ्केतः स्पष्टतया प्रतीयते । अयम् ऋग्वेदः[1] परापश्यन्तीमध्यमा वैखरीति चतुर्विधं शब्दस्य स्वरूपं प्रतिपादयति । एतेषां मध्ये परेत्यादि शब्दत्रयं गुहायां प्रच्छन्नत्वान् मानवैर्न व्यवह्रियते ।

गुहाश्च तिस्रः—१ मूलाधारः, २. नाभिस्थानम्, ३. हृदयञ्च । मूलाधारः पराया वाचः, नाभिश्च पश्यन्त्याः, मध्यमायाश्च हृदयं गुहास्थानम् (आवरणस्थानम्) क्रमशो वेदितव्यम् । चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्चेति विभागस्तु लोकेऽर्थबोधनेच्छया प्रयुक्ताया वैखर्या वाच एव, न तु परादीनाम्; तत्र वर्णवाक्यपदानां विभागशः क्रमशश्च प्रतीत्यभावात् ।

अत्र मन्त्रे नामाख्यातेतिभेदेन अर्थबोधनेच्छया प्रयुक्तस्य शब्दस्य यद् व्याख्यानं तद् वैज्ञानिकम्, यच्च मध्यमेत्यादिभेदेन अलौकिकं व्याख्यानम् तत्तु दार्शनिकमवधारितव्यम् । एवं शब्दस्वरूपस्य वैज्ञानिकदार्शनिकभेदेन[2] यद्व्याख्याद्वयं तद् ऋगादिवैदिकयुगीयं प्राचीनकालिकमेव प्रतिभाति, न तु केवलं पौराणिकं तान्त्रिकं यद्वा कस्यचिद् आधुनिकस्य कृत्यं विद्यते । तदेवं रीत्या पातञ्जलमहाभाष्ये "चत्वारि वाक्परमितानि" इति ऋग्वेदीयमन्त्रस्योद्धरणात् तत्र च परादिभेदेन शब्दस्वरूपस्य व्याख्यानाद् एते वैयाकरणा अपि शब्दाख्यतत्त्वस्य चतुर्विधत्वं भजन्ते ।

1. चत्वारि वाक्परिमितेत्ययं मन्त्र ऋग्वेदीयः (मण्डल १ सूक्त १६४, मन्त्र ४५) । अतो मूलेऽयं ऋग्वेदीयः इत्युक्तम् ।
2. In fact, all neologism (New words or meanings produced into the language) beings as slang except in those branches of terminology where (as in Scientific and philosophical study) there is an established tradition of word coinage or redeinition.
   —Rabart A, Hall JR–Linguistic and Your language, P. 132.
   अत्र रावर्टमहोदयेन वैज्ञानिकदार्शनिकभेदेन भाषाया यद्वा शब्दस्य द्विविधमध्ययनं प्रोक्तम् ।

अनेकतीर्थभेदायास्त्रय्या वाचः परं पदम्

शब्दाख्यतत्त्वस्य परेत्यादिभेदेन चतुर्विधत्वेऽपि व्याकरणशास्त्रस्य वाक्त्रयमेव प्रतिपाद्यविषयरूपेण स्वीक्रियते । तथा चोक्तम् भर्तृहरिणा **वाक्यपदीयस्य** ब्रह्मकाण्डे—

वैखर्या मध्यमायाश्च पश्यन्त्याश्चैतदद्भुतम् ।
अनेकतीर्थभेदायास्त्रय्या वाचः **परं पदम्** ॥१४३॥ इति ॥

प्राणबुद्धिहृदयाख्येन अनेकस्थानेन विभिन्नाया वैखर्यादेः वाच इदम् अद्भुतं व्याकरणशास्त्रं परं स्थानं विद्यते । "व्याकरणेन वाक्त्रयं ज्ञातुं शक्यते" इति तत्तात्पर्यं बोद्धव्यम् । परा वाग् व्याकरणेन ज्ञातुमशक्या । अतः सा तस्य प्रतिपाद्यतत्त्वं भवितुं नार्हतीति दृष्टचा त्रय्या वाचः परं पदमित्युक्तम्, न तु "वाक्त्रयमेवास्ति" इत्येतावता तदुक्तम् । अन्यथा वाचस्त्रित्वस्वीकारे स्वरूपज्योतिरेवान्तः परा वागनपायिनी, चत्वारिवाक् परिमितेत्यादि श्रुतिविरोधापत्तिः ।

केचित्तु[1] "गुहा त्रीणि निहिता नेङ्गयन्ति, तुरीयं वाचो मनुष्या वदन्ति" इत्यस्य चतुर्णां नामाख्यातोपसर्गनिपातानां चतुर्थभाग मनुष्या अवैयाकरणा वदन्तीति तात्पर्यं समवलम्ब्य वाचस्त्रित्वमेव स्वीकुर्वन्ति । तत्तु दुराग्रहमात्रं प्रतिभाति । लोके नामाख्यातोपसर्गनिपातेति शब्दजातस्य सर्वैर्वैयाकरणैरवैयाकरणैश्च बहुशो व्यवह्रियमाणतया तेषामेकैकस्य गुहायां प्रच्छन्नत्वप्रतिपादनेऽस्य मिथ्यात्वापत्तिः स्यात् ।

यत्तु[2] पश्यन्तीमध्यमावैखरीति वाचस्त्रित्वं स्वीकृत्य तासां मध्ये प्रत्येकं स्थूला सूक्ष्मा परेति भेदेन त्रिविधं प्रतिपाद्यते । तत्सर्वञ्च सङ्कलय्य वाचां नव भेदाः स्वीक्रियन्ते । तदप्यप्रामाणिकं काल्पनिकमेव प्रतिभाति । किञ्च "विवक्षारहिता परसम्विद्रूपा परा वैखरी" इतिकथनमपि न युज्यते । यतो हि किञ्चिद् वक्तुमिच्छयैव सद्यः प्रसूतः शिशुरपि शब्दायते । किञ्च अन्तःकरणे सम्वादविसम्वादरूपा या वाक् सापि विवक्षायुता । मनसा कमपि श्रोतारं परिकल्प्य वक्तु-

1. यथा कैयटकृतप्रदीपे द्रष्टव्यम् । (एतस्मिन्नंशे)
2. भर्तृहरिकृतवाक्यपदीये "वैखर्या मध्यमाया–ब्र० का० १३३" इत्यस्याः कारिकायाः श्रीसूर्यनारायणशुक्लकृतायां भावप्रदीपाख्यव्याख्यायां "इदमत्रावधेयम्—इत्युपपद्यते" इत्यंशो द्रष्टव्यः ।

मिच्छति, ततो मनसैव मनःस्थितं पुरुषं वदति। यद्वा यदा यत्किमपि चिकीर्षति, यत्र कुत्रचिद् **जिगमिषति** तदा आत्मा मन एव प्रष्टुमिच्छति "किं कर्तव्यम्? क्व गन्तव्यमिति"। ततो मनो बुद्धिर्वा समादधति "इदं कर्तव्यं, तत्र गन्तव्यम्" इति। वैखर्या वाचो विवक्षारहितत्वं न कथमपि संघटते। किञ्च पश्यन्तीत्यादिवाचां यः परारूपो भेदः, तस्य लक्षणे जिज्ञासाहीनत्वं सम्विद्रूपत्वमित्येतत्सर्वं सन्निवेशितम्। विवक्षादिरहितत्वं मूलाधारस्थायां परायामपि वाचि विद्यते। तथा चोक्तम्—"स्वरूपज्योतिरेवान्तः परा वागनपायिनी" इति।

अतः पश्यन्तीत्यादिवाचां पराभेदमपरिकल्प्य तदपेक्षया पश्यन्तीमध्यमा वैखरीवाक् चतुर्थी च परा वाक् स्वीक्रियताम्। किञ्च प्रतिपक्षिणाऽपि परायाः वाचः सत्ता स्वीकृता। तथा चोक्तम्—"तदा[1] सर्वावस्थाकारणं परावाक् दशमीत्याख्यायते" इति।

वाचश्चतुष्ट्वस्वीकारे मध्यमेति व्यपदेशस्तु युवत्यर्थवाचकमध्यमाशब्दार्थमादायोपपद्यते। यथा दृष्टरजास्तरुणी मध्यमेति नाम्ना प्रोच्यते।

तथा चोक्तम**मरकोषस्य** द्वितीयकाण्डे मनुष्यवर्गे—

स्यान्मध्यमा दृष्टरजास्तरुणी युवतिः (समे) ॥ ८ ॥

इति तथैव मूलाधारात् समुत्थिता वाङ् नाभिस्थानमतिक्रम्य हृदयदेशं गता प्राप्तयौवना मध्यमा-नाम्ना प्रोच्यते। वैखरी तु वाचोऽन्तिमावस्था।

"लोकेऽर्थबोधनाय वैखरी वागेव व्यवह्रियते। मध्यमा पश्यन्ती पराख्येति शब्दत्रयं तु गुहायां प्रच्छन्नत्वान् मनुष्येषु परप्रत्यायनाय न प्रयुज्यते।" इत्येव तस्याः श्रुतेः स्वारस्यं वेदितव्यम्। अपरं त्रितयन्तु सर्वथाऽनुभूतिगम्यमेव। आधुनिकदृष्ट्या आचार्यभर्तृहरिकृतस्य **वाक्यपदीयम्** इति ग्रन्थस्य व्याख्याकर्तॄणामपि[2] वाक्चतुष्टयस्वीकार एव इष्टापत्तिर्दृश्यते।

परादिशब्दस्य स्वरूपम्

परायां वाचि पदानां तेषाञ्च अर्थानां सूक्ष्मातिसूक्ष्मरूपेणापि वर्तमानानां योगिनां समाधाववभासाभावाद्,पदपदार्थकल्पनातोऽतीतस्वरूपत्वाच्च निर्विकल्प-

१. एतस्मिन्नंशे 'वैखर्या मध्यमायाः" वाक्यपदीयम् ब्र० का० १४३ इत्यत्रत्यं श्री सूर्यनारायणशुक्लकृतभावप्रदीपाख्यव्याख्यायां "इदमत्र तत्त्वम्" इति स्थलं द्रष्टव्यम्।

२. "व्याकरण के तीन ही पद क्यों—इस प्रसंग को समाप्त करने के पहले भर्तृहरि व्याकरण के क्षेत्र के विषय में एक और सत्य का उद्घोष करते हैं। वाणी के पाद सामान्यतः परा पश्यन्ती मध्यमा वैखरी माने गये हैं। वाक्य विवेचन या वाक्यपदीय में उन चारों का विवेचन हो सकता हैं, किन्तु व्याकरण के क्षेत्र में परा का ग्रहण नहीं किया जा सकता। व्याकरण निश्चय ही वाणी का परम पद है, किन्तु उसके क्षेत्र में वाणी के तीन ही क्षेत्र आते हैं। पदविभाग की प्रक्रिया इन्हीं तीन चरणों में पूरी होती है।"

डॉ० सत्यकाम वर्मा—"वाक्यपदीय और भाषातत्त्व" पृ० सं० ३७

तया सा परा वागित्युच्यते। सा च अनपायिनी परमज्योतिःस्वरूपा च। तथा चोक्तं **महाभारते**—

स्वरूपज्योतिरेवान्तः परा वागनपायिनी।
तस्यां दृष्टस्वरूपायामधिकारो निवर्तते ॥ इति ॥

परंज्योतिःस्वरूपेयं वाक् सर्वत्र व्याप्तापि ब्रह्मशक्तिः कुण्डलिन्यादिनामाभिधेये मूलाधाराख्ये देहमध्ये तिष्ठति। तदुक्तं **संगतिरत्नाकरे**—

गुदलिङ्गान्तरे चक्रमाधाराख्यं चतुर्दलम्।
अस्ति कुण्डलिनी ब्रह्मशक्तिराधारपङ्कजे ॥ इति ॥
(१।२।११९-१२०)

इदञ्च पराख्यं शब्दतत्त्वमेव वाच्यवाचकरूपेण विवर्तमानं परितो दृष्टिगोचरीभवति।

आधुनिकविज्ञानदृष्ट्या परायाः वाचस्तत्त्वम्

"इयं परा वाक् सर्वत्र व्याप्ता; निखिलप्रपञ्चस्य जनयित्री" इति विद्वद्भिर्मन्यते। इयं कथं सर्वत्र व्याप्तेति भौतिकविज्ञानं रसायनशास्त्रञ्च समाश्रित्य युक्त्या प्रतिपाद्यते, येन "परा वाक् सर्वत्र व्याप्ता" इति वचनं विश्वासपदमाटीकताम्।

"ध्वनिः[1] कम्पनात् प्रादुर्भवति"। अतो यत्र यत्र परिस्पन्दनं चाञ्चल्यं वा तत्र तत्र नादः, यथा कण्ठे घण्टायां वा। यद्वा "यत्र यत्र शब्दस्तत्र तत्र परिस्पन्दनम्" इत्येवमपि वक्तुं शक्यते। घण्टायां यदा यस्मिन् स्थाने आघातः क्रियते, तत्र प्रथममाघाताव्यवहितोत्तरं ध्वनिः समुत्पद्यते, तदव्यवहितोत्तरञ्च घण्टायां यत्राघातः पूर्वं कृतस्तत्र तत्संश्लिष्टेषु च परमाणुपुञ्जेषूत्तरोत्तरं परिस्पन्दनं प्रादुर्भवति।

१. "यह बात हम अपने सामान्य ज्ञान से जानते हैं कि ध्वनि पिण्डों के कम्पन करने से उत्पन्न होती है। बजती हुई घण्टी या थाली को छूने से हमें झनझनाहट मालूम होती है। बजते हुए सितार के तार को छूने पर उसके कम्पन का हमें स्पष्ट अनुभव होता है। इसी प्रकार जब हम बोलते हैं तो हमारे फेफड़ों से निकलती हुई वायु के द्वारा हमारे गले में स्थिर स्वरयंत्र (Vocal Chard) की झिल्लियों में कम्पन होने लगते हैं। वस्तुतः प्रत्येक प्रकार की ध्वनि ध्वनि-उत्पादक पिण्डों के कम्पन करने से उत्पन्न होती है। पाठक स्वयं अनेक प्रयोगों की रूपरेखा खींच सकते हैं। नीचे हम इस प्रकार के तीन प्रयोगों का वर्णन करेंगे।

(१) किसी प्याले को पानी से आधा भरो और एक कमान (Bow) को उसके किनारे तक चलाओ। तब देखेंगे कि ध्वनि के साथ साथ पानी में लहरें भी उठ रही हैं। कमान चलाने से पानी तथा पानी के कणों में कम्पन उत्पन्न हो जाता है। पानी में यदि सरकण्डे के गूदे की एक छोटी सी गोली एक धागे में बांध कर प्याले

अतः "पूर्वं शब्दस्ततः परमाणुषु परिस्पन्दनं प्रादुर्भवति ।" इति सर्वत्र स्पन्दनं शब्दपूर्वकमेव समुत्पद्यते । अथ च घण्टायां कृताघातातिरिक्तपरमाणुषु च स्पन्दनपूर्वकमेव ध्वनिः समुदेति । अतो यत्र यत्र परिस्पन्दनं तत्र तत्र ध्वनिरित्यपि वक्तुं क्षममेव ।

"कुत्रचित्तु परिस्पन्दनमनुभूयते, किन्तु शब्दश्रुतिर्न जायते" इत्येतावता ध्वनिर्न समुदेतीति तु न मन्तव्यम् । किन्तु तत्रापि परमसूक्ष्मो ध्वनिर्भवत्येव । यतो हि एवमपि ध्वनिर्जायते यं वयं श्रोतुमक्षमाः, किन्त्वपरे प्राणिनो यथा श्वानस्तं शृण्वन्ति । अतो मानवीयश्रोत्रेन्द्रियातीता अपि ध्वनयो भवन्तीति निश्चयेन स्वीकर्तव्यम् । अस्माकं देहे रक्तसम्वाहिकासु नाडीषु यत् किमपि परिस्पन्दनमनुभूयते, तत्रापि श्रोत्रेन्द्रियातीता ध्वनयो निःसरन्ति । यदा हस्तेन हस्तं काष्ठादिफलकं वा स्पृशामः, हस्तेन रज्जुं सूत्रं वा गृहीत्वा कम्पयामः, तदा तत्राप्यव्यक्तात्मको रवः समुत्तिष्ठति । परिस्पन्दनं विना क्वापि केनचिदपि कस्यचिद् उत्तरदेशेन संयोगो न सम्भाव्यते । केनचित् सह समेतुं शरीरे पादयोर्वा परिस्पन्दने सति श्रोत्रेन्द्रियातिशायी शब्दोऽवश्यमेव प्रादुर्भवतीति "यत्र यत्र परिस्पन्दश्चाञ्चल्यं वा तत्र तत्र ध्वनिः, यथा कण्ठे घण्टायां वा" इति प्रत्यक्षानुभवजन्यप्रामाण्येन प्रमाणीकृतानुमानेन वक्तुं सर्वथा सत्यम् । अतः किञ्चिद् विवक्षायां प्राणिनां हृद्देशे स्थिते जीवात्मनि बुद्धया सह समेतुं यदैव परिस्पन्दनं चाञ्चल्यं वा समुदेति, तदैव बुद्धया सह संयोगात् पूर्वमेव सूक्ष्मातिसूक्ष्मो रवः (ध्वनिः) स्फूर्तिरूपेण प्रस्फुटति । बुद्धया सह संयोगात् पूर्वम् आत्मनिष्ठस्पन्दनेन यो ध्वनिः प्रस्फुटति स एव रवः आत्मनो बुद्धयादिभिः सह परम्परया संयोगानन्तरं कण्ठादिस्थानतोऽकारादिरूपेण बहिरभिव्यज्यते । न च निष्कले आत्मनि स्पन्दनमयुक्तमिति वाच्यम्; तस्यापि चञ्चलरूपत्वात् । "अणोरणीयान् महतो महीयान्" इति श्रुतौ ब्रह्मणो यद्रूपम्, तत् तु नटराजवच्चञ्चलस्पन्दनमयमेव विद्यते । यत्कालावच्छेदेन तद्ब्रह्म महतो महीयस्तत्कालावच्छेदेन अणोरणीय इति महतो महीयस्त्वमणोरणीयस्त्वं चैककालावच्छेदेन भवतः । "एकोऽहं बहु स्याम्" इत्यादिभिस्तस्मिन्नपि स्पन्दनं विज्ञायते । एकस्य बहुत्वभवनं स्पन्दनं विना न सम्भाव्यते । यत्र यत्र परिस्पन्दस्तत्र तत्र रवः, यथा कण्ठे नानद्यमानासु घण्टासु" इति पूर्वोक्तप्रत्यक्षप्रमाणानुमानाभ्यामयमेव विश्वासः सुदृढः सञ्जायते यदेकस्मिन् ब्रह्मणि यदा बहुत्वभवनेच्छारूपं स्पन्दनं समजनि, तदव्यवहितोत्तरमेव नादः प्रास्फुटत् ।

में छूती हुई लटकाएँ तो पानी में कम्पन होते समय उसमें भी कम्पन दिखाई देगा" ।—डॉ० वी० एस० दूबे, एम० एस० सी०, पी-एच० डी०; एवं एच० पी० शर्मा, एम० एस० सी० कृत माध्यमिक भौतिक विज्ञान—द्वितीयखण्ड, षष्ठ परिच्छेद, पृ० सं० ३५५ ।

अत्र सर्वे प्रयोगाः विस्तरभयान्न प्रदर्शिताः ।

अत्र च नागेशकृत**वैयाकरणलघुसिद्धान्तमञ्जूषायां** यद्वा **काशीखण्डे** सृष्टिप्रक्रियायां यो नादाभिव्यक्तिक्रमो दृश्यते तद्भिन्न एव क्रमः । तथा च **मञ्जूषायां** शक्त्याश्रयनिरूपणे प्रोक्तम्—

"ततोऽपरिपक्वप्राणिकर्मभिः कालवशात् प्राप्तपरिपाकैः स्वफलप्रदानाय भगवतो बुद्धिपूर्विका सृष्टिर्मायापुरुषौ प्रादुर्भवतः । ततः परमेश्वरस्य सिसृक्षात्मिका मायावृत्तिर्जायते । ततो बिन्दुरूपमव्यक्तं त्रिगुणं जायते । इदमेव शक्तितत्त्वम् । तस्य बिन्दोरचिदंशो बीजम् । चिदचिन्मिश्रोंऽशो नादः चिदंशो बिन्दुरिति । अचिच्छब्देन शब्दार्थोभयसंस्काररूपाऽविद्योच्यते । अस्माद् बिन्दोः शब्दब्रह्मापरनामधेयं वर्णादिविशेषरहितं ज्ञानप्रधानम्, सृष्टयुपयोग्यवस्थाविशेषरूपं चेतनमिश्रं नादमात्रमुत्पद्यते । एतज्जगदुपादानमेव रव-परा-आदिशब्दैर्व्यवह्रियते । अत्र नागेशोक्तोद्धृते "अबुद्धिपूर्विका" इत्यत्र अबुद्धिपदस्य "परमेश्वरस्य स्वभावो लीला" इति पर्यायौ । स्वभावः कीदृग् इति चेत् ? बहुत्वभवनरूपः परिस्पन्दः । यद्वा रन्तुमिच्छारूपः । तदुक्तं **काशीखण्डे**—

यदेकलो न शक्नोषि रन्तुं स्वैरञ्चर प्रभो ।
तदिच्छा तव योत्पन्ना सैषा शक्तिरभूत्तव ॥ इति ॥

अस्माद् बिन्दोः शब्दब्रह्मापरनामधेयमिति पूर्वोक्तनागेशवाक्ये अस्माद् बिन्दोरित्यनेन त्रिगुणात्मकबिन्दोर्ग्रहणम्, न तु चिदंशो बिन्दुरित्यस्य । अत्र प्रक्रियायां "पूर्वं रन्तुमिच्छा, ततस्त्रिगुणात्मको बिन्दुः, ततश्चेतनमिश्रो नादः" इत्येवं क्रमः । रन्तुमिच्छारूपपरिस्पन्दजन्यत्रिगुणात्मकबिन्दोरभिव्यक्त्युत्तरं नादः समजनि । परन्तु पूर्वोक्तेन प्रत्यक्षप्रमाणीकृतानुमानेनेदं पराया वाचो जनित्वं विश्वासं नैव समारोहति । ब्रह्मणि "एकोऽहं बहु स्याम्" इत्येवं यदा परिस्पन्दः समजनि तदव्यवहितोत्तरमेव शब्दः सञ्जातः । यद्वा, अपरिपक्वप्राणिकर्मणां फलप्रदानाय लीलापूर्विका यदेच्छा, परिस्पन्दः क्षोभो वा, तस्मिन्नेव क्षणे नादः प्रादुर्बभूव; सर्वस्य ज्ञानस्य, इच्छाया वा शब्दानुविद्धत्वात् । तथा चोक्तं **वाक्यपदीयस्य** ब्रह्मकाण्डे—

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ॥ १२३ ॥ इति ॥

ब्रह्मणि बहुत्वभवनरूपेच्छा तज्जन्यस्पन्दाश्च शब्दपूर्वका एव जाताः, न तु पूर्वं रन्तुमिच्छा, ततः स्रष्टुमिच्छा, ततश्च त्रिगुणात्मको बिन्दुरिति । ब्रह्मनिष्ठपरिस्पन्दस्फुटितो यो नादः स निखिलब्रह्माण्डस्य जनयिता, संसारस्य च प्रत्येकं परमाणुं सततं स्पन्दितं करोति । परमाणुपरिस्पन्दनस्य सत्त्वात् तत्रापि शब्दः । यच्चलति, गच्छति वा तज्जगदुच्यते । परमाणवोऽपि परितश्चलन्ति, अतस्तेऽपि जगत्पदवाच्याः । यथा ध्रुवलोके ध्रुवमभितो नक्षत्रमण्डलानि, सूर्यमभितो ग्रहोपग्रहगणा वा भ्राम्यन्ति, तथैव परमाणुपुञ्जनिर्मितानां पृथ्वीजलतेजोवाय्वादीनां प्रत्येकं परमाणूनामा-

भ्यन्तरे स्थितं नाभिकम् (न्यूक्लियस) ऋणविद्युताऽविष्टा (इलेक्ट्रान[१]) ग्रहकणा भ्राम्यन्ति। प्रत्येकं परमाणोराभ्यन्तरे यन्नाभिकं तत्त्वं विद्यते, तस्मिन् स्थितिजा[२] गतिजा च इत्याख्ये द्वे शक्ती विद्येते। स्थितिजशक्त्या च (इलेक्ट्रान) ऋणविद्युद्-ग्रहकणाः परिमितक्षेत्र एव केन्द्रमभितो भ्राम्यन्तु, न तु परिमितक्षेत्राद् बहिः, इत्येवं कस्पनगतेर्नियन्त्रणं क्रियते। स्थितिजशक्त्या इलेक्ट्रानग्रहकणानां परिभ्रमणस्य नियन्त्रणादेव कोऽपि पदार्थश्छिन्नो भिन्नो वा न जायते। अन्यथा तेषां परिभ्रमणस्य नियन्त्रणाभावे कस्यचित् पदार्थस्य सत्ता दृष्टिगोचरी न स्यात्। गतिजशक्त्या च ते ग्रहकणाः स्वनियतकेन्द्रमभितः स्पन्दिताः क्रियन्ते। परमाणुष्विदं परिस्पन्दनं स्वैरञ्चरे ब्रह्मणि रन्तु यत् स्फुरणं जातम्, तत एव। यया लेखन्याऽयं निबन्धो लिख्यते, तस्याः प्रत्येकं परमाणवः केन्द्रमभितो नियन्त्रितरूपेण स्पन्दन्ते। अतो लेखन्याः प्रत्येकं कणेषु सततं स्पन्दनस्य सत्त्वाच्छब्दोऽपि सततं तत्र भवति। श्रोतुर्वक्तुः शरीरस्य सूर्यरश्मीनां च कणाः, विद्युद्वाय्वादीनाञ्च प्रत्येकं पर-माणवः, वयं सर्वे यस्मिन् गृहे निवसामस्तस्य सर्वे कणाश्च परिस्पन्दमयाः। अतः सर्वमिदं जगत्, किञ्च अद्वितीयं ब्रह्मापि स्पन्दनमयमेव विद्यते। स्थावरनामा न कोऽपि पदार्थः। निरतिशयरूपेण स्थिरताया न कुत्रापि लाभः। अतः सर्वत्र

१ "प्रोट्रान और न्यूट्रान से निर्मित नाभिक के चारों ओर इलेक्ट्रान नामक ग्रहकण परि-क्रमा लगाते हैं। नाभिक के चारों ओर इलेक्ट्रानों के परिक्रमा लगाने की क्रिया बहुत कुछ पृथ्वी द्वारा सूर्य की परिक्रमा के समान है"।

लेखक—डोनाल्डवार, अनुवादक—श्री रामचन्द्र तिवारी, केन्द्रीय हिन्दी निदेशालय—शिक्षामन्त्रालय, भारत सरकार के सहयोग से प्रकाशित—'परमाणु-शक्ति (क्यों और कैसे सचित्र विज्ञान १४)।

२ नाभिकं धनविद्युत्कण (प्रोट्रान) निर्विद्युत्कण (न्यूट्रान) इति तत्त्वद्वयेन निर्मितम्। नाभिकस्य बाह्यकणाश्च ऋणविद्युत्कण (इलेक्ट्रान) नाम्ना प्रोच्यन्ते। विजातीय-विद्युतोः सान्निध्ये सति परस्परमाकर्षणं जायते। नाभिकस्य ऋणविद्युत् (इलेक्ट्रान) नामका ग्रहकणा ऋणविद्युता, प्रोट्रानतत्त्वानि च धनविद्युता आविष्टानि भवन्ति। प्रत्येकं नाभिके धनविद्युदाविष्टग्रहकणानां ऋणविद्युदाविष्ट (इलेक्ट्रान) तत्त्वानाञ्च एकादश एकादश संख्या भवन्ति। अतो द्वयोः समत्वादेव इलेक्ट्राननामका ग्रहकणाः प्रोट्रानतत्त्वेन आकर्षिता नियतकक्षैरेव परितो भ्राम्यन्ति। एतत्सर्वमुपर्युक्तायां "परमाणुशक्ति" इति पत्रिकायां पञ्चविंशे षड्विंशे च पृष्ठे सम्यक्तया प्रतिपादितम्। तद्यथा—

"नाभिक का आकर्षण इलेक्ट्रानों को उसी प्रकार कक्षा में रखता है, जिस प्रकार आपकी भुजा बाल्टी को कक्षा में रखती है।" (पृ० सं० २६)। एतत्सर्वं मनसि निधाय मया मूले—"प्रत्येकं परमाणुषु यन्नाभिकं (न्यूक्लियसतत्त्वम्) तस्मिन् स्थितिजा गतिजेति द्वे शक्ती विद्येते" इत्येवं प्रकारान्तरेण प्रोक्तम्।

पदार्थजातस्य परमाणुषु स्पन्दनस्य सत्त्वात् तत्र श्रोत्रेन्द्रियातीतो मनसाऽपि ग्रहीतुमक्षमः शब्दः सर्वत्र सर्वदा व्याप्तः। अधोक्षजत्वाच्च[१] स शब्दः परनाम्नाऽपि वक्तुं शक्यते। रसायनशास्त्रदृष्ट्या अपि च भौतिकविज्ञानदृष्ट्या, पराया वाचो व्याप्तिमत्त्वं पूर्वोक्तरीत्या प्रत्यक्षानुमानाभ्यामित्थमेव व्याख्यातुं शक्यते।

"ध्वनिद्वारा पदार्थो निर्मातुं शक्यते" इत्यस्मिन् विषये आधुनिकध्वनि-शास्त्रेषु[२] पुष्कलरूपेण प्रक्रियात्मकं व्याख्यानं बहुशो दृश्यते। पराश्रव्यध्वनीनां रासायनिकोपयोगेऽतिशयं[३] महत्त्वं प्रोक्तम्। किञ्च, अस्मिञ्जगति समेषां पदार्थानां सृष्टिः शब्दपूर्विका एव जायते। एतच्च परिपच्यमानेषु तण्डुलादिषु सर्वत्रानुभूयते। किञ्च पृथ्व्यां निक्षिप्तं बीजं यदा द्विधा भिद्यते, तदा तत्रापि सूक्ष्मातिसूक्ष्मः शब्दः सञ्जायते। तस्माद् वृक्षादिप्ररोहणं शब्दपूर्वकमेव। पराश्रव्यध्वनिद्वारा वृहदणोः परमाणरूपेण परिवर्तनमाधुनिकैः रासायनिकैश्च क्रियते। एवं रीत्या वाचो विश्वप्रसूत्वं रासायनिकदृष्ट्या विश्वसनीयं जायते। पराया वाचो विश्वप्रसूत्वं विश्वव्याप्तित्वञ्च भाषाविज्ञानदृष्ट्या व्याख्यातुं न शक्यते। यतो हि भाषा-विज्ञानं[४] खलु भाषायाः सामान्यं रूपमेव व्याचष्टे। नूतनपदार्थानां निर्माता रासा-यनिक इव भाषां तदर्थं वा निर्मातुं न शक्नोति।

१. अधः कृतम् अक्षजम् इन्द्रियज्ञानं यस्य येन वेति स अधोक्षजः, तस्य भावः अधोक्ष-जत्वम्, तस्माद् अधोक्षजत्वात्।

२. परा श्रव्य तरङ्ग की क्षमता—

"परा श्रव्य ध्वनि की क्षमता श्रव्यध्वनि की अपेक्षा बहुत अधिक होती है, जिससे अनेक प्रकार की रासायनिक, जैविक, यान्त्रिक आदि क्रियाएँ सम्पन्न होती हैं।"

—श्रीललितकिशोरसिंह एम० एस० सी० कृत ध्वनिविज्ञान. पृ० सं० २३१।

३. "रासायनिक पोटेशियम आयोडाइड (के० आई०) के घोल में या हाइड्रोजन सल्फाइड (H^2S) में पराश्रव्य ध्वनि का सञ्चार होने से इन यौगिकों में से और अलग हो जाते हैं। यह प्रक्रिया आक्सीकरण की है। परा श्रव्य ध्वनि से उलटी क्रिया भी होती है जिसे लघुकरण रिडक्शन कहते हैं। जैसे मर्क्यूरिक क्लोराइड (Mercuric Chloride) का मर्क्यूरस क्लोराइड (Mercurous Chloride) में बदल जाना।"

—श्रीललितकिशोरसिंह एम० एस० सी० कृत ध्वनिविज्ञान, पृ० सं० २३२।

४. The Linguistic can simply define linguistic forms and their approximate meaning, but he can not do the work of the chemist, the Physicist, the anthropologist.

Robeet A. Halljr—Linguistic and your Language. P. No. 133.

यदि परा वाक् सर्वत्र व्याप्ता, तर्हि "प्रत्येकं पदार्थस्य सर्वेषु परमाणुषु सततं परिस्पन्दनं जायते' इत्याधुनिकं मतं भारतीयदार्शनिकैः सहृदयैः स्वीकर्तव्यम्। यतो हि यत्र यत्र ध्वनिस्तत्र तत्र परिस्पन्दोऽवश्यमेव जायते; ध्वनिस्पन्दनयोः साहचर्यस्य नित्यत्वात्। इयञ्च परावाक् न केवलं चित्स्वरूपा, ज्ञानस्वरूपा वा, अपि तु ध्वन्यात्मिकाऽपि विद्यते। पराया वाचो ध्वन्यात्मकत्वं वर्णाभिव्यक्तिप्रक्रियायां स्पष्टतया प्रतिपादयिष्यते।

अथ च यद्याधुनिकैः पराश्रव्यध्वनीनां रासायनिकोपयोगः स्वीक्रियते, तर्हि "वागेव विश्वा भुवनानि जज्ञे" इतीदं परमप्राचीनं भारतीयं मतं तैरपि सहृदयैः स्वीकरणीयं विश्वसनीयञ्च। तथा च "स भूरिति व्याहरद् भूमिमसृजद्" इत्यादिवचनं मृषा, अस्मदुच्चरितभूशब्दात् पृथ्व्युत्पत्त्यदर्शनात्। इत्येवं प्रत्यक्षप्रमाणीकृतानुमानेन शब्दद्वारा जगत्सृष्टावविश्वासो नार्हः। महर्षेरगस्त्यस्य शापात् कश्चिन्मुनी[1] राक्षसः सञ्जातः, अस्माकं वचनेषु च एतादृशी शक्तिर्न दृश्यते। यदा तानसेनो दीपकरागमगायत तदा स भस्मसात्सञ्जातः, अस्माभिरपि सा एव गीतिर्गीयते, किन्तु तथा न दृश्यते' इत्यादिस्थले पूर्वोक्तानुमानस्य बाधात्। साधनद्वारा शब्दं तन्निष्ठां शक्तिञ्च साधुतया ये समुपासितवन्तः, तेष्वेव शब्दद्वारा सृष्टिकर्तुः प्रजापतेरंशः प्रचुररूपेण विद्यते। तथा चोक्तम्—

साध्वी[2] वाग्भूयसी येषु पुरुषेषु व्यवस्थिता।
अधिकं वर्तते तेषु पुण्यं रूपं प्रजापतेः॥ इति॥

येषु प्रजापतेः पुण्यरूपं प्रचुररूपेण विद्यते, ते यमर्थं प्रवदन्ति, सोऽर्थस्तद्वचनमनुसरति। तथा चोक्तमुत्तररामचरिते भवभूतिना—

ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावति। इति।

एवं शब्देषु विश्वस्य निबन्धन्याः शक्तेर्विद्यमानत्वात् परायां वाचि विश्वप्रसवशक्तिर्विश्वासं समारोहति। उपर्युक्तव्याख्यानुसारेण पराया वाचो लक्षणं "रिरंसुब्रह्मनिष्ठस्पन्दजन्यत्वे सति सर्वाभिधानाभिधेयोपादानत्वम्" इति।

सा च परावाक् सर्वव्याप्ताऽपि प्राणिनां मूलाधारे तिष्ठति। यथा वायुर्गन्धं देशाद् देशान्तरं प्रापयति, एवं देहमध्येऽपि वक्तुर्विवक्षया संस्कृतो वायुर्मूलाधारे स्थितं पराख्यं शब्दतत्त्वं नाभ्यादिस्थानेषु प्रापयति। वक्तुर्विवक्षया मूलाधार एव पवनोऽपि समुत्पद्यते। तथा चोक्तं **प्रपञ्चसारतन्त्रस्य** प्रथमपटले—

देहेऽपि मूलाधारे समुदेति समीरणः॥ श्लो० सं० ९१॥ इति॥

---

१. रिषि अगस्त को साप भवानी। राक्षस भयउ रहा मुनि ज्ञानी॥
—श्रीमद्गोस्वामीतुलसीदासकृत श्रीरामचरितमानस–सुन्दरकाण्ड,

२. श्लोकोऽयं श्रीसूर्यनारायणीयभावप्रदीपाख्यव्याख्यायां "शब्दस्य परिणामोऽयम्"—(ब्र० का०, १२०) इति भर्तृहरिप्रोक्तवाक्यपदीयव्याख्यायां समुद्धृतः।

संस्कृतेन वायुमाध्यमेन नाभिदेशं समागता परावाक् पश्यन्तीनाम्ना तृतीयं शब्दतत्त्वमभिधीयते। इदञ्च तृतीयं शब्दतत्त्वं मनोविषयीभूतम्। तत्र सर्वेषामर्थानां तद्वाचकपदानाञ्च सूक्ष्मातिसूक्ष्मरूपेण विद्यमानानां मनसा दर्शनादेव सा वाक् पश्यन्तीनाम्नाऽभिधीयते। पश्यति सर्वमर्थम्, सर्वञ्च तत्तदर्थवाचकं पदं या सा पश्यन्ती। अत्र योगिनां समाधौ "अस्यार्थस्येदं पदं वाचकम्" इति ज्ञानं जायते। पश्यन्त्यां वाचि सूक्ष्मातिसूक्ष्मरूपेण पदपदार्थबोधस्य योगिभिर्मनसा दर्शनादेव तस्या अपि परमं पदं व्याकरणं भर्तृहरिणा प्रोक्तम्। परा वाक्तु योगिभिरपि दुर्ज्ञेया। तत्र पदपदार्थकल्पनाया मनसाऽप्यसम्भवात् निर्विकल्पतया चिन्मात्रस्वरूपा इति परा, पश्यन्तीत्युभयोरन्तरं वेदितव्यम्। तदेव च पराख्यं शब्दतत्त्वं वक्तुर्विवक्षया संस्कृतस्य वायोर्मध्यमेन नाभेरूर्ध्वं हृदयस्थानं यदा प्राप्नोति, तदा तत्तत्त्वं मध्यमेति संज्ञया व्यवह्रियते। स्वयञ्च कर्णपिधानेन अनाहतनादरूपेण प्रत्यक्षीक्रियते।

नागेशश्चैनामेव मध्यमां वाचं पदार्थबोधकम् अखण्डं स्फोटाख्यं तत्त्वं निरचिन्वत्। नागेशमतानुसारेण मध्यमाया वाचो लक्षणम्—"श्रोत्रगृहीतैरकारादिध्वनिभिरभिव्यङ्ग्यत्वे सति, अर्थविषयकबोधजनकत्वम्"[1] इति। इयं मध्यमा वाक् कर्णपिधानेन श्रूयते, किन्तु पश्यन्तीवाक् श्रोत्रेन्द्रियजन्यप्रत्यक्षाविषयीभूता, मानसजन्यप्रत्यक्षविषयीभूता चेत्युभयोरन्तरं समवगन्तव्यम्। तदेव च शब्दतत्त्वं वक्तुर्विवक्षया संस्कृतेन पवनेन आस्यं प्राप्य स्थानकरणयत्नव्यापारेण वैखरीरूपेण बहिराविर्भवति। "वैखरीरूपेणाभिव्यक्तमिदं शब्दतत्त्वं प्रवक्तृश्रोतृणां श्रोत्रेन्द्रियजन्यप्रत्यक्षविषयीभूतम्, मध्यमा वाक् तु केवलं स्वश्रोत्रेण गृह्यते" इत्युभयोः सामान्यभेदो बोद्धव्यः। अनयोर्विशेषभेदश्च "अर्थावबोधकशब्दस्वरूपविमर्शः" इत्यत्र यथाऽवसरं व्याख्यास्यते।

एवञ्च पराख्यशब्दतत्त्वादेव पश्यन्तीत्यादिवाक्त्रयं प्रादुर्भवति। तथा चोक्तं नन्दिकेश्वरेण—

सर्वं परात्मकं पूर्वं ज्ञप्तिमात्रमिदं जगत्।
ज्ञप्तेर्बभूव पश्यन्ती मध्यमा वाक् ततः परम्॥
वक्त्रे विशुद्धचक्राख्ये वैखरी सा मता ततः॥ इति॥

एतासां परादिवाचां स्थानमपि क्रमशो मूलाधारादिकं **पदार्थादर्शा**दिग्रन्थेषु क्रमशः प्रतिपादितम्, तदनुसृत्यैव मया तासां स्थानं प्रोक्तम्[2]।

---

१. एतल्लक्षणं नागेशेन वैयाकरणलघुसिद्धान्तमञ्जूषायां शक्त्याश्रयनिरूपणे "व्यञ्जकरूपरूषितस्य स्फोटस्य वाचकत्वम्" इत्यत्र यदुक्तं तदनुसृत्य प्रोक्तम्।

२. "सूक्ष्मा कुण्डलिनी ज्योतिर्मात्रस्वरूपिणी।
अश्रोत्रविषया तस्माद् उद्गच्छत्यूर्ध्वगामिनी॥
स्वयम्प्रकाशा पश्यन्ती सुषुम्नामाश्रिता भवेत्।
सैव हृत्पङ्कजं प्राप्य मध्यमा नादरूपिणी॥

यद्यपि पराख्यशब्दतत्त्वात् पश्यन्तीत्यादिवाचामाविर्भावस्वीकारे तस्या अपि स्वरूपे वैकृत्यं समापतति, तथापि नेदं पराख्यं शब्दतत्त्वं सुवर्णादिपिण्डवत्, किन्तु ज्योतिर्वद् विद्यते। यथा एकस्मात् प्रदीपात् सहस्राणि प्रदीपान्तराणि प्रज्वाल्यन्ते, किन्तु तस्य तेजसि अल्पत्वं महत्त्वं वा अण्वपि न दृष्टिगोचरीभवति। तद्वदेकस्मादेव ज्योतिःस्वरूपात् पराख्यशब्दतत्त्वात् पश्यन्तीत्यादिशब्दान्तराणि जायन्ते, किन्तु तत् पराख्यं शब्दतत्त्वं तावदेवावशिष्यते।

मध्यमाया वैखर्याश्च वाचोरभिव्यक्तेरपरा प्रक्रिया

क्वचित् पुराणेषु मध्यमाया वाचोऽपरं पूर्वोक्ताद् भिन्नं मूलं विद्यते। श्रीमद्**भागवत**स्य द्वादशस्कन्धे षष्ठाध्याये हृदयदेशावच्छिन्नमाकाशं नादाभिव्यक्तिमूलं प्रोक्तम्। तद्यथा—

समाहितात्मनो ब्रह्म ब्रह्मणः परमेष्ठिनः।
हृदयाकाशादभून्नादो वृत्तिरोधाद् विभाव्यते ॥ २७ ॥
यदुपासनया ब्रह्मन् योगिनो मलमात्मनः।
द्रव्यक्रियाकारकाख्यं धूत्वा यान्त्यपुनर्भवम् ॥ ३६ ॥

विषयानुपप्लुतचित्तस्य परमेष्ठिनो ब्रह्मणो हृदयदेशावच्छिन्नाकाशान्नादः समजनि, स च नादः कर्णपिधानेन श्रोत्रवृत्तिनिरोधादस्माभिरपि श्रूयते। तस्मान्नादाच्च अकारोकारमकारेति वर्णत्रयस्य (ॐकारस्य) अभिव्यक्तिर्जाता[1]।

ततः सञ्जल्पमात्रा स्याद् विभक्तोर्ध्वगामिनी।
सैवोरःकण्ठतालुस्था शिरोघ्राणरदस्थिता ॥
जिह्वामूलौष्ठनिर्धूतसर्ववर्णपरिग्रहा।
शब्दप्रपञ्चजननी श्रोत्रग्राह्या तु वैखरी ॥
इच्छाज्ञानक्रियात्मासौ तेजोरूपा गुणात्मिका।
क्रमेणानेन सृजति कुण्डलिनी वर्णमालिकाम्" ॥
(पदार्थादर्शः)

१. ततोऽभूत्त्रिवृदोङ्कारो योऽव्यक्तप्रभवः स्वराट्।
यत्तल्लिङ्गं भगवतो ब्रह्मणः परमात्मनः ॥ ३९ ॥
तस्य ह्य शास्त्रयो वर्णा अकाराद्या भृगूद्वह।
धार्यन्ते यैस्त्रयो भावा गुणानामर्थवृत्तयः ॥ ४२ ॥
ततोऽक्षरसमाम्नायमसृजद् भगवानजः।
अन्तःस्थोष्मस्वरस्पर्शह्रस्वदीर्घादिलक्षणम् ॥ ४३ ॥
तेनासौ चतुरो वेदांश्चतुर्भिर्वदनैर्विभुः।
सव्याहृतिकान् सोङ्कारांश्चातुर्होत्रविवक्षया ॥ ४४ ॥
—श्रीमद्भागवतम्, द्वादशस्कन्धः, षष्ठोऽध्यायः।

अकारादिवर्णत्रयेण च इकारादिस्वराणाम्, कादिस्पर्शवर्णानाम्, यकाराद्यन्तःस्थानां शकाराद्यूष्मवर्णानाञ्च सृष्टिरभूत्। एवञ्चात्र प्रक्रियायां नादवर्णभेदेन वाग्द्वयस्यैव समुपलब्धिर्दृश्यते, न तु वाक्चतुष्टयस्य। यद्यपि हृद्देशावच्छिन्नाकाशजन्यनादात् प्रणवस्य, प्रणवाच्च सर्ववर्णानामभिव्यक्तेः सत्त्वात् वाक्त्रयमेत्र दृष्टिपथं समायाति, तथापि प्रणवस्य अकारादिवर्णत्रयात्मकतया वाग्द्वयमेव श्रीमद्भागवतानुसारेण स्वीकर्तुमापतति। "द्वयोरपि वाचोः श्रोत्रेन्द्रियजन्यप्रत्यक्षविषयीभूतत्वम्, वैखर्या मूलञ्च हृद्देशावच्छिन्नाकाशजन्य नादः" इति समासतोऽवधारणीयम्। वैखर्याश्च वाचोऽपरमपि मूलं भर्तृहरिकृत**वाक्यपदीय**स्य ब्रह्मकाण्डे "वायोरणूनां ज्ञानस्य" (१०७) इति कारिकायां प्रोक्तम्। एषा कारिका वर्णाभिव्यक्तिप्रक्रियाप्रतिपादनावसरे भौतिकविज्ञानं समाश्रित्य विशदरूपेण व्याख्यास्यते।

एवं केचिद् वाचो वैखर्यादिभेदेन चतुर्विधत्वम्, केचिच्च त्रिविधत्वम्, केचित्तु नादवर्णभेदेन द्विविधत्वं यथामति भजन्ते। "वाचश्चतुर्विधत्वमेव न तु त्रिविधत्वम्, यद्वा द्विविधत्वमेव न तु चतुर्विधत्वम्" इत्यत्र मे दुराग्रहो नास्ति। किन्तु लोके पदार्थबोधनेच्छया, अन्तःकरणे गृहीतान् भावान् परेषु प्रकटीकर्तुं कण्ठताल्वादिव्यापारेणाभिव्यक्तः श्रोत्रेन्द्रियग्राह्यश्च यः शब्दः प्रयुज्यते, तदपेक्षया सूक्ष्मातिसूक्ष्मोऽपि शब्दो विद्यते, न तु श्रूयमाणस्वरूप एव तस्येयत्ता परिसमाप्यते।

भौतिकविज्ञानदृशा शब्दस्वरूपविमर्शः

ये खलु स्थूलाक्षा भौतिकपदार्थेष्वेव सर्वस्वं स्वीकुर्वाणाः, ते तु शब्दतत्त्वस्य श्रोत्रेन्द्रिजन्यप्रत्यक्षविषयीभूतं स्थूलं शब्दस्वरूपमेव इयत्तया बुद्ध्या स्वीकृत्य प्रायोगिकं व्याख्यात्मकञ्च तस्य विवेचनं बहुविधं प्रतिपादयन्तो दृष्टिगोचरीभवन्ति। एते सर्वे वर्णात्मकम्, अवर्णात्मकं च सर्वमपि शब्दजातं ध्वनीत्यपरनाम्ना व्यवहरन्ति। भौतिकविज्ञानस्य यस्मिन् भागे ध्वनितत्त्वं व्याख्यायते, स भागो ध्वनिविज्ञानेति नाम्ना व्यपदिश्यते। ध्वनेरुत्पत्तिः, सञ्चारः, तस्य च माध्यमम्, ध्वनिग्राहकयन्त्रस्थानापन्नं श्रोत्रेन्द्रियम्, तस्य च रचना—इत्यादिकं सर्वं विषयमेते भौतिकशास्त्रिणो ध्वनिविज्ञानस्य प्रतिपाद्यं तत्त्वं मन्यन्ते।

शब्दस्वरूपस्य यल्लक्षणं पातञ्जल**महाभाष्ये** प्रोक्तम्, तदनुसृत्य एवैते ध्वनेर्लक्षणं प्रतिपादयन्ति। तथा चोक्तं पातञ्जल**महाभाष्य**स्य पस्पशाह्निके "अ इ उ ण्" इति सूत्रे—

"श्रोत्रोपलब्धिः बुद्धिनिर्ग्राह्यः प्रयोगेणाभिज्वलित आकाशदेशः शब्दः" इति।

"श्रोत्रेन्द्रियस्थज्ञानतन्तूनां परिस्पन्दने यद् भौतिकं कारणं तदेव ध्वनितत्त्वम्" इत्येषामाधुनिकानां राद्धान्तः। पातञ्जल**महाभाष्य**प्रोक्तश्रोत्रोपलब्धि-

त्वम्, श्रोत्रेन्द्रियस्य ज्ञानतन्तूनां परिस्पन्दनत्वञ्च—इत्युभयोरेकमेव तात्पर्यमवसीयते।

श्रोत्रेन्द्रियस्था ज्ञानतन्तवो मस्तिष्के यः श्रवणकेन्द्रो विद्यते तेन सह संश्लिष्यन्ते। श्रोत्रेन्द्रियज्ञानतन्तुमाध्यमेन ध्वनिर्मस्तिष्के निर्मितं यच्छ्रवणकेन्द्रम्, तत्र यदा गच्छति तदा ध्वनिमात्रं जायते। श्रोत्रेन्द्रियस्य विभागशो वर्णनं **ध्वनिविज्ञानेति**[१] ग्रन्थे विशदरूपेण दृश्यते।

श्रोत्रस्य त्रयो भागा विद्यन्ते—

१. बाह्यं श्रोत्रम्—अनेन ध्वनयः सङ्गृह्यन्ते। अस्यापि भागत्रयं क्रियते—(क) कर्णशष्कुली, (ख) श्रोत्रप्रणाली, (ग) अन्तिमश्च तृतीयो भागः कर्णपटनाम्ना (यश्च झिल्लिकामयः) प्रोच्यते।

२. मध्यमं श्रोत्रम्—बाह्यकर्णस्य यस्तृतीयोऽन्तिमो भागस्तदग्रे वायुसम्पूरितश्च मध्यमः कर्णो येन बाह्यकर्णगृहीता ध्वनितरङ्गा अग्रे (तृतीयकर्णपर्यन्तम्) प्रक्षिप्यन्ते। अस्मान्मध्यकर्णाद् एका प्रणाली[२] गलविवरपर्यन्तं गता। जृम्भणादिवेलायामियं प्रणाली विवृता तत्तदतिरिक्तक्षणेषु च सम्वृत्ता सञ्जायते। कर्णस्यास्मिन् भागेऽतीव तनुरूपाणि क्रमशो द्रुघण[३]-स्थूण[४]-रिकावी[५] नाम्ना व्यवहृतानि त्रीणि अस्थीनि विद्यन्ते। द्रुघणस्यैको भागः कर्णपटेन, अपरश्च भागः स्थूणेन सह संश्लिष्यते, स्थूणस्य च संयोगो रिकाव्या (तश्तर्या) सह विद्यते। एवमस्थित्रयस्य परस्परं संश्लेषात्, कर्णपटेन सह च परम्परया तत्त्रिकस्य (अस्थित्रयस्य) सम्बन्धस्य सत्त्वादेव ध्वनिकम्पितकर्णपटस्य कम्पनं मध्यमकर्णद्वारा तृतीयकर्णपर्यन्तं प्रसरति। मध्यकर्णस्य दक्षिणभित्तौ गवाक्षद्वयम्—एकोऽण्डाकृतिकः[६], अपरश्च वर्तुलाकारो[७] विद्यते। अण्डाकृतिको गवाक्षो रिकावीति पूर्वोक्तेनास्थ्ना आच्छन्नः वर्तुलरूपश्च गवाक्षो झिल्लिकया सन्नद्धो विद्यते।

---

१. श्रीललितकिशोरसिंह, एम० एस-सी० कृते ध्वनिविज्ञानेति ग्रन्थे "मानसध्वनिप्रक्रिया" इत्यत्र कर्णरचना प्रतिपादिता। तदनुसृत्य तेषां मतानुसारेण मूले श्रोत्रस्वरूपं व्याख्यातमग्रे।

२. योस्टेशियन नली Eustachian tube.

३. हथौड़ी।

४. निहाई।

५. तश्तरी।

६. **Oval window.**

७. **Round Window.**

३. आन्तरं श्रोत्रम्—मध्यमकर्णात्परमान्तरनामाभिधस्तृतीयः कर्णो विद्यते। अयं भागोऽर्धवृत्तात्मना[१] कुल्यात्रयेण शम्बूकवत् कुण्डल्या[२] च निर्मितः। अर्धवृत्तात्मकस्य कुल्यात्रयस्य ध्वनिविषये न कोऽप्युपयोगः। केवलं कुण्डलवद् यदङ्गम्, तदेव मध्यमकर्णद्वारा प्राप्तं ध्वनितरङ्गमग्रे प्रक्षिपति। शम्बूकाकृतिकं तृतीयकर्णस्येदमङ्गं द्रवमयपदार्थेन संसिक्तम्, एकया झिल्लिकया[३] च भागद्वये विभक्तं जायते। या झिल्लिका शम्बूकसदृशीं कुण्डलीं भागद्वये विभजते तस्याः शीर्षपर्यन्तं गतेनास्थ्ना सह सम्बन्धो विद्यते। द्विधा विभक्तायाः कुण्डल्याश्च यो भागो लोमकोश-विशिष्टझिल्लिकामय[४]स्तत्र बहवः श्रुतितन्तवः समुत्पन्नाः शम्बूकरूपायां कुण्डल्याञ्च परितो विस्तृता एकीभूय च मस्तकपर्यन्तं गच्छन्ति। एतैरेव श्रुतितन्तुभिर्ध्वनिर्मस्तकं यदा प्राप्तः, तदा शब्दज्ञानं जायते। इदं तु श्रोत्रेन्द्रियस्य विशदरूपेण व्याख्यानं कृतम्। संक्षेपतश्चास्येदं तात्पर्यं बोद्धव्यम्।

श्रोत्रस्य[५] भागत्रयं कर्तुं शक्यते, तद्यथा--

१ बाह्यं श्रोत्रम्, येन ध्वनिर्गृह्यते।

२ वायुसम्पूरितश्च मध्यमः कर्णः, येन बाह्यकर्णगृहीता ध्वनितरङ्गा अग्रे प्रक्षिप्यन्ते।

३. आन्तरं श्रोत्रम्—अत्र श्रवणतन्त्रिका विद्यन्ते, तेषाञ्च सम्बन्धो मस्तिष्कनिर्मितश्रवणकेन्द्रेण सह विद्यते।

श्रोत्रद्वारा स्वदेशं समागतः शब्दो बुद्ध्या कथं निगृह्यते? इत्येतत् सर्वं यथावसरं विशदरूपेण प्रतिपादयिष्यते।

सांख्यातिरिक्ताः भारतीयदार्शनिकास्तु "येनेन्द्रियेण योऽर्थो गृह्यते तत्तेन निर्मितम्; श्रोत्रेण गन्धस्य, यद्वा घ्राणेन शब्दस्य ग्रहणाभावात्" इति युक्त्या कर्णशष्कुल्यवच्छिन्नमाकाशमेव श्रोत्रं तेन च शब्दोपलब्धिं मन्यन्ते।

तथा चोक्तं नागेशेन **वैयाकरणलघुसिद्धान्तमञ्जूषायाम्—**

---

१. By the Semicircular canals.

२. Cochlea.

३, ४—Cochlea.

५. "श्रवणतन्त्रिकविन्यास (चित्र ७२) में सम्मिलित होते हैं। एक बाह्यकर्ण जो ध्वनि तरङ्गों को पकड़ता है, एक वायुपूरित मध्यकर्ण जो उन तरङ्गों (आवेगों) को आगे पहुँचाता है। तथा एक तरल सम्पूरित आन्तर कर्ण, जिसमें श्रवण के अन्तरंग अर्थात् ग्राहक होते हैं। इनमें से निकलने वाली श्रवणतन्त्रिका तथा उसके भाग मस्तिष्क के श्रवण के केन्द्रों से जुड़े रहते हैं।

मूल लेखक—एडिथ ईस्प्राउल, एम० डी,

—मानवशारीरिकी, बैज्ञानिक पुस्तक पृ० सं० २२२

"कर्णशष्कुल्यवच्छिन्ननभस एव श्रोत्रत्वेन, इन्द्रियाणामसम्बन्धविषयाग्राहकतया तत्तद्भूतसम्बद्धगुणस्यैव तत्तदिन्द्रियग्राह्यतया च आकाशदेशस्थत्वमेव शब्दस्येत्याशयात् ।" इति ।

सांख्यास्तु तत्तादिन्द्रियाणामाहङ्कारिकतया[1] श्रोत्रम् अहङ्कारस्य परिणामं मन्यन्ते । चित्तवृत्तिसहकृतं श्रोत्रं स्वदेशमागतं शब्दं चित्तवृत्तिपरम्परया गृह्णाति । यद्वा इन्द्रियाणामाहङ्कारिकत्वस्वीकारे तेषां पृथ्व्याद्यधिष्ठानत्वं नोचितं प्रतिभाति[2] । अतस्तेजोनभआदिपरमाणूनां परिणामभूतमिन्द्रियं स्वीकुर्वन्ति । तेन "श्रोत्रम् आकाशपरमाणुपरिणामभूतम्" इति । विषय-देशपर्यन्तमेव परमाणूनामिन्द्रियरूपेण परिणामादसन्निकृष्टस्य शब्दस्य न श्रोत्रेण प्रत्यक्षत्वापत्तिः ।

यद्यप्येवम् इन्द्रियविषये तत्तदिन्द्रियजन्यप्रत्यक्षविधौ च प्राचीनविदुषां मध्ये, तैश्च सह अर्वाचीनानां मतवैषम्यस्य सत्त्वाच्छ्रोत्रस्य, तेन च शब्दप्रत्यक्षविधेश्च विभिन्नं स्वरूपं दृश्यते । मध्यकर्णाद् गलपर्यन्तं या प्रणाली गता, ध्वनिग्रहणविषये तस्योपयोगमाधुनिका यथाकामं न मन्येरन्, किन्तु नागेशप्रभृतयस्तस्यातिशयं महत्त्वं मन्यमानाः प्रतीयन्ते । हृद्देशावच्छिन्नाकाशे यो नादः समजनि, तस्य यच्छ्रवणं श्रोत्रपिधानेन तद्वृत्तिनिरोधेन जायते, तत्तु अस्या एव प्रणाल्या माध्यमेन सम्भाव्यते, नान्यथा । गलविवरपर्यन्तं गताया मध्यमकर्णस्य अस्या एव प्रणाल्या माध्यमेन कण्ठविवरं समतिक्रम्य समागतेन ध्वनिनाऽन्तःकरणं संस्क्रियते । ध्वनिसंस्कृतान्तःकरणेन च स्फोटो गृह्यते । तथा चोक्तं नागेशकृत**वैयाकरणलघुसिद्धान्तमञ्जूषायां** शक्त्याश्रयनिरूपणे—"व्यञ्जकरूपरूषितस्य स्फोटस्य वाचकत्वम्" इत्यत्र—

"अयञ्च आन्तरत्वात् श्रोत्रग्राह्यवैखरीसंस्कृतान्तःकरणग्राह्यः" इति ।

मध्यकर्णनिःसृताया गलविलं गतायाश्च प्रणाल्या ध्वनिविषयेऽनुपयोगित्वस्वीकारे हृद्देशेऽभिव्यक्तस्य मध्यमाख्यनादस्य श्रवणम्, ध्वनिद्वारा अन्तःकरणस्य संस्करणञ्च एतत्सर्वं दुर्घटम् । अतस्तस्याः प्रणाल्याः समुपयोगित्वम्, हृदयपर्यन्तं गतस्य गलविवरस्य माध्यमेन परम्परया हृदयेन सह तस्याः सम्बन्धश्च स्वीकर्तव्यौ । एवं चक्षुरित्यादीन्द्रियचतुष्टयस्यापि प्रणालीनामन्तःकरणेन सम्बन्धः स्वीकर्तव्यः । इन्द्रियविशिष्टमेवान्तःकरणं विषयाकारेण परिणमति । अत एव इन्द्रियदोषात् तत्तत्सम्बद्धान्तःकरणस्यापि सदोषत्वेन तादृशस्यैव च तस्य विषयाकारेण परिणामात् इन्द्रियगतदोषाणां विषयेऽपि प्रतीतिः । एवमिन्द्रियप्रणाल्या विषयजातस्य अन्तःकरणेऽनुभवाच्छब्दस्यापि श्रोत्रद्वारा तत्रैव ज्ञानम्, न तु शिरसीत्युभयोर्मतयोर्महावैषम्यं प्रतिभाति । तथापि "श्रोत्रमाध्यमेन एव, न तु घ्राणादीन्द्रियेण शब्दो बुद्ध्या निगृह्यते" इत्यत्र समेषां मतैक्यं विद्यते । किञ्च "सन्ध्यावन्दनादिषु[1] शिरसि शिवस्य यद्वा पञ्चभूतशुद्धौ[2] शिरोमण्डले सहस्रदलकमलस्य ध्यानं कर्तव्यम्" इत्येवं प्रतिपादनान्मस्तकेऽपि[3] चक्षुरादीन्द्रियद्वारा विषयस्य ज्ञानं स्वीकर्तुमापतति । अतः श्रवणतन्त्रिकातन्त्रमाध्यमेन शिरःप्रदेशे (यत्र श्रोत्रकेन्द्रम् तत्र) शब्दस्य बुद्ध्या निग्रहणं स्वीकरणीयम् । एवं महाभाष्योक्तं शब्दस्य यल्लक्षणम् "श्रोत्रोपलब्धिर्बुद्धिनिर्ग्राह्यः" इति, तदप्येतैः समन्वितम् ।

---

१. इन्द्रियाणामाहङ्कारिकत्वम्—सांख्यदर्शनम्—अध्याय २ ।

वैकारिकान्मनो जज्ञे देवा वैकारिका दश ।
दिग्वातार्कप्रचेतोऽश्विवह्नीन्द्रोपेन्द्रमित्रकाः ॥

—श्रीमद्भागवतम् (२।५।३०,)

२. न्यायमतानुसारेण ।

प्रयोगेणाभिज्वलितः

श्रोत्रेणोपलब्धुं योग्यो बुद्ध्या निर्ग्राह्यश्च शब्दः । "प्रयोगेण कण्ठताल्वादिव्यापारस्य तज्जन्यकम्पनस्य च प्रयोगेणाभिज्वलितः अभिव्यक्तः" इति पूर्वोक्तोऽर्थोऽस्य ग्रहीतव्यः । एतद्भिन्नोऽप्यर्थः क्रियते । तद् यथा —"प्रयोगेण वैखरीरूपेण अभिज्वलितः स्वरूपरूषितः, यद्वा नादाभिव्यङ्ग्यः स्फोटः" इति । अत्र तु प्रथमार्थस्यैव प्रयोजनम् । सर्वोऽपि शब्दः पदार्थसंघर्षजन्यकम्पनेनाभिव्यज्यते इति तु प्रत्यक्षमेव दृश्यते । "तपरस्तत्कालस्य" (१।१।७०) इति पाणिनीयसूत्रे महाभाष्यकारोऽपि भेर्याघातो भेरीमाहत्य कश्चिद्विंशति पदानि गच्छति इत्यादिषु भेरीमाहत्येत्युक्त्या "तुल्यास्यप्रयत्नं सवर्णम्" इत्यादिषु वर्णाभिव्यक्तिजनकस्थानप्रयत्नानां विमर्शाच्च, कण्ठताल्वादिव्यापारेणैव वर्णात्मकशब्दस्याऽभिव्यक्तिं स्वीकरोतीति प्रतीयते । भर्तृहरिकृत**वाक्यपदीयस्य** ब्रह्मकाण्डे "स्थानानामभिघातश्च" इत्युक्त्या पूर्वोक्तं वचनं विश्वासार्हं जायते । आधुनिका भौतिकशास्त्रिणोऽपि ध्वनिं कम्पनजन्यं मन्यन्ते इति पूर्वमेव "आधुनिकविज्ञानदृष्ट्या पराया वाचस्तत्त्वम्" इत्यत्र सप्रमाणं विशदरूपेण निरूपितम् ।

अन्तिमञ्च लक्षणं विद्यते—"**आकाशदेश**" इति ।

शब्दस्याकाशदेशत्वं कथं साध्यतेऽस्माभिः—इत्यस्य प्रथमं ज्ञानमपेक्ष्यते । सर्वेषां पदार्थानामाधार आकाशमेव अस्माभिः स्वीक्रियते । द्युलोके यावन्तः सूर्यचन्द्रादयो दृश्यन्ते, तेषामाधारः पृथिवी न सम्भवति, अपि तु आकाशमेव । यावन्ति नक्षत्रचक्राणि, तानि आकाशस्थितान्येव । सर्वेषां पदार्थजातानामाकाशस्याधारत्वे खे प्रक्षिप्तो लोष्टस्तत्रैव स्थीयेत, किन्त्वेतद्विपरीतं कथं दृश्यते ? इति शङ्का

---

१. श्रीसरयूदासनिर्मिते श्रीरामपटले एतद्विषयकोंऽशो द्रष्टव्यः ।

२. श्रीरामपटलेतिनामके ग्रन्थे पञ्चभूतशुद्धिप्रक्रियायां शिरसि सहस्रदलकमलस्य ध्यानं कर्तुं प्रोक्तम् ।

३. अथवा हृद्देशे । तथा च शिरोदेशे हृद्देशे चेत्युभयत्रापि विषयज्ञानं जायते ।

तु न ह्यवधारणीया । "यो यस्यांशः स तेन आकृष्यते" इति नियमेन खे प्रक्षिप्तो लोष्टः पृथ्व्या आकर्षितस्तत्रैव तिष्ठति । एवमान्तरिक्षोऽब्विकारो धूमो (नीहारः) निवाते आकाशे नैव तिर्यङ् न वा ऊर्ध्वमारोहति, किन्त्वधस्तादेव जलेषु समापतति । प्रदीपार्चिरपि निवाते आकाशे ऊर्ध्वमेव गच्छति, यतो हि प्रदीपार्चिस्तेजोविकारः, तेजःपुञ्जसूर्यश्च खे विराजते । एतत्सर्वं पातञ्जल**महाभाष्ये** "स्थानेऽन्तरतमः" (१।१।५०) इति पाणिनीयसूत्रे स्पष्टतया प्रतिपादितम् । तथा चोक्तम्–"येषामेव किञ्चिदर्थकृतमान्तर्यम्, तैरेव सहासते" इति ।

महावैज्ञानिको न्यूटनस्तु "पृथ्व्यामाकर्षणशक्तेः सत्त्वात्, प्रक्षिप्तो लोष्टस्तया आकृष्यते" इत्येतन्मात्रमन्वेषणं कृतवान् । किन्तु ततोऽप्यतीव पूर्वं" न केवलं पृथ्वीविकारः, अपि तु "जलादयोऽपि विकारा जलादिभिराकृष्यन्ते" इत्यधिकमन्वेषणं कृतम् ।

एवं रीत्या पदार्थजातानामाकाशस्य आधारत्वे स्वीकारे वेगेन प्रक्षिप्तः पदार्थस्तत्रैव स्थीयेत—इत्यवधारणा मनसि न स्थातव्या । पृथिव्या अधस्तात् स्थितस्य नागादिलोकस्याप्याधार आकाशमेव, न तु तदुपरि स्थितो भूलोकः, स्वर्लोको वा सम्भवति । एतदेव प्रतिपादितं **वाक्यपदीये** भर्तृहरिणा—

आधारशक्तिः प्रथमा सर्वसंयोगिनामयम् ।
इदमत्रेति भावानामभावानाञ्च कल्पते ॥
व्यपदेशस्तमाकाशनिमित्तं तु प्रचक्षते ।
(काण्डम् ३, अधिकरणाधिकारः)

"आकाशे निखिलपदार्थानां धारणाशक्तेर्विद्यमानतया शब्दस्यापि स एव आधारः" इति रीत्या शब्दस्याकाशदेशत्वमस्माभिः साध्यते ।

मन्ये तावद् भौतिकवैज्ञानिका अपि उपर्युक्तयुक्त्या शब्दमाकाशदेशमेव स्वीकुर्वाणाः प्रतीयन्ते । आकाशे यानि नक्षत्रचक्राणि विद्यन्ते, या चैषा पृथ्वी दृश्यते, तत्सर्वं परस्परमाकृष्टं विद्यते । अतो नक्षत्राणि आकाशान्न निपतन्ति । आकाशे शतद्वयं ध्वनिग्राहकयन्त्र(रेडियो)नक्षत्राणि विद्यन्ते—इत्येवं व्यवहारो भौतिकैः क्रियते । अयं व्यवहारः आकाशं विना न सम्भवति । किञ्च निर्वातं चन्द्रलोकं गतैर्जनैर्भूलोकात् प्रेषितः समाचारः (चन्द्रलोके) ध्वनिग्राहकयन्त्रद्वारा श्रुतः । शब्दस्याकाशदेशत्वास्वीकारे सर्वमेतद् दुर्घटमेव प्रतिभाति । किञ्च प्रकाशतरङ्गाणां यद्वा ध्वनितरङ्गाणां केनचिन्माध्यमेनैव सञ्चारस्य सत्त्वात् "आकाशात् सूर्यकिरणा भूमिं कथं समवतरन्ति, कथं वा ध्वनितरङ्गाणां चन्द्रलोकं यावत्सञ्चरणम्" इति काठिन्यमपाकर्तुम् 'ईथर' नामकं तत्त्वमाधाररूपेण कल्पितवन्तः । कल्पिताऽऽधारस्वीकारापेक्षया शून्ये निखिलपदार्थानामाधारशक्तेः सत्त्वात् तस्या एव आधारत्वं स्वीक्रियतां नाम । नात्र काचित् क्षतिः ।

एवमेतादृशयुक्त्या शब्दस्याकाशदेशत्वमुभयोर्मते साधयितुं शक्यते ।

वस्तुतस्तु पातञ्जल**महाभाष्ये** प्रत्याहाराह्निके "अ इ उ ण्" (१) इति सूत्रे "श्रोत्रोपलब्धिर्बुद्धिनिर्ग्राह्यः—" इत्यत्र शब्दस्य यल्लक्षणं प्रोक्तम्, तत्र आकाशदेशत्वं विहाय श्रोत्रोपलब्धिरित्यादिलक्षणत्रयदृष्टचोभयोः साम्यम् वेदितव्यम् । भौतिकशास्त्रमते शब्दस्याकाशदेशत्वं तु युक्त्या ध्वन्यते । नूतना भौतिकशास्त्रिणः आकाशं विहाय वायुतेजोजलपृथिवीनिष्ठं शब्दं मन्यमानाः प्रतीयन्ते, वाय्वादीनां परस्परं संघर्षणात् तस्याभिव्यक्तेः । शब्दस्य श्रोत्रेन्द्रियेण गृह्यमाणत्वात् कर्णशष्कुल्यवच्छिन्नाकाशस्य च श्रोत्रत्वात्तस्याकाशदेशत्वं साधयितुं न शक्यते; उभयोर्मते श्रोत्रस्य विभिन्नस्वरूपत्वात् ।

एवं रीत्या श्रोत्रग्राह्यशब्दस्य यल्लक्षणं पतञ्जलिना प्रोक्तम्, तदेव लक्षणम् अधुनातनैः वैज्ञानिकैः स्वीकृतम् । परन्तु श्रोत्रग्राह्यत्वादिकं यल्लक्षणं पतञ्जलिना प्रोक्तं तत्तु स्थूलशब्दस्य यल्लक्षणं तस्यैव । परन्तु श्रोत्राग्राह्यमिन्द्रियातीतं शब्दस्य यत् स्वरूपम् ऋगादिवेदेषु व्याकरणदर्शने च प्रतिपादितम्, तदेते भौतिका अन्तःकरणस्य भौतिकज्ञानपिहितत्वान्न विदन्ति ।

ध्वनिर्देशाद्देशान्तरं गन्तुं माध्यममपेक्षते

भौतिकशास्त्रनिपुणा विद्वद्वरिष्ठा आधुनिका वैज्ञानिकाः "आकारादिध्वनयो देशाद् देशान्तरं गन्तुं माध्यममपेक्षन्ते" इत्येवं प्रतिपादयन्ति । अत्रैव च तेषां सुदृढो विश्वासो विद्यते । इमं सिद्धान्तं द्रढयितुं ते निम्नोक्तं प्रमाणं समुपस्थापयन्ति ।

विद्युद्घटिकां यद्वा समयसूचिकां घटिकां काचनिर्मितपात्रे सन्निवेश्य, तत्पात्रं निर्वातिकर्तृयन्त्रोपरि च संस्थाप्य काचपात्रावच्छिन्नं वायुं तेन यन्त्रेण शनैः शनैर्निःसारयेत् । काचपात्रान्तर्गतस्य वायोः क्रमशः शनैर्बहिर्निःसरणानुसारेण ध्वनिरपि क्रमशो मन्दं मन्दं श्रूयते । यदि तत्पात्रावच्छिन्नं वायुं निःशेषतया बहिष्कर्तुं कोऽपि प्रभवेत्, तर्हि ध्वनेः श्रवणमणुमात्रमपि न स्यात् । परन्त्वियमवस्था निष्पादयितुमशक्या; यतो हि काचपात्रान्तर्गतस्य वायोर्निःशेषतया निःसारयितुं बहुशः कृतेऽपि प्रयत्ने तस्य कोऽप्यंशोऽवशिष्यत एव ।

यदि काचपात्रे शनैश्शनैः वाष्पं प्रवेशयेत्तर्हि ध्वनिरपि क्रमश उच्चैः श्रूयते । एतावताऽवगम्यते यद् ध्वनिर्देशान्तरं सञ्चरितुं माध्यममपेक्षते । अयं विषयो **माध्यमिकभौतिकविज्ञानग्रन्थेषु** बहुशः प्रतिपादितो दृष्टिपथं समायाति ।

ध्वनिमाध्यमस्य स्थानान्तरणाभावः

वक्तृमुखान्निर्गलितः, यद्वा कोऽपि शब्दो माध्यमेन देशान्तरं प्राप्नोति, तदा तन्माध्यमं स्थानाद् भ्रष्टं न जायते, किन्तु तस्य प्रत्येकं कणाः स्वकेन्द्रमभितः स्पन्दिता भवन्ति । काचनिर्मिता एका नालिका यस्या व्यासो वालिस्तपरिमितः,

लम्बनञ्च हस्तपरिमितं स्याताम् । एकः शिरोभागश्च शङ्क्वाकृतिको भवेत् । शङ्क्वाकृतिके शिरोभागे प्रज्वलितं दीपं सन्निधाप्य सा नालिका धूम्रेण प्रपूर्यताम् । तस्या द्वितीयशिरोभागे हस्ततलौ, यद्वा काष्ठद्वयं परस्परमाहत्य यदा ध्वनिः क्रियते, तदा दीपकस्य ज्योतिः परिकम्पते, किन्तु धूम्रो नालिकातो बहिर्न निःसरन् दृश्यते । एतावताऽयं सिद्धान्तः प्रकर्तव्यो यद् ध्वनिसञ्चारक्षणे माध्यमं स्थानान्तरितं न जायते, किन्तु तस्य प्रत्येकं कणं कम्पयन् ध्वनिरेव प्रसरति" इति ।

कम्पनतरङ्गयोः सम्बन्धस्तस्य च माध्यमम्

ध्वनिर्माध्यमस्य प्रत्येकं कणं प्रकम्प्य तरङ्गं समुत्पादयन् देशान्तरं व्रजति, माध्यमञ्च स्थानान्तरं न भजतीत्येवं पूर्वं प्रतिपादितम् । अत्र कम्पनतरङ्गयोर्जन्यजनकरूपसम्बन्धो वेदितव्यः । कम्पनं जनकम्, तरङ्गाश्च जन्याः । एवमाघातकम्पनयोरपि जन्यजनकरूपः सम्बन्धो विद्यते । आघातो जनकः, कम्पनञ्च जन्यमिति । ध्वनिर्माध्यमस्य प्रत्येकं कणं प्रकम्प्येति पूर्वोक्तवाक्ये कणपदेन परमाणुर्न गृह्यते, अपि तु मध्यमावयवीभूतस्य कस्यचिल्लघोरायततस्य ग्रहणं क्रियते । ध्वनिमाध्यमीभूतवाय्वादिसम्पृक्ते वस्तुनि यथा कम्पनम्, तादृशमेव कम्पनं तत्संश्लिष्टेषु माध्यमकणेष्वपि जायते, तच्च कम्पनं प्रत्येकं कणस्य साहचर्यादग्रे विक्षिप्यते । माध्यमस्य प्रत्येकं कणेष्वयं कम्पनस्य विक्षेपस्तरङ्गनाम्नाऽभिधीयते । संक्षेपतश्च "प्रत्येकं माध्यमकणस्य स्वकेन्द्रमभितः स्पन्दनं कम्पनम्, तत्समूहश्च तरङ्गः" इति वेदितव्यम् ।

ध्वनिमाध्यमावयवभूतस्य प्रत्येकं कणस्य स्वकेन्द्रमभित एव प्रकम्पनात् स्थानान्तरणाभावाच्चैकस्मिन् माध्यमे बहवो ध्वनयः प्रसरन्ति । अत एव एकस्मिन्नेव माध्यमे विभिन्नदिग्भ्यः समागच्छन्तो ध्वनयः स्पष्टतया श्रूयन्ते ।

प्रशान्ततरङ्गेऽप्रवहति सरोवरजले प्रक्षिप्तेन प्रस्तरखण्डेन जन्यो यस्तरङ्गः प्रशान्ते वायौ च ध्वनिजन्यो यस्तरङ्गस्तयोरन्तरं विद्यते । जले प्रक्षिप्तप्रस्तरखण्डेन केवलं तरङ्गमात्रं समुत्पद्यते, तरङ्गाश्च तटपर्यन्तं प्रसरन्ति, प्रस्तरखण्डस्तु यत्र प्रक्षिप्यते तत्रैव मग्नः सञ्जायते । ध्वनिस्तु वायौ तरङ्गमात्रं न समुत्पादयति, तथा सति वायोस्त्वगिन्द्रियेण ग्रहणात् तस्य श्रोत्रेण ग्रहणानापत्तेः, अपितु ध्वनिः खलु वायौ तरङ्गं समुत्पाद्य तदधिरुह्य च श्रोत्रदेशपर्यन्तं पर्यटति ।

ध्वनिसञ्चारप्रक्रिया

नैयायिका वीचितरङ्गन्यायेन, अथ च कदम्बगोलकन्यायेन श्रोतॄणां श्रोत्रदेशपर्यन्तं ध्वनिसञ्चारं मन्यन्ते । तदुक्तं श्रीविश्वनाथकृतकारिकावल्याम्—

शब्दो ध्वनिश्च वर्णश्च मृदङ्गादिभवो ध्वनिः ।
कण्ठसंयोगादिजन्या वर्णास्ते कादयो मताः ॥

सर्वः शब्दो नभोवृत्तिः श्रोत्रोत्पन्नस्तु गृह्यते ।
वीचितरङ्गन्यायेन तदुत्पत्तिस्तु कीर्तिता ॥
कदम्बगोलकन्यायादुत्पत्तिः कस्यचिन्मते ।

यथा सरोवरजले प्रथमं निमित्तकारणीभूतवायुना एका वीचिरुत्पद्यते, सा एव वीचिस्तरङ्गान्तरं समुत्पाद्य नश्यति । प्रथमवीचिजन्यतरङ्गाश्च पुनस्तरङ्गान्तरं समुत्पाद्य नश्यन्ति । एवं पूर्वपूर्वतरङ्गेभ्य उत्तरोत्तरतरङ्गाणां समुत्पत्तिर्जायते । तथैव कण्ठताल्वादिषु निमित्तभूतस्य वायोः संयोगविभागाभ्यामास्यान्तर्भूततत्तद्देशावच्छिन्ने नभसि यः प्रथमः शब्दः समुत्पन्नः स एव कण्ठताल्वादिभिन्नदेशावच्छेदेन सर्वदिगवच्छेदेन चैकदैव स्वसजातीयान् दश शब्दाञ्जनयति । ते च शब्दाः पुनः स्वसजातीयशब्दान् समुत्पाद्य विनश्यन्तीति सजातीयशब्दारम्भपरम्परया श्रोतुः कर्णदेशावच्छिन्ने नभसि समुत्पन्नः सजातीयः शब्दो गृह्यते । आकाशे समवायेनोत्पन्नस्य शब्दस्य धारावाहिकोत्पत्त्या कर्णात्मकाकाशे समुत्पन्नस्य प्रत्यक्षं भवतीत्यर्थः । अत्र वायुर्निमित्तं कारणम् ।

वीचिर्यथा सर्वदिगवच्छेदेन एकदा तरङ्गान् जनयति, परन्तु यद्देशदिगभिमुखो वायुस्तद्देशदिगवच्छेदेनाधिकं तरङ्गान् जनयति । तथैव भेरीमृदङ्गाद्यवच्छेदेन जायमानः शब्दो भेर्यादिभिन्नसर्वदेशावच्छेदेन सर्वदिगवच्छेदेन चैकदैव शब्दान् जनयति, परन्तु यद्देशदिगभिमुखो वायुस्तद्देशदिगवच्छेदेनाधिकशब्दान् जनयति ।

शब्दसञ्चारस्य, यद्वा सजातीयशब्दोत्पत्तेर्द्वितीयं प्रकारमाह—

'कदम्बगोलकन्यायादुत्पत्तिः कस्यचिन्मते' । इति ।

यथा कदम्बपुष्पमेकनालाधिकरणविशेषे स्वसमीपदेशेषु सर्वासु दिक्षु स्वसजातीयपुष्पाणि जनयति, तादृशपुष्पाणि तस्मिन्नेवाधिकरणे तत्समीपदेशेषु सर्वासु दिक्षु चान्यानि सजातीयपुष्पाणि जनयन्ति; एवं कण्ठताल्वादिदेशावच्छेदेन समुत्पन्नः शब्दः स्वोत्पत्तिमूलदेशसमीपदेशावच्छेदेन दशसु दिक्षु स्वसदृशान् शब्दानारभते । ते च स्वसमीपदेशावच्छेदेन सर्वदिगवच्छेदेन च बहून् शब्दान् जनयन्ति । अत्र पक्षे बहूनां शब्दानां शब्दासमवायिकारणत्वकल्पनेन द्वितीयक्षणभिन्नक्षणानां निमित्तकारणत्वकल्पनेन च गौरवात् कारिकायां **'कस्यचिन्मते'** इत्युक्तम् । पक्षद्वयेऽपि आद्यशब्दोऽतीन्द्रियः । पूर्वपूर्वशब्देभ्य उत्तरोत्तरं जायमानाः शब्दाः शब्दजशब्दनाम्नाभिधीयन्ते । शब्दजशब्दे पूर्वपूर्वशब्दोऽसमवायिकारणम् । पवनादिकं तु निमित्तम् । एवमाकाशे समवायेन समुत्पन्नस्य शब्दस्य धारावाहिकोत्पत्त्या कर्णात्मकाऽऽकाशे समुत्पन्नस्य प्रत्यक्षं भवति ।

सामान्यदृष्टया (स्थूलदृष्टया) विचार्यमाणे सति भौतिकशास्त्रिभिः प्रतिपादिता तरङ्गरूपेण ध्वनिसञ्चारस्येयं प्रक्रिया नैयायिकोक्तशब्दजशब्दप्रक्रियया सह

साम्यं भजमाना प्रतिभाति । अत्र शब्दस्य धारावाहिकरूपेण शब्दजशब्दोत्पत्तिः, शब्दजशब्दे वायोर्निमित्तकारणत्वस्वीकारश्चेत्युभयं माध्यमेषु तरङ्गरूपेण ध्वनिसञ्चारं स्वीकुर्वता भौतिकेन सह साम्यं भजते । नैयायिका वाय्वादिकं ध्वनिसञ्चारस्य निमित्तं कारणम्, भौतिकाश्च माध्यमं मन्यन्ते । उभयोरेकत्रैव तात्पर्यमवसीयते ।

वस्तुतस्तु सूक्ष्मदृष्ट्या विचार्यमाणे सत्युभयोर्मध्ये भेदोऽपि प्रतिभाति । एते भौतिकाः क्वचिद् ध्वनिसञ्चारस्य एवं रीतिं प्रतिपादयन्ति, यया सह वैयाकरणानां साम्यं प्रतिभाति । माध्यमशब्दस्य 'मध्ये ध्वनेः प्रभव-गन्तव्यस्थानयोर्मध्ये भवो यथा वायुरिति स मध्यमः, तस्य भावः कर्म वेति तन्माध्यमम्' इति व्युत्पत्तेः सत्त्वाद् यस्याधारेण साहाय्येन वा ध्वनिः (कोऽपि पदार्थः) सञ्चरति, तन्माध्यमसंज्ञया व्यपदेष्टुं शक्यते । "ध्वनिसञ्चारस्य माध्यमम्" इत्यस्य ध्वनिसञ्चारस्याधारः प्रकृष्टोपकारकं करणं वेत्यर्थो भवितुमर्हति । लौकिके व्यवहारेऽपि "त्वं केन माध्यमेन समागतोऽसि ? शकटस्य माध्यमेन समागतः", शकटेन समागतोऽस्मीत्यर्थः; "भवतां निबन्धस्य किं माध्यमम् ? दैवी वाग्" इत्येवं दृश्यते । माध्यमं कार्यजनकक्रियाया आधारः, प्रकृष्टोपकारकरूपं करणं वा भवितुमर्हम् । किन्तु निमित्तं कारणं तु तदनर्हम् । अतएव पाणिनिः "दण्डेन घटः" इत्यादौ तृतीयाविधानार्थम् "हेतौ" (२।३।२३) इति सूत्रञ्चकार । करणनिमित्तयोरैक्ये तु इदं व्यर्थमेव स्यात् । उक्तञ्च—

"द्रव्यादिविषयो हेतुः कारकं नियतक्रियम् ।
अनाश्रिते तु व्यापारे निमित्तं हेतुरिष्यते ।।" इति ।

एतदेव "हेतौ" (२।३।२३) इति पाणिनिसूत्रे भट्टोजीदीक्षितेन स्पष्टीकृतम्—"द्रव्यादिसाधारणं निर्व्यापारसाधारणञ्च हेतुत्वम् । करणं तु क्रियामात्रविषयं व्यापारनियतञ्च" इति । एवं निमित्तमाध्यमयोर्महतो भेदस्य सत्त्वात् तयोर्वैषम्यं प्रतिभाति । यद्वा भवतु नाम "दण्डेन घटः" इत्यादौ "दण्डमाध्यमेन घटः" इत्येवं व्यवहारः, एवं माध्यमस्य निमित्तकारणकरणाधारैः सह साम्यं स्यात्; किन्तु अपरश्च भेदोऽनयोः स्पष्टतया दृश्यते—एक एव ध्वनिः श्रोतृदेशपर्यन्तं वायुनिमित्तेन आकाशे पुनः पुनरुत्पद्यते, नश्यति चेति नैयायिकाः । भौतिकनये तु एक एव ध्वनिः सकृदभिव्यक्तः वाय्वादिमाध्यमस्य प्रत्येकं कणं क्रमशः परिकम्पयन् पर्यटतीत्युभयोर्महान् भेदः प्रतिभाति ।

क्वचित्तु नूतनैर्ध्वनेर्माध्यमरूपेण परिवर्तनमपि प्रतिपाद्यते । तद्यथा—ध्वन्यूर्जसो विद्युदूर्जोरूपेण परिवर्तनम् । एतदपि वैयाकरणेन सह साम्यं भजति ।

अयं विषयो वर्णाभिव्यक्तिप्रक्रियाप्रकरणे—

"स मनोभावमापद्य तेजसा पाकमागतः" ।

इति भर्तृहरेः कारिकाया व्याख्यावसरे प्रतिपादयिष्यते । इदमपि नैयायिकैः सह विरुणद्धि; घटादिकार्यस्य दण्डादिनिमित्तरूपेण परिणामाभावात् । समवायिकारणे आकाशे शब्दादेव शब्दस्योत्पत्तेः ।

वस्तुतस्तु नैयायिकानां नये ध्वनिसञ्चारस्य शब्दजशब्दसरणिर्नोचिता प्रतिभाति, "सोऽयं ककारः" इति प्रत्यभिज्ञानाच्छब्दस्य नित्यत्वेन शब्दजशब्दोत्पत्तेर्दुर्घटत्वात् । तदुक्तं श्रीभर्तृहरिणा **वाक्यपदीये**—

प्रत्यक्षप्रत्यभिज्ञानाद् वर्णैकत्वं प्रतिष्ठितम् ।
वर्णात्मकं पदं तच्च तद्भेदान्न भिद्यते ।। इति ।

दिनान्तरेऽनुभूतेऽधुनाऽनुभूयमानस्य "सोऽयम्" इति प्रत्यभिज्ञया तावत्कालं स्थिरत्वे सिद्धे "तावत्कालं स्थिरं चैनम् कः पश्चान्नाशयिष्यति" इति न्यायाद् वर्णानां नित्यत्वम् । सादृश्यमादाय "सोऽयम्" इति प्रत्यभिज्ञापत्तिस्तु न समीचीना, तथा सति द्वयोः सदृशयोर्घटयोः "सोऽयम्" इति, मथुरायां यो देवदत्तो दृष्टः, तत्सदृशः कश्चित् काश्यां दृष्टश्चेत्तर्हि देवदत्तसदृशेऽपि पुरुषे "स एवायं देवदत्तो यो मथुराय दृष्टः" इति; पूर्वनखादिनाशोत्तरम् पुनरुत्पन्ने तत्सदृशे नखादौ "तदेवेदं नखम्, त एव इमे केशाः" इति च प्रत्यभिज्ञापत्तेः । तस्मात् प्रत्यभिज्ञाया व्यक्तिविषयकत्वाद् वर्णस्तदात्मकं पदञ्चेत्युभयं नित्यम् । सर्वदेशेषु तदुपलम्भाद् विभुत्वम् । शब्दस्य विभुत्वादेवैक इन्द्रशब्दोऽनेकेषु क्रतुषु आविर्भवति, अधुनातनभौतिकैश्च भूमण्डलाद् ध्वनिप्रेषकयन्त्रद्वारा प्रेषितो ध्वनिश्च चन्द्रलोके तत्र गतैर्जनैः श्रुतः । शब्दस्य विभुत्वानङ्गीकारे एतत्सर्वं दुर्घटम् ।

नैयायिकसरणिमधिकृत्य वर्णानां कण्ठताल्वभिघातजानां जन्यत्वपक्षे शब्दजशब्दन्यायेन वीचितरङ्गवत् श्रोतृपर्यन्तं गमनाङ्गीकारे च सर्वजनानुभवसिद्धप्रत्यक्षस्य सुतरामपलापः । तद्यथा श्रुते वर्णे "देवदत्तोऽस्योच्चारकः, अयमेतदीयो ध्वनि; अयञ्च श्लेषः कण्ठविवरं सङ्कोच्य व्यक्त्यन्तरध्वनिमुत्पादयति" इति प्रतीतिः सर्वानुभवसिद्धा । जन्यत्वपक्षे शब्दजे शब्दे च श्रुतस्य तस्य ध्वन्यात्मकस्य ककारादेर्वर्णस्य एतद् व्यक्त्युच्चरितत्वम् वक्तुः सुकरमुच्यते । तस्माज्जन्यत्वपक्ष इव शब्दजशब्दपक्षोऽपि तेषां शशशृंगवत् खपुष्पमेव । अभिव्यक्तिवादिनां शाब्दिकानामन्येषां मीमांसकानाञ्च निकाये कण्ठताल्वभिघातजाभिव्यक्तिमेव श्रोतृश्रोत्राणि गृह्णन्ति । अतस्तादृशप्रत्यये बाधाभावः । जन्यत्वपक्षस्तु तत्तद्युक्तिभिराचार्यवचनैश्च पुरा निराकृत एव । इदानीं शब्दजशब्दपक्षोऽपि अभियुक्तिभिर्ध्वस्तप्रायः ।

किञ्च, आधुनिका अतीतकालिकध्वनिग्राहकयन्त्रमनुसंहितवन्तः[1] । तच्च

१. अयं विषयः स्पान (Span) पत्रिकादिषु बहुत्र प्रकाशितः, श्रुतश्च कर्णाकर्णिकपरम्परया ।
"उपरोक्त शक्तियाँ.................. । शब्दविज्ञान एक स्वतन्त्र विज्ञान है, इसमें

यन्त्रमाकाशे सन्निहितम् । तस्माद् यन्त्राद् गर्जनतर्जनाद्यात्मका बहवः शब्दाः श्रूयन्ते । ते च शब्दाः प्राचीनकालिका इत्येवं तेषामनुमानम् । यद्यपीदमनुसन्धान-मद्यावधि सफलतां न प्राप्तम्, तथापि तत्साफल्यम् प्राप्तुकामाः सर्वे वैज्ञानिका यत्नशीलाः । अस्य साफल्यस्य सम्भावना शब्दस्य नित्यत्वस्वीकारादेव युज्यते, नान्यथा । यन्त्रद्वारा अतीतकालिकध्वनिग्रहणे क्रियमाणे यत्नो वैयाकरणानां "तावत्कालं स्थिरं चैनं कः पश्चान्नाशयिष्यति" इति सिद्धान्तं दृढीकरोति ।

तस्माच्छब्दस्य नित्यत्वाद्, विभुत्वाद्, एकत्वाच्च ध्वनिना कण्ठताल्वादि-मतः प्राणिनश्च "अयं देवदत्तो वदति, यतो हि देवदत्तस्यायं ध्वनिः", "अयं मृदङ्ग-स्य ध्वनिः", "दुन्दुभिध्वनिर्मया श्रूयते" इत्येवं परिज्ञानाच्च शब्दजशब्दसरण्या ध्वनिसञ्चारस्य प्रक्रिया विश्वासं न समारोहति । किन्तु एक एव शब्दः स्थालीरेखा-श्रिताङ्गुलिपरिभ्रमणवत् सर्वतो दिक्षु व्याप्नोति । यथा स्थाल्यां कुण्डलवद् रचितं रेखावलयमाश्रित्य एका अंगुली सर्वासु दिक्षु वृत्तात्मिकासु सर्वासु रेखासु चक्रवद् भ्राम्यति; एवमेकः शब्दो (ध्वनिः) दशसु दिक्षु वाय्वादिमाध्यमस्य प्रत्येकं कणं परिकम्प्य निखिलं ब्रह्माण्डं व्याप्नोति । भौतिका वाय्वादिद्रव्येषु ध्वनेर्वेगं प्रतिपादयन्ति, तेन प्रतीयते यद् वक्त्रोच्चरित एव ध्वनिः श्रोतृदेशपर्यन्तं पर्यटति । विभिन्नमाध्यमेषु ध्वनेर्विभिन्ना गतिरेतैश्च स्वीक्रियते । तद्यथा ध्वनिवेगस्य एकं विवरणमत्र प्रस्तूयते ।

विभिन्नमाध्यमेषु[1] ध्वनेर्वेगः (Velo city of Sund in different Media)

वायौ	३३२	क्रोशार्धं[2]	प्रतिविपलं[3]	पर्यटति
उदजने[4]	१२७०	,,	,,	,,
ओषजने[5]	३१६	,,	,,	,,
जले	१४३५	क्रोशार्धं	प्रतिविपलं	पर्यटति
ताम्रे	३६००	,,	,,	,,
लोहधातौ	५०००	,,	,,	,,
स्फटीमये[1]	५१००	,,	,,	,,
सिन्दूरवृक्षकाष्ठे[2]	४०००	,,	,,	,,
दारुगन्धायां[3]	३३००	,,	,,	,,
सिक्थके[4]	५५००	,,	,,	,,
भारतीयतरलद्रव्ये[5]	४३	,,	,,	,,

महान् शक्ति है। इसीलिए इसे ब्रह्म भी कहा जाता है। इसका कभी नाश नहीं होता। वैज्ञानिकों ने भी सिद्ध कर दिया है कि हमारे द्वारा उच्चरित शब्द आकाश में घूमते रहते हैं और अपनी जाति के शब्दों के साथ मिलकर सुसगठित शक्ति द्वारा अन्य व्यक्तियों को प्रभावित करते रहते हैं। फ्रांस की प्रसिद्ध वैज्ञानिक महिला मैडम फिनोलिग ने सिद्ध किया है कि शब्द के साथ मन और दृश्य का सम्बन्ध है"।

—लें०, डॉ० चमनलाल गौतम, मन्त्रमहाविज्ञान (प्रथम खण्ड पृ० सं० १०४—१०५)

१. विभिन्नमाध्यमेष्वयं ध्वनेर्वेगः कुमार एवं भार्गव इति विद्वद्द्वयकृतं सरलभौतिक नामकं ग्रन्थमाश्रित्य प्रतिपादितः । तत्र ४८५ तमे पृष्ठे द्रष्टव्यः ।
2. Mile.
3. Second.
4. Hydrogen.
5. Oxygen.

अत्र विचार्यताम् तार्किकाः ध्वनेर्विषये (वर्णावर्णात्मकोभयविधस्य) क्षण-त्रयम्, (केचिच्च षट्क्षणात्) न नश्यति, ततः परं तु नश्यति" इत्येवं मन्यन्ते । भौति-कमतानुसारेण यदि ध्वनिः प्रतिविपलं बहुक्रोशं व्रजति, तर्हि "लौकिके व्यवहारे वक्त्रोच्चरितो यो ध्वनिः स श्रोतृदेशपर्यन्तं वायुमाध्यमेन क्षणत्रयेण षड्भिः क्षणैर्वा समागन्तुं न प्रभवति, तस्योत्पन्नविनाशशालित्वात्" इत्येवं वचनं तार्किकाणां भौतिकमतविरुद्धं, वैयाकरणेन सह च अनुरुद्धं प्रतिभाति । तेषां मते सकृदभिव्यक्त-स्यैव ध्वनेः श्रोतृदेशे गमनात्[6] ।

स्वाभिव्यक्तिस्थानादभिव्यक्तः शब्द एव श्रोतृदेशं पर्यटतीतीमं विषयं **निरुक्त**कारो यास्काचार्योऽपि अनुमोदते । तदुक्तं निरुक्ते "व्याप्ति-मत्त्वात्तु शब्दस्य[7]" इति । "अभिधानाभिधेयरूपा बुद्धिर्हृदयाकाशप्रतिष्ठिता परबोधनेच्छया पुरुषेणोदीर्यमाणा कण्ठादिषु वर्णभावमापद्य बाह्याकाशस्थं शब्दं स्वरूपं कृत्वा श्रोतृद्वारेण तत्र स्थिता श्रोतुर्बुद्धिमनुप्रविश्य सर्वार्थसर्वाभिधानरूपां तद्बुद्धिं व्याप्नोति" । इति तद्भाष्यांशः । अभिधानाभिधेयरूपेत्यस्य अभिधानो वाचकः शब्दः, अभिधेयं वाच्यम् । हृद्देशे प्रतिष्ठिता शब्दरूपा बुद्धिरेव वर्णरूपेण श्रोतृदेशपर्यन्तं व्रजति । व्यापनं[8] व्याप्तिः सा यस्मिन्नस्ति स व्याप्तिमान् तद्भावो व्याप्तिमत्त्वं नित्यत्वम्, तस्मात् । प्राप्तिमत्त्वाच्छब्दस्य पदचतुष्टयादि सर्वमुपपद्यत एव । व्याप्तिमत्वादित्यनेनैव इतरेतरोपदेशः प्रत्युक्तः । शास्त्रकृतो योगश्च ।

1. Aluminiam.
2. Oak.
३. चीड़ ।
४. कांच ।
५. रबर ।
६. अयं विषयोऽग्रे "तपरस्तत्कालस्य" इति पाणिनीयसूत्रं समुद्धृत्य प्रतिपादितः ।
७. निरुक्त नैघण्टुके १।१।२ ।
८. छज्जूरामशास्त्रिणामिदं व्याख्यानम् ।

अत्रापि वक्त्रोच्चरितस्यैव वर्णस्य श्रोतृभिर्ग्रहणं प्रतीयते। किञ्च महाभाष्यकारो भगवान् पतञ्जलिरपि अभिव्यक्तिस्थानाभिव्यक्तस्यैव ध्वनेर्देशान्तरे पर्यटनं स्वीचकार। उक्तञ्च "तपरस्तत्कालस्य" (१।१।७०) इति सूत्रस्य **भाष्ये**–"एवं तर्हि स्फोटः शब्दः, ध्वनिः शब्दगुणः" इति। अस्य भाष्यस्य भाष्यकार एवं व्याख्यानं चकार, येन एकस्यैव ध्वनेः सर्वत्र सञ्चारः प्रतीयते। तद्यथा—

"भेर्याघातवत्[1]" तद्यथा भेर्याघातो भेरीमाहत्य कश्चिद् विंशतिः पदानि गच्छति, कश्चित् त्रिंशत्, कश्चिच्चत्वारिंशत्। स्फोटस्तावानेव भवति, ध्वनिकृता वृद्धिः। इति। कश्चिदिति ध्वनेर्विशेषणीभूतं सर्वनाम, कश्चिद् ध्वनिः विंशतिः पदानि कश्चिच्चत्वारिंशत् पदानि गच्छतीत्यर्थः। भेरीशब्दस्तु एक एव। यस्य भेरीशब्दस्य ध्वनिर्विंशतिपदानि, तस्यैव शब्दस्य ध्वनिश्चत्वारिंशत् पदानि गच्छतीति तयोर्नास्ति भेदः। एकस्यैव स्फोटात्मकस्य भेरीशब्दस्य ध्वनेर्विभिन्ना गतिः द्रुतादिवृत्त्या भिद्यते। द्रुतगत्या आहतायां तज्जन्यो ध्वनिर्दूरतमम्, मध्यमगत्या आहतायां दूरतरम्, विलम्बितगत्या च आहतायां दूरं गच्छति। एवं द्रुतवृत्त्योच्चारिते सति एकमात्रिकोऽकारः श्रोतृदेशं झटिति, मध्यमादिवृत्त्योच्चारिते तु विलम्बेन गच्छति। किन्तु सर्वास्ववस्थासु एकमात्रिक एव अकारः श्रूयते। एवं ध्वनिप्रेषककेन्द्रस्थानाद् प्रेषितो देशान्तरेषु ध्वनिग्राहकयन्त्रैः[2] स एव एकमात्रिकोऽकारः श्रूयते यो ध्वनिप्रेषककेन्द्रस्थानात्[3] ध्वनिप्रेषकयन्त्रेण प्रेष्यते। केन्द्रस्थानात् एकमात्रिकेऽकारे प्रेषिते सति देशान्तरेषु यन्त्रद्वारा द्विमात्रिकरूपेण यद्वा अर्धमात्रिकरूपेण अभिव्यक्तिर्न दृश्यते, किन्तु मात्रिकप्रकृतिकस्यैव अकारस्य। केवलं ध्वनेर्गतेस्तीव्रता, स्थूलता, सूक्ष्मता च इत्यादयोऽवस्था अनुभूयन्ते। परन्तु सर्वास्ववस्थासु मात्रिक एव अकारः। एतदेव स्पष्टयति भाष्यकारो भगवान् पतञ्जलिः "तपरस्तत्कालस्य" (१।१।७०) इति सूत्रे—

ध्वनिः स्फोटश्च शब्दानां ध्वनिस्तु खलु लक्ष्यते।
अल्पो महाँश्च केषाञ्चिदुभयं तत्स्वभावतः॥ इति।

अत्र ध्वनिशब्देन द्रुतादिवृत्तिविशिष्टा वैकृतध्वनयः, स्फोटशब्देन च अकाराद्यात्मको यद्वा अकारादिप्रकृतिकः शब्दो गृह्यते। "कस्यचिदकारस्य ध्वनिरल्पः, कस्यचिच्च महान् श्रूयते" इति तु वक्तुरुच्चारणशक्तिभेदाद् भेदः। परन्तु सर्वास्ववस्थासु अकाराद्यात्मकः स्फोटः सर्वत्र स्वस्वरूपेणैव श्रूयते।

किञ्च, शब्दानित्यत्वपक्षेऽपि भाष्यकार एकस्यैव ध्वनेः देशान्तरेषु श्रुतिं **कण्ठरवेण** प्रोक्तवान्। तद्यथा **महाभाष्यस्य** प्रत्याहाराह्निके अ इ उ ण् ॥१॥

---

१. वार्त्तिकमिदम्।
2. **By The receiver or radio.**
3. **From the Radio Station.**

इति सूत्रे—"शकुनिवत् स्युः", "तद्यथा शकुनय आशुगामित्वात् पुरस्तादुत्पतिताः पश्चाद् दृश्यन्ते, एवमकारो द' इत्यत्र दृष्टः 'ण्ड' इत्यत्र दृश्यते" इत्युक्तम्।

अत्र **भाष्ये** शकुनिदृष्टान्तेन वक्तृमुखादभिव्यक्तस्यैव शब्दस्य देशान्तरेषु श्रुतिः, न तु शब्दजशब्दस्य।

किञ्च नैयायिकमतेऽपि अकारादिवर्णानां द्रुतवृत्त्योच्चारणे सति, द्रुतगत्या मध्यमवृत्त्या समुच्चारिते सति मध्यमगत्या, विलम्बितवृत्त्या समुच्चारणे विलम्बेन पूर्वपूर्वशब्देभ्य उत्तरोत्तरशब्दानामुत्पत्तिः स्यात्। मध्यमवृत्त्या अकारादेरुच्चारणे विपलकालः[1] परिसमाप्यते। पूर्वोच्चरितः शब्दो यदा स्वोत्तरशब्दमुत्पाद्य विनश्यति तदा द्वितीयः क्षणः परिसमाप्यते, पुनश्च तृतीयक्षणे नाशं प्राप्नोति। एवं विंशतिः पदानि यद्वा त्रिंशत्पदानि, किं बहुना, विंशति पदानि तु अन्यदेकपदमपि गन्तुं महास्त्रिणेमिर्लंगिष्यति। यतो हि प्रथमोत्पन्नः यद्वा शब्दाच्छब्दोत्पन्नः शब्दः आकाशस्य कियत्स्थानमावृत्य तिष्ठतीति तु न निश्चीयते। न हि शब्दः काष्ठादिवच्चाक्षुषं द्रव्यं यत् परिमापकेन परिमीय वक्तुं शक्येत—'अयं शब्द इयान् आयताकारः, इयन्तञ्च आकाशदेशमावृत्य तिष्ठति" इति।

यद्युच्यते – प्रथमोत्पन्नः शब्दः आकाशस्य षडंगुलं व्याप्य तिष्ठति; तर्हि मुखोच्चरित एव, न तु शब्दजशब्दो वक्त्रा श्रूयते, मुखात् षडंगुलदूरे श्रोत्रस्य सत्त्वात्। परन्तु यत्रान्यः श्रोता, वक्ता च अन्यः, तत्र तु ध्वनिश्रवणे वृहत्कालो हास्यति। एवमस्यामप्यवस्थायां महान् दोषः।

यद्युच्यते—प्रथमोत्पन्नः शब्दः कर्णशष्कुल्यवच्छिन्नाकाशपरिमितं स्थानमावृत्य तिष्ठति, कर्णशष्कुल्यवच्छिन्नाकाशे तस्य श्रवणात्; तर्हि एवमपि श्रोतृदेशपर्यन्तं ध्वनेरागमने महास्त्रिणेमिर्हास्यतीति पूर्वोक्त एव दोषः। स च दोषो दुरुद्धरः। प्रत्येकं वीचितरङ्गाः परिमातुं शक्यन्ते, तेषां परिमापकेन परिमेयत्वात्। परन्तु शब्द आकाशस्य कियद्देशं व्याप्य तिष्ठतीति वक्तुं दुर्भाव्यम्।

यद्युच्यते प्रथमाविभक्तः शब्दः सर्वमाकाशदेशं व्याप्य तिष्ठति, तर्हि "वक्त्रोच्चरितः शब्द एव श्रोत्रा श्रूयते" इति भाष्यसम्मतं मन्मतमेव दृढतां भजति। एकस्मिन्देशे समभिव्यक्तः शब्दः सर्वमाकाशं व्याप्य तिष्ठति। अतो दिव्यश्रोत्रेण रसातलेऽपि, यद्वा यत्र कुत्रापि समभिव्यज्यते, स श्रूयते।

एवं भौतिकानां निकाये विभिन्नध्वनिवेगस्य अत्र च 'तपरस्तत्कालस्य' इति पाणिनीयसूत्रस्थमहाभाष्यस्य च समीक्षया "अभिव्यक्तिस्थानाद् अभिव्यक्तः शब्द एवं श्रोतृदेशं पर्यटति" इति दृढीभवति। "वक्त्रोच्चरित एव ध्वनिः श्रूयते" इत्यस्मिन्नंशे भौतिकवैयाकरणयोस्सामञ्जस्यम्, किन्तु श्रोत्रावच्छिन्ने आकाशे यो नादः कर्णपिधानेन श्रूयते स इतरशब्दवदाघातजन्यो न, किन्तु स्वत एव श्रोत्रावच्छिन्ने

---

१. विपलशब्देनात्र आधुनिकसेकेण्डनाम्ना व्यवहृतः कालो ग्रहीतव्यः।

आकाशेऽभिव्यज्यते । अत एव सोऽनाहत उच्यते । लौकिकोपायम् ऋतेऽपि शब्दाभिव्यक्तिरिति भारतीयं व्याकरणदर्शनं भौतिकापेक्षया अतिरिच्यते । एतन्मतञ्च—

श्रृणोति य इमं स्फोटं सुप्ते श्रोत्रे शून्यदृग् ।
येन वाग्व्यज्यते यस्य व्यक्तिराकाश आत्मनः ॥
(श्रीमद्भागवतम्–१२।६।४०)

"हृद्याकाशादभून्नादो वृत्तिरौघाद् विभाव्यते" ।

इत्यादि प्रमाणानि पोषयन्ति । यस्याभिव्यक्तिराकाशदेशेऽभूत्, स वाय्वादि माध्यमं विनापि शून्ये सञ्चरितं प्रभवति[1] । अयं विषयोऽग्रे पुष्कलरूपेण प्रतिपादयिष्यते ।

परन्तु भौतिका वाय्वादिमाध्यमं विना ध्वनेः सञ्चारमसम्भवं स्वीकुर्वन्ति । यत्तु पूर्वं भौतिकमतानुसारेण शब्दस्याकाशदेशत्वं साधितम्, तत्तु तेषां वाक्यैर्ध्वन्यते, एतैः कण्ठरवेण शब्दस्याकाशदेशत्वं न क्वाप्युक्तम् । पृथ्वीजलतेजोवायुविद्युद् (ईथर), इत्यैतत्सर्वं ध्वनिसञ्चारस्य माध्यममंगीकुर्वन्ति । समुत्पन्नः शब्दो वाय्वादिमाध्यमस्य प्रत्येकं कणं परिकम्प्य, उत्तरोत्तरदेशं च स्पृशन् श्रोतृदेशं लभते । वायुध्वनिसञ्चारस्य व्यावहारिकं सार्वकालिकं माध्यमम्, ईथरविद्युच्चेति माध्यमद्वयं यान्त्रिकव्यवहार उपयुज्यते ।

ईथरनामकं तत्त्वं ध्वनिवेगस्य परमोत्कृष्टं माध्यमं भौतिका मन्यन्ते । भौतिकविदुषां[2] मतानुसारेण सर्वमपि ब्रह्माण्डं प्रकाशनिर्मिततत्त्वेन कणशः परिपूर्णम् । तेषामयं सिद्धान्तः "अग्नीषोमात्मकमिदं जगद्" इत्युक्त्या अग्नेः प्रकाशस्वरूपत्वात् "सूर्य आत्मा जगतस्तस्थुषश्च" इति वैदिकप्रमाणेन स्थावरजङ्गमानां सूर्यमयत्वाद् वेदशास्त्राविरोधी एव प्रतिभाति । तेषां सम्प्रदाये इदमेव अग्नितत्त्वमीथरादिनाम्ना व्यपदिश्यते । तच्च तत्त्वं सर्वेषु पदार्थेषु अनन्तसीम्नि खे च सर्वत्र व्याप्तम् । अस्यान्वेषणं गणितविद्यायां, खगोलशास्त्रे, भौतिकशास्त्रे च निपुणो हालैण्डदेशवास्तव्यः क्रिश्चियन हाइजीन्स नामा कश्चिदाधुनिको विद्वान् कृतवान् ।

---

१. वस्तुतस्तु सर्वोऽपि शब्दो नभोवृत्तिस्तन्माध्यमेन श्रोतुं शक्यते ।

2. At the time when Marconi was a school boy, the important discovery was made that space in the universe is filled with alight substance called ether. This is made up of Particles so tiny that It can make it's way through all matter, liquid, solid or gas.
(Page No. 8) Peges of Prose for high School Classes
By P. S. Dustoor, Marconi and Wireless Telegraphy.

विद्युच्च[1] ईथरतत्त्वे सर्वतो दिक्षु तरंगं कम्पनं वा समुत्पादयितुं प्रभवतीति जर्मनदेशवास्तव्यो हर्टजाभिधोऽन्वेषणं कृतवान् । विद्युद्द्वारा ईथरतत्त्वे तरङ्गोत्पादनस्यानेन वैज्ञानिकेन अन्वेषणादेते तरङ्गा हर्टजनाम्ना वैज्ञानिकेषु प्रसिद्धिमागताः । इमे तरङ्गा निखिलभूमण्डलं निमेषपरिमिते काले अष्टवारं परिक्रमितुं प्रभवः । अतो ध्वनिरपि हर्टजतरङ्गमधिरुह्य भूमेः परितोऽष्टवारं सञ्चरितुं प्रभुः ।

ध्वनिप्रेषकयन्त्रद्वारा[2] विद्युन्माध्यमेन ध्वनिसञ्चारः[3]

आधुनिकमतानुसारेण जगति समेषां पदार्थानां सृष्टिस्त्रिभिस्तत्त्वैः स्वीक्रियते । अयं विषयः आधुनिकविज्ञानदृष्टया पराया वाचस्तत्त्वस्य निरूपणावसरे पूर्वमेव प्रतिपादितः । सर्वेषां पदार्थानां परमाणोरन्तःप्रदेशे तत्त्वद्वयम्— घनविद्युत्कणः, निर्विद्युत्कणश्च । ऋणविद्युतश्च परमाणोर्बहिः प्रदेशं सततं परिक्रामन्ति । प्रत्येकं पदार्थेषु ऋणविद्युत्कणाः समसंख्यया सन्निहिताः । अतः पदार्थेषु विघटनं न समुत्पद्यते । यद्यपि ऋणविद्युत्कणाः सततं स्वकेन्द्रमभितो गतिमन्तस्तथापि सामान्यावस्थायां तेषु वैद्युतः कोऽपि प्रभावो न स्फुटति । रासायनिकप्रक्रियया यदा ऋणविद्युत्कणेषु विशेषावस्था (कम्पनादिकम्) समुत्पाद्यते तदा विद्युद्धारा सर्वतो दिक्षु प्रवहति ।

यथा सरोवरजले यावता वेगेन प्रस्तरखण्डः प्रक्षिप्यते, तावता वेगेन तरङ्गाः समुत्पद्यन्ते । एवं रासायनिकप्रक्रियाद्वारा द्रुतमध्यमविलम्बितगत्या ऋणविद्युत्कणेषु आघाते सति द्रुतादिगतिमन्तो विद्युत्तरङ्गाः समुत्पाद्यन्ते । विद्युत्तरङ्गमधिरुह्य एक एव ध्वनिः "शकुनिवत्" इति भाष्योक्तरीत्या भ्राम्यते । यद्वा स्थालीरेखाश्रिताङ्गुलिन्यायेन सर्वतो दिक्षु प्रसरति । यद्वा यथा वेगेन भ्रामन्तीं जलभ्रमिमधिरूढं शुष्कं शष्पं चतुर्दिक्षु झटिति भ्राम्यति । त्वरया गत्या भ्रमणाच्च कस्यां दिशि कदा समागतमिति क्लेशेन ज्ञायते । यस्मिन् काले ज्ञायते तृणं पूर्वस्यां दिशि तदव्यवहितोत्तरकाल एव झटिति दक्षिणदिशं प्राप्नुवद् दृश्यते । एवं विद्युत्प्रवाहमधिरुह्य वक्त्रोच्चरितो ध्वनिः सर्वतो दिक्षु पर्यटति । एवं वक्त्रोच्चरित एक एव शब्दः सर्वत्र कथं पर्यटतीति शङ्कावसरो न देयः, शकुन्यादिदृष्टान्तेन समाधानात् ।

क्वचित्तु[4] भौतिकैर्ध्वनिसञ्चारमाध्यमस्य स्थानान्तरणमपि प्रतिपाद्यते ।

---

1. See Pages of prose for High School—Marconi and wireless telegraphy.

2. By The Transmiter.

3. Broadcastlng.

४. प्रेषित (ट्रांसमीटर) का कार्य रे० फ्री० लहरें उत्पन्न करना व इन्हें कार्यक्रम के अनुरूप समन्वित करके पर्याप्त शक्ति पर प्रसारित करना है । प्रेषित का कार्य इस

तद्यथाऽत्रैव प्रतिपाद्यमानस्य विद्युन्माध्यमस्य। इदमपि मतं वैयाकरण सह सम्मतम्। मूलाधारात् समुत्थितेन नाभ्यादिस्थानं प्राप्नुवता वायुना पराया वाचो नाभिहृत्कण्ठ-तालवादिस्थानेषु प्रापणविधेः प्रतिपादनात्। यथा शरीरान्तःप्रदेशे गतिमान् मूला-धारस्थो वायुः सूक्ष्मां वाचं कण्ठादिस्थानं प्रापयति, एवं प्रवहमाणा विद्युद्धारा अपि मुखोद्गीर्णां वाचं देशान्तरं प्रापयति, या ध्वनिग्राहकयन्त्रैः सर्वत्र श्रूयते। विद्युद्धारा अपि शून्याकाशे निराधारं सञ्चरितुमनर्हा। अतस्तस्याधारमीथरतत्त्वं कल्पितवन्तः। यच्च ईथरतत्त्वं सर्वत्र व्याप्तम्—इत्येतत्सर्वं पूर्वमेव निरूपितम्।

रासायनिकक्रियया यद्वा विद्युच्चुम्बकीयोपपादनक्रियया समुत्पन्नेन विद्यु-द्ग्राहकबलेन[1] विद्युद्धारा सर्वतः प्रसरति। न च विद्युति प्रवहमाणायां रात्रौ सर्वतः प्रकाशः स्यादिति वाच्यम्? विद्युदूर्जायाः (ऊर्जसः) प्रकाशरूपेण परिवर्तनाभावात्। यदा काचनिर्मितकुतुपे[2] धातुनिर्मितसूक्ष्मतन्तुना सह[3] विद्युतः सम्पर्कः, तदनन्तरमेव तस्याः प्रकाशरूपेण परिवर्तनात्।

यद्यपि सर्वेषां पदार्थानां परमाणवो बहिर्भागत ऋणविद्युताऽविष्टाः किन्तु परिचालकपदार्थेभ्य एव निःसृत्य सर्वतः प्रसर्तुमर्हाः। कस्यचिदपि परिचालक-शक्तियुतस्य पदार्थस्य शिरोभागे विद्युद्ग्राहकबलस्य प्रयोगेण तस्माद् विद्युद्धा-रायाः परिवहनं प्रारभ्यते। परिचालकपदार्थो यथा रजतधातु,[4] ताम्रकम्[5] इत्यादि। ताम्रकाख्यो धातुस्तु सम्यक्प्रकारेण विद्युत्कणान् निर्मोक्तुमर्हः। अत एव तान्त्रिके प्रयोगे मारणमोहनादिशक्तियुतं हनुमदादियन्त्रं ताम्रफलके निर्माय तत् पूज्यते। यथाकामं यन्त्रे पूजिते सति सर्वमीप्सितं पूर्णतां भजति। किञ्च भूर्जादिपत्रे कामप्र-पूरकान् विविधमन्त्रान् समुल्लिख्य ताम्रनिर्मितयन्त्रे (पुटके) सम्पुटीकृत्य कण्ठाद्य-ङ्गेषु धार्यते। अत्र को हेतुः? अस्येदमेव कारणं संस्कृतताम्रफलकं विद्युद्-धारां प्रमुञ्चति, तन्माध्यमेन च मन्त्र ईप्सितवस्तुदेशम् प्राप्य मनोऽभिलषित-मानीय कामं पूरयति। अतस्ताम्रधातुर्विद्युद्धारां प्रमोक्तुमर्हतीत्यस्य गवेषणा आधुनिकविज्ञानस्य प्रारम्भादतीव पूर्वं भारतीयैर्महर्षिभिः कृता। भारतीयानां कृते नेदं किमप्यभूतपूर्वमनुसन्धानम्।

तथ्य पर आधारित है कि रेडियो फ्रीक्वेंसी लहरें आकाश में विद्युच्चुम्बकीय Elecıro Magnative लहरों के रूप में अत्यन्त तीव्र गति (१८६००० मील) प्रतिसेकेण्ड से चारों ओर फैलती है।" रमेशचन्द्र विजय—रेडियो सर्विसिग, (पृ० सं० ४) एतैर्वाक्यैर्ध्वनिमाध्यमस्य स्थानान्तरणं सूच्यते।

1. of thc Electrometive force
2. Aluminiam
3. In to the bulb.
4. With the Filament.
5. Copper.

येभ्यो धातुभ्यो विद्युत् प्रमुच्यते, यद्वा विद्युतः सञ्चारस्ते धातवः परिचा-लकनाम्ना, एतद्गुणविपरीताश्च अपरिचालकनाम्नाऽभिधीयन्ते। अपरिचालको धातुर्यथा—अभ्रकमित्यादि। परन्तु विद्युद्धारायाः प्रसारणे द्वावपि पदार्थौ प्रयुज्येते। परिचालकपदार्थेभ्यो विद्युद्धारा प्रमुच्यते, अपरिचालकेन च तस्या नियन्त्रणं क्रियते। केचित्तु पदार्था उभयात्मका (परिचालकापरिचालकोभयात्मकाः) तैश्च परिवर्तनकर्तृयन्त्राणि[1] निर्मीयन्ते।

परिचालकपदार्थेभ्यो विद्युद्धारां समुत्पादयितुं बहवो विधयो विद्यन्ते। तेषां मध्ये कश्चिदेक उपायोऽधस्तात् प्रस्तूयते—

विद्युद्धारा द्विविधा—१ ऋजुः[2], २ वक्राकृतिका, यद्वा प्रत्यावर्तिरूपा[3]। अत्रोभयोरपि विद्युद्धारयोः समुत्पादनविधिर्यथाधीतं प्रदर्श्यते—ध्वनिप्रेषितृयन्त्रेषु[4] विद्युत्तरङ्गान् समुत्पादयितुं दर्पणनिर्मितं कुतुपं[5] निःशेषतया निर्वातं कृत्वा विद्यु-न्मोचको धातुनिर्मिततन्तुस्तत्र[6] निधीयते। दार्पणकुतपे च फलकं[7] संयुज्यते। अस्या-मवस्थायां यदा ऋजुधाराया[8] दार्पणकुतपस्थः सूक्ष्मस्तन्तुः[9] सन्ताप्यते, तदा तस्मा-त्तन्तोर्विद्युत्कणाः प्रमुच्यमानाः दृश्यन्ते। विद्युद्धारा च दार्पणकुतुपान्तःप्रदेशेऽभ्र-वत् प्रवहति। यदा सूक्ष्मतन्तुनिर्मुक्तैर्विद्युत्कणैः दार्पणकुप्पिकासंश्लिष्टफलकं सन्ताप्यते, तदा तस्मादपि ऋणविद्युत्कणाः प्रमुच्यन्ते, विद्युद्धारा च सर्वतः प्रवहति।

दार्पणकुतपान्तराले[10] ये विद्युत्स्फुलिङ्गाः प्रवहन्ति तेषां बहिर्निस्सरणा-भावात् तेभ्यो विद्युद्धारा सर्वतो न प्रवहति, किन्तु धातुनिर्मितात्, सूक्ष्मतन्तु-प्रमुक्तविद्युत्कणसन्तप्ताद् दार्पणकुप्पिकासंसक्तफलकात्[11] निःसृता ऋणविद्युत्-कणा एव ऋजुधारया सर्वतः प्रवहन्ति। सूक्ष्मतन्तुः[12] आवर्तिधाराविशिष्टविद्युता

---

1. Transistors.
2. Direct Current.
3. Alternating Current.
4. In to the Transmitter.
5. Valve.
6. Filament.
7. Plate.
8. By the D. C.
9. Filament.
10. In to the Valve.
11. From the Plate.
12. Fllament.

सन्ताप्यते। अतस्तस्मादणविद्युत्कणा अपि ऋजुधारया[1] एकस्यामेव दिशि प्रवहन्ति। यदि सूक्ष्मतन्तुः प्रत्यावर्तिधारया[2] सन्ताप्यते, तदा वक्रमार्गेण प्रत्यावर्तिधारया वा सर्वतो दिक्षु विद्युत्तरङ्गा प्रवहन्ति। यादृश्या विद्युता सूक्ष्मस्तन्तुः[3] सन्ताप्यते तादृश्येव विद्युद्धारा तस्मान्निःसरतीति संक्षेपतः समवगन्तव्यम्। किन्तु प्रत्यावर्तिधारां[4] समुत्पादयितुं सूक्ष्मतन्तुमभितो[5] निर्द्वारः[6] संश्लिष्यते, यो बहुभिर् ऋणविद्युत्कणप्रमोचकधातुभिः संयुज्यते। एतद्विना प्रत्यावर्तिधारा समुत्पादयितुमशक्या। इमे च तरङ्गा विद्युच्चुम्बकीयतरङ्ग[7]नाम्नाऽभिधीयन्ते। ये च प्रतित्रिपलं १८६००० क्रोशार्धं सर्वतः प्रसरन्ति।

विद्युच्चुम्बकीयतरङ्गोत्पादनं वायवीयद्वारा[8] अपि सम्पाद्यते। इमांस्तरङ्गान् समुत्पादयितुं वायवीयमत्युच्चैः संस्थाप्यते। वायवीयस्य विद्युन्मोचकम् एकं फलकम्[9] बहिःप्रदेशे अत्यूर्ध्वम् अपरञ्च फलकं पृथिव्यां सन्निधीयते। उभयोः फलकयोः सम्पर्कः संस्वरेण चौम्बिकक्षेत्रे परिभ्रामिकुण्डलेन[10] क्रियते। तस्यैको भागोऽत्युत्थितं फलकम्, अपरश्च भागो भूमौ सन्निहितं फलकं स्पृशति। यदा वायवीयस्योभयोः फलकयोः सम्पर्कः क्रियते तदा वायवीयपृथ्व्योर्मध्ये परिकम्पनं[11] समुत्पद्यते, तेन विद्युद्धारायाः समुत्पत्तिर्जायते। इमाश्च विद्युद्धारास्तरङ्गरूपेण सर्वतः प्रसरन्ति।

---

1. By the Direct current.
2. By the Alternative current.
3. Filament.
4. Alternatlving current,
5. All round the Filament.
6. Cathode.
7. Electro Magnetic,
   "तीव्रे गरम किये जाने वाले कैथोड फिलामेण्ट कहलाते हैं।·········इनमें से अधिक वोल्टताओं पर कार्य करने वाले वाल्वों में जिनका उपयोग प्रेषित्रों (प्रेषकों) ट्रान्समीटर में किया जाता है। फिलामेण्ट शुद्धटंगस्टन अथवा थोरियम मिले हुए टंगस्टन के बनाये जाते हैं।"—रमेशचन्द्र विजय–रेडियो सर्विसिंग (पृ० सं० २१, २२)। अत्र स्पष्टतया प्रेषितृयन्त्रेषु दार्पणकुतुपविधिना (वाल्वजविधिना) विद्युत्समुत्पादनं ज्ञायते। दार्पणकुतुपविधिना (वाल्वजविधिना) ध्वनिप्रेषितृयन्त्रेषु विद्युत्तरंगान् समुत्पादयन्ति।
8. By the Areal.
9. Plate.
10. By tunning coil.
11. Ocillation.

विद्युद्धारां समुत्पादयितुमन्येऽपि बहव उपाया विद्यन्ते, अप्रसङ्गात् सर्वेषामुल्लेखो अत्रासम्भाव्यः। यावता प्रयोजनम् तावत् प्रतिपादितम्।

प्रत्येकं ध्वनिप्रेषककेन्द्राद् विभिन्ना विद्युत्तरङ्गाः प्रसार्यन्ते। अतएव प्रत्येकं सम्वादविसम्वादप्रेषककेन्द्रस्य समाचाराः सुस्पष्टतया श्रूयन्ते। अन्यथा सर्वेभ्यः केन्द्रेभ्यः प्रेषितानां विद्युत्तरङ्गाणामपृथक्त्वे प्रेषिताः सङ्गीतादयो ध्वनिग्राहकयन्त्रे[1] सुस्पष्टतया श्रोतुमशक्याः, परस्परं कलहायमानानां शिशूनामिव शब्दाश्च श्रोष्यन्ते।

प्रसारयिष्यमाणाः सम्वादविसम्वादाः समाचारा वा सूक्ष्मध्वनिग्राहक[2]-यन्त्रस्य पुरःसरसि उच्चार्यन्ते। अस्मिन् यन्त्रे ध्वनिगतिर्विद्युद्गतिरूपेण परिवर्त्यते। ध्वन्यूर्जोमिश्रितो[3] विद्युत्तरङ्गो ध्वनिवर्धकयन्त्रेण सम्बर्धितः सन् ध्वनिग्राहकयन्त्रस्य[4] तरङ्गेण समन्वितो भूत्वा[5] वायवीयं प्रविशति। स च विद्युच्चुम्बकीयतरङ्गरूपेण सम्मिश्र्य सर्वतः प्रसारयति। ध्वन्यूर्जोमिश्रिता[6] इमे विद्युच्चुम्बकीयतरङ्गा[7] ध्वनिग्राहकयन्त्रेण प्रगृह्य ध्वनिरूपेण परिवर्त्यन्ते।

ध्वनिग्राहकयन्त्रस्य चतुरङ्गानि विद्यन्ते—

१. वाञ्छितकेन्द्रस्य चायकः[8], २. केन्द्रस्य शक्तिवर्धकः, ३. विद्युद्ध्वनितरङ्गयोः पृथक्कर्ता[9], ४. ध्वनिवर्धकः[10]।

विभिन्नकेन्द्रस्थानात् प्रेषिताः विद्युच्चुम्बकीयतरङ्गाः ध्वनिग्राहकयन्त्रमेककालावच्छेदेनाभिरतन्ति। "यस्मात् केन्द्रात् प्रेषितः समाचारः श्रोतुमभिलष्यते, तस्मात् केन्द्रादेव प्रसारिता ध्वनिमिश्रिताः विद्युच्चुम्बकीयतरङ्ग-ध्वनिग्राहकयन्त्रं प्रविशन्तु नान्यैः'—इतीदं कार्यं केन्द्रचायकेन[11] क्रियते। तस्य

---

1. In to the Receiving instrument or Radio.
2. Before the Mycrofon.
3. रमेशचन्द्रविजयकृतस्य 'रेडियो सर्विसिंग' इति ग्रन्थस्य चतुर्थपृष्ठे यल्लिखितं तदनुसृत्य व्याख्यायमानमिदं सर्वम्।
4. With the Radio frequency.
5. Modulated.
6. Arial.
7. Electro Magnetic.
8. Selector.
9. Detector.
10. Loud speaker.
11. By the tune, seleeter.

शक्तिवर्द्धनं विद्युत्तरङ्गेभ्यो ध्वनेः पृथक्करणम्, यथा तितउना तुषाद्यपनीयते, तथैव विद्युत्तरङ्गेभ्यो ध्वनेः पार्थक्यं पृथक्कर्तृयन्त्रेण[1] क्रियते । यथा सर्वतो दिक्षु कश्चिद्धावकजनो बहुषु दर्पणेषु क्रमशोऽभिव्यज्यते, तथैव विद्युद्धारामाध्यमेन परिधावन्तो ध्वनयो ध्वनिग्राहकयन्त्रेष्वभिव्यज्यन्ते, श्रोतृभिश्च श्रूयन्ते । न च सर्वव्यापकस्य शब्दस्य चलनादिक्रिया न युज्यते, तस्य सर्वत्र व्यापकत्वात्, तच्छून्यस्थानस्याभावाद्, यद्वा नित्यत्वादिति वाच्यम् ? कूटस्थस्य ब्रह्मणोऽपि तथा दर्शनात् । यथा सर्वत्र व्याप्तं कूटस्थं ब्रह्म क्वचिन्मनुष्यादिरूपेणाऽभिव्यक्तं क्वचिच्चानभिव्यक्तं दृश्यते; तथैव कादिवर्णानामपि विषये बोध्यम् ।

अत्रेदमवधेयम् – ध्वनिर्विद्युदूर्जोरूपेण कदापि न परिवर्तते इति । यथा दुग्धजलयोर्मिश्रणे सति तादात्म्याज्जलमपि दुग्धरूपेण परिणतमिव दृश्यते । परन्तु दुग्धेन मिश्रितमपि जलं दुग्धं न भवति । उभयोर्मिश्रितावस्थायामपि सत्ता स्थीयते । अत एव यन्त्रद्वारा नीरक्षीरविवेचनं क्रियते । तथैव ध्वनिविद्युतोः परस्परं मिश्रणे सति तादात्म्याद् ध्वनिरपि विद्युद्रूपेण परिवर्तित इव प्रतीयते । तादात्म्यश्च तद्भिन्नत्वे सति तदभेदेन प्रतीयमानत्वम् । उभयोर्मिश्रितावस्थायां विद्युद्भिन्नोऽपि ध्वनिर्विद्युदात्मनाऽऽभिन्नः प्रतीयते । एतच्च तादात्म्यमादाय एव आधुनिकैर्भौतिकैः ध्वन्यूर्जाया (ऊर्जसो) विद्युदूर्जोरूपेण परिवर्तनं निष्पाद्यते । परम् उभयोर्मिश्रितावस्थायामपि स्वसत्ताऽवशिष्यते । अत एव पृथक्कर्तृयन्त्रेण[2] विद्युतो ध्वनिः पृथक् क्रियते ।

यद्वा भवतु नाम ध्वनेर्विद्युद्रूपेण परिणामः । इदमपि मतं व्याकरणशास्त्राविरुद्धम् । एतच्च "स मनोभावमापद्य तेजसा पाकमागतः" इति भर्तृहरिकारिकां वर्णाभिव्यक्तिप्रक्रियायां व्याख्यास्यन् प्रतिपादयिष्यते, परन्तु सिद्धान्ते तु पूर्वोक्तमेव वचनं दृढीभवति ।

विद्युद्द्वारा ध्वनिः स्थानात् स्थानान्तरं गच्छतीति तु एतद्देशप्रसूता ऋषय ऋत्विजश्च अनुसन्दधति स्म । आधुनिकैर्भूलोके या विद्युन्निर्मीयते, या च विद्युत् खे प्रकाशे, ताः सर्वा अग्नेरेव भेदाः । कश्चिद् याजको यज्ञाग्निं दूतरूपेण देवानां पार्श्वे गन्तुं प्रार्थयति यद् हे अग्ने, त्वं दूतो भूत्वा देवान् गच्छ, तांश्च आहूय अस्माकं यज्ञे समानय । तथा चोक्तम् —

"त्वं[3] दूतो अमर्त्या आवहा दैव्यं जनम् । शृण्वन् विप्रस्य सुष्टुतिम्" ।

"अमर्त्योऽमरधर्मास्त्वं दूतो भूत्वा दैव्यं देवसम्बन्धिनञ्जनमावह । अस्मद्यज्ञे आनय । किं कुर्वन् ? विप्रस्य मेधाविनो भरद्वाजस्य सुष्टुतिं शोभनां स्तुतिं

1. By the detecter.
2. By The Detecter.
३. ऋग्वेद मण्डलः ६, सूक्तम् १६, मन्त्रः १० ।

शृण्वन्" इत्येवं सायणाचार्यो व्याख्यातवान् । अस्मिन् मन्त्रे दूरदेशेषु विद्युद्द्वारा समाचारप्रेषणस्य संकेतः सुस्पष्टतया समुपलभ्यते ।

पातञ्जलयोगदर्शनदिशा अत्र विषये सांख्यमतसमन्वितो विचारः

भौतिकशास्त्रसमन्वितमिदमाविष्कृतं तथ्यमतीव रमणीयम्; परन्तु ध्वनिराकाशगुणतया, यद्वा आकाशदेशाश्रयत्वात् पृथ्वी-जल-विद्युदादि माध्यमं विनापि केवलमाकाशमाध्यमेनैव देशाद् देशान्तरं गन्तुं प्रभवति । पूर्वोक्तो[1] वैज्ञानिकः प्रयोगः सम्यक्तया निरीक्षणीयः । यथा लौहनिर्मितं कपालद्वयं परस्परं संश्लिष्य वायुचूषकयन्त्रेण निःशेषतया वायौ निःसारिते सति अतिशयेन संश्लिष्यते । बलपूर्वकं विकर्षणेऽपि कपालौ न वियुज्येते । एवं काचपात्रान्तर्गतो वायुर्यदा निर्वातकर्तृयन्त्रेण निःसार्यते, तदा काचपात्रं तेन यन्त्रेण सह अतिशयेन संश्लिष्यते, तेन काचपात्रावच्छिन्नस्य आकाशस्य बहिराकाशेन सह कोऽपि सम्बन्धो नावशिष्यते । अस्यामवस्थायां काचपात्रान्तर्गतमाकाशमतिशयेन परितोऽवरुद्धं सञ्जायते । आकाशस्यावरोधाद् बहिर्निःसर्तुमसम्भवाद् ध्वनिर्न श्रूयते, न तु निर्वातमात्रमत्र कारणं विद्यते । यदा पात्रे वाष्पं पूर्यते, तदा तस्य पात्रस्य निर्वातकर्तृयन्त्रेण सहातिशयसंश्लेषस्याभावः सञ्जायते, तेन तत्पात्रान्तर्गतस्याकाशस्य बाह्याकाशेन सह ऐक्यं निष्पद्यते, ध्वनिश्च श्रूयते ।

अत्रेममेव विषयं बुद्ध्याऽवधारयितुं द्वितीयं प्रमाणं समुपस्थाप्यते, येनास्मदुक्तस्य पुष्टिर्भविष्यति । कपाटं गवाक्षं च इत्युभयमपि पिधाय यदा स्वप्रकोष्ठे तिष्ठामः, तदा प्रकोष्ठाद् बहिर्देशे केनचिद् यदि ध्वनिः क्रियते, तर्हि न श्रूयते । यद्वा मन्दं मन्दमेवानुश्रूयते । अत्र विचार्यताम्—को हेतुः ? पिहितप्रकोष्ठे वायुरपि विद्यते ? अत्र विचार्यमाणे सति मदुक्तवचनस्यैव पुष्टिर्जायते । कपाटगवाक्षेत्युभयोः पिधानात् कोष्ठान्तर्गताकाशस्य बहिराकाशेन सह विभागः अतिशयेन च परितोऽवरोधः सञ्जायते, येन बहिर्देशे ध्वनिर्न श्रूयते । यदा च गवाक्षः कपाटञ्चेत्युभयमपि उद्घाट्यते, तदा कोष्ठान्तर्गताकाशस्य बहिराकाशेन सहैक्यं सम्पद्यते, ततो बहिर्देशावच्छिन्नवायोरपि कोष्ठान्तर्देशावच्छिन्नवायुना सहैक्यं सम्पद्यते । ध्वनिश्च स्पष्टतया श्रूयते । अतो वाय्वादिमाध्यमं विनाऽपि ध्वनिः स्थानान्तरं गन्तुं प्रभवतीत्येव सिद्धान्तः प्रकर्तव्यः । ध्वनेराकाशमाध्यमेन श्रवणादेव भगवता पतञ्जलिना **योगदर्शनस्य** विभूतिपादे—"श्रोत्राकाशयोः सम्बन्धसंयमाद् दिव्यं श्रोत्रम्" इत्युक्तम्, न तु श्रोत्रवाय्वादिसम्बन्धसंयमादिति ।

अत्र धारणा-ध्यान-समाधीत्येतत्त्रयस्य ध्येये वस्तुनि समुपस्थितिः संयमः । आकाशदेशे चित्तस्य बन्धनं यद्वा चित्तेन श्रोत्राकाशयोः सम्बन्धस्य चिन्तनमत्र[2]

१. २३ पृष्ठे प्रतिपादितः ।
२. देशबन्धश्चित्तस्य धारणा—पात० योग० अ० ३, सू० १ ।

धारणा, आकाशे तैलधारावदव्यवच्छिन्नरूपेण चित्तस्य प्रत्येकतानता ध्यानम्[1]। एवं सततं ध्यानद्वारा यदा केवलमाकाशमात्रस्याभासो जायते, नान्यस्य, तदा आकाशविषयकः समाधिः[2], श्रोत्राकाशयोः सम्बन्धस्य च साक्षात्कारः सञ्जायते। ततो निरवच्छिन्ने यद्वा केनचिदवरुद्धे आकाशे यत्र कुत्रापि शब्दोऽभिव्यज्येत, तत्सर्वं दिव्यश्रोत्रद्वारा शृणोति। अयं समाधिर्निर्वीज-निरोधसमाधिभ्यां भिन्नः सम्प्रज्ञातनाम्ना[3], यद्वा सबीजनाम्ना प्रोच्यते। सबीजे समाधौ त्विन्द्रियद्वारैव ज्ञानं जायते। अत एव "श्रोत्राकाशयोः सम्बन्धसंयमाद् दिव्यं श्रोत्रम्" (३) इति पातञ्जल**योगदर्शन**सूत्रे "दिव्यं श्रोत्रम्" इत्युक्तम्।

सबीजसमाधेर्लक्षणं भगवता पतञ्जलिना **योगसूत्रस्य** समाधिनामके प्रथमपादे प्रोक्तम्। तद् यथा—

"ता एव सबीजः समाधिः" (१।४६) इति। शब्दार्थज्ञानविकल्पसहिता समापत्तिः (समाधि-)चित्ते केवले ध्येयमात्रस्य ध्यानञ्चेत्येतत्सर्वं सम्भूय सवीजसमाधिनाम्ना व्यपदिश्यते।

किञ्च "यद् यद् उत्पत्तिमद् विक्रियमाणं वा तत्सर्वं सावयवं घटादिवद्" इत्यनुमानेन तामसादहङ्कारादाकाशस्योत्पत्तेः सत्त्वात् तदपि सावयवम्, "यत्सावयवं तत् परमाणुमद्, यथा पृथ्वी" इति युक्त्या आकाशस्य सावयवत्वात् तत् परमाणुमद् विद्यते। आकाशस्योत्पत्तिमत्त्वं श्रीमद्**भागवतस्य** द्वितीयस्कन्धे प्रोक्तम्। तद्यथा—

तामसादपि भूतादेर्विकुर्बाणाद् अभून्नभः।
तस्य मात्रा गुणः शब्दो लिङ्गं यद् द्रष्टृदृश्ययोः॥
(अध्याय ५, श्लोक २५)

क्वचित्तु शब्दतन्मात्रात उत्पत्तिरुक्ता। भवतु नाम पक्षद्वयेऽपि आकाशस्योत्पत्तिमत्त्वम्, उत्पत्तिमत्त्वाच्च परमाणुमत्त्वम् विक्रियमाणत्वञ्च, इमानि सर्वाणि

---

१. तत्र प्रत्यैकतानता ध्यानम्—पा० यो० द० अ० ३, सू० २।

२. तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः।
—पातञ्जलयोगदर्शनम् ३।३।

३. बितर्कविचारानन्दास्मितारूपानुगमात् सम्प्रज्ञातः।
—पातञ्जलयोगदर्शनम् १।१७,

"वितर्कः—चित्तस्यालम्बने स्थूल आभोगः सूक्ष्मो विचारः, आनन्दः = ह्लाद,: एकात्मिका सम्विद्–अस्मिता। तत्र प्रथमश्चतुष्टयानुगतः समाधिः सवितर्कः, द्वितीयो वितर्कविकलः सविचारः, तृतीयो विचारविकलः सानन्दः, चतुर्थस्तद्विकलोऽस्मितामात्र इति। एते सर्वे सालम्बना समाधयः" इत्येवं व्यासो भाष्यं चकार।

तस्मिन् सिद्धयन्ति। नभसि विक्रियमाणत्वक्रियायाः सत्त्वादेव तस्माद् वायोरुत्पत्तिरुक्ता[1]। तथा चोक्तं श्रीमद्**भागवतस्य** द्वितीयस्कन्धे पञ्चमाध्याये—

"नभसोऽथ विकुर्वाणादभूत् स्पर्शगुणोऽनिलः" इति।

स्वयं विकुर्वदाकाशतत्त्वम् अपरमप्युरुबलान्वितं वायुतत्त्वं विकरोति। अत एव वायो रूपतन्मात्रस्य तेजसः सृष्टिः। तथा चोक्तं श्रीमद्**भागवतस्य** तृतीयस्कन्धे पञ्चमाध्याये—

अनिलोऽपि विकुर्वाणो नभसोरुबलान्वितः।
ससर्ज रूपतन्मात्रं ज्योतिर्लोकस्य लोचनम्॥३३॥ इति।

अत्र पूर्वार्धस्य "ऊरुबलान्वितो नभसा विकुर्वाणोऽनिलोऽपि" इत्येवमन्वयः। एवमाकाशे क्रियाशक्तिरस्तीति विश्वसनीयं जायते।

भौतिकैरप्याकाशस्य[2] प्रसारणाकुञ्चने स्वीक्रियेते, प्रसारणाकुञ्चनयोः सत्त्वाच्च एतेषामपि मते तस्य सावयवत्वं परमाणुमत्त्वञ्च सिद्धयते। यथा पृथ्व्याः परमाणवः पार्थिवाः, जलस्य जलमयाः, तेजसस्तैजसाः, वायोश्च वायुमयाः परमाणवः; तथैव आकाशस्य आकाशमयाः परमाणवो विद्यन्ते। पृथ्व्यादिकठिनपदार्थेषु, जलादिद्रवात्मकेषु वस्तुषु च प्रवेष्टुमर्हत्वात् सर्वत्र व्याप्ताः, तन्माध्यमेन च सर्वत्र ध्वनिर्व्याप्नोति। ईथरतत्त्वस्य च प्रकाशमयत्वात्तस्य तेजसि अन्तर्भावः कर्तव्यः। यथा ध्वनिः पृथ्व्यादेः प्रत्येकं कणं परिकम्पयंस्तरङ्गरूपेण स्थानान्तरं व्रजति, एवम् आकाशस्य प्रत्येकं कणं प्रकम्पयँस्तन्माध्यमेन निर्वातं चन्द्रादिलोकं व्याप्नोति। परन्तु आकाशमाध्यमेन दूरात् समागतं ध्वनिं श्रोतुं धारणाध्यानसमाधिरूपसंयमद्वारा श्रोत्राकाशयोः सम्बन्धस्य साक्षात्कारः परमावश्यकः। यदैवास्या विद्याया अत्र ह्रासः प्रारब्धः, ततः प्रभृत्येव दूरध्वनिग्राहकयन्त्राणामन्वेषणं प्रारब्धम्।

अत्रेदं बोध्यम्– शब्दस्याकाशदेशाश्रयत्वात्, कर्णशष्कुल्यवच्छिन्नाकाशरूपेण श्रोत्रेन्द्रियेण च गृह्यमाणत्वाद् देशान्तरं गन्तुमाकाशं तस्य सर्वोत्तमं माध्यमं विद्यते। तन्माध्यमेन सूक्ष्मातिसूक्ष्मं शब्दं श्रोतुं शक्यते। अत एव श्रीमद्**भागवतस्य** दशमस्कन्धे प्रथमाध्याये—

गिरं समाधौ गगने समीरितां निशम्य वेधास्त्रिदशानुवाच ह।
गां पौरुषीं मे शृणुतामराः पुनर्विधीयतामाशु तथैव मा चिरम्॥ २१॥

---

१. श्रीमद्भागवतम्, स्कन्ध २, अध्याय ५।

२. इसलिये ऐसे आकाश का लगातार प्रसारण ही होता जाता है और आकुञ्चन बिल्कुल नहीं होता"—पृ० सं० ११७; मूललेखक—एलवर्ट आइष्टीन, अनुवादक—डा० देवीदास रघुनाथ मवालकर तथा डा० निहालकरण सेठी, आपेक्षिकता का अभिप्राय।

इत्यत्र "गगने समीरितां गिरम्" इत्युक्तम् । क्षीरपयोनिधेर्मध्ये यत्र कोऽपि गन्तुं न समर्थः । स्वयं ब्रह्माऽपि स्वोत्पत्तिभूतकञ्जस्य मूलमन्वेष्टुं तन्नालं गृहीत्वा जलमध्ये बहुकालं विचचार, किन्तु मनसेप्सितमनवाप्य ततो निवृत्तः तावति गम्भीरजले सहस्रफणशेषभोगपर्यङ्के स्थितेन भगवता गगने समीरितां "पुरैव पुंसावधृतो धराज्वरः" इत्यादि गिरमाकाशमाध्यमेन क्षीरपयोनिधेस्तीरे देवैः सह स्थितो ब्रह्मा श्रुतवान् । अन्ये च देवाः समाहितचित्तत्वाभावान्न श्रुतवन्तः ।

"गिरं समाधौ गगने" इत्यत्र समाधिपदेन सजीवस्यैव समाधेर्ग्रहणम्, न तु [1]निरोधनिर्वीजयोः[2] । तथा सति पुरुषसूक्तेन पुरुषस्योपस्थापनाऽसम्भवात् ।

एवमेव रावणभयत्रस्तैर्देवैः सह ब्रह्मा सावधानमनसा सर्वव्यापकं सकलशक्तिविशिष्टं ब्रह्म तुष्टाव । ततो ब्रह्मा देवाश्च "देवा मा भैषीः, युष्माकं रक्षणाय नृदेहं धरिष्ये" इत्येवं **गगनगिरं** श्रुतवन्तः । अत्र सर्वे देवाः समाहितचित्ता आसन्, अतस्तेऽपि तां गगने गिरं श्रुतवन्तः । अन्ये च प्राणिनः तां वाणीं न जानन्तिस्म; मनसः समाहितत्वाभावात् । दिव्यश्रोत्रत्वाभावाच्च ।

एवमेव नैमिषारण्ये शतरूपया सह मनुर्भगवन्तं प्रसादयितुं दुष्करं तपश्चकार । यदा सर्वं[3] शरीरं निर्गलितम्, अस्थिमात्रमवशिष्टम्, तदा "याचस्व मनसेप्सितम्" इत्येवं गगनगीः सञ्जाता । ताञ्च नभोगिरं केवलं मनुरेव तपोद्वारा समाहितत्वात् श्रोत्रद्वारा श्रुतवान्, नान्ये मुनयः । यतो हि ते कामपि याचनां न

---

१. **निरोधसमाधेर्लक्षणम्**—"विरामप्रत्ययाभ्यासपूर्वः संस्कारशेषोऽन्यः"
—(पात० यो० द० १/१८)
चित्तवृत्तेर्बाह्यविषयकारतान्निरोधः, केवलं पूर्वजन्मजातसंस्काराणामवशेषश्च निरोधसमाधिः प्रोच्यते ।

२. **निर्बीजसमाधेर्लक्षणं यथा**—तस्यापि निरोधे सर्वनिरोधान्निर्बीजः समाधिः—
(पात० यो० दर्श० १/५१)
चित्तेऽनेकजन्मकृतकर्मोत्पन्नसंस्काराणां निरोधे सति बाह्याभ्यन्तरसर्वविषयाणां निरोधान् निर्बीजनामकः कैवल्यनामकः समाधिर्लभ्यते ।

३. अस्थिमात्र होइ रहे सरीरा । तदपि मनाग मनहिं नहिं पीरा ॥
प्रभु सर्वग्य दास निज जानी । गति अनन्य तापस नृप रानी ॥
माँगु माँगु बरु भई नभबानी । परम गभीर कृपामृत सानी ॥
मृतक जियावनि गिरा सुहाई । श्रवण रन्ध्र होइ उर जब आई ॥
हृष्ट पुष्ट तनु भए सुहाये । मानहुं अबहिं भवन ते आये ॥
दो०—श्रवनसुधा सम वचन सुनि, पुलक प्रफुल्लित गात ।
बोले मनु करि दण्डवत्, प्रेम न हृदय समात ॥ १४५ ॥
—श्रीमद्गोस्वामितुलसीदासकृते श्रीरामचरितमानसे मनुशतरूपातपः ।

कृतवन्तः । एवमेव तपोद्वारा दिव्यचक्षुषो लाभात् सशतरूपो मनुरेव नीलमणिवत् श्यामं शरन्मयङ्कवदनं देवाधिदेवं धनुष्पाणिं ददर्श, नान्ये तत्रस्था मुनयः ।

तदित्थमत्र सर्वत्र गगनगिरः समुल्लेखस्य उपलब्धेः सत्त्वात् सूक्ष्मातिसूक्ष्मं शब्दं श्रोतुमाकाशं तस्य परमोत्कृष्टं माध्यममिति ज्ञायते । यथा अद्यतने युगे "आकाशमाध्यमेन (तत्स्थानापन्न ईथरतत्त्वस्य माध्यमेन) प्रेषितं ध्वनिमभीष्ट एव पुरुषः शृणोतु नान्यः"—इत्येतदर्थं कस्यचिद् यन्त्रस्यान्वेषणं मार्कोनीनामकेन विदुषा कृतम् । एवं पुरा कालेऽपि यः संयमद्वारा श्रोत्राकाशयोः सम्बन्धं साक्षात्कृतवान्, दिव्यं श्रोत्रञ्च लब्धवान्, स एव नभोगिरं दिव्यश्रोत्रेण, ग्रहीतुमर्हः, नान्यः ।

पृथ्व्यादिकं तु ध्वनिसञ्चारस्य गौणं माध्यमं विद्यते । आकाशवायुतेजोजलपृथ्वीति पञ्चानां मध्ये क्रमशः पूर्वस्मादुत्तरोत्तरस्य जायमानत्वात्तेषां शब्दस्पर्शरूपरसगन्धेति पञ्चानां मध्ये शब्दस्य स्पर्शगुणवति वायौ, शब्दस्पर्शयोश्च रूपवति तेजसि, शब्दस्पर्शरूपाणां रसगुणवति जले, शब्दादिचतुर्गुणानाञ्च गन्धवत्यां पृथ्व्यां सङ्क्रमो विद्यते । तथा चोक्तं श्रीमद्**भागवते** तृतीयस्कन्धे—

भूतानां नभआदीनां यद् यद् भव्यावरावरम् ।
तेषां परानुसंसर्गाद् यथासंख्यं गुणान् विदुः ॥
(अध्या० ५. श्लो० ३६)

अत आकाशाद् व्यतिरिक्तं वाय्वादिकं ध्वनिसञ्चारस्य गौणं माध्यमं स्वीक्रियते । वाय्वादीनां गौणमाध्यमत्वस्वीकारे हेतुश्च "शब्दो वाय्वादीनां गौणः, आकाशस्य च प्रधानो गुणः" इति वेदितव्यः । न च आकाशे सर्वत्र व्याप्ते सति सर्वतोऽवरुद्धे स्थाने समुद्भूतो ध्वनिराकाशमाध्यमेन कथं न श्रूयते ? इति वाच्यम्, विद्युता प्रसारितस्यापि ध्वनेः श्रोत्रेण प्रत्यक्षाभावात् । ध्वनिप्रेषककेन्द्रस्थानात् सर्वतो दिक्षु विद्युन्माध्यमेन प्रविसरन्तो ध्वनयोऽस्माकं श्रोत्रं प्रसरन्ति, परन्तु न श्रूयन्ते । तत्रैव विद्यमानेन ध्वनिग्राहकयन्त्रेण च अभिव्यज्यन्ते । अत्र को हेतुः ? सूक्ष्मातिसूक्ष्मं शब्दं श्रोतुमस्माकं श्रोत्रमसमर्थम्, अदिव्यत्वात् । किन्तु संयमद्वारा श्रोत्राकाशयोः सम्बन्धं प्रत्यक्षीकृत्य दिव्यं श्रोत्रं लब्धवान् स सूक्ष्मातिसूक्ष्मं ध्वनिं ग्रहीतुं समर्थः । स सर्वतोऽवरुद्धे यद्वा यत्र कुत्राऽपि समुद्भूतं ध्वनिं शृणोति । किञ्च, विद्युन्माध्यमेन सार्वत्रिको ध्वनिः श्रवणगोचरानर्हः; विद्युतः सर्वत्र सञ्चरणेऽनर्हत्वात् । अस्माकं महर्षिभिः केचिदेवं लोका गवेषिताः, यत्र सूर्यप्रकाशोऽपि प्रवेष्टुमप्रभुः । रासायनिकक्रियया समुत्पन्नाया विद्युतश्च कुतः सामर्थ्यम् ! ते च लोका यथा वाल्मीकीय**रामायणस्य** किष्किन्धाकाण्डे—

ततः परमगम्या स्याद् दिक्पूर्वा त्रिदशावृता ।
रहिता चन्द्रसूर्याभ्यामदृश्या तिमिरावृता ॥ ६३ ॥

इत्यत्र चत्वारिंशत् सर्गे,

तत्र सोमगिरिर्नाम मध्ये हेममयो महान् ।
इन्द्रलोकगता ये च ब्रह्मलोकगताश्च ये ॥ ५६ ॥

देवास्तं समवेक्षन्ते गिरिराजं दिवं गताः ।
स तु देशो विसूर्योऽपि तस्य भासा प्रकाशते ॥ ५७ ॥

इत्यत्र त्र्यधिकचत्वारिंशत्सर्गे च सूर्यप्रकाशानधिगतस्य लोकस्य निर्देशो विद्यते । तत्र कृत्रिमाया विद्युतः प्रवेशो दुष्करः । अतस्तन्माध्यमेन अस्माल्लोकात्तत्र देशे यद्वा तस्माद् देशाद् अत्र लोके ध्वनिसञ्चारोऽसम्भवः । किन्तु आकाशस्य सर्वव्यापकत्वात्तन्माध्यमेन सार्वत्रिकः शब्दः श्रवणार्ह इति पातञ्जल**योगदर्शनाज्** ज्ञायते । यः श्रोत्राकाशयोः सम्बन्धं संयमद्वारा साक्षात् कृतवान् स सकलं भुवनजन्यं शब्दं श्रोतुं प्रभुः । श्रोत्राकाशयोः सम्बन्धस्य संयन्ता न केवलं वर्तमानकालिकमेव सार्वत्रिकं ध्वनिं शृणोति, अपि तु अतीतकालिकमपि । यथा महर्षिवसिष्ठस्यातीतकालिकं ज्ञानं **रघुवंश**काव्यस्य प्रथमसर्गे प्रोक्तम्—

इति विज्ञापितो राज्ञा ध्यानस्तिमितलोचनः ।
भावितात्मा भुवो भर्तुरथैनं प्रत्यबोधयत् ॥

अत्र जितेन्द्रयो वसिष्ठो योगमार्गेण कामधेनुसमुच्चरितमतीतकालिकं खे विचरन्तं शापात्मकं ध्वनिं समाधौ श्रुत्वा तद्वाच्यार्थञ्च विज्ञाय दिलीपं निःसन्ततित्वकारणं प्रोवाच । "न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते" इति भर्तृहर्युक्त्या खे विचरतोऽतीतकालिकध्वनेः श्रवणेनैव निःसन्ततित्वकारणज्ञानं जातम् यद्विषये नूतना भौतिकवैज्ञानिका यतमानाः साफल्यं न प्राप्तास्तद्विषये प्राचीना महर्षयोऽतीव पूर्वं साफल्यं भेजुः ।

जगति केचिद् एवं **प्राणिनः** सन्ति, ये जलमाध्यमेन समागतं ध्वनिं श्रोत्रावच्छिन्नाकाशे गृह्णन्ति । तद्यथा जलजानां मध्ये मत्स्याः । केचित् प्राणिनां वायुमाध्यमेन समागतं ध्वनिं शृण्वन्ति यथा **स्थलचराः** । किञ्चिच्च यन्त्रं विद्युदाख्यतेजोमाध्यमेन ध्वनिं गृह्णाति, यथा आधुनिकं ध्वनिग्राहकं यन्त्रम्[1] । कश्चिच्च आकाशमाध्यमेन ध्वनिं शृणोति । यथा श्रोत्राकाशयोः सम्बन्धस्य संयन्तारो योगिनः । परन्तु आकाशस्य परानुसंसर्गाच्छब्दगुणत्वाच्च वाय्वाद्यवच्छिन्नं नभ एव तन्माध्यमम् । योगिनो निरवच्छिन्नेन यद्वा सावच्छिन्नेन नभोमाध्यमेन ध्वनेः सूक्ष्मातिसूक्ष्मं स्पन्दनं गृह्णन्ति । श्रोत्राकाशयोः सम्बन्धस्य संयमद्वाराऽतीव सूक्ष्मस्य ध्वनेर्ग्राहकं दिव्यं श्रोत्रं येन समुपलब्धम्, स दूरातिदूरस्थितान् कोष्ठकेऽववरुद्धांश्च ध्वनीन् श्रोतुमर्हति । यदा भविष्यति काले भौतिकशास्त्रस्य (ध्वनि-

1. Radio,

विज्ञानस्य) कश्चित् सुधीप्रवरः एवं मार्गमनुसन्धास्यति येन किञ्चित् साहाय्यं विना यत्र कुत्रापि समुद्भूतस्य ध्वनेर्ग्रहणं स्यात् । यद्वा, नभोवाणिप्रेषककेन्द्रस्थानम् अथवा तन्तुमाध्यमं[1] विनाऽपि यतः कुतश्चिदपि समागतो ध्वनिर्नभोवाणीग्राहकयन्त्रेण गृह्येत तदा नूतनस्य ध्वनिग्राहकयन्त्रस्य संयमद्वारा समुपलब्धेन दिव्यश्रोत्रेण सह कथञ्चित् साम्यं भविष्यति ।

वक्त्रा समुच्चरितः शब्दः श्रोत्रदेशं गतः सन् प्रवक्तुर्मनोगतं तात्पर्यमवबोधयति, नान्यथा । स च शब्दः श्रोतुः श्रोत्रदेशं कथं प्राप्नोतीत्ययं विषयो नूतनध्वनिविज्ञानप्रोक्तध्वनिसञ्चारविधिं प्रतिपादयन् न्यायव्याकरणदृष्टया च तस्य युक्तायुक्तत्वं समीक्षितम् ।

(वस्तुतस्तु आकाशस्यैकस्मिन् देशेऽभिव्यक्तः शब्दः सकृदेव निखिलब्रह्माण्डावच्छिन्ने आकाशेऽभिव्यज्येत, न तु आकाशस्यैकदेशे । ध्वनिसञ्चारः, ध्वनिः माध्यमेन पर्यटतीति तु लौकिको व्यवहारः । विद्युदादिकं ध्वनिग्राहकयन्त्रादिषु विप्रकृष्टदेशेऽभिव्यक्तस्य शब्दस्याभिव्यक्तिमात्रं विशदीकरोति । प्रथमोऽभिव्यक्तः शब्दः सर्वमाकाशं व्याप्य तिष्ठति । एतत्सर्वं "व्याप्तिमत्वात्तु शब्दस्य" इति नैरुक्तवचनद्वारा सुस्पष्टं कृतम् । न च सकृदभिव्यक्तस्य शब्दस्याकाशस्य सर्वदेशे व्यापकत्वात् सर्वत्र सर्वैस्तस्य श्रवणं कुतो न भवतीति, सर्वेषां श्रोत्रस्यादिव्यत्वात् । दिव्यश्रोत्रद्वारैव विप्रकृष्टदेशेऽभिव्यक्तस्य श्रवणं जायते, न तु अदिव्यश्रोत्रेण ।

वक्त्रोच्चारिताः श्रोत्रेन्द्रियजन्यज्ञानविषयीभूता हृद्गतभावावबोधनशक्तिविशिष्टा ध्वनिसमूहात्मकाः शब्दा मानवेष्वेव प्रयुज्यन्ते, नेतरेषु जन्तुषु ।)

भाषाविज्ञानदृष्टचा मनोविज्ञानदृष्टचा च शब्दस्वरूपम्

भाषाविज्ञानं[2] खलु मानवेषु पदार्थबोधनेच्छया व्यवहृतानां शब्दानामेव वैज्ञानिकीं व्याख्यां सम्पादयति । मानवेष्वेव च भाषात्मकशब्दस्य व्यवहारमामनति । मानवेषु व्यवह्रियमाणमर्थबोधकम् अथवा "प्रतीतपदार्थको लोके ध्वनिः

1. Wire.
2. "Linguistic theory is a mata theory dealing with the properties of linguistic description of natural language, In particular, linguistic theory is concerned with what ever such discriptions have in common with universals of linguistic discription."

   Jerry A, Fodor/Jerrold J. Katj—"The structure of language—reading in the philosophy of language PP. 19. "Language does not exist in a vacuum. Language is used in human society, for purposes of communication and hens has meaning"—Robert A, Hall J. R.
   Linguistic and your language, PP. 121.

शब्दः" इति पातञ्जलमहाभाष्ये पस्पशाह्निके यच्छब्दस्वरूपं व्याख्यातम्, तदेव शब्दस्य यथार्थं स्वरूपं स्वीकुर्वन्ति[१]। अर्थावबोधकशब्देषु ध्वनिसमूहमङ्गीकृत्य तं ध्वनिसमूहनिर्मितं मन्यन्ते। अकारादिवर्णांश्च ध्वनीत्यपरनाम्ना व्यवहरन्ति। भाषायाः संग्रथनम्, ध्वनिविचारः, ध्वनिशिक्षा, प्रकृतिप्रत्ययादीनां वाक्यानाञ्च विमर्शः, शब्दार्थयोः सम्बन्धतत्त्वस्य च विवेचनम्—इत्येवं स्थूलरीत्या मानवेषु प्रयुक्तशब्दानां बहुशो विवेचनं सम्पाद्यते। यत्र तत्र ध्वनीनां परिवर्तनस्य, विकारस्य च विवेचनादेते शब्दमनित्यं स्वीकुर्वाणाः प्रतीयन्ते। एवं रीत्या भाषावैज्ञानिकाः शब्दस्य यत् स्थूलं वैखर्यात्मकं श्रोत्रग्राह्यं स्वरूपं विद्यते, तदेव यथार्थतया समवगच्छन्ति।

वस्तुतस्तु भाषातत्त्वस्य सूक्ष्मदर्शिनो ये भाषावैज्ञानिकास्ते मानवलोकेषु व्यवह्रियमाणं शब्दस्य यद् वैखर्यात्मकं स्वरूपम्, तदेव इयत्तया (एतावदेव शब्दस्य स्वरूपम्, नान्यद्) न मन्यन्ते। ततोऽपि सूक्ष्मातिसूक्ष्मं स्वरूपं स्वीचक्रुः। न केवलं शब्दस्यैव प्रत्युत शब्दवाच्यार्थस्यापि यो व्यवहारो लोके दृश्यते, तावत् परिमाण एव तस्य तत्त्वं न परिसमाप्यते। किन्तु ततोऽप्यधिकं सूक्ष्मं स्वरूपं व्याचक्षते। अत्र विषये रावर्टेत्याख्यस्य विदुषो लेखस्य तात्पर्यं समुद्ध्रियते, यत्रार्थस्वरूपप्रतिपादनपूर्वकं शब्दस्य सूक्ष्मातिसूक्ष्मत्वमवगम्यते।

अस्मिञ्जगति[२] यद्यर्थस्य पूर्णस्वरूपं यथार्थतया परिसमाप्तितया च

१. "अर्थतत्त्व और सम्बन्धतत्त्व का परस्पर भेद समझ लेने पर भी शब्द क्या है ?—यह सवाल हल नहीं होता। संस्कृत के वैयाकरणों ने शब्द के प्रयाग को 'पद' की संज्ञा दी है। ध्वनियों का समूह ही 'पद' माना गया है।... ... ...। किसी किसी भाषा में पद ही पूरा वाक्य होता है अथवा वाक्य ही पूरा पद होता है। ऐस्किमो ऐसी ही एक भाषा है। वाटू में हम देख चुके हैं कि दो शब्दों को मिलाकर ही सम्बन्धतत्त्वबोधक पद का बोध होता है। उदाहरणार्थ इ+फु=(वस्त्र) फु+च्श (फुच्श) इन दो दो शब्दों के समूह को ही पद कह सकते हैं। कहीं-कहीं ये दो शब्द वाक्य में अलग अलग एक दूसरे से दूर स्थित रह सकते हैं। फ्रेंच भाषा का न पा (नहीं) उदाहरण है (ज न ले पा वू=मैंने नहीं देखा)। इन सब बातों को ध्यान में रखते हुये पद का नीचे लिखा लक्षण ठीक ठीक मालूम पड़ता है—

पद उस ध्वनि या ध्वनिसमूह को कहते हैं, जिसका वाक्य में भाषा की परम्परा के अनुसार सम्बन्धतत्त्व का, अर्थतत्त्व का, अथवा उन दोनों के अर्थ का बोध कराने के लिए प्रयोग होता है। यदि ध्वनिसमूह है तो एकत्र और कभी कभी अनेकत्र भी उसके अंशों की स्थिति रहती है।"

—ले० श्रीबाबूराम सक्सेना, सामान्य भाषा विज्ञान (पृ० सं० १२३)

2. And yet despite such observation............... ....

अस्माभिर्ज्ञातुं वाञ्छ्यते। अपि च भाषायाः सरलतमग्रथनस्यापि तत्त्वं जिज्ञास्यते, तदाऽस्य ब्रह्माण्डस्य स्वरूपं सृष्टिश्चेति विषयद्वयमवश्यमेव ज्ञातव्यम्, श्रोतुर्वक्तुश्चेत्युभयोर्बुद्धौ स्थितं तत्त्वमपि वेदितव्यम्। अन्यथा शब्दार्थौ पूर्णतया ज्ञातुं ग्रहीतुं न शक्येते। अर्थात् सृष्टिमूल एव भाषायास्तत्त्वं विद्यते। यथा बीजे एको महीरुहस्तिष्ठति, यदि तद्बीजं न स्वीक्रियते तदा शाखापल्लवादिविशिष्टं वृक्षत्वमपि सम्यग्रूपेण न ज्ञायते। एवं भाषाया अपि तत्त्वं विद्यते।

अत्र रावर्टमहोदयाः स्पष्टतया शब्दस्य बाह्यं स्थूलस्वरूपं स्वीकुर्वाणाः सूक्ष्मातिसूक्ष्ममान्तरिकमपि तत्त्वमङ्गीकुर्वन्ति। मानसतत्त्वान्वेषिणो मनोवैज्ञानिकास्तु सर्वमपि वस्तुजातं मानसिकमेव मन्यन्ते। श्रोत्रेत्यादिज्ञानेन्द्रियैर्यत् किमपि शब्दादिविषयजातमनुभूयते, तत्सर्वं मनः स्थितम्। अत एव जाग्रदवस्थायां श्रुता उच्चरिताश्च शब्दा एव स्वप्ने श्रूयन्ते, उच्चार्यन्ते च। किञ्च "मनोभूतविचारा एव तत्तत्सुखदुःखप्रदात्मकं रूपं परिदधते" इति तेषां राद्धान्तः। अत्र विषये कस्यचिन्मनोवैज्ञानिकस्य तात्पर्यमुद्ध्रियते, येन मानवानामन्तःस्थितां विचारा (ज्ञानम्) एव विभिन्नावस्थां भजन्ते, यत्र स्पष्टतया भाषात्मकशब्दस्य न केवलं बाह्यं स्वरूपम्, अपि तु "सूक्ष्मातिसूक्ष्मा गतिरप्यस्ति" इत्यस्य पुष्टिर्भविष्यति।

भाषा[१] तस्याः स्वरूपञ्च सदैव स्वप्रकाशस्वरूपा। आकाशे आदित्यवद्

to define meaning completely and exactely **Even that of the simplest linguistic form**, We should have to have a complete knowledge of the sturucture of Universe, and also of every thing going on in side the body and head of every speaker and every hearer.

—Robert A. Hall J R.—Linguistics and your language PP. 133.

अत्र 'वाक्यकदम्बे' अपि च भाषायाः 'सत्यं स्वरूपं ज्ञातुम्' इत्यर्थकरेखाङ्कितवाक्येन शब्दस्य यथार्थतम स्वरूपस्यास्तित्वं ज्ञायते। आंग्लभाषीय सिम्पुलशब्दस्य "अमिश्रं सरलं निष्कपटं सत्यम्" इत्यादयोऽर्था वाच्याः। अत्र रेखांकितवाक्ये प्रसङ्गात् सत्यार्थस्यैव ग्रहणम्। सिम्पुलशब्दात् प्रकृष्टतमार्थे आंग्लभाषीय इष्ट प्रत्यये कृते सति सत्यतमार्थो यद्वा यथार्थतमोऽर्थः संजायते।

1. The questions with we shall attempt to answer in this book may be stated as follows. what are the needs which a child tends to satisfy when he talks ? This problem is stricktly speaking neither linguistic, nor logical. It belong to functional psychology. But it should serve never the less as a fitting prelude to any study of child logic.

—Piaget, jean—Language and thought of the Child, PP. 1

एषा भारती सदैव प्रतिभाति। दिक्षु विदिक्षु सर्वेषु प्राणिषु पण्डितेष्वपण्डितेषु च सर्वत्र भाषायाः सूक्ष्मतमा गतिर्विद्यते। अत्रैव युक्तिर्दीयते यत् पण्डितैः क्षुधिते जने (यो भाषां प्रयोक्तुं न सम्यग्जानाति) यया रीत्या भाषा व्यवह्रियते, शिशूनां मध्येऽपि (ये खलु षाण्मासिकाः शिशवः) तादृशी रीतिर्विद्यते। इति। अतोऽयं सिद्धान्तः प्रकर्तव्यो यद् भाषा खलु जगति नित्या, स्वप्रकाशा च। एषा स्व-प्रकाशाय वक्त्र्यतिरिक्तम् कारणान्तरं किञ्चिन्नापेक्षते। सत्यमिदं प्रतिभाति। मनोविज्ञानविदां प्रवरस्य पेगटजीनमहोदयस्यापि चात्र सम्मतिः परिलक्ष्यते। "केन प्रयोजनेन शिशुः शब्दं कुरुते ? अस्य प्रश्नस्य समाधानं तर्कादिशास्त्रैः कर्तुं न पार्यते।" इत्येवं प्रश्नो ग्रन्थारम्भे समुपस्थापितः। पेगडजीनमहोदयस्यो-क्तेन प्रश्नेन ज्ञायते यद् बालोऽपि मनोऽभिलषितप्रयोजनमभिव्यक्तुं शब्दं कुरुते। स च शब्दो मनःस्थित एव।

भाषाप्रयोगकुशलः पण्डितो जनः क्षुधाद्यवस्थायां यया रीत्या भाषायां स्पष्टाक्षरेषु स्वभावान् व्यनक्ति, तया रीत्या सद्यः प्रसूतः शिशुरपि यः खलु बहिर्ज-गज्ज्ञानशून्यः, शब्दं प्रयोक्तुं न शिक्षितः सोऽपि स्वभाषायां स्पष्टाक्षरेषु हृदगतान् भावान् व्यनक्ति। अतः शब्दस्य हृद्यन्तःस्थितं किमपि सूक्ष्मं स्वरूपं विद्यते। अत एव भर्तृहरिणा **वाक्यपदीयस्य** ब्रह्मकाण्डे—

आद्यः करणविन्यासः प्राणस्योर्ध्वंसमीरणम्।
स्थानानामभिघातश्च न विना शब्दभावनम्॥ १२२॥

वाचस्पतिमिश्रास्तु **न्यायकणिकायामिमां** कारिकां निम्नोक्तप्रकारेण व्याचख्युः—

जातमात्रः[1] खल्वयं बालकः पित्रा मुखे हुते मधुसर्पिषी जिह्वया लेढि। सोऽय-माद्यः करणविन्यासः प्राणांश्चोर्ध्वं समीरयति यच्छ्वसितीति उच्यते। अपि चोदी-रितेन वायुना हृदयादीनि स्थानान्यभिहन्ति, यद् यतः शब्दभेद आविरस्ति तदैतत् प्रागभावीयशब्दभावनाविजृम्भितमिति "सद्यः प्रसूतो बालोऽपि जन्मान्तर-शब्दपूर्वकमेव कण्ठताल्वादिस्थानेषु जिह्वास्पर्शादिव्यापारं वितनुते" इति तत्तात्पर्यमवगन्तव्यम्।

एवं रीत्या मनोवैज्ञानिकाः श्रीभर्तृहरिप्रोक्तबालमनोविज्ञानमेवानुसरन्तः शब्दस्य स्थूलं स्वरूपं स्वीकुर्वन्तः श्रीभर्तृहरिकृत**वाक्यपदीय**प्रतिपादितं यद् आन्त-रिकं सूक्ष्मं स्वरूपं तदप्यङ्गीकुर्वन्ति, यतो हि सर्वस्यापि वस्तुजातस्य मानसिक-स्वरूपानङ्गीकारे मनोविज्ञानसम्प्रदास्य न काऽपि सत्ता स्थातुमर्हति।

मानवेषु पदार्थबोधनेच्छया व्यवहृतस्य यद्वा आघातादिना भेरीमृदङ्गादि-जन्यस्य श्रोत्रग्राह्यस्य शब्दस्य नित्यानित्यत्वविषये मतभेदो यथाकामं भवतु नाम,

१. अस्याः कारिकायाः श्री सूर्बनारायणशुक्लप्रणीतभावप्रदीपाख्यव्याख्यायाः टिप्पण्यामिदं समुद्धृतम्।

किन्तु "श्रोत्रग्राह्यादतिरिक्तमपि शब्दस्य सूक्ष्मातिसूक्ष्मं स्वरूपं विद्यते"—इत्यस्मिन् विषये सर्वे प्राचीना नवीनाश्च विद्वांस एकमतयः स्पष्टतया दृष्टिपथमवतरन्ति। यद्यपि शब्दस्य सूक्ष्मातिसूक्ष्मस्वरूपस्य मध्यमापश्यन्तीपरेति नामभिव्याख्यानं रावर्टेत्यादि-पण्डितैर्न कृतम्, तथापि तत्सत्तां (सूक्ष्मातिसूक्ष्मशब्दस्य सत्तां) स्वीचक्रुः।

लोकेऽर्थावबोधकं शब्दस्वरूपम्

एवं रीत्या भारतीयैः प्राचीनमहर्षिभी रावर्टप्रभृतिभिर्नूतनैर्मनीषिभिश्च मानवव्यवहृतशब्दस्य स्थूलसूक्ष्मस्वरूपयोर्निश्चये कृतेऽपि "लोकेऽर्थावबोधकः कः शब्दः ?" इति जिज्ञासा परिसमाप्तिं न गता। अत्र विषये कौण्डभट्ट-नागेश-कैयटादिविदुषां यथाकामं विविधाः प्रवादा दृष्टिगोचरीभवन्ति। कौण्डभट्टादयः पदार्थबोधनेच्छया प्रयुक्तं कण्ठताल्वादिव्यापाराभिव्यक्तं वैखर्यात्मकं श्रोत्रग्राह्यं शब्दमेव अर्थावबोधकं सिद्धान्तसिद्धं युक्त्या प्रत्यपादयन्[1]। कैयटनागेशप्रभृतयो दार्शनिकाश्च कण्ठताल्वाद्यभिव्यक्तवर्णान् ध्वनीत्यपरनाम्ना स्वीकृत्य "श्रोत्रगृहीत-कादिध्वन्यभिव्यङ्ग्यो मध्यमानाद एव अर्थस्य बोधकः" इत्येवं **वैयाकरणलघुसिद्धा-न्तमञ्जूषायां** शक्त्याश्रयनिरूपणस्थले वैखरीशब्दस्य शक्त्याश्रयत्वं युक्त्या खण्डयन्तः स्वीचक्रुः। एवं रीत्या शाब्दिकानां मध्ये केचिद् वैयाकरणाः वैखर्यात्मकं श्रोत्र-ग्राह्यमखण्डवाक्यमेव स्फोटं स्वीकृत्य तस्यैव शक्त्याश्रयत्वम्, केचिच्च कादिध्वन्य-भिव्यङ्ग्यं मध्यमावस्थं शब्दं स्फोटं स्वीकृत्य तस्यैव शक्त्याश्रयत्वं सिद्धान्तसिद्धं निरचिन्वन्। मतभेदेन उभयोः शब्दयोरर्थावबोधकशक्त्याश्रयत्वस्य स्वीकारादेव आचार्यभर्तृहरिरुभयमतप्रतिपादनपरामिमां कारिकामाह—

द्वावुपादानशब्देषु शब्दौ शब्दविदो विदुः।
एको निमित्तं शब्दानामपरोऽर्थे प्रयुज्यते॥ ४४॥
(वाक्यपदीयम्, ब्र० का०)

यैर्वैखर्यात्मकशब्दस्यैव स्फोटात्मकत्वमङ्गीक्रियते, तेषां मतानुसारमस्याः कारिकाया एवं व्याख्यानं कर्तुं शक्यते—

शब्दविदो वैयाकरणा उपादानशब्देषु वाचकशब्देषु द्वौ शब्दौ विदुः। एकश्च मध्यमावस्थः प्रणवात्मकः शब्दस्तेषां वैखरीशब्दानां निमित्तम्। अपरश्च वैखर्यात्मकः शब्दः अर्थे अर्थबोधनाय प्रयुज्यते। प्रणवात्मको मध्यामाख्यः शब्द एव कादिरूपेण परिणमते। तथा चोक्तं **वाक्यपदीयस्य** ब्रह्मकाण्डे—

अरणिस्थं यथा ज्योतिः प्रकाशान्तरकारणम्।
तद्वच्छब्दोऽपि बुद्धिस्थः श्रुतीनां कारणं पृथक्॥ ४६॥

यथा अरणिस्थं ज्योतिः काष्ठद्वयस्य परस्परं संघर्षणेनाभिव्यक्तस्याग्ने-रुपादानं कारणम्। अरणौ प्रच्छन्नोऽग्निरेव बहिश्चक्षुषा प्रत्यक्षीक्रियमाणरूपेण

१. **वैयाकरणभूषणसारे वाक्यात्मकस्य स्फोटस्यैव अर्थावबोधकशक्त्याश्रयत्वं स्वीकृतम्।**

गृह्यते। तद्वद् बुद्धिस्थो मध्यमाशब्दोऽपि स्वपरश्रोत्रग्राह्यशब्दानामुपादानं कारणम्। यथा मयूरादयोऽङ्गप्रत्यङ्गचन्द्रकादीनामुपसंहारेण लीयमाना अण्डरूपमापन्ना भवन्ति। अस्यामवस्थायामङ्गानां पृथक् पृथक् प्रतीतिर्न जायते। अण्डे भिद्यमाने च व्यक्त्यवयवरूपेण प्रादुर्भवन्ति। तथैवोपसंहृतकादिवर्णक्रमिको मध्यमाख्यः शब्दोऽपि अर्थबोधनेच्छया सावयवः सक्रमः प्रादुर्भवति। अत्रैव च सत्कार्यवादस्य तत्त्वमपि परिलक्ष्यते। उक्तञ्च **वाक्यपदीयस्य** ब्रह्मकाण्डे—

> आण्डभावमिवापन्नो यः क्रतुः शब्दसंज्ञकः।
> वृत्तिस्तस्य क्रियारूपा शब्दत्वेन विवर्तते॥ इति॥

श्रुतिरप्याह—

ॐकार एव **सर्वा** वाक् सैषा स्पर्शोष्मभिर्व्यज्यमाना बह्वी नानारूपा **भवति**॥ इति॥

बह्वी वाक्पदादिरूपा, नानारूपा सा घटपटादिरूपा च ओङ्कारात्मिका वाग् **भवति**। एवं रीत्या मध्यमाशब्द एव अकारादिरूपेण कण्ठताल्वादिव्यापारेण **अर्थबोधनेच्छया** जायते। मध्यमावैखरीणां निमित्तम्। अपरश्च वैखरीशब्दोऽर्थ-**बोधनाय** प्रयुज्यते। "द्वावुपादानशब्देषु" इति भर्तृहरिकारिकाया इदं व्याख्यानं **रङ्गोजीभट्टात्मजकौण्डभट्टमतानुसारि; वैयाकरणभूषणसारे** वाह्यस्यैव अखण्ड-**वाक्यस्फोटस्य** वाचकत्वस्वीकारात्। उक्तश्च सिद्धान्तनिष्कर्षः—

> वाक्यस्फोटोऽतिनिष्कर्षे तिष्ठतीति मतिस्थितिः।
> साधुशब्देऽन्तर्गता हि बोधका न तु तत्स्मृताः[1]॥ ६१॥ इति॥

अत्र पक्षे "श्रोत्रोपलब्धिर्बुद्धिनिर्ग्राह्यः[2] प्रयोगेणाभिज्वलितः" इति पातञ्जल**महाभाष्योक्त**वाक्ये "प्रयोगेणाभिज्वलितः" इत्यस्य "अर्थबोधनेच्छया शरीरमारुताभिहतकण्ठताल्वादिव्यापारेणाभिव्यक्तो घटपटादिशब्दः इत्येवं पूर्वोक्तं[3] तात्पर्यमवगन्तव्यम्। एवं "येनोच्चारितेन"[4] इत्यस्यापि तदेव तात्पर्यमवसीयते। प्रत्यक्षोपलभ्यमानस्फोटस्य वाचकत्वं स्वीकुर्वाणा एते कौण्डभट्टादयो वर्णनिष्ठं **तारत्वादिकं** ध्वनिं मन्यन्ते। कश्चिच्च तमेवाकारं तावता तारस्वरेण उच्चार-

---

१ भूषणसारे स्फोटनिरूपणस्य **प्रारम्भे** इयं कारिका व्याख्याता।

२ पातञ्जलमहाभाष्ये, प्रत्याहाराह्निके, अ इ उ ण् सूत्रे, "आदित्यवत् स्युः" इति वार्तिकस्य व्याख्यावसरे प्रोक्तम्।

३. **भौतिकविज्ञानदृष्ट्या** शब्दस्वरूपविमर्शावसरे पूर्वं व्याख्यातम्।

४. पातञ्जलमहाभाष्ये, पस्पशाह्निके "अथ गौरित्यत्र कः शब्दः?"—इति प्रश्नं समुत्थाय "येनोच्चारितेन" इत्यादिवाक्येन समाधानं कृतम्।

यितुं न समर्थः। अतस्तस्य ध्वनिस्तदपेक्षया नातिदूरमेव श्रूयते। भोजनादिग्रासस्य[1] निगरणक्षणे जिह्वायाः कण्ठताल्वादिना सह संयोगविश्लेष-क्रियाभ्यां किञ्चित्-प्रकारकध्वनेः श्रवणात् "यत्र यत्र जिह्वायाः कण्ठताल्वादिना सह संश्लेषविश्लेषौ, तत्र ध्वन्युत्पत्तिः, भोजनादिग्रासनिगरणक्षणे तथा दर्शनात्" इत्यनुमानेन वर्णो-च्चारणस्थलेऽपि कण्ठादिस्थानेन सह जिह्वायाः संयोगवियोगाभ्यां ध्वनिसत्तां साधयन्ति।

"द्वावुपादानशब्देषु" इत्येतत्कारिकाघटकस्य "एको निमित्तं शब्दानाम्" इत्यस्य अपरा च व्याख्या निम्नोक्तरूपा क्रियते—

"एकश्च कण्ठताल्वादिव्यापारेणाभिव्यक्तः प्रत्यक्षोपलभ्यमानो घटपटादिशब्दो मध्यमाख्यस्फोटमभिव्यक्तुं निमित्तम्। घटपटादिध्वनिभिरभिव्यक्तः अपरश्च मध्यमावस्थामापन्नः शब्दोऽर्थे अर्थबोधनाय प्रयुज्यते। अर्थाद् मध्यमाशब्दादेव पदार्थबोधः, न तु वैखरीशब्दात्। यथा जपाकुसुमाद्युपाधिवशात् स्फटिको रक्तवर्णोऽवभासते, तथैव मध्यमास्फोटोऽपि कण्ठताल्वादिव्यापारेणाभिव्यक्तैः कर्णविवरमाध्यमेनान्तःप्रविष्टैरकारादिध्वनिभिरूषितस्तद्रूपेण भासते। अकारादिध्वनिभिः प्रकाशितश्च स एव स्फोटोऽर्थावबोधकः, तस्यैव च अर्थाव-बोधकशक्त्याश्रयत्वं स्वीक्रियते।"

पूर्वोक्तकारिकाया इदं व्याख्यानं नागेशप्रभृतिसम्मतम्। एते बाह्यवैखरीशब्द-स्यार्थबोधकशक्तेरनाश्रयत्वं मन्यन्ते। अत्र कारणम्—अकारादिध्वनीनामुच्चरित-प्रध्वंसित्वेन तेषां युगपदेकत्रोपलब्धेरसम्भवात्तेषां पौर्वापर्यस्यासम्भवाच्च शक्त्या-श्रयरूपपदस्यानिष्पत्तिरूपम्, अविद्यमानपदस्य शक्त्यनाश्रयत्वरूपञ्च बोद्धव्यं। घटपटादिशब्देषु घकार इदानीमभिव्यक्त इति स पूर्वः, टकारश्च तदनन्तरमभिव्यक्तः स तत्पर इत्येवं पौर्वापर्यत्वसम्भवेऽपि पदस्य समुपलब्धिर्दुष्करा। यथा नष्टो घटो जलाश्रयो भवितुं नार्हति; तथैव रीत्या नष्टः शब्दोऽर्थावबोधकशक्त्याश्रय-योग्यो न सङ्घटते। किञ्च, नष्टस्य शब्दस्यार्थावबोधकत्वाङ्गीकारे शब्दार्थसम्बन्धो न स्यादिति पूर्वोक्तरीत्या टकारादिध्वनिभिस्तद्रूपेणाभिव्यक्ता मध्यमा वागेव अर्थावबोधिकेति नागेशादीनां राद्धान्तः। कर्णकुहरद्वारेण हृद्देशं समागतेन घटा-दिशब्दघटकघकारेण सततं श्रूयमाण एकः स्फोटः किञ्चिद् अभिव्यज्यते, तदनन्तर-मन्तिमध्वनिना टकारेण पूर्णरूपेण स एव स्फोटः, यः पूर्वं घकारेण किञ्चिदभि-व्यक्तः, इदानीं पूर्णरूपेणाभिव्यक्तः सन् कम्बुग्रीवादिविशिष्टमर्थमवबोधयति।

यथा अतीवोर्ध्वमाकाशे स्थितं नारदं द्वारिकावासिनः प्रथमं "कश्चिच्चयस्त्विषाम्" इत्येवं पुराऽवधारितवन्तः। यदा स किञ्चिद् अधः समागतः, तमेव "अयं कश्चित् शरीरी यद्वा प्राणी" इत्येवं ज्ञातवन्तः, ततोऽप्यधस्तात् समागतम् "अयं

---

१. कौण्डभट्टकृतभूषणसारे स्फोटनिर्णये "न च वर्णस्थले ध्वनिसत्त्वे मानाभावः" इत्यतः प्रारभ्य "विपरीतगौरवम्" इत्येतत्पर्यन्तं द्रष्टव्यम्।

कश्चित् पुमान्'' इति, अतीव समीपञ्च समागतं तं ''अयं नारदः'' इत्येवमेकमेव वस्तु क्रमेण यथार्थतया ज्ञातवन्तः[1]। तथैव रमणेत्यादिपदघटकरेफेण नित्यो मध्यमाख्यः स्फोटः प्रथमं रमणपदात्मना अस्पष्टरूपेण किञ्चिद् अभिव्यज्यते, ततः स एव स्फोटः मकारध्वनिना पूर्वापेक्षया स्पष्टतररूपेण रमणपदात्मना अभिव्यक्तः, ततोऽन्तिमध्वनिना णकारेण स एव स्फोटः पूर्णरूपेण रमणपदात्मनाऽभिव्यज्यते, पूर्वपूर्वध्वनिसहकृताऽन्त्यध्वनिना क्रमशः स्पष्ट-स्पष्टतर-स्पष्टतमरूपेणाभिव्यक्तोऽर्थमवबोधयति। अत्र पक्षे ''श्रोत्रोपलब्धिर्बुद्धिनिर्ग्राह्यः प्रयोगेणाभिज्वलितः'' इति पातञ्जल**महाभाष्ये** ''प्रयोगेणाभिज्वलितः'' इत्यस्य ''अकारादिध्वनीनां प्रयोगेण अभिज्वलितः प्रकाशितः'' इत्यर्थो बोद्धव्यः। एवं ''येनोच्चारितेन सास्नालांगूल''— इति वाक्ये ''येनोच्चारितेन'' इत्यस्य ''अकारादिध्वनिभिरुच्चारितेन प्रकाशितेन येन सास्नालांगूलककुदखुरविषाणिनां सम्प्रतीतिः स शब्दः'' इत्यर्थो वेदितव्यः।

अत्र पक्षे ''श्रोत्रगृहीतध्वन्यभिव्यङ्ग्यत्वे सति अर्थविषयकबोधजनकत्वम्'' इति शक्त्याश्रयस्य शब्दस्य स्वरूपं स्वीक्रियते। एतेषां मतानुसारेण प्राकृतवैकृतनामकौ द्वौ ध्वनी प्रतिपाद्येते। अकारादिवर्णाः प्राकृतध्वनिनाम्ना प्रसिद्धाः, तेषां द्रुतादिवृत्योच्चारणञ्च वैकृतध्वनिनाम्ना व्यवह्रियते। एतयोर्मध्ये प्राकृतध्वनिना स्फोटोऽभिव्यज्यते, न तु वैकृतध्वनिना। तथा चोक्तं संग्रहे—

स्फोटस्य ग्रहणे हेतुः प्राकृतध्वनिरिष्यते।
वृत्तिभेदे निमित्तत्वं वैकृतः सम्पद्यते॥ इति॥

एवं रीत्योभयोः पक्षयोर्मतस्य पोषिकाः कारिकाः भर्तृहरिविरचित**वाक्यपदीये** समुपलभ्यन्ते। नागेश-कौण्डभट्टादयश्च स्वसिद्धान्तपोषिकाः कारिकाः प्रामाण्यरूपेण समुद्धृत्य यथाकामं स्वमतं पोषयन्ति। वस्तुतस्तु सूक्ष्मेक्षिकया समवलोकनेन ''**वाक्यपदीयं** सर्वेषां शब्दविषयकसिद्धान्तानां सङ्कलनात्मको ग्रन्थः'' इति निश्चयो बुद्धौ समवतरति। **वाक्यपदीयस्य** ब्रह्मकाण्डे शब्दस्य विवर्तवाद-परिणामवादौ समुपलभ्येते। तथा चोक्तम्—

शब्दस्य परिणामोऽयमित्याम्नायविदो विदुः।
छन्दोभ्य एव प्रथममेतद्विश्वं व्यवर्तत॥ (१२०) इति॥

अनया कारिकयेदं ध्वन्यते यद् यथा केचिद्[2] वेदान्तिनः सर्वं जगद् ब्रह्मणो विवर्त-

१. माघकृते शिशुपालवधे सर्गः १, श्लोक ३ इत्यत्र एतदीयोंऽशो द्रष्टव्यः।

२. यथा अद्वैतवेदान्तिनः। उक्तञ्च सर्वज्ञात्ममुनिप्रणीते संक्षेपशारीरके द्वितीयाध्याये—
आरम्भवादः कणभक्षपक्षः संघातवादस्तु भदन्तपक्षः।
सांख्यादिपक्षः परिणामवादो वेदान्तपक्षस्तु विवर्तवादः'' ॥ (श्लो० ६३)
कणभक्षः = कणादः, भदन्तः = वैभाषिको सौत्रान्तिकश्च।

रूपम्, केचिच्च यथा—विशिष्टाद्वैतवादिनः, परिणामं[1] मन्यन्ते, तथैव शाब्दिकानां मध्ये केचिद् वैयाकरणाः सर्वं जगत् शब्दस्य विवर्तरूपम्, यथा नागेशादयः; केचिद् परिणामं मन्यन्ते। अत एव ''ॐकार एव सर्वा वाक् सैषा स्पर्शोष्मभिर्व्यज्यमाना बह्वी नानारूपा भवति'' इति श्रुतौ बह्वी नानारूपा भवतीत्युक्तम्, न तु विवर्तते इत्येवं प्रोक्तम्। भर्तृहरिश्च अनयोर्विवर्तवाद-परिणामवादयोरेकत्र ''अनादिनिधनं ब्रह्म'' (१) ''शब्दस्य परिणामोऽयम्''—इत्यनयोः कारिकयोः सङ्कलनं कृतवान्। किन्तु इदं समीचीनम् इदञ्च न समीचीनमिति कण्ठरवेण न प्रोक्तवान्। केचित्तु विवर्तपरिणामशब्दयोः परस्परं पर्यायत्वं स्वीकृत्य—

शब्दस्य परिणामोऽयमित्याम्नायविदो विदुः।
छन्दोभ्य एव प्रथममेतद् विश्वं व्यवर्तत॥

इतिभर्तृहरिकारिकायां पूर्वापरविरोधं परिहरन्ति। विवर्तपरिणामयोः परस्परं पर्यायत्वे प्रमाणञ्च **उत्तररामचरिते** भवभूतिप्रोक्तं श्लोकं समवतरन्ति। तद्यथा—

एको रसः करुण एव निमित्तभेदाद् भिन्नः पृथक् पृथगिवाश्रयते विवर्तान्।
आवर्तबुद्बुदतरङ्गमयान् विकारानम्भो यथा सलिलमेव हि तत्समग्रम्॥ इति।

वस्तुतस्त्वत्र जलस्य य आवर्तबुद्बुदतरङ्गमया विकारास्तेजलस्य परिणामभूता न तु विवर्तरूपेति कथं दृष्टान्तदार्ष्टान्तयोः समन्वयः स्यादित्यस्माद्धेतोरत्रोभयोः पर्यायत्वं स्वीकर्तव्यम्। इति। तन्न समीचीनम्; कोशेषूभयोः परस्परं पर्यायत्वस्यानुपलम्भात्. ''अतात्त्विकोऽन्यथाभावो विवर्तः, सतात्त्विकोऽन्यथाभावः परिणामः'' इति विवर्त-परिणामयोर्भेदप्रतिपादनात्। श्लोकोत्तरार्द्धघटकविकारपदेन अतात्त्विकस्यान्यथाभावरूपस्य, न तु तात्त्विकस्य विकारस्य ग्रहणं क्रियते। यतो हि दुग्धस्य दधिरूपेण परिणामवज् जलस्यावर्तबुद्बुदादिरूपेण न स्थिरो विकारः, किन्तु अस्थिरः, किञ्चित् क्षणानन्तरञ्च पुनरेव ते तरङ्गा जलरूपं परिदधते। एवमेव घटिकाः, कुण्डिका इत्यादयो मृत्पिण्डस्य, रुचकाः, कटकाः, स्वस्तिका, कुण्डलानि इत्यादीनि सुवर्णपिण्डस्य विवर्तभूतानि। यतो हि आकृत्युपमर्देन पुनः मृत्पिण्डमात्रं, सुवर्णपिण्डमात्रमेवावशिष्यते। आकृत्युपमर्देन कुण्डलादीनि सर्वाणि पुनः स्वमूलस्वरूपं पिण्डात्मकं भजन्ते। किञ्च सर्वास्ववस्थास्वपि सुवर्णत्वादिप्रतीतिर्जायते। इयञ्च विवर्तरूपा विकृतिः परिणामवत् प्रतीयते। अत एव प्राञ्चो विद्वांसः एतादृशं विवर्तात्मकं विकारं परिणामं मन्यन्ते स्म। मन्मते तु यत्र विकृतिः आकृत्युपमर्देन

१. यथा विशिष्टाद्वैतवेदान्तिनः। उक्तञ्च रामानुजकृतश्रीभाष्ये प्रकृत्यधिकरणे— परिणामात् (१/४।२७) परिणामस्वाभाव्यात्, नात्रोपदिश्यमानस्य परिणामस्य परस्मिन् ब्रह्मणि दोषावहत्वं स्वभावः, प्रत्युत निरङ्कुशैश्वर्यावहत्वमेवेत्यभिप्रायः। एवमेव हि परिणाम उपदिश्यते।

यद्वा भ्रमात्मकज्ञानस्यापहारे सति पुनः स्वस्वरूपं भजते, स विवर्तः। यथा पूर्वमुदाहृतम्। यत्र तु विकृतिः आकृत्युपमर्देन पुनः स्वरूपं न प्राप्नोति, स परिणामः, तद्यथा दुग्धस्य दधिरूपेण परिणामः। यद्वा यथा बदरीफलस्य श्यामता-तिरोभावे लौहित्यस्याविर्भावः। अतोऽयमपि जलस्य तरङ्गरूपो विकारो विवर्त-रूप एव, न तु परिणामरूपः। अत एव[1] शब्दस्य किमुपादानमिति विषयं समादाय ब्रह्मकाण्डे—

"वायोरणूनां ज्ञानस्य शब्दत्वापत्तिरिष्यते"

इत्यस्यां कारिकायाम्—

कैश्चिद् दर्शनभेदोऽत्र प्रवादेष्वनवस्थितः"

इत्येवं प्रोक्तम्। वायोरणूनां ज्ञानस्य शब्दत्वापत्तिं मन्यमानाः स्वसिद्धान्ता-नुसारेण वाय्वादेः शब्दत्वापत्तौ यां प्रक्रियां याञ्च युक्तिं स्वीकुर्वन्ति तासामेव क्रमशः प्रतिपादनं ब्रह्मकाण्डे दृश्यते। किञ्च—

कार्यत्वे नित्यतायां वा केचिदेकत्ववादिनः।
तत्र यन्मुख्यमेकेषां तत्रान्येषां विपर्ययः॥ (का० प०, ब्र० का०)

इत्यादिकारिकाभिर्वाक्यपदीयस्य सङ्कलनात्मकत्वमेव प्रतीयते, न च पूर्वं ये सिद्धान्ताः प्रतिपादितास्तेषां तदुत्तरसिद्धान्तेन खण्डनं कृतम्। अत्र च क्रमशः सन्निवेश एव प्रमाणम्। यथा "पदभेदेऽपि वर्णानामेकत्वं न निवर्तते" इत्यस्यां कारिकायां पूर्वमीमांसकानां सिद्धान्तो व्याख्यातः, तदनन्तरं "पदे न वर्णा विद्यन्ते" इत्यस्यां कारिकायां वैयाकरणानां सिद्धान्तः सन्निवेशितः। अतः पूर्वप्रतिपादित-मीमांसकस्य "पदे न वर्णा विद्यन्ते" इति कारिकया तत्खण्डनं जातमिति न वाच्यम्? तथा स्वीकारे "विरुद्धपरिणामेषु" इत्यादिकारिकासु आभ्यन्तरस्फोटस्य प्रतिपाद-नानन्तरं "यः संयोगविभागाभ्याम्" इत्यादिकारिकासु शब्दानित्यत्ववादिनां मतानु-सारेण स्फोटस्वरूपप्रतिपादनाच्छब्दानित्यत्ववादिनैयायिकाभिमतस्फोटविषयक-सिद्धान्तेन आभ्यन्तरस्फोटवादिनां वैयाकरणानां सिद्धान्तस्य खण्डनापत्तेः। अतोऽयं ग्रन्थः आकरग्रन्थः इति स्वीकर्तव्यः। अत एव "द्वावुपादानशब्देषु" इत्यस्यां कारिकायाम् "एको निमित्तं शब्दानामपरोऽर्थे प्रयुज्यते" इत्यत्र "एको निमित्तम्" इत्येवं प्रोक्तम्, न तु वैखरी वाग् अर्थविबोधिका, मध्यमावाक् च तस्या निमित्तम्, न वा वैखरीवाङ् मध्यमायाः प्रकाशने निमित्तम्, मध्यमा वाक् च अर्थविबोधिकेति प्रोक्तम्। ये तु वैखरीं वाचमर्थविबोधिकां मन्यन्ते, ते तु उपर्युक्तकारिकायाम् "एको निमित्तम्" इत्यत्र एकशब्देन मध्यमां वाचम्, ये अपरशब्देन च वैखरीं वाचं गृह्णन्ति। ये तु मध्यमामेव वाचमर्थवाचकं स्वीकुर्वन्ति, ते तु एकपदेन अपरपदेन

१. वाक्यपदीयस्य सिद्धान्तानां संकलनात्मकत्वस्वीकारादेव।

च बाह्यस्फोटवादिविपरीतमेव गृह्णन्ति। एवं रीत्याऽर्थविबोधकशब्दविषये सिद्धान्तोऽनवस्थित एव दृश्यते।

लोके पदवाच्यार्थविमर्शः

अर्थविबोधकशब्दविषय इव तद्वाच्यार्थविषयेऽपि मतभेदो दृश्यते। केचित्तु बाह्यमर्थम्, तदन्ये च आभ्यन्तरं बौद्धमेवार्थं पदवाच्यं स्वीकुर्वन्ति। श्रीभर्तृहरि-प्रोक्तवाक्यपदीयस्य द्वितीयकाण्डे—

अस्त्यर्थः सर्वशब्दानामिति प्रत्याय्यलक्षणम्॥ (१२१)

इत्यतः प्रारभ्य

"यथेन्द्रियं सन्निपतद् वैचित्र्येणोपदर्शनम्।

तथैव शब्दार्थस्य"—

इति पर्यन्तं पदवाच्यार्थविषये द्वादश पक्षाः समुपस्थापिताः।

तत्र प्रथमः पक्षः—

[1]सर्वशब्दानामपरामृष्टाकारविशेषमर्थमात्रं वाच्यमिति केचिदाहुः। एतत्सर्वशब्दानामप्रत्याख्यलक्षण प्रत्याय्यस्य वाच्यस्य लक्षणं बोध्यम्। यथा अपूर्व-देवतादिषु हि आकारप्रसिद्धिर्न दृश्यते। यत्तु गवादिशब्देषु आकारप्रथनं, तत्रान्तरी-यकतया बोद्धव्यम्। सास्नादिमत्स्वेव[2] यदा गोशब्दप्रयोगं पश्यति। तद्दर्शनाभ्या-साच्च यत्राकारपरिग्रहो यः, स शब्दस्य प्रत्ययो न भवति।

अथ द्वितीयः पक्षः—

केचिद् भेदा[3] जात्यादयः शब्दवाच्याः केचित्तत्रार्थप्रयोजकाः अनुनिष्पादिन एव, तथा तांश्च शब्दार्थं इत्यपरे मन्यन्ते।

तृतीयः पक्षः—

[4]सर्वं एवाकारा गुणप्रधानभावेन पदस्यार्थं इति केचिन्मन्यन्ते।

१. अस्त्यर्थः सर्वशब्दानामिति प्रत्याय्यलक्षणम्।
अपूर्वदेवतास्वर्गैः सममाहुर्गवादिषु॥ १२१॥

२. प्रयोगदर्शनाभ्यासाद् आकारावग्रहस्तु यः।
न स शब्दस्य विषयः स हि यत्नान्तराश्रयः॥ १२२॥

३. केचिद् भेदाः प्रकाश्यन्ते शब्दैस्तदभिधायिभिः।
अनुनिष्पादिनः कांश्चिच्छब्दार्थं इति मन्यते॥ १२३॥

४. नियतास्तु प्रयोगा ये नियतं यच्च साधनम्।
तेषां शब्दाभिधेयत्वमपरैरनुगम्यते॥ १२७॥

चतुर्थः पक्षः—

समुदाय एव तुल्यकक्ष्यतया शब्दस्यार्थः ।

पञ्चमः पक्षः—

[1]जातिगुणक्रियात्मकस्यार्थस्यासत्त्वभूतः संसर्ग एव शब्दार्थः ।

षष्ठः पक्षः—

[2]सत्यमेवासत्योपाधिविचित्रितं शब्दवाच्यम् ।

सप्तमः पक्षः—

शब्दस्य स्वरूपमेवाभिधेयम् । अर्थाच्छब्द एव शब्दस्य वाच्यभूतोऽर्थः ।

तद्यथा प्रोक्तम्—

शब्दो वाच्याभिजन्यत्वमागतो याति वाच्यताम् ॥ (वा० प० १२९)

अभिजन्यत्वमध्यासरूपत्वमागतः शब्द एव स्वरूपलक्षणः शब्दस्य वाच्यः ।

अभिजन्यस्वरूपश्च—

सोऽयमित्यभिसम्बन्धाद्[3] रूपमेकीकृतं यदा ।
शब्दस्यार्थेन तं शब्दमभिजल्पं प्रचक्षते ॥ ३३०॥ इति ।

सोऽयमित्यभिसम्बन्धोऽध्यासाख्य उच्यते, तेन पदार्थस्वरूपमाच्छादितमेकीकृतमिव प्रत्याय्यते तदाभिजल्पः शब्द उच्यते । अध्यासवशाच्छब्दार्थयोरेकात्मकत्वेऽर्थांशस्यैव प्राधान्यम्, उपयोगवशात् ।

तत्र लोकेऽर्थांशस्यैव प्राधान्यमित्यपि दर्शयितुमाह—

[4]लोकेऽर्थरूपतां शब्दः प्रतिपन्नः प्रवर्तते ॥ १२८ ॥

अष्टमः पक्षः—

अर्थेषु[5] न शक्तिः पृथगस्ति, किन्तु शब्दाधीनेति यथा ते शब्दैर्विधीयन्ते तथैवावगम्यन्ते इति स्वमाहात्म्योपस्थापित एव शब्दार्थः ।

---

१. असत्यो वापि संसर्गः शब्दार्थः कैश्चिदिष्यते ॥ १२६ ॥
२. असत्योपाधि यत्सत्यं तद्वा शब्दनिबन्धनम् ॥ १२७ ॥
३. वाक्यपदीयम्, द्वितीयकाण्डम् ।
४. ,, ,,
५. असक्तेः सर्वशक्तेर्वा शब्दैरेव प्रकल्पिता ।
एकस्यार्थस्य नियता क्रियादिपरिकल्पना ॥ १३३ ॥

नवमः पक्षः—

असर्वशक्तिरर्थो[1] व्यवस्थितः । तस्य प्रतिनियतशक्त्यभिधानं शब्देनैव भवति ।

दशमः पक्षः—

अथ बुद्ध्युपारूढ एव शब्दस्यार्थो न बाह्यः । तथा चोक्तं वाक्यपदीये—

यो वार्थो बुद्धिविषयो बाह्यवस्तुनिबन्धनः ।
स बाह्यं वस्त्विति ज्ञातः, शब्दार्थः सम्यगिष्यते ॥ १३४ ॥

शब्दस्य बुद्ध्युपारूढस्य वैकल्पिकस्य यो बुद्ध्युपारूढो बाह्यवस्तुनिबन्धनो बाह्यवस्तुविकल्पजननद्वारेण निबन्धनं यस्य स तथाभूतः । स च वैकल्पिकोऽर्थः दृश्यविकल्पैकाकारेणाबहीरूपोऽपि बहीरूपतयाऽध्यस्तः । अध्यस्तमेव वस्त्ववगच्छामि शब्दादिति शब्दनिमित्तं शब्दार्थ इष्यते ।

एकादशः पक्षः—

शब्दानामाकारविशेषवानर्थो[2] पूर्वप्रभृतीनां संविन्मात्रमपरामृष्टाकारविशेषोऽर्थः ।

द्वादशः पक्षः—

[3]प्रतिनियतवासनावशेनैव प्रतिनियताकारोऽर्थस्तत्त्वतस्तु क्वचिदपि नाभिधीयते । अविपरीतमप्यर्थमिन्द्रियदोषवशान्नानारूपमवभासयति । यथा तथैव नियतवासनावासितचेतसां शब्दार्थप्रतीतिरिति नास्ति कश्चिन्नियत एकः शब्दस्यार्थः ।

एतेषां मध्ये बौद्धार्थस्यैव वाच्यत्वं नागेशप्रभृतिभिः स्वीक्रियते । बाह्यशब्दानां बाह्यार्थैः सहाभेदसम्बन्धस्यासम्भवाच्छब्दार्थयोस्तत्त्वतोऽभेदसम्बन्धस्य सिद्धये, हिरण्यगर्भस्यापि स्वमानेन वर्षशतान्ते नाशात् "धाता यथापूर्वमकल्पयत्" इति श्रुत्युक्त्या जन्मान्तरानुभूतबौद्धपदार्थज्ञानपूर्वकमेव स्रष्टृत्वाद् बौद्धं पदार्थमावश्यकम्, तमेव च पदवाच्यं तयोरेव च अभेदसम्बन्धं स्वीकुर्वन्ति । प्रलये[4] च

---

१. उपर्युक्तकारिकायाः 'सर्वशक्तेर्वा' इत्यनेनांशेन नवमः पक्षः प्रोक्तः ।
२. आकारवन्तः सम्वेद्याः व्यक्तस्मृतिनिबन्धनाः ।
ये ते प्रत्यवभासन्ते सम्विन्मात्रं त्वतोऽन्यथा ॥ १३५ ॥
३. यथेन्द्रियं सन्निपतद् वैचित्र्येणोपदर्शकम् ।
तथैव शब्दादर्थस्य प्रतिपत्तिरनेकधा ॥ १३६ ॥
४. किञ्च, बौद्धपदार्थानङ्गीकारे—
सर्वेषां तु स नामानि कर्माणि च पृथक् पृथक् ।
वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे ॥ (मनुस्मृतिः १/२१)
इति स्मृतेः, "स भूरिति व्याहरत्, स भूमिमसृजत" इति श्रुतेश्च सृष्टेः प्राग् भूशब्दादिभ्यस्तदर्थज्ञानपूर्वकं सृष्टिरिति लाभेन, तदा बाह्यभुवोऽभावात् 'भूः' शब्दस्य

जात्यादेर्नाशात् तस्य पदवाच्यत्वं नाङ्गीकुर्वन्ति । एवं बाह्यविषयैः सह चक्षुरादीन्द्रियाणां संयोगात् पूर्वमेव जन्मान्तरेषु संस्काररूपेण बुद्धौ येऽर्था स्थितास्त एव पदवाच्याः, न तु बाह्याः । यथा कर्णकुहरद्वारेणान्तःकरणं प्रविष्टा वैखरी वाग् आभ्यन्तरस्य स्फोटस्याभिव्यञ्जिका, एवं बाह्यार्थोऽपि चक्षुरादीन्द्रियमाध्यमेन जन्मान्तरानुभूतस्य बुद्धौ स्थितस्य रूपादिविषयकसंस्कारस्य अभिव्यञ्जकः । बाह्यार्थो बुद्धौ प्रसुप्तमर्थमुद्बोधयतीति संक्षेपतो बोद्धव्यः । यथा चोक्तं **वाक्यपदीयस्य** द्वितीयकाण्डे भर्तृहरिणा—

> यो वाऽर्थो बुद्धिविषयो बाह्यवस्तुनिबन्धनः ।
> स बाह्यं वस्त्विति ज्ञातः शब्दार्थः सम्यगिष्यते ॥ १३४ ॥

'बाह्यवस्तुनिबन्धनः = बाह्यवस्तुविकल्पजननद्वारेणाध्यस्तत्वेन निबन्धनम् = निमित्तं यस्य स तथाभूतो बुद्धिविषयः = बुद्धौ स्थितो योऽर्थः स एव बहिराभासते' इत्येवं ज्ञानं यदा जायते, तदा "अस्य शब्दस्याऽयमर्थः" इत्येवं शब्दार्थः सम्यक्तया अवगम्यते । यत्र आभ्यन्तरबाह्यार्थयोः परस्परं सम्वादः सञ्जायते स शब्दः प्रमाणम्, विसम्वादे त्वप्रमाणम् । यद्यपि सर्वेऽर्था बौद्धास्तथापि रागादिदोषवशाद् बहीरूपतयाऽतात्त्विकरूपेण भासन्ते । अत एव **योगवासिष्ठे**—

> बहिर्न किञ्चिदप्यस्ति खाद्रयब्ध्युर्वीदिगादिकम् ।
> एतत् स्वचित्त एवास्ति पत्रपुञ्जमिवांकुरे ॥ (५।४८।४९)

इत्युक्तम् । व्योमपर्वतसमुद्रपृथ्वीदिगादिकमित्येतत् सर्वं किञ्चिदपि अणुमात्रं बहिर्न विद्यते । यथा अंकुरे पत्रपुञ्जं सूक्ष्मरूपेण लीयमानम्, तथैव एतत्सर्वं पृथ्व्यादिकं स्वचित्त एवास्ति । एवमान्तर एव स्फोटो वाचकः, आन्तर एवार्थो वाच्य इत्युक्तं भवति ।

भाषाविज्ञानदृष्टया लोकेऽर्थावबोधकशब्दस्वरूपस्य, तद्वाच्यार्थस्य च विमर्शः

भाषातत्त्वस्य विश्लेषका वैज्ञानिकास्तु अर्थावबोधकशब्दस्य (भाषायाः) जनलोक एव प्रयोगमङ्गीकृत्य लोकप्रयुक्तं शब्दमेवार्थस्य स्फोटकं स्वीकुर्वन्ति । एवं तद्वाच्यार्थमपि लौकिकमेव स्वीकुर्वन्तीति "भाषाविज्ञानदृष्टया शब्दस्वरूपम्' इत्यत्र पूर्वमेव प्रतिपादितम् । यथा पातञ्जल**महाभाष्ये** "शवतिर्गतिकर्मा

शक्तिग्रहपूर्वकं कस्यार्थस्य बोधः स्यात् ? न च जातेर्नित्यत्वात्तत्र शक्तिग्रह इति वाच्यम्, अद्वैतिनां जातेरप्यनित्यत्वेन तस्या अपि केनचिद् वैदिकशब्देनैव ज्ञानपूर्वं ब्रह्मणा निर्माणे तत्र प्यस्या एव दुरवस्थायाः सत्त्वात्, निराश्रयजातिसत्त्वे मानाभावाच्च तद्व्यक्त्यवच्छिन्नब्रह्मसत्ताया जातित्वेऽप्यवच्छेदकाभावात्तस्यास्तदा जातित्वाभावात् ।"
—नागेशकृतवैयाकरणलघुसिद्धान्तमञ्जूषायां बौद्धार्थनिरूपणप्रकरणस्यान्ते इमानि **वाक्यानि** ।

कम्बोजेष्वेव भाषितो भवति, विकार एवैनमार्या भाषन्ते[1]" इत्येवमेकस्यैव शब्दस्य देशभेदेन वाच्यार्थान्तरं व्याख्यातम्, तथैव एतेऽपि "देशकालभेदेन[2] एक एव शब्दो वाच्यार्थान्तरं प्रपद्यते" इत्येवं मन्यन्ते । एवमेते बाह्यमेव शब्दमर्थस्फोटकम्, बाह्यमेव च अर्थं तद्वाच्यं स्वीकुर्वन्ति ।

वस्तुतस्तु केचिद् भाषाविज्ञानमूर्द्धन्याः, ये शब्दतत्त्वस्य दार्शनिकं स्वरूपं विदन्ति, ते रामादिशब्दस्य केवलं दशरथापत्यादिरूपं लौकिकमेवार्थं न स्वीकुर्वन्ति, किन्तु एकैकशब्दस्य वाच्यरूपेण यावानर्थो बहिर्दृश्यते, ततोऽप्यधिकोऽर्थो विद्यते । अयं विषयः पूर्वमेव प्रतिपादित इति पिष्टपेषणस्य नास्त्यावश्यकता । एवमेते बौद्धमेवार्थं वाच्यम्, बौद्धमेव च शब्दं वाचकं मन्यमानाः प्रतीयन्ते । परन्तु "लौकिको बाह्यः शब्दो बाह्यश्च अर्थ इत्युभौ सर्वथा वाच्यवाचकौ न स्तः" इत्येवं ते न स्वीकुर्वन्ति । प्रत्युत अपूर्णरूपेण प्रायः शुद्धरूपेण च बाह्यशब्दार्थयोः परस्परं वाच्यवाचकत्वमामनन्ति ।

परन्त्वेतेषां बौद्धपदार्थो नागेशोक्तबौद्धपदार्थविलक्षणः । रावर्टमहोदयः स्वग्रन्थे[2] बाइबिलग्रन्थस्योल्लेखात्[3] ईसाईधर्मानुसारिणां मते च पुनर्जन्माभावाद् वर्तमानकालिकजन्मनि बुद्धौ यो बाह्यार्थानां संस्कारः पतितः स बौद्धपदार्थः ।

सम्यक्तया पदार्थावबोधे निखिलसृष्टेर्ज्ञानमपेक्षितम् । आदमकालात् प्रारभ्याद्यावधि तस्यार्थस्य तस्मिन् काले किं स्वरूपम् ? तद्वाचकं च पदं किमासीत्, सम्प्रति च तस्य पदस्य तद्वाच्यार्थस्य च किं स्वरूपम् ? इत्येतत्सर्वम् ऐतिहासिकं तथ्यं ज्ञात्वा पदार्थः सम्यग्ज्ञायते । नागेशस्तु प्राक्कालिकेष्वनेकजन्मसु यद्वा सृष्टेरादौ प्रकृतिरूपायां बुद्धौ सूक्ष्मवासनारूपेण ये पदार्थाः स्थितास्ते बौद्धपदार्थाः ।

एवं मनोवैज्ञानिका अपि मनःस्थितमेवार्थं वाच्यं स्वीकुर्वन्तीति सद्यः प्रसूतो बालोऽपि जन्मान्तरानुभूतं मानसिकमेव किञ्चिदर्थमस्पष्टाक्षरेषु ब्रवीतीति बौद्धमेवार्थं वाच्यं मन्यन्ते[4] । प्रेङ्खशायी बालोऽपि कदाचिदकारणं हसति रोदिति चेति जन्मान्तरीयां स्मृतिमेवात्र कारणं मन्यन्ते विद्वांसः ।

१. "एतस्मिंश्चातिमहति शब्दस्य प्रयोगविषये ते शब्दास्तत्र तत्र नियतविषया दृश्यन्ते । तद् यथा शवतिर्गतिकर्मा कम्बोजेष्वेव भाषितो भवति, विकार एवैनमार्या भाषन्ते शव इति । हम्मतिः सुराष्ट्रेषु, रंहतिः प्राच्यमध्येषु, गमिमेव त्वार्याः प्रयुञ्जते । दातिर्लवनार्थे प्राच्येषु, दात्रमुदीच्येषु" ।
—पातञ्जलमहाभाष्ये, पस्पशाह्निके "सर्वे देशान्तरे" इति वार्त्तिकव्याख्यावसरे प्रोक्तम् ।

२. राबर्ट ए हाल जे आर कृते "लिंग्विष्टिक एण्ड योर लाङ्ग्वेज" इत्यस्मिन् ग्रन्थे "लाङ्ग्वेज डज नाट स्टे द सेम…" इति स्थले एतदीयोंऽशो द्रष्टव्यः ।

३. उपर्युक्ते ग्रन्थे "ओन लाङ्ग्वेज ओन वर्ल्ड' इति स्थले एतदीयोंऽशो द्रष्टव्यः ।

४. भारतीयमनोविज्ञानदृशा ।

अत्र युक्तायुक्तत्वविचारः

वस्तुतस्तु नैयायिक-मीमांसक-कौण्डभट्टादिमनीषिभिः, अधुनातनैर्भाषा-तत्त्वान्वेषिभिश्च लोके व्यवहाराय यत् तुरीयं शब्दतत्त्वमर्थविबोधकतया सिद्धान्तितम्, तस्मिन्नेवार्थबोधकत्वं नित्यानित्यत्वयोरुभयोरपि पक्षयोः सर्वैः स्वीकर्तुं स्वभावतः समापतति।

पदेषु वाक्येषु च वर्णपदयोर्भावाभावकल्पनाविषयं समादाय नैयायिक-कौण्डभट्टादिविदुषां परस्परं यथाकामं मतभेदो भवतु नाम, किन्तु तुरीयाया वाचोऽर्थविबोधकत्वस्वीकारे सर्वे एकमतयः प्रतीयन्ते। ये ये दोषा आभ्यन्तरस्फोटस्य वाचकत्वं मन्यमानैर्बाह्यस्फोटस्य वाचकत्वस्वीकारे आविष्कृतास्त एव दोषास्तत्पक्षेऽपि समापतन्ति। ध्वनीनामुच्चरितप्रध्वंसित्वेन यौगपद्यासम्भवात् तेषां सङ्घातरूपपदात्मकशब्दोपलब्धेरसम्भवाच्च प्रत्यक्षोपलभ्यमानस्य स्फोटस्य अर्थानवबोधकत्वं सिद्धान्तितम्। यया रीत्या मध्यमाया वाचः परिणामभूतायाः कण्ठताल्वादिव्यापारेण च अभिव्यक्ताया वैखर्याः क्षणिकत्वम्, तया रीत्या पराया वाचः परिणामभूतायाः वायुमाध्यमेन मूलाधारनाभिस्थानाभ्यां हृदयदेशं प्राप्ताया आभ्यन्तरस्फोटवादिना वाचकत्वेन स्वीक्रियमाणाया मध्यमाया वाचोऽपि क्षणावस्थायित्वं समापतति। किञ्च—

समाहितात्मनो ब्रह्मन् ब्रह्मणः परमेष्ठिनः।
हृद्याकाशादभून्नादो वृत्तिरोधाद् विभाव्यते॥
(अध्या० ६, श्लो० ३७)।

इत्येवं श्रीमद्भागवतस्य द्वादशस्कन्धानुसारेण मध्यमाया हृद्देशेऽभिव्यक्तिस्वीकारेऽपि समुत्पन्नविनाशित्वं प्रतीयते। यस्याभिव्यक्तिः समुत्पत्तिर्वा प्रतीयते, तस्य तिरोभावो विनाशो वा अवश्यं भाव्यः। तथा चोक्तं श्रीकृष्णेन **गीतायां** द्वितीयाध्याये—

जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च ॥ इति ॥ (२७)

तुरीयाया वाचः समुत्पत्तिः समभिव्यक्तिर्वा चेत्तर्हि तिरोभाव-विनाशावपि ध्रुवौ। एवं मध्यमाया वाचोऽपि प्रादुर्भावविनाशौ ध्रुवौ। मध्यमाया वाचोऽनित्यत्वे निष्पन्ने "एकैकवर्णेनोपरञ्जिता मध्यमा वागेवार्थबोधिका" इति वाचा विग्लापनमात्रं प्रतिभाति।

कर्णपिधाने सति मध्यमाख्यनादस्य सततं श्रवणात्तस्यानित्यत्वं स्थायित्वं वा वक्तुमशक्यम्। अत्र विनिगमकं यथा नदीप्रवाहः। गङ्गादिनदीषु यस्मिन् क्षणे यत्र यः प्रवाहः परिदृश्यते, अन्यस्मिन् क्षणे स एव प्रवाहः पुनर्नोपलभ्यते, किन्तु तत्र पूर्वस्माद् भिन्न एव प्रवाहः परिदृश्यते; एवं रीत्याऽस्मिन् क्षणे यो मध्यमानादः कर्णपिधाने सति श्रूयते, स एव नादः पुनरन्यस्मिन् क्षणे न श्रूयते; किन्तु तस्मादतिरिक्त एव। यथा घटपदे यस्मिन् क्षणे घकारः समभिव्यक्तः, तदव्यवहितोत्तरक्षणे स नष्टस्तिरोहितो वा सञ्जातः, टकरश्च समभिव्यक्तः समुत्पन्नो वा सञ्जातः। एवं यस्मिन् क्षणे घकारेणोपरञ्जितो यो मध्यमानाद इदानीं समभिव्यक्तः स एव नादो नदीप्रवाहवत् तदव्यवहितोत्तरक्षणे न समुपलभ्यते। यदि च नद्यां यः प्रवाहोऽत्र दृष्टः स एव प्रवाहोऽन्यस्मिन् क्षणे तत्र मा भूत्, तदन्यत्र स्थले तु समुपलभ्यते एव। एवं हृद्देशे यो मध्यमानादोऽस्मिन् क्षणे प्रादुर्भूतः स एव नादः पुनरन्यस्मिन् क्षणे हृदयाद् बहिर्देशावच्छिन्नाकाशे जलप्रवाहवत् कुत्रचित् स्यादेवेति मध्यमाया वाचो नित्यत्वं स्वीकार्यमिति चेत्तर्हि प्रत्यक्षोपलभ्यमानस्फोटस्य वाचकत्वस्वीकर्तुरपि तत्तुल्यमेव। कण्ठताल्वादिव्यापारेणाऽभिव्यक्तोऽकारादिवर्णो यस्मिन् क्षणे श्रोत्रदेशे श्रुतः, अपरस्मिन् क्षणे श्रोत्रादन्यत्र आकाशदेशे तत्सत्ता स्यादेवेति तस्या अपि नित्यत्वम्।

एवं स्वदोषानाविष्कारिणाऽऽभ्यन्तरस्फोटवादिना प्रत्यक्षोपलभ्यमानस्फोटस्य या अनित्यत्वरूपा असूया कृता, स दोषस्तत्पक्षेऽपि सूक्ष्मेक्षिकया प्रतिभाति। उभयोः पक्षयोर्दोषाणां तुल्यत्वस्य सत्त्वात् कस्यापि पक्षस्य न्यूनाधिक्याभावात् "कः शब्दोऽर्थविबोधकः ?" इति जिज्ञासा परिसमाप्तिं न याता। अत उभयोः पक्षयोर्गौरवलाघवे विचार्येते।

आभ्यन्तरस्फोटस्य वाचकत्ववादिमते १. प्रथमं मध्यमाया वाचो घटपटादिवैखरीरूपेण अभिव्यक्तिः, २. तदनन्तरं कर्णविवरमाध्यमेनान्तःकरणं प्रविष्टेन घटपटादिध्वनिना मध्यमाया उपरञ्जनत्वम्, ३. ततो मध्यमानदस्य घटपटादिरूपेण प्रतीतिः, ४. तत्पश्चाद् घटपटाद्यर्थावगतिः—इति चतस्रः क्रियाः समापतन्तीति महद् गौरवमनुभूयते। परन्तु घटपटाद्यखण्डस्फोटवादिनां मते तु 'बुद्धावव्यवहितोत्तरत्वसम्बन्धेन घवत्त्वं टकारे परिगृह्य घटादिपदज्ञाने जाते सति तत एव तद्वाच्यार्थबोध इति महल्लाघवं प्रतिभातीति अस्यैव वाचकत्वं स्वीकार्यम्। बाह्यस्फोटस्य केवलं लाघववशादेव वाचकत्वं न स्वीकार्यम्, अपि तु लोके तत एव पदार्थबोधो जायते" इत्येतावताऽपि स्वीकार्यम्। यतो हि डॉ० स्प्राउलेत्यादिनवीनविद्वद्भिः प्राचीनैश्च भारतीयमनीषिभिर्बुद्धौ मनसि वा तत्तद्विषयाणां तत्तदिन्द्रियद्वारेण संस्कारः[२] स्वीकृतः, न तु ते तत्तदिन्द्रियगृहीतविषयैर्हृद्याकाशे स्थितस्य कस्यचिद् विषयस्य संस्कारं प्रोक्तवन्तः। यथा रूपं चक्षुरिन्द्रियेण द्रुते

---

१. एवमव्यवहितोत्तरत्वसम्बन्धेन घवत्त्वं टकारे गृह्यते। एतादृशपदज्ञानकारणताया अविवादात्"।—कौण्डभट्टकृतवैयाकरणभूषणसारेऽखण्डस्फोटनिर्णयः।

२.　"चित्तद्रव्यं हि जतुवत् स्वभावात् कठिनात्मकम्।
तापकैर्विषयैर्योगे द्रवत्वं प्रतिपद्यते ॥ ४ ॥
कामक्रोधभयस्नेहहर्षशोकदयादयः।
तापकाश्चित्तजतुनस्तच्छान्तौ कठिनं तु तत् ॥ ५ ॥
द्रुते चित्ते विनिक्षिप्तस्वाकारो यस्तु वस्तुना।
संस्कारवासनाभावभावनाशब्दभागसौ ॥ ६ ॥

चित्ते प्रविश्य संस्कारं भजते, तथैव शब्दोऽपि श्रोत्रेन्द्रियेणान्तः प्रविश्य द्रुतं चित्तं संस्करोति, न तु मध्यमां वाचम् । तस्मात् कादिवर्णानां नित्यत्वम् अनित्यत्वं वा स्याद्, उभयथा लोके घटपटादिशब्दानामर्थविबोधकत्वं विश्वासपदवीं समारोहति ।

यद्यपि शब्दानित्यत्वपक्षे घटपटादिशब्दैः कम्बुग्रीवादिरूपाद्यर्थस्यावगतिरसम्भाव्या, विद्यमानस्य शब्दस्यार्थप्रत्यायकत्वात्; तथाऽपि श्रोत्रेन्द्रियद्वारा तेषां यत् प्रतिबिम्बं[1] संस्कारो[2] वा चित्ते समापतितः, तत्तु विम्बे नष्टेऽपि समवशिष्यते । यथा सूर्यमभिनेत्रं कृत्वा दीर्घकालं प्रेक्षणानन्तरं तद्विपरीतदिशायां मुखे कृते सति चक्षुषा सूर्यरश्मिसंयोगाभावेऽपि यद् रश्मिजन्यं चाकचिक्यरूपप्रतिबम्बं तत् किञ्चित् कालं स्थिरमेवानुभूयते । अतो यावत्कालं चाकचिक्यम्, तावत्कालम् अन्यद्वस्तु नेत्रयोर्न प्रतिभाति । एवं रीत्या इन्द्रिजन्यप्रत्यक्षविषयीभूतपदार्थाः ज्ञानेन्द्रियाण्येवं प्रभावयन्ति येन तेषामनुपस्थितावपि प्रत्यक्षवत् प्रतीतिर्जायते । पाश्चात्यदार्शनिकानामाप्तभूतस्य अरस्तू[3]महोदयस्यापि समनुभूतिः, न केवलम-

---

शिथिलीभावमात्रं तु मनो गच्छत्यतापकैः ।
न तत्र वस्तु विशति वासनात्वेन किञ्चन ॥ ७ ॥
द्रुतायां प्रविष्टं सद् यत् काठिन्यदशां गतम् ।
चेतः पुनर्द्रुतौ सत्यामपि तन्नैव मुञ्चति" ॥ ८ ॥

—श्रीमधसूदनसरस्वतीकृतभक्तिरसायने प्रथमोल्लासः ।

१, २. द्रुतायां प्रविष्टं सद् यत्काठिन्यदशां गतम् ।
चेतः पुनर्द्रुतौ सत्यामपि तन्नैव मुञ्चति ॥ ८ ॥
वाह्यपिण्डस्य नाशेऽपि तिष्ठत्येव मनोमयः ।
अतः स्थायीति विद्वद्भिरयमेव निरूपितः ॥ २८ ॥

चित्तद्रुतौ भवति वासना, शिथिलीभावे तु वासनाभास इत्यत्र विनिगमकमाह-द्रुतायाम् = द्रवावस्थायां भूतायां प्रविष्टहिंगुलादिरङ्गस्य जतुनः पुनः काठिन्यापनयनेन काष्ठादिसंयोगे जायमाने यथा स एव रङ्गः प्रतिभासते । शैथिल्यावस्थाप्रविष्टस्तु रङ्गो न तथा । एवं द्रवावस्थे चेतसि यद्वस्तु स्वरूपं प्रविष्टं सत् काठिन्यदशापर्यन्तं स्थितं तत्पुनर्द्रवीभावान्तरेण विषयान्तरे गृह्यमाणेऽपि प्रकाशमानत्वाच्चेतसा न त्यज्यते । शैथिल्यावस्थाप्रविष्टं तु काठिन्यावस्थापर्यन्तं न तिष्ठति, तिष्ठद् वा विषयान्तरग्रहणसमये चित्तेन त्यज्यते इति स वासनाभास इत्यर्थः" ।

—श्रीमधुसूदनसरस्वतीकृते भक्तिरसायने प्रथमोल्लासः ।

एवं येन शब्देन चित्तद्रव्यं पूर्णरूपेण द्रवीभूतम्, तस्य शब्दस्य प्रगाढः संस्कारः, येन शब्देन च शैथिल्यमात्रं चित्ते जायते तस्य शब्दस्य आभासमात्रं चित्ते संस्कारो जायते इति समूहनीयम् ।

३. "पश्चाद्बिम्ब—अरस्तू पश्चाद् बिम्ब की घटना से परिचित था, इसी के ज्ञान के आधार पर उसने कल्पना, स्मृति, स्वप्न आदि की क्रियाओं को समझाया है । पश्चाद् बिम्ब

स्माकमेव दार्शनिकानाम् । श्रोत्रेन्द्रियविषयभूतशब्दस्याभावेऽपि श्रोत्रेन्द्रियद्वारा तस्य यत् प्रतिबिम्बं चित्ते समापतितम्, तस्मादेवार्थबोधः । शब्दनित्यत्वपक्षे तु कण्ठताल्वादिव्यापारेण समभिव्यक्तः श्रोत्रेन्द्रियेण ज्ञानकेन्द्रं मस्तकं प्रविश्य तत्र स्थिरो जायते, तत्रैव च उच्चरितवर्णानां पूर्वापरत्वयोरवधारणात् तयोः (पूर्वापरत्वयोः) आधारो ज्ञानं (बुद्धिः) निश्चीयते ।

मनोबुद्धिचित्ताहङ्कारा एकस्यैवान्तःकरणतत्त्वस्य भेदाः । सङ्कल्पविकल्परूपसंशये सति मनः, निश्चये सति बुद्धिः, स्मृतौ सत्यां चित्तम्, गर्वे सति च अहङ्कार इति संज्ञाचतुष्टयमन्तःकरणतत्त्वं लभते । यद्यपि बुद्धेः परिणामितया तत्र वर्णानां पौर्वापर्यज्ञानं दुर्लभम्, तथाऽपि चिवृत्तिरात्माधीना, यावन्तं कालं यं विषयं प्रत्यक्षीकर्तुं वाञ्छति, तावन्तं कालं चित्तवृत्तिस्तद्रूपेण स्थिरतां भजते । यतो हि यावत्कालं यस्य विषयस्य प्रत्यक्षमनुभूयते, तावत्कालं तद्भिन्नविषयस्य प्रत्यक्षं न जायते ।

वस्तुतस्तु आधुनिकवैज्ञानिकाः "कस्यचित् पदार्थस्य न कोऽप्यंशश्चक्षुरिन्द्रियपर्यन्तं समागच्छति, न वा किमपीन्द्रियं विषयदेशं गच्छति" इति मन्यन्ते । रूपादिविषयग्राहकचक्षुरादीन्द्रियाणां मध्ये प्रत्येकं ज्ञानेन्द्रियस्य केन्द्रस्थानं मस्तके निर्मितं विद्यते । प्रकाशस्तत्तत्पदार्थस्य प्रतिबिम्बं गृहीत्वा चक्षुरिन्द्रियं प्रापयति । प्रकाशमाध्यमेन चक्षुरिन्द्रियं प्राप्तं तत्तत्पदार्थस्य प्रतिबिम्बं चक्षुरिन्द्रियतन्त्रिकामाध्यमेन मस्तकस्थं चक्षुःकेन्द्रं गच्छति, तदनन्तरं नीलपीतादिरूपज्ञानं जायते । अनेनैव क्रमेण रसादीनामपि ज्ञानं तत्तदिन्द्रियैर्जायते । एवमाधुनिकानां मतानुसारेण बुद्धिदेश एव तत्तदिन्द्रियद्वारा विषयाणां ज्ञानस्य जायमानत्वाच्छब्दोऽपि बुद्धिदेश एव प्रत्यक्षीक्रियते । अयं विषयः पूर्वं "भौतिकविज्ञानदृष्ट्या शब्दस्वरूपम्" इत्यत्र प्रतिपादितम् । तस्य स्पष्टार्थमत्र विशदरूपेण व्याख्यायते । घटादिशब्दघटकघकारादिध्वनयो येन क्रमेण श्रोत्रेन्द्रियेण गृह्यन्ते, तेनैव क्रमेण बुद्धिस्थश्रवणकेन्द्रेऽङ्किताः प्रतिबिम्बिता वा जायन्ते । तत्रैव च घटादिशब्दावयवघकारादिवर्णानां पौर्वापर्यज्ञानं सुलभम् ।

एवं रीत्या ये घटपटादिशब्दैः श्रोत्रादिषु संस्कारं मन्यन्ते । तद्यथा प्रोक्तं **वाक्यपदीयस्य** ब्रह्मकाण्डे—

इन्द्रियस्यैव संस्कारः शब्दस्यैवोभयस्य वा ।
क्रियते ध्वनिभिर्वादास्त्रयोऽभिव्यक्तिवादिनाम् ॥ ७८ ॥

का विवरण उसने इतने स्पष्ट शब्दों में दिया है कि उसे और कुछ समझा ही नहीं जा सकता । वह कहता है कि ऐन्द्रिक प्रत्यक्ष की वस्तुयें ज्ञानेन्द्रियों को इस प्रकार प्रभावित करती हैं कि उनके प्रभाव न केवल प्रत्यक्ष के समय विद्यमान रहते हैं, बल्कि वस्तुओं के हट जाने पर भी रहते हैं" । —डी सीम्नस ४६० बी, १०, ४५९ए, २५ ।

ले॰ शिवानन्द शर्मा एम॰ ए॰—अरस्तु—पृ॰ ९५, ९६ ।

स्फोटाभिव्यक्तिवादिनां शब्दाभिव्यक्तिविषये त्रयो वादाः सन्ति, ते यथा—केषाञ्चिन्मते ध्वनिभिरिन्द्रियस्य, केषाञ्चिन्मते शब्दस्य, अन्येषां मते च तदुभयस्य संस्कारः क्रियते इति; तन्न समीचीनम्; बुद्धावेव तेषां संस्कारस्य जननात्। तथा च प्रोक्तम्—

नादैराहितबीजायामन्त्येन ध्वनिना सह।
आवृत्तपरिपाकायां बुद्धौ शब्दोऽवधार्यते ॥ ८४ ॥
(वा० प०, ब्रह्म० का०)

नादैः पूर्वपूर्वध्वनिभिराहितबीजायाम् = आहितं समर्पितं [बीजं संस्कारो भावना वा यस्यां सा तस्याम्। आवृतपरिपाकायाम् = आवृत्तोऽभ्यस्तः परिपाकः = अवधारणविषयीभूतस्य रागादिकषायस्य परिपाकः परिपाचनम्, प्रक्षालनं वा यस्यामिति सा तस्यां बुद्धौ अन्त्येन ध्वनिना सह शब्दोऽवधार्यते। अत एव "परः सन्निकर्षः संहिता" (१।४।१०८) इत्यस्मिन् सूत्रे "उच्चरितप्रध्वंसिनः खल्वपि वर्णाः। उच्चरितः प्रध्वस्तः; अथापरः प्रयुज्यते, न वर्णो वर्णस्य सहायः। उच्चरितप्रध्वंसिनां वर्णानां पौर्वापर्याभावात् तेषां संहिता न भवतीत्याशंक्य—

"बुद्धौ कृत्वा सर्वाश्चेष्टाः कर्ता धीरस्तन्वन्नीतिः।
शब्देनार्थान् वाच्यान् दृष्ट्वा बुद्धौ कुर्यात् पौर्वापर्यम्॥

बुद्धिविषयमेव पौर्वापर्यम्। इह य एष मनुष्यः प्रेक्षापूर्वकारी भवति, स पश्यत्यस्मिन्नर्थेऽयं शब्दः प्रयोक्तव्यः, अस्मिंस्तावच्छब्देऽयं तावद्वर्णस्ततोऽयं ततोऽयमिति"—इत्येवं समाहितम्। उच्चरितप्रध्वंसिनां बुद्धौ वर्णानां पौर्वापर्यसम्भवात् तेषां पदत्वकल्पना सम्भवति। ततश्च तेषां वाचकत्वमपि (बोधजनकत्वरूपशक्त्याश्रयत्वमपि) सुतरां समायाति। यथा कपालद्वयनिर्मितो घटः कपालद्वयभिन्नः, एवं बुद्धौ घकारादिध्वनिना संस्कारे सति तत्राभिव्यक्तो घटादिशब्दोऽपि घादिध्वनिभिन्नः।

श्रोत्रेन्द्रियेण गृहीतो घटपटादिशब्दो बुद्धिपटले कथं स्थायिभावं प्राप्नोतीति दृष्टान्तद्वारा प्रतिपाद्यते—

यथा कर्गलपत्रे लिपिबद्धानि वाक्यानि युगपदेव चक्षुषा द्रष्टुं पठितुं वा न शक्यन्ते, किन्तु क्रमश एव। लिपिबद्धे "कमलं शोभते" इति वाक्ये कमलशब्दो यदा चक्षुषा प्रत्यक्षीक्रियते, तदा लिपिबद्धः "शोभते" इति शब्दो न दृश्यते, यदा च "शोभते" इति शब्दो दृश्यते, तस्मिन् क्षणे "कमलम्" इति शब्दो न ज्ञायते। लिपिबद्धस्य "कमलं शोभते" इति वाक्यघटकस्य कमलशब्दस्य चाक्षुषप्रत्यक्षवेलायां "शोभते' शब्दस्य प्रत्यक्षाभावात् "शोभते शब्दो न विद्यते" इति तु वक्तुं न युज्यते, किन्तु विद्यते, चक्षुरिन्द्रियेण संयोगाभावाच्च न दृश्यते। एवमुच्चरितः कमलेत्यादिशब्दः श्रोत्रेन्द्रियेण बुद्धिदेशं प्राप्य तत्र अङ्कितः प्रतिबिम्बितो वा जायते। बुद्धिपटलेऽङ्कितस्य कमलेत्यादिशब्दघटकस्य कध्वनेर्मानसचक्षुषा दर्शनं

जायते, तस्मिन् क्षणे म-ल-ध्वन्योर्ज्ञानं न भवति, कध्वनिज्ञानाव्यवहितोत्तरं लिपिबद्धस्य म-ध्वनेर्मनसि प्रत्यक्षवेलायाञ्च क-ल-ध्वन्योर्ज्ञानं न जायते। एवं लध्वनेरपि वेदितव्यम्। बुद्धिपटलेऽङ्कितस्य कमलशब्दावयवककारस्य प्रत्यक्षवेलायां मध्वनेः प्रत्यक्षाभावात् 'स मध्वनिर्बुद्धिपटले न विद्यते" इति वक्तुं न युज्यते, किन्तु विद्यते। मानस-म-ध्वनिना सह मानसश्रोत्रसंयोगाभावान्न दृश्यते। एवं दृष्टान्तदार्ष्टान्तिकयोः समन्वयः।

अत्रायं निष्कर्षः—पूर्वपूर्वध्वनिसंस्कारसहकृतचरमध्वनिनाऽर्थबोधस्यानुभवसिद्धत्वं सार्वजनीनम्। स चायं संस्कारो बुद्धावेव।

आधुनिकप्रक्रियाद्वारा बुद्धौ ध्वनेः स्थायिकरणत्वप्रतिपादनम्

घकाराद्यवयवघटपटादिशब्देषु येन क्रमेण घकारादयः समुच्चार्यन्ते, तेनैव क्रमेण धातुनिर्मिते जडात्मकेऽपि ध्वन्यभिलेखनयन्त्रे[1] घकारादिध्वनीनामङ्कनं स्थायित्वं[2] वा दृश्यते, तर्हि समुच्चरितानां तेषां चेतनवत्यां बुद्धौ पूर्वपूर्वध्वनिक्रमेण कथं नाङ्कनं स्यात्!

ध्वन्यभिलेखनयन्त्रे[3] ध्वनेः स्थायित्वकरणविधिः

मुखाद् यद्वा कुतश्चिन्निःसृता ध्वनितरङ्गा यदा तनुपटे निपतन्ति, तदा तनुपटोऽपि ध्वन्यनुरूपेण स्पन्दते। ध्वन्यनुरूपपरिकम्पितश्च तनुपटोऽपि वायौ ध्वन्यनुरूपमेव तरङ्गं समुत्पादयति। पुनश्च स एव ध्वनिः श्रूयते, यः पूर्वं वक्तुर्मुखान्निःसृतः। ध्वन्यभिलेखनयन्त्रनिर्माणस्यायमेवाधारः।

अद्यत्वे वक्तुर्मुखान्निःसृता ध्वनयो ध्वन्यभिलेखनयन्त्रस्य परिवृत्तात्मके मण्डलके[4] लिपिरूपेण स्थायिनः क्रियन्ते। तनुपटेन संश्लिष्टा एका सूचिका मण्डलकं संस्पृशति। ध्वन्यभिलेखनक्षणे मण्डलकं[5] क्रमशः शनैः शनैः परिभ्राम्यते। ध्वन्यभिलेखनयन्त्रस्थस्य तनुपटस्य पुरः सरसि गायकेन, यद्वा वक्त्रा, गीतं वाक्यं वा समुच्चार्यते। तदा तनुपटोऽपि ध्वन्यनुरूपं परिस्पन्दनं कुरुते। ततस्तनुपटसंश्लिष्टसूचिकाऽपि ध्वन्यनुरूपपरिकम्पिततनुपटस्पन्दनानुरूपेण क्षुभ्यमाणा परिभ्राम्यमाणे मण्डलके ध्वन्यनुरूपमुच्चावचं वक्त्राकृतिकं गर्तं क्रमेण निर्माति, इत्थं ध्वन्यभिलेखनयन्त्रे ध्वनयः स्थायिभावमापद्यन्ते[6]। एवमन्तःकरणे मस्तके वा बुद्धिनामक एको

1. Into The Gramophone.
2. Recording.
3. Method of the Sounds recarding in to the Gramophone.
4. Into the Record.
5. Record.
६. ध्वनेः स्थायित्वकरणस्यायं विधिः के० पी० घोष कृत-माध्यमिकभौतिकी (भाग २) ग्रन्थानुसारेण व्याख्यातः। तत्र ग्रन्थे ६३तमे पृष्ठे द्रष्टव्यः।

द्रवात्मकः पदार्थो विद्यते । येन क्रमेण घकारादिध्वनयः श्रोत्रेन्द्रियस्य तरलपरिपूरिततृतीयभागस्थं श्रवणतन्त्रिकातन्त्रं प्रकम्पयन्ति, तेनैव क्रमेण बुद्धावपि प्रथमं घध्वनिः, ततो टध्वनिः—इत्यव्यवहितोत्तरत्वेन बुद्धाववधार्यन्ते, स्थायिभावमापन्नाश्च जायन्ते । तदन्तरं घकार-टकारविलक्षणौ घटशब्दौ बुद्ध्येते ।

भक्तप्रवराः श्रीमधुसूदनाचार्यास्तु बुद्धेर्जतुना सहोपमां दत्तवन्तः । तथा चोक्तं **भक्तिरसायनस्य** प्रथमोल्लासे—

चित्तद्रव्यं हि जतुवत् स्वभावात् कठिनात्मकम् ।
तापकैर्विषयैर्योगे द्रवत्वं प्रतिपद्यते ॥

चित्तनामकं द्रव्यं स्वभावतो जतुवत् कठिनात्मकं विद्यते । अग्नितापसंयोगेन यथा जतुपदार्थो द्रवीभावमापद्यते, तथैव तापकैर्विषयैः सह चित्तस्य संयोगे सति तस्मिन् द्रवत्वं समायाति । मनोबुद्धिचित्ताहङ्कारेषु परस्परं कोऽपि तात्त्विको भेदो न विद्यते । सर्वप्रथमं घटादिशब्दघटकैर्घकारादिपूर्वपूर्वध्वनिभिर्बुद्धिरूपजतुपदार्थस्य घटशब्दभिन्नशब्दप्रत्यक्षावरणभङ्गरूपपरिपाकः क्रियते । यदा च बुद्धौ घटशब्दभिन्नशब्दविषयकप्रत्यक्षावरणस्य भङ्गः सञ्जायते, तदा घटशब्दघटकघकारादिध्वनीनां क्रमशो बीजमाधीयते । यस्मिंश्च क्षणे कण्ठताल्वादिव्यापारेणाभिव्यक्तस्य टकाराव्यवहितोत्तरस्यान्तिमस्याकारस्य बीजं संस्कारो बुद्धावाधीयते तदा स घटशब्दः प्रत्यक्षतामापद्यते । एवमन्येषामपि शब्दानां विषये समूहनीयम् । उपलब्धिक्रमेण क्रमवन्तो ध्वनयः प्रतीताः पश्चाद् युगपत् स्मर्यमाणा अपि तत्क्रमेण स्मर्यन्ते । एवं सरो रस इत्यादावविशेषप्रसङ्गोऽपि न शङ्कनीयः । यतो हीदं बुद्धितत्त्वं रामादिशब्दान्त्यवर्णविषये प्रत्यक्षरूपम्, पूर्वेषु चातीतेषु स्मृतिरूपमिति प्रत्यक्षात्मकं स्मरणात्मकञ्च चित्ररूपं बुद्धितत्त्वं विद्यते । तथा चोक्तं **श्लोकवार्त्तिके**—

"चित्ररूपाञ्च तां बुद्धिं सदसद्वर्णगोचराम्" । (स्फो० १११) इति ।

तया बुद्ध्या गौरित्येवं गकारादिविलक्षणं शब्दान्तरं प्रत्यक्षमवगम्यते ।

यथा कण्ठताल्वादिव्यापारेणाभिव्यक्ता ध्वनय एव ध्वन्यभिलेखनयन्त्रे स्थायिनः क्रियन्ते, न तु ध्वन्यभिव्यक्तमध्यमास्फोटः । तत्र च स्थायिभूता ध्वनय एव वायुविद्युदादिसाहाय्येन यस्मिन् कस्मिन्नपि क्षणेऽभिव्यज्यन्ते, श्रोतृभिश्च श्रूयन्ते । तत्र यन्त्रे यस्य ध्वनेः संस्कारो न सञ्जातस्तस्याभिव्यक्तिः श्रुतिर्वा न कदापि सम्भाव्यते । एवं रीत्या लोके श्रोत्रेन्द्रियेण गृहीतो यो ध्वनिर्बुद्धिमुपारूढः स एव स्थायिभावमापन्नः सन् यथेच्छ पुनरुच्चार्यते । यस्य ध्वनेर्बुद्धौ न कदाऽपि संस्कारस्तस्योच्चारणं कथमपि केनापि कर्तुं न पार्यते । यया रीत्या बहिर्देशे ग्रन्थेषु लिखितान् शब्दाँश्चक्षुषा दृष्ट्वा तेषामुच्चारणं क्रियते, एवं रीत्या श्रोत्रेन्द्रियमाध्यमेन नानाचित्रात्मिकायां बुद्धौ समुल्लिखितान् शब्दान् दर्शंदर्शं वाचयामः । न च श्रोत्रेन्द्रियमाध्यमेन बुद्धिदेशं गतत्वाद् वैखर्यात्मको बाह्यस्फोटोऽपि बौद्धः । तथा च बुद्धिदेशावच्छिन्नेनैव शब्देनार्थप्रतीतिरिति बाह्यस्फोटस्यापि बुद्धिदेशस्थत्वाद्

आभ्यन्तरेणैव स्फोटेन लोकेऽर्थप्रतीतिः, न तु बाह्यस्फोटेन । न बाह्यस्फोटो नाम किमपि तत्त्वमिति चेन्न ? उभयोर्भेदस्य सत्त्वात् । अर्थावबोधनसामर्थ्यविशिष्टशब्दस्य श्रोत्रेन्द्रियेण सह संयोगात्पूर्वं यो बुद्धिरूपदेशावच्छिन्नोऽनाहतनादः सः आभ्यन्तरः स्फोटः । भवतां मते तेनैव च लोकेऽर्थबोधः । किञ्चिद् विवक्षया कण्ठताल्वादिव्यापारेण व्यक्तस्य यस्य शब्दस्य श्रोत्रेन्द्रियद्वारा वर्णपदवाक्यरूपेण बुद्धावधारणं स बाह्यस्फोटः, लोके च अनेनैव स्फोटेनार्थोऽवबुद्ध्यते । अयञ्च बाह्यस्फोटाख्यो वैखरीशब्दो वाचिकादिभेदेन त्रिविधः—इति अस्य परिच्छेदस्यान्ते स्पष्टीकरिष्यते ।

शब्दनित्यतायाः शास्त्रीयो विचारः

वस्तुतस्तु अस्यापि वैखर्यात्मकस्य पदवाक्यात्मकस्य शब्दस्य नित्यता सर्वैर्वैयाकरणैः स्वीक्रियते । अत एव "षष्ठी स्थाने योगा" (१. १. ४९) इति पाणिनीयसूत्रस्य व्याख्यावसरे "इको यण्" (६/१/७७) इत्यादेरच्परयकारघटितशब्दस्यार्थबोधनाय प्रसङ्गे तत्परयकारघटितः प्रयोक्तव्य इत्यर्थः । "एरुः" (३/४/८६) 'तेस्तुः' इति । अतो न शब्दनित्यताहानिः । किञ्च "इकारबुद्धिप्रसंगे यकारबुद्धिरित्यर्थः" इत्येवं नागेशेन **लघुशब्देन्दुशेखरे** संज्ञाप्रकरणे प्रतिपादितम् । अतएव भगवान् पतञ्जलिरपि "एरुः" (३/४/८६) इत्यादौ शब्दानित्यत्ववारणाय "दाधा ध्वदाप्" (१, १. १९) इति सूत्रे—

सर्वे सर्वपदादेशाः दाक्षीपुत्रस्य पाणिनेः ।
एकदेशविकारे हि नित्यत्वं नोपपद्यते ॥

इत्येवं स्वकण्ठरवेण भाष्यञ्चकार । यत्र "सुधी + उपास्यः" इत्येवं बुद्धिर्वर्तते, तत्र "सुध्युपास्यः" इत्येवं बुद्धिः कर्तव्या । यद्वा 'सुधी + उपास्यः' इत्युच्चारणप्रसंगे 'सुध्युपास्यः' इत्युच्चारणीयम्, न तु सुधीघटकेकारो यकारादेशेन विक्रियते । तथा सति शब्दनित्यताहानिः स्यादित्यत्रैव भगवतः पाणिनेराचार्यस्य स्वारस्यम् । अतएव "एकदेशविकारे हि नित्यत्वं नोपपद्यते" इत्युक्तम् । नित्येषु शब्देषु अकारादयो वर्णाः संसर्गपरिणामध्वंसेति त्रिविधानित्यतारहिताः । ह्रस्वोऽकारः सर्वदा सर्वत्र मात्रात्मके स्वस्वरूपे एव स्थितो भवति । एवमन्येऽपि वर्णस्फोटाः । द्रुतादिवृत्तिभिः तत्स्वरूपे न कदापि विकृतिः समायाति । अकाराद्यात्मकः स्फोटस्तावानेव तिष्ठति । उक्तञ्च "तपरस्तत्कालस्य" (१. १. ७०) इति पाणिनीयसूत्रे पातञ्जल**महाभाष्ये**—

"भेर्याहन्ता भेरीमाहत्य कश्चिद् विंशति पदानि, कश्चित्त्रिंशत् पदानि गच्छति स्फोटस्तावानेव" इति ।

महाभाष्यस्य पस्पशाह्निके "सिद्धे शब्दार्थसम्बन्धे" इति वार्त्तिके नित्यपर्यायवाचिनः सिद्धशब्दस्य ग्रहणं प्रतिपादयन् "ध्रुवं कूटस्थमविचाल्यनपायोपजनविकार्यनुत्पत्त्यवृद्ध्यव्ययोगि यत्तन्नित्यम्" इति नित्यस्य लक्षणं व्याख्यातवान् ।

अनित्यता त्रिविधा—१. संसर्गानित्यता—तद्यथा स्फटिकस्य लाक्षाद्युपधाने स्वरूपतिरोधानेन पररूपभासः। २. परिणामानित्यता—बदरीफलस्य श्यामतातिरोधाने लौहित्यस्याविर्भावः। ३. ध्वंसानित्यता—सर्वात्मना नाशः। तत्र नित्यलक्षणे ध्रुवं कूटस्थमिति पदाभ्यां संसर्गानित्यता अपहृता। अविचालीत्यनेन परिणामानित्यता, अनपायेत्यादिना च प्रध्वंसानित्यता परिहृते। तत्र सिद्धशब्दस्य बह्वोऽर्थाः प्रदर्शिताः पूर्वपक्षिणा, उक्तञ्च - "अयं खलु नित्यशब्दः आभीक्ष्ण्येऽपि वर्तते, तद्यथा—नित्यप्रहसितो नित्यप्रजल्पित इति। सिद्धशब्दो विकृत्यर्थेऽपि दृश्यते—सिद्ध ओदनः इत्यादीन्युदाहरणानि च। तत्रोत्तरपक्षिणा "व्याख्यानतो विशेषप्रतिपत्तिर्नहि सन्देहादलक्षणम्" इति परिभाषया नित्यपर्यायवाचिनः सिद्धशब्दस्य ग्रहणमित्येवं समाहितम्। अर्थवति शब्दे अर्थे च तयोश्च सम्बन्धे सिद्धे (नित्ये) सति इदं व्याकरणशास्त्रं प्रवृत्तमिति वार्त्तिकस्य स्वारस्यम्। तत्र शब्दब्रह्मणोर्विषये इदमेव ध्रुवं कूटस्थमिति नित्यलक्षणम्। स च सिद्धशब्दः मंगलार्थः सन् नित्यार्थवाचकः। पदार्थविषये च "यस्मिंस्तत्त्वं न विहन्यते तदपि नित्यम्" इत्येवं प्रवाहनित्यता स्वीकृता भगवता पतञ्जलिना। यस्मिन् विहतेऽपि तद्वृत्तिधर्मो न नश्यतीति प्रवाहनित्यता चानेनोक्ता। तन्नाशेऽपि तद्धर्मो न नश्यति, आश्रयप्रवाहाविच्छेदादिति भावः। तत्र ध्रुवं कूटस्थमित्यादि नित्यलक्षणमकारादिवर्णविषये सङ्घटते। यथा आकाशं त्रिविधानित्यतारहितम्, आकाशस्योपरि कस्यचित् पदार्थस्य संसर्गेण न कोऽपि प्रभावः, न वा परिणामः, न वा प्रध्वंसः; तथैवाकारादिवर्णस्फोटविषयेऽवगन्तव्यम्।

यत्तु नागेशेन **वैयाकरणलघुसिद्धान्तमञ्जूषायां** शक्त्याश्रयनिरूपणे वर्णानां क्षणावस्थायित्वम्, यच्च "परः संनिकर्षः संहिता" (१. ४. १०८) इति पाणिनीयसूत्रस्य महाभाष्ये उच्चरितप्रध्वंसित्वं तेषां प्रतिपादितम्, तत्तु वर्णानामभिव्यक्तिविषय एव प्रध्वंसित्वं प्रतिपादितम्। अन्यथा पूर्वापरविरोधापत्तिः।

अकारादयो वर्णस्फोटा यद्यपि नित्याः, सर्वत्र व्याप्ताः, तथापि तेषामभिव्यक्तिः कण्ठताल्वादिव्यापारेण, यद्वा यान्त्रिकक्रियादिभिरेव सम्भवति, नान्यथा। यथा अरणिस्थं ज्योतिः अरणौ सर्वावयवावच्छेदेन व्याप्तम्, किन्तु न दृश्यते, दृश्यते च अरणिमन्थनादिनाऽभिव्यक्तौ सत्याम्। तथैव अकारादिवर्णविषये बोध्यम्। एवञ्च, वर्णाभिव्यक्तिजनककण्ठताल्वादिव्यापाराणामेवानित्यता, न तु अकारादिवर्णस्फोटानाम्। "उच्चरितप्रध्वंसिनः" इत्यत्र बहुव्रीहिसमासः। उच्चरितमित्यत्र नपुंसके भावे क्तप्रत्ययः। उच्चरितम् = उच्चारणम् प्रध्वंसि येषां ते उच्चरितप्रध्वंसिनो वर्णाः। अमुमेवोच्चारणविषयमादाय नैयायिकाः शब्दमनित्यं प्रवदन्ति। वस्तुतस्तु प्रवाहनित्यता उच्चारणेष्वस्त्येव। तस्माद् वर्णाभिव्यक्तीनामपि प्रवाहनित्यताऽङ्गीकार्या। यतोहि उच्चारणे नष्टेऽपि तत्त्वं न विहन्यते।

यत्तु पातञ्जलमहाभाष्यस्य पस्पशाह्निके—

चत्वारि शृङ्गा त्रयो अस्य पादा
द्वे शीर्षे सप्तहस्तासो अस्य।
त्रिधा बद्धो वृषभो रोरवीति,
महो देवो मर्त्यां आविवेश॥

इति ऋङ्मन्त्रे "द्वे शीर्षे" इत्यस्य "द्वौ शब्दात्मानौ—नित्यः कार्यश्च" इत्येवं भगवान् पतञ्जलिर्भाष्यं कृतवान्। अस्य **महाभाष्यस्य** प्रदीपाख्यटीकायां कैयटः—"नित्यः = व्यङ्ग्यः, कार्यश्च व्यञ्जकः"—इत्येवं नित्यकार्यशब्दयोर्व्याख्यां कृतवान्। नागेशश्च "व्यङ्ग्यः = आन्तरः स्फोटः, व्यञ्जको वैखरीरूपः" इत्येवं व्यङ्ग्यव्यञ्जकशब्दम् उद्द्योताख्यटीकायां स्पष्टीचकार। तत्तु न समीचीनम्। नित्यकार्यशब्दयोरेवं व्याख्याने वैखर्यात्मकस्य साधुशब्दस्यानित्यत्वापत्तेः, पूर्वापरभाष्यविरोधापत्तेश्च। 'एङः' (३।४।८६) इति सूत्रस्य महाभाष्ये शब्दानित्यत्ववारणाय "सर्वे सर्वपदादेशाः"—इत्येवं व्याख्यानं कृत्वा सन्धिस्थले यद्वा आगमादेशस्थले बुद्धिविपरिणामं बोधयामास, न तु वर्णविपरिणामम्। तथा च **महाभाष्यस्य** पस्पशाह्निके—"लोकतः" इत्यत्रत्यमपि भाष्यं विरुणद्धि। तत्र हि एवमुक्तम्—"लोकतः" इति। यल्लोकेऽर्थमुपादाय शब्दान् प्रयुञ्जते, नैषां निवृत्तौ यत्नं कुर्वन्ति। ये पुनः कार्याभावाः निर्वृतौ तावत्तेषां यत्नः क्रियते। तद्यथा—घटेन कार्यं करिष्यन् कुम्भकारकुलं गत्वा आह—"कुरु घटम्, कार्यमनेन करिष्यामी"ति। न तद्वच्छब्दान् प्रयुयुक्षमाणो वैयाकरणकुलं गत्वा आह—'कुरु शब्दान्, प्रयोक्ष्ये' इति। तावत्येवार्थमुपादाय शब्दान् प्रयुञ्जते"। इति।

लोके तावत् वैखर्यात्मकस्यैव साधुशब्दस्य प्रयोगः क्रियते। "द्वौ शब्दात्मानौ नित्यः कार्यश्च" इति भगवतः पतञ्जलेर्भाष्यस्य नागेशरीत्या व्याख्याने पूर्वापरभाष्यविरोधः सुतरां दृष्टिपथं समायाति। अतः "नित्यः = अर्द्धमात्रात्मकः स्फोटः (कादिव्यञ्जनानि) एकद्वित्रिमात्रात्मकाः स्फोटाः (अकारादिस्वराः)। कार्यः = द्रुतमध्यमविलम्बितवृत्यात्मका ध्वनयः" इत्येवं नित्य-कार्यशब्दयोर्व्याख्याने तु न पूर्वापरभाष्यविरोधः समायाति। अतः स्फोटः शब्दः, ध्वनिः शब्दगुणः। तदुक्तं "तपरस्तत्कालस्य" (पा० सू० १।१।७०) इति तपरसूत्रे भाष्यकृता—"वृत्यन्तरे ऽेसोऽनापत्तिः, तत्तद्वृत्तिजनकभेदेन वर्णानां तत्तत्कालस्यैवौचित्यात्" इत्याशङ्क्य "एवं तर्हि स्फोटः शब्दः, ध्वनिः शब्दगुणः। कथम् ? यथा—भेर्याहन्ता भेरीमाहत्य कश्चिद् विंशतिं पदानि गच्छति, कश्चित्त्रिंशत्, कश्चिच्चत्वारिंशत्, स्फोटस्तावानेव, ध्वनिकृता वृद्धिः। यथोक्तम्—

ध्वनिः स्फोटश्च शब्दानां ध्वनिस्तु खलु लक्ष्यते।
अल्पो महाँश्च केषाञ्चिदुभयं तत्स्वभावतः॥

(महाभा० १। १। ७०) इति।

स्फोटः शब्द इति = श्रोत्रेन्द्रियग्राह्यः स्फोटनामा पदार्थः शब्दः, ध्वनिस्तदभि-

व्यक्त्युत्तरं जायमानो वैकृतध्वनिरूप; शब्दस्य चिराचिरोपलब्धिकरत्वाद् गुणः (उपकारकः) तस्माद् अकारादिवर्णस्फोटः रामादिपदस्फोटः, एहि कृष्ण ! अत्र गौश्चरतीत्यादिवाक्यस्फोटाः नित्याः, तद्गताश्च द्रुतमध्यमविलम्बितध्वनयोऽनित्याः शब्दगुणाश्चेति समवगन्तव्यं समाधेयञ्च। अनयैव दिशा शब्दनित्यत्वविचारः कर्त्तव्यः। मध्यमादिवाचामिवास्यापि नित्यता।

प्राकृतवैकृतभेदेन अवर्णादिस्फोटानां द्विविधो ध्वनिः; मात्राद्यात्मकस्य अकारादिस्फोटस्य मात्राद्यात्मकः प्राकृतो ध्वनिः। तथा च प्राकृतध्वन्यर्द्धमात्रादद्यात्मकस्वरव्यञ्जनयोरभेदः। अतएव **महाभाष्यस्य** परस्पशाह्निके "अथवा प्रतीतपदार्थको लोके ध्वनिः शब्दः" इत्युक्तम्। अर्थात् प्राकृतध्वनिरेव शब्दः इति तदाशयः। प्राकृतध्वनि-ह्रस्वादद्यात्मकशब्दयोरभेदात् तयोश्चाभेदसम्बन्धस्य नित्यत्वं हरिणाऽप्युक्तम्।

स्फोटस्याभिन्नकालस्य ध्वनिकालनुपातिनः।
स्वभावतस्तु नित्यत्वाद् ह्रस्वदीर्घप्लुतादिषु।
प्राकृतस्य ध्वनेः कालः शब्दस्येत्युपचर्यते॥
(वाक्य० १, कां० १, ७५-७६ का०)

अकारादिवर्णस्य ज्ञानं प्राकृतध्वन्यात्मकमेव जायते। द्रुतमध्यमविलम्बितध्वनयस्तु चिराचिरोपलब्धिविशेषे निमित्तानि। उक्तञ्च हरिणा—

वर्णस्य[1] ग्रहणे हेतुः प्राकृतो ध्वनिरिष्यते।
स्थितिभेदे निमित्तत्वं वैकृतः प्रतिपद्यते॥
(वाक्य ० कां० १, कारि० ७७)

तस्मात्कण्ठताल्वादिव्यापारेण प्राकृतध्वनिना स्वरव्यञ्जनात्मकवर्णपदवाक्याभिधानां बाह्यशब्दानामभिव्यक्तिः, तेषाञ्च सर्वत्र सर्वदोपलब्धेः सत्त्वाच्च नित्यता समायाति[2]। यथा वेदान्तिनां मते चिद्विशिष्टं यद्वा चिदचिद्विशिष्टं ब्रह्म चिन्मयत्वाद् चिदेव ब्रह्म यद्वा ब्रह्मणः किं स्वरूपमिति चेत्? चिन्मयमित्युच्यते। एवं प्राकृतध्वनिविशिष्टः प्राकृतवैकृतध्वनिविशिष्टो वा वर्णात्मकः शब्दः प्राकृतध्वनिमयत्वात् प्राकृतध्वनिरेव शब्दः, यद्वा शब्दस्य किं स्वरूपमिति चेत्? प्राकृत-

१. क्वचिद् "स्फोटस्य ग्रहणे" इत्यपि पाठः।

२. भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च।
अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा॥ (७।४)
अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम्।
जीवभूतां महाबाहो ययेदं धार्यते जगत्॥ (७।५)
—व्यासकृतश्रीमद्भगवद्गीता

ध्वनिमयं शब्दस्वरूपमित्युच्यते। यथा ब्रह्मणो नित्यानित्यभेदेन यद्वा क्षराक्षरभेदेन द्वे शरीरे, तथैव शब्दानामपि नित्यानित्यभेदेन शरीरद्वयम् = प्राकृतो ध्वनिः, वैकृतध्वनिश्च। प्राकृतध्वनिमयः शब्दो नित्यः।

मध्यमाख्यः "शृणोति य इमं स्फोटं सुप्ते श्रोत्रे च शून्यदृक्" इत्यादद्युक्त्या वैयाकरणैराभ्यन्तरस्फोटरूपेण स्वीक्रियमाणः शब्दस्तु अनाहताव्यक्तात्मकनादमयो विद्यते, न तत्र ह्रस्वदीर्घप्लुतमात्राः कालाः। अत एव स आगमदर्शनेषु अनाहतध्वनिभट्टारक उच्यते। नानयोः बाह्याभ्यन्तरस्फोटयोः प्रकाश्यप्रकाशकभावः, उभयोः स्वतः प्रकाशमयत्वात्।

उक्तञ्च **वाक्यपदीयस्य** ब्रह्मकाण्डे हरिणा—
आत्मरूपं यथा ज्ञाने ज्ञेयरूपं च भासते।
अर्थरूपं तथा शब्दे स्वस्वरूपञ्च भासते॥ ५०॥
ग्राह्यत्वं ग्राहकत्वं च द्वे शक्ती तेजसो यथा।
तथैव सर्वशब्दानामेते पृथगिव स्थिते॥ ५५॥

अर्थात् शब्दः स्वं प्रकाशयन्नर्थं प्रकाशयति। यथा ज्ञाने ज्ञेयरूपं (विषयः), स्वस्वरूपञ्च (ज्ञानस्वरूपञ्च) भासते, तथैव शब्देऽपि अर्थरूपं स्वस्वरूपञ्च भासते। यथा प्रदीपं प्रकाशयितुं प्रदीपान्तरस्य आवश्यकता नास्ति, तथैव शब्दानामपि विषये समूहनीयम्। एवमेव मध्यमापश्यन्त्योस्तथा पश्यन्तीपरयोरपि परस्परं प्रकाश्यप्रकाशकते न विद्येते, स्वतः प्रकाशमयत्वात्।

परापश्यन्तीमध्यमाख्यशब्दानां नित्यत्वविषये समेषां मतैक्यम्। वैखर्या वाचो विषये नित्यानित्यत्वविषयदृष्टया विवादो दृश्यते। सोऽपि विवादः पूर्वोक्तया मदुक्तदिशा समाधेयः।

किञ्च महाभाष्यकारो **महाभाष्ये** बहुत्र स्थलेषु वैखर्या वाचो नित्यत्वं स्वकण्ठरवेण जगाद। तदद्यथा पूर्वोक्तादन्यदपि स्थलं समुपस्थाप्यते।

"मुखनासिकावचनोऽनुनासिकः" (१।१।८) इत्यस्मिन् सूत्रे "अनुनासिकसंज्ञायामितरेतराश्रये उक्तम्" इत्यत्र—

"सिद्धं तु नित्यशब्दत्वात्। इति। नित्याः शब्दाः। नित्येषु सतोऽनुनासिकसंज्ञा क्रियते, न संज्ञयाऽनुनासिको भाव्यते।" इति।

लोके बुद्धिमुपारूढस्य शब्दस्य तद्वाच्यार्थस्य च बाह्यनिबन्धनत्वप्रतिपादनम्

यः कश्चनापि शब्दो बुद्धिमुपारूढः स बाह्यनिबन्धीभूतः, न तु अन्तःकरणोपनिबन्धनः। वस्तुतस्तु बुद्धिमुपारूढस्य शब्दमात्रस्यैवेति न, अपि तु सकलविषयस्य बुद्धिमुपारूढत्वे बाह्यमेव वस्तुनिबन्धनं विद्यते। अत एव भर्तृहरिणा **वाक्यपदीयस्य** द्वितीयकाण्डे "यो वार्थो बुद्धिविषयो बाह्यवस्तुनिबन्धनः" (१३२) इत्यत्र बाह्यवस्तुनिबन्धन इति प्रोक्तम्। अत्र कारिकायामर्थपदेन सकलेन्द्रियजन्यज्ञानविषयीभूतानां शब्दादिपञ्चविषयाणां तदाश्रयीभूताकाशादीनाञ्च ग्रहणम्। बाह्यमेव

वस्तु शब्दस्पर्शादिविषयः श्रोत्रादीन्द्रियद्वारेण बुद्धिमुपारूढत्वे निबन्धनं कारणं यस्य स इत्येवं यो बुद्धिविषयो बुद्धिं विशेषेण सिनोति बध्नातीति बुद्धिविषयः, श्रोत्रादीन्द्रियद्वारेण बुद्धिदेशं गतो यः शब्दः। तद्वाच्यार्थश्च स एव बाह्यं वस्तु इत्येवं यदा ज्ञायते तदा शब्दस्तद्वाच्यार्थश्च सम्यक्तया बुद्ध्यते। यथा "जले परिदृश्यमानो यश्चन्द्रः स एवाकाशे प्रकाशते" इत्येवं यदा ज्ञायते तदा जले बिम्बायमानस्य चन्द्रमसः परिपूर्णतया ज्ञानं जायते।

अत्र जले यश्चन्द्रो दृश्यते स कमलवन्न जलोद्भवः, किन्तु आकाशस्थस्य चन्द्रमसः प्रतिबिम्बम्। एवं बुद्धिस्थवस्तुविषयेऽपि बोद्धव्यम्। बुद्धौ प्रतीयमानघटपटादिपदार्थानां न स्थितिः, किन्तु इन्द्रियमाध्यमेन बुद्धौ दर्पणप्रतिबिम्बवद् बाह्या घटपटाद्यर्थाः प्रकाशन्ते। बुद्धौ तु केवलं विशुद्धः परमात्मतत्त्वमेव, तदेव च अन्तःकरणनिबन्धनीभूतम्।

अत्र कारिकायां[1] "बाह्यवस्तुनिबन्धनम्" इत्युक्त्या पूर्वं बाह्यस्यैव पदार्थस्य बुद्धौ श्रोत्रादीन्द्रियद्वारेण संस्कारे कारणत्वं प्रोक्तम्, यतो हि यावत् कालं बाह्यवैखर्यादिशब्दानां श्रोत्रादीन्द्रियैः सह सन्निकर्षो न जायते, न तावद् बुद्धौ तस्य संस्कारः। बाह्यपदार्थस्य बुद्धौ संस्कारे जाते सति बौद्धबाह्यपदार्थयोः परस्परं "यो बाह्य स आभ्यन्तरः यश्च आभ्यन्तरः स बाह्यः" इत्येवं सम्वाददिसम्वादयोः सतोः पदार्थज्ञानं जायते।

एवञ्च पूर्वोक्तकारिकाया व्याख्याकारैः अबहीरूपोऽपि बहीरूपतयाऽध्यस्तः" इति यदुच्यते, तन्मन्दम्। किञ्च बाह्यस्यैव शब्दादेरात्मन्यध्यासाद् वेदान्तिभिः महर्षिपतञ्जलिना च ब्रह्मसाक्षात्कारार्थं श्रोत्रादीन्द्रियाणां तत्तद्विषयेभ्यः प्रत्यावर्तनं परमात्मसक्षात्कारे च सबीजनिर्बीजसमाध्योरनुपयोगित्वम्, निरोधसमाधेरेव च महत्त्वं प्रोक्तम्। सबीजसमाधिद्वारा श्रोत्रादीन्द्रियेषु दिव्यशक्तेरुदयात् सूक्ष्मातिसूक्ष्मविषयास्तत्तदिन्द्रियप्रणाल्या निर्गतायाश्चित्तवृतेस्तत्तद्रूपेण परिणामाज्ज्ञायन्ते। निर्बीजसमाधौ तु इन्द्रियप्रणाल्या चित्तवृत्तेर्बहिर्निःसरणाभावाच्चित्तवृतेस्तद्विषयाकारेण परिणत्यभावः सञ्जायते। असम्प्रज्ञातसमाधौ चित्तं स्वसंकारमात्रमवशिष्यते।

तथा चोक्तं **पातञ्जलयोगदर्शने**—"[2]विरामप्रत्ययाभ्यासपूर्वः, संस्कारशेषोऽन्यः" (१/१८) इति।

---

१. यो वार्थो बुद्धिविषयो बाह्यवस्तुनिबन्धनः।
स बाह्यं वस्त्विति ज्ञातः शब्दार्थः सम्यगिष्यते ॥ १३२ ॥
—श्री भर्तृहरिकृते वाक्यपदीये द्वितीये काण्डे।

२. **विरामप्रत्ययाभ्यासपूर्वः संस्कारशेषोऽन्यः**—सर्ववृत्तिप्रत्यस्तमये संस्कारशेषो निरोधश्चित्तस्य समाधिरसम्प्रज्ञातः। तस्य परं वैराग्यमुपायः सालम्बनो ह्यभ्यासस्तत्साधनाय न कल्पते इति विरामप्रत्ययो निर्वस्तुक आलम्बनीक्रियते। तदभ्यासपूर्वकं चित्तं निरालम्बनमभावप्राप्तमिव भवतीत्येष निर्बीजः समाधिरसम्प्रज्ञातः।

अत्र समाधौ स्वसंस्कारमात्रोपयोगेन चित्तेन कैवल्यपदमिवानुभवन्तो योगिनो रमन्ते। आवृत्तिकत्वञ्च कैवल्येन सारूप्यम्, साधिकारं संस्कारशेषत्वञ्च वैरूप्यम्। चित्तं स्वसंस्कारमात्रमुपभुंक्ते।[1] अत्र तावद् विविच्यताम्—यदि बुद्धिमुपारूढस्य शब्दस्य तद्वाच्यार्थस्य च अन्तःकरणोपनिबन्धनत्वं स्यात्तर्हि तेषामपि भानमत्र समाधौ स्यात्। किन्त्वेवमसम्प्रज्ञातसमाधिमारूढा योगिनो नानुभवन्ति। तस्मात्तेषां बाह्यनिबन्धनत्वं वाच्यवाचकत्वञ्च स्वीकर्तव्ये। निरोधसमाधौ तु संस्कारमात्रावशिष्टस्य स्वप्रकृतौ लयात् केवलं पुरुषः स्वरूपमात्रप्रतिष्ठितः शुद्धः केवलो मुक्त इत्युच्यते। उक्तञ्च **पातञ्जलयोगदर्शने**—"तस्यापि निरोधं सर्वनिरोधान्निर्बीजः समाधिः (१।५१) इति।

एवमेव वेदान्तिनोऽपि मन्यन्ते। इन्द्रियाणां तत्तद्विषयेभ्यः प्रत्यावर्तने सति चित्तवृत्तेर्बहिर्निःसरणाभावाद् शब्दादिविषयाणां तत्र संस्काराभावाच्च तस्यां चित्तवृत्तौ हृदि स्थितस्येश्वरस्य संस्कारः सञ्जायते। ततश्चानन्दोऽनुभूयते। यदि च आभ्यन्तरस्यैव बहीरूपतया भानं स्यात् तदा इन्द्रियाणां विषयेभ्य प्रत्यावर्तनेऽपि रूपादिविषयाणामन्तःस्थितत्वात् तेषामेव भानं स्यात्। ततश्च चित्तवृत्तेर्विषयाकारतारूपप्रतिबन्धकस्य सत्त्वाद् भगवत्साक्षात्कारोऽसम्भव एव। किन्त्वेवं वेदान्तिभिर्नानुभूयते, अनुभूयते च ब्रह्मसाक्षात्कारजन्यानन्दः इति बाह्यस्यैव आभ्यन्तरे भानम्। आभ्यन्तरं वस्तु तु पराख्यं ज्ञानस्वरूपं शब्दब्रह्मैव। चित्तवृत्तेर्बहिर्निर्गमरूपक्रियाया निरोधे च तस्यैव भानम्। अतोऽन्तःकरणे भगवतः सत्त्वात्तस्य भानं बुद्धेः स्वाभाविको धर्मः, तद्भिन्नस्य बाह्यस्य च आभ्यन्तरे भानं तद्विपरीतो धर्मो बोध्यः।

विप्र ! पृथ्व्यादिचित्तस्थं न बहिस्थं कदाचन।
स्वप्नभ्रममदाद्येषु सर्वैरेवानुभूयते ॥ इति ॥

अस्य तु अन्यदेव तात्पर्यम्। हे विप्र ! बहिर्देशे पृथ्व्यादिकं यद् दृश्यते तत्ते चित्तस्थम्। बहिर्देशस्थितानां पृथ्व्यादीनां चक्षुरिन्द्रियादिमाध्यमेन चित्ते संस्कारः समजनि, अतस्ते चित्तस्थाः। अतस्तेषां भानं जायते। यदि पृथ्व्यादेश्चित्ते

---

१. वायुपुराणे प्रोक्तम्—

दश मन्वन्तराणीह तिष्ठन्तीन्द्रियचिन्तकाः।
भौतिकास्तु शतं पूर्णम् सहस्रं त्वाभिमानिकाः ॥
बोद्धा दश सहस्राणि तिष्ठन्ति विगतज्वराः।
पूर्णं शतसहस्रं तु तिष्ठन्त्यव्यक्तचिन्तकाः ॥
पुरुषं निर्गुणं प्राप्य कालसंख्या न विद्यते ॥

"भवप्रत्ययो विदेहप्रकृतीनाम्" (१/१९) इति पातञ्जलयोगसूत्रस्थव्यासभाष्यस्य टीकायामेते श्लोकाः समुद्धृताः।

संस्कारो न स्यातदा तेषां ज्ञानं न स्याद् इति "न बहिस्थं कदाचन" इत्यस्य भावोऽवगन्तव्यः। अत एव जाग्रदवस्थायां ये विषया न दृष्टास्ते स्वप्ने न दृश्यन्ते; चित्ते तेषां संस्काराभावात्।

किञ्च, **वाक्यपदीयस्य** द्वितीयकाण्डे शब्दार्थनिरूपणावसरे "केचिद् बाह्यमेवार्थं शब्दवाच्यं मन्यन्ते, केचित्तु संस्काररूपेण, यदा विषयाकारपरिणतरूपायां चित्तवृत्तौ योऽर्थोऽवभासते तं शब्दवाच्यं मन्यन्ते" इत्येवं शब्दार्थविषये द्वादश पक्षान् श्रीभर्तृहरिचरणाः प्रत्यपादयन्। तत्र "बुद्धिसत्तासमाविष्टो योऽर्थः स एव शब्दवाच्यः" इतीमं दशमं पक्षं "यो वाऽर्थो बुद्धिविषयः" इत्यस्यां कारिकायां व्याचष्ट। अतः पूर्वं तु तयोरपृथगर्थत्वम् (१२९), "लोकेऽर्थरूपतां शब्दः प्रतिपन्नः प्रवर्तते" (१३०) इत्यादिकारिकासु लोके बाह्यार्थस्यैव शब्दवाच्यत्वं प्रतिपाद्यमानं प्रतीयते।

अत्र विषयेऽयमेव पक्षः समीचीनः, अयञ्च न, यद्वा उभौ पक्षौ समीचीनौ—इत्यत्र मे नास्ति दुरवग्रहः, परन्तु "यो वार्थो बुद्धिविषयः" इत्यस्यां कारिकायां "बाह्यवस्तुनिबन्धनः" इत्युक्त्या पूर्वं लोके गृहीतसंकेतस्य शब्दस्य तद्वाच्यार्थस्य च तत्तद्विषयग्राहकेन्द्रियेण बुद्धौ संस्कारः, ततो बाह्यपदानां तद्वाच्यार्थानाञ्च ज्ञानम्, न तु पूर्वजन्मान्तरेष्वनुभूतानां बहीरूपतया आभासः।

अतएव जन्मना यो येनेन्द्रियेण विकलः स तदिन्द्रियजन्यज्ञानविषयीभूतपदार्थं जाग्रदवस्थायां स्वप्ने वा न प्रत्यक्षीकरोति; वर्तमानजन्मनि तत्तदिन्द्रियद्वारेण तत्तद्विषयाणां बुद्धौ संस्काराभावात्। यथा जन्मान्धो रूपं न स्वप्ने न वा जाग्रति प्रत्येति। यदि जन्मान्तरानुभूतबौद्धपदार्थस्य प्रतीतिः स्यात्तर्हि जन्मान्धपुरुषे स्वप्नादिषु रूपादिकं प्रत्यक्षीकर्तव्यम्। न च सामग्र्यभावाज्जन्मान्धेन बौद्धं रूपं नानुभूयते। बाह्यार्थस्य चक्षुरादीन्द्रियाणामुपस्थितिः बाह्यार्थस्य चक्षुरादीन्द्रियेण संयोगश्चेत्येतत् त्रिकं बौद्धपदार्थप्रत्ययो हेतुः। यदा बाह्यपदार्थस्य चक्षुरादीन्द्रियेण सयोगः सञ्जायते, तदा बुद्धौ सुषुप्तोऽर्थः समुद्बुद्धः सन् ज्ञायते इति वाच्यम्, मातुर्गर्भे त्वदुक्तसामग्र्यभावेऽपि बुद्धौ सूक्ष्मसंस्काररूपेण स्थितानां पदार्थानामवबोधाद् व्यभिचारदर्शनात्। मातुः कुक्षौ सप्तमे मासे दैववशाल्लब्धबोधो जन्तुर्जन्मशतोद्भवं बुद्धौ सूक्ष्मवासनारूपेण स्थितं कर्म स्मरति। तथा चोक्तं श्रीमद्**भागवतस्य** तृतीयस्कन्धस्यैकाधिकत्रिंशेऽध्याये—

अकल्पः स्वाङ्गचेष्टायां शकुन्त इव पञ्जरे।
तत्र लब्धस्मृतिर्दैवात् कर्म जन्म शतोद्भवम्॥
स्मरन् दीर्घमनुच्छ्वासं शर्म किं नाम विन्दते॥ ९॥
आरभ्य सप्तमात् मासाल्लब्धबोधोऽपि वेपितः।
नकत्राऽऽस्ते सूतिवातैर्विष्ठाभूरिव सोदरः॥ १०॥

मातुः कुक्षौ जन्तुर्जन्मान्तरेषु कृतान्यन्तःकरणे सूक्ष्मसंस्काररूपेण स्थितानि कर्माणि स्मरति। अत्र बाह्यपदार्थानां चक्षुरादीन्द्रियेण संयोगाभावेऽपि बुद्धौ

स्थितान् जानाति। गर्भजन्यदुःखेभ्यश्च स्वात्मानं मोचयितुमीशं प्रार्थयति। परन्तु यथा गर्भाद् बहिःप्रणीतस्तदा सर्वं विस्मरति। बुद्धौ स्थितान् अपि पदार्थान्न जानाति। अत्र को हेतुः? मातुः कुक्षौ दैवकृपया तमोगुणजन्यस्याज्ञानरूपावरणस्य भङ्गः सञ्जायते, तेन जन्मान्तरकृतकर्माणि स्मर्यन्ते। गर्भाद् बहिस्तु अज्ञानतिमिरान्धेन ज्ञानमावृतं जायते, तेन बौद्धाः पदार्था न ज्ञायन्ते। अतो जन्मान्धेन जन्मान्तरेष्वनुभूतं बुद्धौ सूक्ष्मरूपेण स्थितमपि नीलपीतादिरूपं न प्रतीयते। अत्र चक्षुरिन्द्रिस्य बहिर्देशस्थनीलपीतादिना सह संयोगाभावो न हेतुः, किन्तु तमोगुणजन्याज्ञानरूपमावरणमेव। दैवकृपया तदावरणस्य भङ्गः स्यात्तर्हि सोऽपि रूपं बुद्ध्या प्रत्येतुं शक्नोति; यतो मातुगर्भे तेन सर्वं ज्ञातम्। बुद्धिस्थरजस्तमोगुणजन्याज्ञानरूपावरणभङ्गोपायस्तु तौ गुणावभिभूय सत्त्वगुणस्य विवृद्धिः, तेन ज्ञानस्योदयः। उक्तञ्च श्रीमद्**भगवद्गीतायाश्**चतुर्दशाध्याये—

सर्वद्वारेषु देहेऽस्मिन् प्रकाश उपजायते।
ज्ञानं यदा तदा विद्याद् विवृद्धं सत्त्वमित्युत॥ ११॥

यदा अस्मिन् देहे सर्वद्वारेषु शब्दादिपञ्चविषयग्राहकेन्द्रियेषु प्रकाशः ज्ञानं प्रादुर्भवति, तदा सत्त्वगुणस्य विवृद्धिं जानीयात्। सत्त्वगुणस्य विवृद्ध्युपायस्तु सत्त्वगुणविशिष्टकञ्जनाभस्य ध्यानं तपश्चर्यादिकञ्च। तदुक्तं श्रीमद्**भागवतस्य** तृतीयस्कन्धे नवमाध्याये—

भूयस्त्वं तप आतिष्ठ विद्याञ्चैव मदाश्रयाम्।
ताभ्यामन्तर्हृदि ब्रह्मन् लोकान् द्रक्ष्यस्यपावृतान्॥ ३९॥

तपः, भगवदाश्रयीभूता विद्या च—इत्येतद् द्वयं पदार्थज्ञानस्योपायभूतम्। ताभ्यामज्ञानरूपावरणस्य भंगे सति सत्त्वगुणस्य च विवृद्धौ बुद्धौ स्थिताः सर्वे पदार्था ब्रह्मणा दृष्टाः, तदनुसारं सृष्टिं चकार। अतः "जन्मान्तरेष्वनुभूतस्य सूक्ष्मसंस्काररूपेण बुद्धौ स्थितस्य पदस्य जन्मान्तरेष्वनुभूतो बौद्ध एव अर्थो वाच्यः, वर्तमानजन्मनि श्रोत्रेन्द्रियेण बुद्धिदेशं गतस्य तत्र च पुनः संस्कारं प्राप्तस्य बाह्यपदस्य च बाह्यार्थो वाच्यः" इत्येवं सिद्धान्तः प्रकर्तव्यः।

तेन ये केचिद् शब्दस्य बौद्धमेवार्थम्, ये च बाह्यमर्थं मन्यन्ते, तेषां परस्परं समन्वयोऽपि संघटते। वर्तमानजन्मनि "कम्बुग्रीवादिविशिष्टोऽर्थो घटपटवाच्यः" इत्येवं वृद्धव्यवहारेण श्रोत्रादीन्द्रियाणां घटपटाद्यर्थैः सह संयोगे सति तेषामन्तःकरणे पुनः संस्कारः सञ्जायते।

येषु तु सत्त्वगुणस्योद्रेको विद्यते, ते तत्तदिन्द्रियेण तत्तत्पदार्थस्य बुद्धौ पुनः संस्कारं नापेक्षन्ते। बौद्धपदेनैव सर्वमर्थं जानन्ति। यथा रामबोलेत्यपरपर्यायः श्रीमद्गोस्वामितुलसीदासो यदा गर्भाद् बहिर्निःसृतस्तदा शिक्षणं विनाऽपि रामेति नाम व्याजहार। अन्ये तु प्राणिनो रजस्तमोगुणयोरतिशयेनोद्रेकाद् अज्ञानरूपावरणेन बुद्धेरवच्छिन्नत्वाच्च अन्यस्य शिक्षणमपेक्षन्ते।

किञ्च, इन्द्रियमाध्यमेन बुद्धौ प्रविष्टाः सर्वे शब्दादिविषयाः वासनारूपेण यद्वा संस्काररूपेण स्थायिरूपतां न भजन्ति; किन्तु येषां संयोगेन चित्तद्रव्यं सम्यक्तया द्रुतं जायते, त एव। चित्तद्रव्यस्य शैथिल्यावस्थायां प्रविष्टस्तु विषयान्तर्ग्रहणसमये नश्यतीति वासनाभासः। अतीते जन्मनि यस्य विषयस्य यस्य चित्ते वासना, स एव विषयो जन्मान्तरे संस्काररूपेण तस्य चित्ते समुपलभ्यते; तद्यथा कामुकस्य हृदि कामिन्या एव, नान्यस्य। अन्येषां विषयाणां संस्कारस्तु नष्टः। अतो वर्तमानजन्मनि यस्यां बुद्धौ सूक्ष्मवासनारूपेण येषां शब्दानां तद्वाच्यार्थानामुपस्थितिर्न विद्यते, स "अस्य शब्दस्यायमर्थो वाच्यः" इति कथं ज्ञास्यतीति तस्य चित्ते बाह्यपदार्थानां संस्कारः समपेक्ष्यते। अतो लोके बाह्यस्फोटस्य वाचकत्वम्, बाह्यार्थस्य च वाच्यत्वं स्वीकर्तुमापतति। "घटमानय", "भोजनं कुरु" इत्युक्ते नहि बौद्धो घटो हस्तांगुलिना गृहीत्वा आनीयते, न वा बौद्धस्य भोजनस्य गलविलाधःसंयोगः क्रियते, किन्तु बाह्य एव घट आज्ञाप्येन आनीयते, बाह्यमेव च भोजनं क्रियते। लोके बौद्धपदार्थेन व्यवहाराभावात्तयोः (बौद्धपदस्य तद्वाच्यार्थस्य च) परस्परं वाच्यवाचकत्वे नाभ्युपेयेते।

किञ्च, ये पुनर्जन्मवादिनस्तेषां पक्षे वर्तमानजन्मनि अज्ञानरूपावरणावच्छिन्नत्वाद्, ये च अपुनर्जन्मनि विश्वासं भजमानास्तेषां मतानुसारं बौद्धपदार्थानामभावाच्च बुद्धौ तेषां बाह्यपदार्थानां संस्कारः समपेक्ष्यते। घटपटादिवाह्यपदानां श्रोत्रेन्द्रियेण बुद्धौ पुनः संस्कारं विना कमपि सार्थकं शब्दं कामपि भाषां वा व्यवहर्तुं न प्रभवन्ति। अत्र विषये भाषावैज्ञानिकेषु प्रथितं समनुभूतञ्च एकमितिवृत्तं[1] श्रूयते। शृगालस्य गह्वरे जन्मना निवसन् कश्चिद् बालो न कमपि मानवं शब्दमुच्चारयितुं क्षमोऽभूत्। एवं शृगालस्य गृहे सम्बर्द्धमाना काचिद् वालिकाऽपि न कामपि मानवीं भाषां व्यवहर्तुं समर्थाऽभूत्। केवलं शृगालसदृशमेव शब्द-

१. "मनुष्य पहले से ही कुछ बोलता रहा होगा। यह ठीक ठीक बताया जा सकता हैं। हम थोड़ा सा ध्यान देकर सोचें तो यह बात कुछ हमारी समझ में आने लगेगी। अभी हाल ही में लखनऊ के अस्पताल में एक लड़का भेड़िये की माँद से पकड़कर लाया गया, जो भेड़िये की तरह ही चारों हाथों पैरों पर चलता है। भेड़िया जैसा ही चिल्लाता और गुर्राता है। पर न कुछ बोलता है, न हंसता है, न रोता है। बहुत दिन हुए मेदिनीपुर में भी एक पादरी को ऐसी ही एक लड़की भेड़िये की खोह से मिली थी। वह भी ऐसे ही चिल्लाती गुर्राती थी।"

—श्रीसीतारामचतुर्वेदी, भाषालोचन, पृ० ९१।

अत्र मानवसम्पर्काभावेण बुद्धौ मानवीयशब्दानां संस्काराभावान्न सार्थकशब्दोच्चरणम्; शृगालसंसर्गेण च शृगालवच्छब्दोच्चारणेन च "बुद्धौ घटपटादिशब्दानां पुनः संस्कारोऽपेक्ष्यते" इति ज्ञायते।

मुभावकुरुताम्। यतो हि जन्मना शृगालशब्दा एव श्रोत्रगृहीतास्त एव बुद्धाववधृताः, न तु मानवीयाः। एतत्सर्वं लोके बुद्धिमुपारूढस्य शब्दस्य बाह्यनिबन्धनत्वस्वीकार एव संघटते। श्रोत्रेन्द्रियग्राह्यबाह्यनिबन्धनरूपघटपटादिशब्दानां बुद्धौ संस्काराभावे ज्ञानात्मिका परा वाग् मूलाधारे स्वस्वरूपेणैव स्थास्यति। तस्याः विविधरूपेण कण्ठताल्वादिनाऽभिव्यक्तेरभावः; केवलं भेरीमृदङ्गादिजन्यध्वनिवत् सद्यःप्रसूतशिशुवच्च कश्चित् प्रकारकः शब्द एव कण्ठतो निःसरेत्। भाषायाः समुत्पत्तिविषये ये दिव्यादिवादाः सम्प्रथिताः, तेषां मध्ये दिव्यवाद एव मुख्यतमः प्राचीनतमश्च[1] विद्यते। तस्य समीक्षया बुद्धिमुपारूढः "शब्दो वाह्यनिबन्धनः" इत्येव सिद्धान्तो दृढीभवति।

वैखर्यात्मको बाह्यः शब्द एव लोके बुद्धिमुपारूढः सन् अर्थमवबोधयतीत्यत्र सृष्टिरहस्यसम्बलितं किञ्चित् प्रस्तूयते—

अपभ्रंशशब्दानां विचारः

अपभ्रंशविषये पातञ्जले **महाभाष्ये** बहुत्र स्थलेषु समुल्लेखो दृश्यते। अपभ्रंशशब्दस्यार्थे बहवः शब्दा महाभाष्ये प्रयुक्ताः। तद्यथा पस्पशाह्निके— "तेऽसुराः।" तेऽसुरा हेलयो हेलय इति कुर्वन्तः पराबभूवुः। तस्माद् ब्राह्मणेन न म्लेच्छितवै, नापभाषितवै। म्लेच्छो ह वा एष यदपशब्दः।"

"लघुत्वाच्छब्दोपदेशः। गरीयानपशब्दोपदेशः। एकैकस्य शब्दस्य बहवोऽपभ्रंशाः। तद्यथा—गौरित्यस्य शब्दस्य गावी-गोणी-गोपा-गोपोतलिकेत्येवमादयोऽपभ्रंशाः।" इति।

वस्तुतः संस्कृताद् भिन्ना सर्वे शब्दा अपभ्रंशाः मानवेषु व्यवह्रियन्ते। एतेषां मानवीयापभ्रंशशब्दानां व्यवहारोऽनादिकालत ईश्वरमूलको दृश्यते।

ईश्वर[2] एव विविधदेशेषु विविधमानवान् समुत्पाद्य विविधभाषासु विविधशब्दानां संस्कारं तेषां बुद्धौ पातयामास। उक्तञ्च नागेशभट्टकृत**वैयाकरण**-

१. "सबसे प्राचीन मत यह है कि भाषा को ईश्वर ने उत्पन्न किया और उसने मनुष्यों को सिखाया। यही मत पूर्व और पश्चिम के देशों और जातियों में प्रचलित था"।

—श्यामसुन्दरदासस्य–भाषारहस्यम्।

२. "जैसे ईश्वर ने बहुत से दूसरे जीवों को बोलियां दीं, वैसे ही मनुष्यों को भी बोली दी। और जैसे अलग अलग देशों में पाये जाने वाले कुत्ते अलग अलग ढंग से भौंकते हैं और गुर्राते हैं, वैसे अलग अलग देशों के लोग अलग अलग ढंग से बोलते भी रहे हैं"।

—आचार्य सीताराम चतुर्वेदी–भाषालोचनम्, पृ० ९७।

किञ्च सर्वे खलु आस्तिकजनाः स्वधर्मग्रन्थस्य भाषामादिभाषां मन्यन्ते। तेन ज्ञायते यद् विविधा भाषा विविधरूपेण सृष्टेः प्रारम्भे समुत्पन्नाः। अन्यथा तेषां वचनस्या-

सिद्धान्तलघुमञ्जूषायाम "उपकार: स यत्रास्ति" इत्यस्या: कारिकाया व्याख्यायाम्
"अत एव **वाचस्पत्ये** उक्तम्–सर्गादिभुवां महर्षिदेवतानामीश्वरेण साक्षादेव कृत:
सङ्केतस्तद्व्यवहाराच्च अस्मदादीनामपि सुग्रहस्तत्सङ्केत:" इति । निखिलज्ञान-
केन्द्र ईश्वर एव "आर्वे" नामाख्ये पर्वते आदम[1] (एडम रूपेण प्रादुर्भूत:, तस्य
"इभ" नामिका धर्मपत्नी च आसीत् । नि:शेषज्ञाननिधि: 'एडम:' 'आर्वे' इति
पर्वतोपरि समुत्पन्नान् जनान् "लार्ड" इत्यादिशब्दान् शिक्षयामास । स एव
ईश्वर: अरबदेशे सर्वप्रथमं समुत्पन्नं पैगम्बरमरबीं भाषां शिक्षयामास । तस्यामेव
च भाषायां मुस्लिमधर्मजनान् उपदिदेश ।

स एव परमात्मा भारतवर्षे प्रसूताञ्जनान् मानवीयभाषात्मकशब्दान्
बोधयामास, एतद्देशप्रसूतानाञ्च मानवानां बुद्धौ सर्वप्रथमं यस्या भाषाया: संस्कार
ईश्वरेण समजनि, सा प्राकृतभाषेति नाम्ना प्रसिद्धिमागता । प्रजार्थवाचक-प्रकृति-
शब्दात् प्राकृतशब्दस्य निष्पत्तिर्जाता । प्रकृतिषु प्रजासु जनलोकेषु या भाषा
व्यवह्रियते सा प्राकृतनाम्ना विख्याता । प्रकृतिशब्दस्य प्रजावाचकत्वं "प्रकृतीनां[2]
हितैर्युक्तं प्रकृतिप्रियकाम्यया" इति श्लोकतोऽवगम्यते ।

सृष्टेरादौ सर्वप्रथमं सकलज्ञानकेन्द्रो भगवान् मानवानां बुद्धौ पालिप्राकृते-
त्यादिनाम्ना प्रसिद्धाया मानवीयभाषाया एव संस्कारं पातयामास । अत एव
बौद्धा: प्राकृतं यद्वा पालिभाषामेवास्य देशस्य आदिभाषां मेने । किञ्च, वाल्मी-
कीयरामायणे मानवीयभाषाया समुल्लेखो दृश्यते । तथा चोक्तं वाल्मीकीय-
रामायणस्य सुन्दरकाण्डे त्रिंशे सर्गे —

अहं ह्यतितनुश्चैव वानरश्च विशेषत: ।
वाचं चोदाहरिष्यामि मानुषीमिह संस्कृताम् ॥ १७ ॥
यदि वाचं प्रदास्यामि द्विजातिरिव संस्कृताम् ।
रावणं मन्यमाना मां सीता भीता भविष्यति ॥ १८ ॥

अत्र संस्कृतां मानुषीमित्युक्त्या व्याकरणनियमसम्बद्धा काचिन्मानुषी भाषा
तस्मिन् काले आसीत् । सा च भाषा प्रजा(जनवाचक)प्रकृतिशब्दनिष्पन्ना

सत्यत्वापत्ति: । ये तु ईशप्रोक्तां स्वधर्मग्रन्थस्य भाषामादिभाषाम् सर्वासां भाषाणां
जनयित्रीञ्च मन्यन्ते, तत्तु अद्यत्वे विश्वासं न समारोहति । किन्तु ईश्वरो देशजाति-
भेदेन सर्वान् मानवान् विविधभाषामध्यापयामासेत्येव तत्र स्वारस्यं ग्रहीतव्यम् ।

1. "बाइबिल" ग्रन्थस्य भागद्वयं विद्यते–१–ओल्ड टेस्टामेण्ट, २—न्यू टेस्टामेण्ट इति
च । ओल्ड टेस्टामेण्टनामाख्यो ग्रन्थ: खलु सृष्टिरहस्यवादी । 'आर्वे' इति नामाख्ये
पर्वते 'एडम' (आदम) 'इव' इति दम्पती आस्ताम् । यो खलु अस्माकं पुरुष-प्रकृति-
स्थानापन्नौ स्त: । एतयोरिच्छयैव सृष्टिर्जाता ।

2. श्रीमद्वाल्मीकीयरामायणे बालकाण्डे, प्रथम: सर्ग: ।

प्राकृताभिधा एव आसीदिति प्राकृतशब्दव्युत्पत्त्या ज्ञायते । न च "अंसू" इत्यादि-
प्राकृतशब्दानां मूलप्रकृति: "अश्रु:" इत्यादय: संस्कृतशब्दा विद्यन्ते । तथा संस्कृतं
प्रकृतिरस्येति प्राकृतभाषाया व्युत्पत्त्या प्राकृतभाषा संस्कृताज्जातेति वाच्यम् ?
प्रकृतिप्रत्यययो: काल्पनिकत्वात् । अन्यथा "रामादिशब्दानां क्रीडार्थका 'रमु'
इत्यादिधातवो जनका:" इति व्यहारापत्ति: । तत: ',प्रकृतिप्रत्यया: काल्पनिका:"
इति नागेशादिवचनस्य मिथ्यात्वापत्ति: ।

किञ्च, भाषाया नामकरणं देशजातिभेदेनैव दृश्यते । पूर्वश्लोके संस्कृता-
मित्युक्त्या व्याकरणनियम-बन्धनरहिता ग्राम्या भाषा अप्यासीदित्यनुमीयते ।
द्विजातिरिव संस्कृतामित्युक्त्या संस्कृतभाषाया: (देवभाषाया:) पृथगेव सत्ता
प्रमीयते । यथा आंग्लभाषा आंग्लानाम्, न तु भारतीयानाम् । जर्मनभाषा जर्मन-
देशवास्तव्यानाम्, न तु तदितरेषाम् । तिर्यग्योनिसमुत्पन्नानां भाषा तिरश्चामेव,
न तु मानवानाम् । एवं देवभाषा देवानाम्, न तु मानवानाम् । जातिभेदेन देशभेदेन
च भाषाणां भेदो दृश्यते ।

विभिन्ना भाषा मूलत एव विभिन्नरूपेण ईश्वरद्वारा प्रादुर्बभूवु:, न तु काचिद्
भाषा कस्याश्चिन्मूलभूता । यत्तु भाषान्तरेषु संस्कृततत्समशब्दा व्यवह्रियमाणा
दृश्यन्ते, तत्तु शिक्षाव्यापारादिव्यवहारं कर्तुं विभिन्नदेशोत्पन्नजनानां भारतीयै:
सह परस्परं सम्पर्काद् दृश्यते । तद्यथा—

संस्कृतम्[1]	अवेस्ता
क्षत्रात्	क्षत्रात्
विश:	विशात्

समस्तभूमण्डलसमुत्पन्ना जना अत्र देशे शिक्षां ग्रहीतुमाजग्मु: । एतच्च
मनुस्मृतौ सुस्पष्टतया प्रतिपादितम् । तदयथा—

एतद्देशप्रसूतस्य सकाशादग्रजन्मन: ।
स्वं स्वं चरित्रं शिक्षरेन् पृथिव्यां सर्वमानवा: ॥

यद्वा भारतीया एव देवभाषां शिक्षयितुं विभिन्नं देशं गतवन्त: । अस्योल्लेखोऽग्रे
स्पष्टतया विद्यते । यथा कयोश्चिद् द्वयोरज्ज्वो: सम्मिश्रणे सति कस्यचिद् विलक्षण-
वर्णस्य (रज्जुस्य) निष्पत्तिर्दृश्यते । तथैव परस्परमादानप्रदानव्यहाराभ्यां
विभिन्नभाषीयशब्दानां परस्परं मिश्रणात् काचिद् अन्या भाषा निष्पद्यते । यथा
हिन्दी भाषा । इयं भाषा पालिसंस्कृतप्राकृतापभ्रंशगिराम् आंग्लादिवैदेशिक-

---

1. श्रीश्यामसुन्दरदास:, बी० ए०; पद्मनारायण आचार्य:, एम० ए०, कृते "भाषारहस्ये"
प्रथमभागस्य १५९पृष्ठत इमे प्रयोगा: समुद्धृता: ।

शब्दानाञ्च मिश्रितरूपा विद्यते। उदाहरणार्थं यथा—पालिशब्दाः— जानिया[१], करतून, करते, इत्यादयः।

प्राकृतशब्दाः[२]—तुम्ह, चलइ, गिरा, खाइ, करइ, का वहू, होइ, सहइ इत्यादयः।

अपभ्रंशशब्दा[३] यथा—सोसउ, तुम्ह, तुच्छ, वायसु इत्यादयः।

आंग्लशब्दा यथा—स्टेशन, मोटर, कार इत्यादयः। एवं उर्दू-फारसी-अरवीत्यादि भाषीया अपि शब्दा अस्यां भाषायां समुपलभ्यन्ते। अत्र विस्तरभयाद् अप्रासङ्गिकत्वाच्च सर्वेषां हिन्दीभाषीयशब्दानां व्याख्यानं दुष्करम्। साम्प्रतं तु अस्यां भाषायां संस्कृतशब्दानां प्राचुर्येण प्रयोगो दृश्यते।

केचित् प्राकृतादिशब्दास्तु[४] हिन्दीभाषायामर्थान्तिरेषु प्रयुज्यन्ते। तद्यथा—

'रस्सी'—प्राकृतभाषायां किरणार्थे प्रयुज्यते। किन्तु हिन्दीभाषायां रज्जुपदवाच्यार्थे प्रयोगः क्रियते।

'हरिजन'—संस्कृते अथ च अस्मात् पूर्वं हिन्दीभाषायां भक्तार्थेऽयं शब्दः प्रायुज्यत, किन्तु सम्प्रति राष्ट्रभाषायां (हिन्दी भाषायां) चर्मकारार्थे व्यवह्रियते। एवमियं भाषा बहुभाषीयशब्दानां सङ्करस्वरूपेति निश्चीयते।

---

१. एते प्रयोगाः कच्चायनव्याकरणतः समुद्धृताः। श्री लक्ष्मीनारायणतिवारी तथा वीरबलेति विद्वद्द्वयेन हिन्दीभाषायामनूदिते परिष्कृते च कच्चायनव्याकरणे दृश्यन्ताम्। प्रथमद्वितीयप्रयोगौ "एय्यस आतो इया ना वा" (३/४/२७), "पुब्बकालेककत्तुकान तून त्वान त्वा वा" (४/२/१५) इति सूत्रयोः क्रमेणोदाहरणीभूतौ। तृतीयश्च प्रयोगः करधातोरात्मनेपदे ते-प्रत्यये सति निष्पद्यते।

२. एते प्रयोगाः आचार्यश्रीनरेन्द्रनाथ एम० ए० कृतात्—"प्राकृत भाषाओं का रूपदर्शन" इति ग्रन्थात् समुद्धृताः। एते प्रयोगाः क्रमशो निम्नाङ्कित-पृष्ठेषु व्याख्याताः— १—पृष्ठसंख्या १६५, शब्दसंख्या २१०; २—पृ० सं० १५८, शब्दसंख्या १६३, ३—पृ० सं० १५६, शब्दसंख्या १५०, ४—पृ० सं० १५४, शब्दसंख्या १४०, ५—पृ० सं० १३९, शब्दसंख्या १००; ६—पृ० सं० १४६, शब्दसंख्या ९१, ७—पृ० सं० १०९, शब्दसंख्या ४४६; ८—पृ० सं० १९२, शब्दसंख्या ३८२, ९—पृ० सं० १८६, शब्दसंख्या ३४५।

३. एते प्रयोगाः प्रो० शालिग्रामोपाध्यायेनानूदिताद् "आचार्य हेमचन्द्र का अपभ्रंश व्याकरण" इति ग्रन्थात् समुद्धृताः। एतेषां क्रमस्तत्र ग्रन्थे पृष्ठसंख्या च क्रमशः इत्थमस्ति—२२, २४, १३, १५।

४. रस्सी–आचार्य नरेन्द्रनाथ एम० ए०–कृतात् "प्राकृत भाषाओं का रूपदर्शन" इतिग्रन्थात् समुद्धृतः।

अत्र कारणं आंग्लादिभाषाभाषिणां सम्पर्क एव। तदित्थं ये केचिद् "संस्कृतभाषा यद्वा शौरसेनी, पैशाची, मागधी, महाराष्ट्री—इति चतुर्भेदं भजमाना प्राचीना प्राकृतभाषा अपभ्रंशशब्दरूपेण स्वरूपान्यत्वं भजमाना आधुनिकभारतीयभाषारूपेण विकासं प्राप्ता" इति प्रवदन्ति,[१] तत्सर्वं परास्तम्।

"दैवी वाग्व्यवकीर्णेयमशक्तैरभिधातृभिः" इति भर्तृहर्युक्त्या मदुक्तस्यापलापं कर्तुं तु न शक्यते, तस्याः कारिकाया अन्यतात्पर्यवत्त्वात्। यथा विशुद्धमपि सुवर्णपिण्डं मलपङ्कादिभि व्यवकीर्णमवच्छिन्नं सद् दुर्दर्शम्; एवं दैवी वागपि यदा भूलोकं समागता तदा प्राकृतापभ्रंशादिभिरवच्छिन्ना जाता। विशुद्धशब्दानामुच्चारणे कर्तव्ये असामर्थ्यात् प्राकृतभाषीयान् शब्दानुच्चारयन्ति स्म। न तु विशुद्धशब्द एव अपभ्रंशादिशब्दरूपेण परिणतिं गतः; शब्दानां नित्यत्वाद्। तदनन्तरं तितउना (परिपवनेन) सक्तोरिव व्याकरणेन परिपवनं जातम्।

संस्कृतभाषायाः केचिद् व्यावहारिकाः शब्दा अपि विभिन्नासु भाषासु गृह्यन्ते स्म। अत्र कारणं भारतीयानां तैः सह सम्पर्क एव। एवमांग्लभाषायामपि ये केचिज् जर्मन-लैटिन-रोमनशब्दा मिश्रिता दृश्यन्ते, तत्तु परस्परं सम्पर्कवशाद् आदानप्रदानव्यवहाराभ्याञ्च जातम्। एवं देवभाषाया अपि केचिद् व्यावहारिकाः शब्दा विभिन्नभाषासु प्रयुज्यमाना दृश्यन्ते। अत्र कारणं भारतीयानां तैः सह सम्पर्क एव।

शिक्षाव्यापारादिमाध्यमेन दैव्या भाषायाः शब्दानां भाषान्तरेषु तद्वाच्यार्थेषु तद्भिन्नवाच्यार्थेषु वा विदेशीयैर्ग्रहणात्, पुराकाले तस्या विविधदेशेषु अध्ययनाच्च **महाभाष्यस्य** पस्पशाह्निके भगवता पतञ्जलिना "सर्वे देशान्तरे" इति वार्त्तिकस्य व्याख्यायाम् "उपलब्धौ यत्नः क्रियताम्! महान् शब्दस्य प्रयोग विषयः। सप्तद्वीपा वसुमती।" इत्यत्र सप्तद्वीपाया वसुमत्या उल्लेखः कृतः।

लौकिवैदिकसंस्कृतशब्दानां भूमावतरणम् (वेद-व्याकरणयोर्दृशा)

इयं देवभाषा देवलोके पुराऽऽसीत्। देवजातीयं ब्रह्मेति नामकं प्राणिनमीश्वरो देवभाषामध्यापयामास। ब्रह्मा च देवलोके बृहस्पत्यादिदेवान् नारदेत्यादिदेवर्षींश्च समुत्पाद्य तां दैवीं गिरमध्यजीगपत्। यथा गङ्गा नदी पुरा ब्रह्मलोके आसीत्, न तु भूलोके। स्वतपोबलेन भगीरथस्तां भूमा आनयामास। एवं

---

१. "आधुनिक भाषाओं का स्रोत—शौरसेनी, पैशाची, मागधी, और महाराष्ट्री यह थी चार प्राचीन प्राकृत भाषायें, जिनका व्याकरण अलग अलग था, जिनकी नींव कहीं और थी। मैं उस इतिहास की बात नहीं करना चाहता। वे भाषा से अपभ्रंश में बदल गयीं और अपभ्रंश से हमारे आधुनिक भारत की भाषायें बनीं। यह सारा विकास सिर्फ पिछले छः सौ वर्ष के दौरान हुआ"।

—रिपोर्टर पत्रिका, पृ० सं० ३. (दि० १६।१।६८)

दैवी गीर्देवलोक एव व्यवह्रियमाणा आसीत्। कदाचिद् एतद्देशप्रसूता जनाः, ये केवलं मानवीभाषामेव व्यवहर्तुं क्षमाः, देवगिराञ्च बुद्धौ संस्काराभावात्तां समभिव्यक्तुमक्षमा आसन्, ते सर्वे ब्राह्मणाः सम्भूय विद्वद्गोष्ठीं[1] कृतवन्तः। तत्र विद्वत्संघे देवगिरां तत्त्वज्ञा ऋषयोऽपि समभ्यागच्छन्। तत्र ऋषयश्च ब्राह्मणान् यदा दैवीं वाचं शिक्षयामासुः, ततः प्रभृत्येव ऋगादिवेदानां भूलोके समवतरणमभूत्। वेदतुल्यस्याक्षरसमाम्नायस्यापि एवमेव भूलोके समवतरणं दिवः सञ्जातम्। तदचथा **ऋक्तन्त्रव्याकरणे** शाकटायनः—

"इदमक्षरच्छन्दो वर्णशः समनुक्रान्तम्, यथा चाऽऽर्या ऊचुर्ब्रह्मा बृहस्पतये, वृहस्पतिरिन्द्रायेन्द्रो भरद्वाजाय, भरद्वाज ऋषिभ्यः, ऋषयो ब्राह्मणेभ्यस्तं खल्विममक्षरसमाम्नायमित्याचक्षते, न भुक्त्वा न नक्तं प्रब्रूयाद् ब्रह्मराशिः" इति। ब्रह्मराशिरित्यस्य ब्रह्मप्रतिपादको ब्रह्मराशिरित्यर्थः।"

इत्येवं स्वकण्ठरवेण प्रत्यपादयत्। एतच्च तथ्यं नागेशोऽपि **लघुशब्देन्दुशेखरे** संज्ञाप्रकरणे सिद्धान्ततया पुपोष।

भूलोके सुराणां भाषाया अध्ययनाच्च ब्राह्मणा भूसुरेति नाम्ना प्रसिद्धिमागताः। एते ब्राह्मणा ऋषिभ्यो दैव्या वाचस्तत्त्वं समधिगम्य बहुषु देशेषु तस्याः प्रचारं प्रसारञ्च कृतवन्तः। तथा चोक्तम् ऋग्वेदस्य दशमण्डलस्यैकाधिकसप्ततितमे सूक्ते तृतीयमन्त्रे—

"यज्ञेन वाचः पदवीयमभ्यन्तामन्वविन्दन्नृषिषु प्रविष्टाम्।
तामाभृत्या व्यदधुः पुरुत्रा तां सप्त रेभा अभिसन्वन्ते॥"

सायणाचार्योऽस्य मन्त्रस्य यद् भाष्यं[2] कृतवान्, तस्य दर्शनेन स्पष्टतया पूर्वोक्तं मद्वचनं दृढीभवति। यतो हि कस्याश्चिद् भाषायाः शिक्षणम्, देशान्तरेषु तस्याः प्रचारः प्रसारश्च तदैव सम्भाव्यते, यदा तत्तद्देशोत्पन्ना जनाः कामपि भाषां प्रवक्तुं जानीयुः। भाषणं जानन्तो जना एव विद्वत्सभां कर्तुं प्रभवन्ति। दैव्या वाचो भूमावतरणार्थं सङ्गतिकरणरूपं यज्ञं सभां वा धीराः कृतवन्तः, तत्र च ऋषिषु प्रविष्टां वाचं तेभ्यो ज्ञातवन्तः। अनेनाऽपि ज्ञायते—"मानवीया भाषा न संस्कृतजन्या" इति।

१. ऋग्वेदे दशममण्डलस्यैकाधिकसप्ततितमे सूक्ते एतदीयोंऽशो द्रष्टव्यः।

२. विदितार्था धीराः पदवीयम्—वेतेरचो यत् संज्ञापूर्वकस्य विधेरनित्यत्वाद् गुणाभावः, पदेन यातव्यः पन्थाः पदवीयः तं वाचो मार्गं यज्ञेन अभ्यन् प्राप्तवन्तः। ऋषिष्वतीन्द्रियार्थदर्शिषु प्रविष्टां तां वाचमविन्दन् अलभन्त। अनन्तरं तां वाचम् आभृत्य आभृत्य पुरुत्रा बहुषु देशेषु, व्यदधुः व्यकार्षुः। सर्वान् मनुष्यान् अध्यापयामासुरित्यर्थः। एतादृशीं वाचं रेभाः शब्दायमानाः पक्षिणः पक्षरूपाणि गायत्र्यादीनि सप्तच्छन्दोभिः अभिसन्वन्ते अभितः संगच्छन्ते।

—ऋ॰ वे॰ मण्डल १०, सू॰ ७१, मन्त्रः ३।

एतत्सर्वं घटपटादिशब्दानां बुद्धौ संस्कारस्य बाह्यनिबन्धनत्वस्वीकारादेव सङ्गच्छते।

आभ्यन्तरनिबन्धनं तु आभ्यन्तरं वेदान्ते विशिष्टादिभेदेन प्रसिद्धम् अद्वैततत्त्वम् (ब्रह्मतत्त्वम्) नैयायिकनये स्वीकृतञ्च आत्माख्यं तत्त्वं शब्ददर्शने च विशुद्धं प्रकाशाप्रकाशविलक्षणं[1] शब्दब्रह्मतत्त्वमेव। शब्दब्रह्मतत्त्वं न बाह्यनिबन्धनम्। शब्दब्रह्मतत्त्वमेव आभ्यन्तरपदार्थः। अत एव शास्त्रप्रतिपादितविविधसाधनद्वारा निर्मलीभूतेऽन्तःकरणे शब्दब्रह्म एव प्रत्यक्षीक्रियते योगिभिः, न तु बाह्यपदार्थाः। अन्तःकरणे=आभ्यन्तरे बाह्यपदार्थावभासस्तु प्रथमजन्मनि बाह्यपदार्थैः सह इन्द्रियाणां संसर्गवशात्। जन्मान्तरे च प्रथमजन्मनि बाह्यसंस्काराश्च बौद्धा जाताः। वस्तुतस्तु तेषां तत्र (अन्तःकरणे) न दृढतया स्थितिः; साधनद्वारा तेषां नाशात्। किन्तु कोटिसाधनद्वाराऽपि अन्तःस्थं वास्तविकं तत्त्वं न विनश्यति। अतस्तदेव आभ्यन्तरतत्त्वम्। अन्ये च बाह्या एव।

बुद्धिस्थशब्दस्य बाह्यनिबन्धनत्वं सम्यगवबोधयितुमेव एतत्सर्वं व्याख्यातम्। ब्रह्मसकाशात् प्राप्तदैवीतत्त्वज्ञाना देवर्षयो मानवान् 'घटः, पटः' इत्यादिशब्दान् यावत् नाध्यापयामासुः, न तावत्कालं तेषां बुद्धौ दैव्याः वाचः संस्कारः समजनि। एवं पालि-प्राकृत-हिब्रू-अरबी-आंग्ल—इत्यादिभाषासूपलभ्यमानानां 'धम्म, गॉड' इत्यादिशब्दानामपि विषये समूहनीयम्। ईश्वरश्च खलु निखिलज्ञानकेन्द्रोऽनादिनिधनभूतो घटपटादिशब्दान् समुच्चारयितुं बाह्यनिबन्धनं न समपेक्षते।

किञ्च "दैवी वाग्व्यवकीर्णेयमशक्तैरभिधातृभिः"[2] इति भर्तृहर्युक्त्या यद्वा "भाषा[3] समानरूपा न तिष्ठति" इति रावर्टमहोदयस्योक्त्यनुसारं संस्कृतभाषाया अपि परिवर्तनशीलत्वाद् दैवी वागेव पालिप्राकृतापभ्रंशादिभाषाणां जनयित्री स्यादित्यत्र तुष्यद्दुर्जनन्यायेन न मे काचिद् विचिकित्सा, किन्तु घटपटाद्यात्मिकाया बाह्यवैखर्या वृद्धव्यवहारेण घटपटादिनिष्ठसंकेतस्य बुद्धौ संस्कारं विना ज्ञानमसम्भवम्। अत एव प्राचीनवैयाकरणैः—"स्वविषयकश्रावणप्रत्यक्षस्वनिष्ठशक्तिग्रहादितोद्बुद्धसंस्कारसमवायित्वेत्येतदुभयसम्बन्धेन प्रातिपदिकनिष्ठव्याप्यतानिरूपितव्यापकतावदुपस्थितीयविषयताश्रयतावानर्थः प्रातिपदिकार्थः"—इत्येवं प्रातिपदिकार्थस्य लक्षणं कृतम्। मनुष्याणां भाषणावयवेषु विविधध्वनीन् समु-

१. "व्यतीत्यालोकतमसी प्रकाशं यमुपासते"।
—वाक्यपदीयम्, ब्रह्मकाण्डम्।

२. श्रीभर्तृहरिकृतवाक्यपदीयस्य ब्रह्मकाण्डम्, कारिका १५५।

3. Language does not stay the same.—A Robert A Hall J. R.—Linguistics and Your Language. P.N. 157.

च्चारयितुं शक्तिर्विद्यते[१] । अत एव विविधदेशोत्पन्नजनानां सम्पर्केण विभिन्नभाषाणां प्रत्येकं ध्वनिमुच्चारयितुं नृषु क्षमता दृश्यते । इयं शक्तिर्नृभ्य एव ईश्वरेण प्रदत्ता । तिर्यगादियोनिजानां मध्ये शुकसारिकास्वपि प्रतिध्वनिं समभिव्यवहर्तुं शक्तिर्दृश्यते[२] । अतस्तेषामपि बुद्धौ मानवसम्पर्काद् विविधशब्दानां संस्कारः सञ्जायते । किञ्च, येषु वनवासिषु प्रतिध्वनिं समभिव्यक्तुमीश्वरप्रदत्ता शक्तिर्विद्यते, ते सर्वेऽपि प्रशिक्ष्यमाणाः मानवीयां भाषां व्यवहर्तुं क्षमाः । श्रुतञ्च —"लांगूलवान् वनौकाः कपियोनिं समुपलभ्यापि सूर्यसकाशाद् निखिलं व्याकरणज्ञानं संस्कृतभाषणपाटवञ्च समुपलब्धवान्"[३] । इति । सुग्रीवनलनीलाङ्गदहनुमदाद्यतिरिक्तेषु आकृत्या समानेष्वपि लांगूलवत्सु कपिषु चैवं न दृश्यते ।

यथा सृष्टौ समेषां गन्धानां पृथक् पृथक् सृष्टिरभूत् । नह्येकस्मादेव गन्धात् सर्वजातीयगन्धानां सृष्टिः सम्भाव्यते । यथा वा, नहि एकस्माद् नीलवर्णात् सर्वजातीयपीतादिवर्णानां सर्जनमभूत् । किन्तु नीलपीतहरितादिरूपाणां मूलतः पृथक्तया सर्जनं स्वीकर्तुं युज्यते । नीलपीतादिरूपाणां सृष्टौ सत्यां तेषां परस्परं सम्मेलनादन्यस्य रङ्गस्य प्रादुर्भावो दृश्यते । एवमत्रापि समूहनीयम् ।

दिव्यातिरिक्ता वादाः

विविधभाषासु तत्तच्छब्दानां समभिव्यक्तिविषये दिव्यातिरिक्ता ये सांकेतिकादिपञ्चसिद्धान्ताः स्वीक्रियन्ते, ते सर्वे न युक्तियुक्ताः; ईश्वरेऽविश्वासनिबन्धनभूता, अष्टादशशताब्द्याम्, यद्वा एकोनविंशशताब्द्यामाधुनिकैः कल्पिताः आधुनिकतमा दोषग्रस्ताश्च विद्यन्ते । ते च पञ्च[४] वादा अधस्ताद् अङ्किताः—

१. साङ्केतिकः, २. अनुकरणमूलकः, ३. मनोभावाभिव्यञ्जकः, ४. यो हे हो वादः, ५. डीङ्डैङ्वादश्च ।

एतेषां मध्ये 'यो हे हो वादः', 'डीङ्डैङ्वादः'—इति मतद्वयं निःसार-

1. "Among all the sounds the human organs of speech can produce the sound, There is basic division, depending on whether we can produce the sound exlusively by forming reasonance chambers in the mouth and nose."
—Robert A Hall JR. Linguistics and Your languages P.N. 73.

२. शुकसारिका जानकी ज्याये । कनकपींजरह्नि राखि पढ़ाये ।
व्याकुल कहँहि कहाँ वैदेही । सुनि धीरज परिहरी न केही ।।
—श्रीमद्गोस्वामीकृतश्रीरामचरितमानसे बालकाण्डे श्रीसीतारामविवाहे दो० ३३८ ।

३. वाल्मीकीयरामायणे किष्किन्धाकाण्डे ।

४. एते सर्वे वादा डा० श्यामसुन्दरदासप्रभृतिकृतं भाषारहस्यादिग्रन्थमाश्रित्य प्रस्तुताः ।

भूतमस्तीति वैज्ञानिकैरपि स्वीक्रियते । 'यो हे हो वाद' मतावलम्बिनः प्रारम्भिकयुगे जनाः सम्भूय किमपि कार्यं कृतवन्तः । परिश्रमबेलायाञ्च स्वभावतस्तेषां कार्याणां किञ्चित्प्रकारकध्वनिभिः सम्पर्कः सञ्जातः । यासां क्रियाणां यैर्ध्वनिभिः सम्पर्कोऽभूद्, ते ध्वनयस्तेषां वाचकत्वेन गृहीताः इत्येवं मन्यन्ते । मैक्समूलरप्रतिपादितो यो 'डीङ् डैङ् वादः' स कालान्तरं मैक्समूलरेणैव तिरस्कृतः । तस्मिन् वादे आघाते सति सर्वस्मिन्नपि द्रव्येऽनुरणनं स्वभावतः सञ्जायते । एवं रीत्या "मनुष्येष्वपि एका स्वाभाविकी विभाविका शक्तिरासीद् या घटपटादिशब्दान् निर्ममे" इत्येवं स्वीक्रियते । एतन्मतद्वयं वैज्ञानिकैर्निःसारभूतं स्वीक्रियते । केवलं साँकेतिकम्, अनुकरणमूलकम्, मनोभावाभिव्यञ्जकञ्चेति मतत्रयमांशिकरूपेण सत्यतया स्वीचक्रुः[१] ।

साङ्केतिकमतावलम्बिनः "प्रारम्भिकयुगे जना मूका बभूवुः, केवलं हस्तसंकेतेनैव स्वमनोभावमभिव्यक्तं चक्रुः । हस्तादिसंकेतेन कार्यस्य पूर्णरूपेण निर्वाहाभावे ध्वनिसंकेतमजनयन् । ते ध्वनिसंकेता एव घटपदादिशब्दरूपेण विकसिता अधुना श्रूयन्ते"—इत्येवं मन्यन्ते । इदमपि मतं हास्यास्पदं प्रतीयते । भाषणज्ञानविहीना कमप्यव्यक्तं ध्वनिमपि वक्तुमसमर्था मूका एव सम्भूय भाषणविधिविमर्शं कृतवन्त इति वचनं विश्वासं नावरोहति ।

अनुकरणमूलकतावादिनाञ्च मते काकादिपक्षिणां ध्वनिमनुकृत्य काकादिशब्दानां रचना जाता । प्रारम्भिकयुगे मानवः पशुपक्ष्यादिध्वनिमनुकृत्य नूतनशब्दानां सर्जनं कृतवान् । वस्तुतस्तु अत्राऽपि न मे सुदृढो विश्वासः । यथाऽयं मनुष्यः पशुपक्ष्यादीनां ध्वनिमनुकृत्य शब्दान् विरचयामास, तथैव पशुपक्ष्यादयोऽपि मानवध्वनिमनुकृत्य घटपटादिशब्दान् कथं न व्यवहरन्ति । अतो "जगति विभिन्नाः प्राणिनो विभिन्नशब्दान् प्रयोक्तुं नानादेहधारिणा ईश्वरेण शिक्षिताः"—इति स्वीकरणीयम् ।

मनोभावाभिव्यञ्जकमतावलम्बिनस्तु विस्मयादिबोधकैः मनोभावाभिव्यञ्जकैः "आह पूह" इत्यादिध्वनिभिस्तत्तच्छब्दानां सर्जनं बभूवेति मन्यन्ते ।

१. "विकासवाद का समन्वित रूप—मैक्समूलर के इस बाद की चर्चा मनोरञ्जन के लिए की जाती है । पर इसके पहले के तीन मत—अंशतः सत्य हैं ।" इति श्यामसुन्दरदासो भाषारहस्ये ।
"भाषा के विकास का अगला चरण प्रागैतिहासिक काल से ही प्राकृतिक चीजों और जीव जन्तुओं का अनुकरण है । ध्वनि-अनुकरण या ध्वन्यात्मक शब्दों के इस सिद्धान्त का ह्विटनी, पालि तथा अन्य भाषाविज्ञानविदों ने समर्थन किया है ।
Life and eprowth of Language P. 294–5
ह्विटनी —डा० दामोदर गुणे, तुलनात्मक भाषाविज्ञाने, पृ० १० ।

एतन्मतमपि दूषितं विद्यते। यदि विस्मयादिबोधकशब्दादेव घटपटादिशब्दानां सृष्टिः सञ्जाता। मूले विस्मयादिबोधकाश्च शब्दाः सर्वत्र समाना आसन्, तर्हि सम्प्रत्यपि सर्वत्र समानतया तेषामुपलब्धिः स्यात्, यं मनोभावमभिव्यक्तुं कश्चिज्जर्मनदशीयो निसर्गतः "ओ" ध्वनिं मुखतोऽभिव्यनक्ति, भारतीयश्च तमेव दुःखात्मकं मनोभावं प्रकटीकर्तुं "आह ऊह" इत्यादिध्वनिं प्रयुङ्क्ते। एवमन्ततो गत्वा दैवीवादस्यैव शरणं वयं व्रजामः।

सृष्टौ यथाऽन्येषामङ्गानां सर्जनं जातम्, तथैव कण्ठे स्वरतन्तूनामपि रचना युगपदेवाभूत्। सृष्टेः कतिपयकालान्तरं कण्ठस्थस्वरतन्तूनां रचना जातेति न कोऽपि मनुते। तथा च आसृष्टेः कण्ठस्थस्वरतन्तूनां सृष्टेरस्तित्वस्य सत्त्वाद् मानवेषु भाषणशक्तिरपि जन्मना सहैव जातेति स्वीकर्तुं समापतति; किन्तु "अयं पदार्थो घटशब्देन व्यवहर्तव्यः, अयञ्च पटशब्देन" इत्येवं न जानन्ति स्म। सर्वेषामाचार्याणामादिभूतो भगवानेव जनानां देवदनुजगन्धर्वाणाञ्च बुद्धौ "अस्मिन्नेवार्थेऽयं शब्दः, अस्मिंश्चार्थेऽयम्, दन्त्यसकारघटकोऽस्वशब्दो निर्धनार्थे, तालव्यशकारघटकश्च घोटकार्थे साधुः, तद्भिन्नार्थे च असाधुः। "कट-शब्दघटकसीवर्णस्य ककारोच्चारणम्, सेण्टशब्दे च तस्य सकारोच्चारणं साधु, तद्विपरीतोच्चाणञ्च असाधु" इत्येवं घटपटादिविभिन्नशब्दानां संस्कारं बुद्धौ पातयामास। अत एव "संकेतग्राहकशिरोमणिः वृद्धव्यवहारः"—इति वैयाकरणसिद्धान्तः। "अस्मिन्नर्थेऽयं शब्दः प्रयोक्तव्यः, अस्माच्छब्दादयमर्थो बोद्धव्यः—इत्याकारिकेश्वरेच्छा एव शक्तिः" इति नैयायिकानां राद्धान्तः। ततः प्रभृति जना घटपटादिशब्दं व्यवहर्तुं क्षमाः। कस्मिन् समये सर्वनियन्ता घटपटादिशब्दान् शिक्षयामास? इति प्रश्नस्य समाधानं न काऽपि शताब्दी, न वा कोऽपि शिलालेखश्च कर्तुं क्षमः, किन्तु घटपटादिशब्दानां बुद्धौ संस्कारः, किमपि बाह्यनिबन्धनं विना न सम्भवतीति तु वचनं दृढीभूतमेव जातम्।

यः खलु शब्दोत्पत्तिविषये स्वाभाविकोन्मेषवादी[1], सोऽपि तत्तच्छब्दानां बुद्धौ संस्कारे बाह्यमेव निबन्धनं स्वीकुर्वाणो दिव्योत्पत्तिमतावलम्बी च प्रतीयते। तथा च तेन प्रोक्तम्—

"जन्मसंस्कारे[2] भाषाभावः" इति।

ममैकोऽन्तेवासी गुर्जरप्रान्तीयकन्यया सह पाणि-ग्रहणं कृतवान्। तस्य कन्या मात्रा सह गुर्जरभाषाम्, पित्रा सह हिन्दीभाषाम्, धात्र्या च सह महाराष्ट्रीं भाषां व्यवहरति। अतो भाषा जन्मना सहैव न समुपलभ्यते—इत्येवं जन्मसंस्कारे इति पूर्वोक्तसूत्रस्य व्याख्यानं कृतम्। अनेन इदमेव तथ्यं दृढीभवति यद् बाह्यनिबन्धनं विना विभिन्नशब्दानां बुद्धौ संस्कारोऽसम्भवः। बाह्यनिबन्धीभूतं बुद्धिस्थ-

१. आचार्यश्रीसीतारामचतुर्वेदी, "भाषालोचन", पृ० ९९–१०० ।

२. आचार्यश्रीसीतारामचतुर्वेदी, 'भाषालोचन' पृ० सं० ९९–१०० ।

संस्कारं विना घटपटादिशब्दा नोच्चारयितुमर्हाः। घटपटादिशब्दानां बुद्धौ संस्कारे आद्यभूतं बाह्यनिबन्धनञ्च ईश्वरोच्चरितघटपटादिशब्दाः।

किञ्च, दैवीवादातिरिक्तेषु साङ्केतिकादिवादेषु प्रबलतमो योऽनुकरणादिवादत्रयस्य समन्वितरूपो वादः, तेन मदुक्तवचनमेव पुष्यति। यथा मुहुर्मुहुः, का-केति शब्दं रटतः पक्षिणो ध्वनिमनुकृत्य काकशब्दं व्युत्पादयमासुः। एतद्वादानुसारेण प्रथमं काकेति शब्दं रटतः पक्षिणः "का का" इति शब्दस्य श्रोत्रेन्द्रियेण बुद्धौ संस्कारः समापतितः, ततः काकशब्दस्य निष्पत्तिरिति बाह्यशब्दस्य बुद्धौ संस्कारः।

समन्वितवादे प्रविष्टो यो मनोभावाभिव्यञ्जकतावादस्तत्रापि बाह्यस्यैव बुद्धौ संस्कारः सञ्जातः।

यथाऽनुकरणमूलकतावादी पशुपक्ष्यादिध्वनिमनुकृत्य काकादिशब्दानां निष्पत्तिं स्वीकरोति, तथैव मनोभावाभिव्यञ्जकतावाद्यपि "स्वपार्श्ववर्तिजनानाम् "आइ, वाइ" इत्यादिमनोगतविस्मयादिबोधकं ध्वनिमनुकृत्य शब्दसृष्टिं मनुते। यथा अरवीभाषायां विस्मयबोधक-वोशब्दः सञ्ज्ञावाचकत्वेनापि गृह्यते। मनोगतविस्मयबोधक-वोशब्देन च अरवीभाषायाम् आपत्तिवाचकवेलशब्दो निष्पन्नः। अत्र पूर्वं वे-शब्दस्य बुद्धौ संस्कारस्ततस्तदनुकरणेन वेलशब्दस्य निष्पत्तिः। अस्मिन् समन्वितवादे सम्मिलितो यः प्रतीकवादः, तत्रापि बाह्यस्यैव संकेतस्य बुद्धौ संस्कारः समपेक्ष्यते। सर्वप्रथमं मनुष्यो दन्तान् बोधयितुम् अंगुल्या संकेतं कुर्वन् "अ आ अत्" इत्यादिध्वनिं व्यवहरन्नासीत्। अत एव "अ आ अद्" इत्यादयो ध्वनिसंकेता दन्तार्थेषु भक्षणक्रियार्थेषु च अद्शब्दरूपं प्राप्ताः।

एवं समन्वितवादस्य समीक्षयाऽयमेव सिद्धान्तः सुदृढः सञ्जायते यद् मानवजातिषु स्वभावतः "ओ, ऊ" इत्याद्यात्मकध्वनिं कर्तुं शक्तिरासीत्। किन्तु कस्यचिद् बाह्यस्य सार्थकशब्दस्य बुद्धौ संस्काराभावे न कोऽपि शब्दः समुच्चारयितुं शक्यते। परेण शिक्षित एव घटपटादिशब्दमभिव्यवहर्तुं जानाति, नान्यः। अयं सिद्धान्तः शृगालगुहातः समुपलब्धबालकबालिकयोरितिवृत्तेन "जन्मसंस्कारे भाषाभावः" इति पूर्वोक्तसूत्रस्य व्याख्यानभूतदृष्टान्तेनातीव दृढतमः प्रतिभाति।

एवं रीत्या सृष्टेरादौ सर्वप्रथमं मनुष्येषु शब्दस्य बुद्धिमुपारूढत्वे वैखर्यात्मकस्तुरीयो बाह्यः श्रुतः शब्द एव निबन्धनं कारणम्, न तु किमप्यान्तरिकं कारणम्। श्रुता दृष्टाश्च विषया एव मनसाऽनुभूयन्ते, स्वप्नादिषु च दृश्यन्ते। खे उड्डीयमानं पक्षिणं दृष्ट्वा अस्माकमपि मनसि उड्डेतुमिच्छा जागर्ति—वयमपि च स्वप्ने उड्डीयामहे। खे उड्डीयानस्य कस्यचिज्जीवस्य दर्शनं श्रवणं जाग्रद्दशायां कदापि न स्यात्तर्हि स्वप्नेऽपि न स्यात्। मया कालिकातानगरी न कदाऽपि चक्षुषा दृष्टा, किन्तु श्रुता। अतस्तत्र कस्यां वीथ्यां किं विद्यते? इति चाक्षुषज्ञानं न जायते। केवलं श्रौतमेव ज्ञानं स्यात्। यदा च तस्या नगर्याश्चाक्षुषं

प्रत्यक्षं क्रियते, तदा चाक्षुषं ज्ञानं जायते, तत्रस्थाः पदार्थाश्च बुद्धिमुपारूढा जायन्ते। इत्थं विषयैः सह इन्द्रियसंयोगस्य अन्वयव्यतिरेकाभ्यामयमेव निष्कर्षः सञ्जायते यद् बाह्य एव विषय इन्द्रियद्वारा बुद्धिमुपारूढः सन् घटपटादिरूपेण ज्ञायते। यथा चलचित्रपटे न किमपि चित्रं निसर्गतः समुत्पद्यते, किन्तु यन्त्रद्वारा विद्युन्माध्यमेन यस्य चित्रस्य प्रतिबिम्बं तत्र पटे समापतति तदेव चित्रं विद्युन्महिम्ना चेतनप्राणीव चलद् व्यवहरच्च प्रतीयते। तथैवात्रापि बुद्धिरूपपटे बाह्यमेव चित्रमङ्कितम्। प्राग्जन्मनि यच्चित्रमङ्कितम्, तद् द्वितीयजन्मनि विस्मृतम्। अतः पुनर्जन्मवादिमतानुसारेण तस्य पुनः संस्कारः बुद्धिपटले समपेक्ष्यते।

अपुनर्जन्मवादिमतानुसारेण (यः कृतकर्मणां फलस्य भोगार्थं पुनर्जन्म न मन्यते तदनुसारम्) नवीनः संस्कारः समपेक्ष्यते। एवं लोके कादिध्वनिघटको बाह्यस्फोट एव श्रोत्रेन्द्रियद्वारा बुद्धिमुपारूढः सन्नवधार्यते। अत एव कामपि विद्यां ग्रहीतुं गुरोराराधनं क्रियते। पदवाक्यात्मको बाह्यः स्फोट एव लोके अर्थावबोधकः। घटपटादिशब्देषु घकारादिध्वनीनामव्यवहितोत्तरत्वस्याधारो बुद्धिः। यत्र च नागेशेन घकारादिध्वनिना मध्यमानादस्य संस्कारः स्वीक्रियते तदपेक्षया घकारादिध्वनिना "नादैराहितबीजायाम्"—इति भर्तृहर्युक्त्या बुद्धेरेव संस्कारः स्वीकर्तव्यः। बाह्यस्फोटविषय एव दर्शनेषु नित्यानित्यत्वकलहः श्रूयते, न तु आभ्यन्तरस्फोटविषये। अत एव पातञ्जल**महाभाष्यस्य** प्रत्याहाराह्निके "अ इ उ ण्" इति सूत्रे "नैवं शक्यम्, अनित्यत्वमेवं स्यात्। नित्याश्च शब्दाः। नित्येषु शब्देषु कूटस्थैरविचालिभिर्वर्णैर्भवितव्यतमनपायोपजनविकारिभिः" इत्यत्र बहुवचनं संगच्छते। नागेशप्रतिपादितस्फोटस्य तु एकत्वान्न सङ्गच्छते। बाह्यस्फोटात्मकशब्दस्यैव व्याकरणेन अनुशासनं क्रियते। अत एव **महाभाष्ये** परस्शाह्निके "केषां शब्दानाम्?" इति प्रश्नस्य "लौकिकानां वैदिकानाञ्च" इति समाहितम्। लौकिकशब्दस्योदाहरणं गौरश्वादिशब्दाः, वैदिकशब्दस्य च "शन्नो देवीरमीष्टये" इति प्रदत्तम्, न तु गकारादिध्वन्यभिव्यङ्ग्यः स्फोटः कण्ठरवेण समुपस्थापितः।

लोके घटशब्दस्योच्चारणेन कम्बुग्रीवादिमद्रूपार्थस्यैव बोधदर्शनाच्छब्दार्थयोरभेदसम्बन्धः, घटशब्देन च कम्बुग्रीवादिमद्रूपार्थस्य ज्ञानाच्च घटज्ञानयोरपि अभेदसम्बन्धो निष्पद्यते। तथा चोक्तं **वाक्यपदीयस्य** तृतीयकाण्डे—

ज्ञानं प्रयोक्तुर्बाह्योऽर्थः[1] स्वरूपञ्च प्रतीयते।
शब्दैरुच्चरितैस्तेषां सम्बन्धः समवस्थितः॥ ३-१॥

अभेदसम्बन्धस्य च भेदनिष्ठतया शब्दार्थयोः परस्परं भेदोऽपि विश्वासपदवीमाटीकते; यतो हि भेदे सत्येव अभेदसम्बन्धः सङ्गच्छते। यथा जीवेश्वरयो-

१. प्रयोक्तुरर्थश्च—इति पाठान्तरम्।

र्मोक्षदशायां भेदे सत्येव मोक्षानन्तरं[1] तयोः परस्परमभेदसम्बन्धः सञ्जायते। मोक्षात् पूर्वं दशायामभेदत्वे तु स सम्बन्धो न सङ्गच्छते। तथैव रीत्या शब्दार्थविषयेऽपि समूहनीयम्। गृहीतशक्तिको बाह्यस्फोटात्मकः शब्दो बुद्धिमुपारूढः सन् सास्नालांगूलादिविशिष्टं पदार्थमवबोधयति। बाह्यस्फोट एव लौकिकभाषाया आधारः। स एव भाषाविज्ञानस्य विषयीभूतः। अयं बाह्यस्फोटः (भाषा) लौकिकः सांकेतिकश्च, पूर्वजानां परम्परया अद्यावधि समुपलभ्यमानो विद्यते। अन्यस्य संसर्गद्वारा च ग्रहीतुं शक्यते, नान्यथा। कश्चिद् विदेशी नूतनसंसर्गेणैव कामपि भाषां ग्रहीतुं प्रभवति।

यया रीत्या लोके सुवर्णनिर्मितकटककुण्डलादिभिरेव बाराङ्गनाऽलंक्रियते, न तु सुवर्णपिण्डेन; यथा वा लोके उपादानभूतमृत्पिण्डनिर्मितेन घटेनैव जलाहरणादिक्रियायाः सम्भवः, न तु तदुपादानभूतमृत्पिण्डेन; एवं लोके उपादानभूतमध्यमानादस्य कार्यभूतेन[2] बुद्धिमुपारूढेन वैखरीशब्देनैवार्थावबोधः, न तु तदुपादानभूतमध्यमाख्यशब्देन। यथा स्वर्णपिण्डे विद्यमानेऽपि स्वर्णकारेणाशिक्षितो भूषणनिर्माणानभिज्ञः कटककुण्डलादिकं निर्मातुं न शक्नोति, केनापि शिक्षितो भूषणनिर्माणविधिज्ञ एव कटककुण्डलादिकं निर्माति। एवमन्तर्बहीरूपभाषात्मकशब्दस्योपादानभूते मध्यमानादे स्वतो विद्यमानेऽपि वृद्धजनेनाशिक्षितः शब्दोच्चारणानभिज्ञो घटपटादिकमुच्चारयितुं मनसि चिन्तयितुं वा न समर्थः। अतएव भाषावैज्ञानिकैरुच्यते यद् भाषा (बाह्यस्फोटः) खलु लौकिकी, संकेतरूपा पूर्वजानां परम्परया अद्यावधि समुपलभ्यमाना अन्यस्य संसर्गद्वारा ग्रहीतुं शक्यते, नान्यथा। कश्चिद् विदेशी नूतनसंसर्गेणैव कामपि भाषां ग्रहीतुं प्रभवति।

बाह्यस्फोटस्य भेदाः—

अयं बाह्यः स्फोटः वाचिकादिभेदेन त्रिविधः— १. वाचिकः, २. उपांशुः, ३. मानसश्च इति।

नृसिंहपुराणे जपयज्ञस्य त्रिविधो भेदः प्रोक्तः। स भेदो बाह्यस्फोटस्यापि बोद्धव्यः। तथा चोक्तं **नृसिंहपुराणे**—

त्रिविधो जपयज्ञः स्यात्तस्य भेदं निबोधत।
वाचिकश्च उपांशुश्च मानसस्त्रिविधः स्मृतः॥
(नृ० पु०, अध्या० ५८, श्लो० ७८)

वाचिकबाह्यस्फोटस्य लक्षणम्

अर्थबोधनेच्छया यः शब्दः समुच्चार्यते, अपरैश्च श्रूयते, स वाचिको बाह्यस्फोटो वेदितव्यः। **नृसिंहपुराणे** यल्लक्षणं वाचिकजपस्य प्रोक्तम्, तदेव लक्षणमत्र

१. सायुज्यमुक्तावेव।
२. मध्यमानादादभिव्यज्यमानेन।

बाह्यस्फोटस्यापि ग्रहीतव्यम् । एवमुपांशु-मानसबाह्यस्फोटयोरपि लक्षणमुपांशु-मानसजपलक्षणवद् वेदितव्यम् । वाचिकस्य जपस्य लक्षणम्—

यदुच्चनीचोच्चरितः शब्दैः स्पष्टपदाक्षरैः ।
मन्त्रमुच्चारयेद् वाचा वाचिकोऽयं जपः स्मृतः ॥
(नृसिं० पु० अध्या० ५८, श्लो ८०) ।

उपांशुबाह्यस्फोटस्य लक्षणम्

यस्योच्चारणे ओष्ठद्वयमीषदेव प्रचलतः, ध्वनिश्च अपरैर्न श्रूयेत, शनैः शनैश्च यस्योच्चारणं स्यात्, स उपांशुबाह्यस्फोटोऽवगन्तव्यः ।

शनैरुच्चारयेन्मन्त्रमीषदोष्ठं प्रचालयन् ।
अपरैरश्रुतः किञ्चित् स उपांशुजपः स्मृतः ॥
(नृसिं० पु०, अ० ५८, श्लो० ८१) ।

मानसबाह्यस्फोटस्य लक्षणम्

यस्योच्चारणे ओष्ठद्वयादिकं न प्रचलेत्, केवलं मनसैवोच्चारणं श्रवणं वा स्यात्, स मानसः शब्दः कथ्यते । तथा चोक्तं **नृसिंहपुराणे—**

धिया यदक्षरश्रेण्या वर्णाद् वर्णं पदात् पदम् ।
शब्दार्थचिन्तनं भूयः कथ्यते मानसो जपः ॥
(नृसिं० पु०, अ० ५८, श्लो० ८२)

अत्र यल्लक्षणं मानसजपस्य प्रोक्तम्, तदेव लक्षणमाभ्यन्तरबाह्यस्फोटस्यापि प्रवक्तुं शक्यते ।

यद्वा, अर्थस्य प्रत्यायकः स्फोटो द्विविधः—१. बाह्यः, २. मानसश्च । बाह्यस्फोटो बाह्यदेशे वक्त्रा समुच्चार्यते श्रोत्रा वक्त्राऽपि च श्रूयते, तेन च अर्थोऽवबुद्धयते, स बाह्यः । अपरश्च अन्तःसम्वादविसम्वादरूपो विद्यते । यथा अर्थविबोधिकायाम् अखण्डवाक्यस्फोटात्मिकायां बाह्यवैखर्यां वैयाकरणमते वर्णाभावः, पदाभावश्च, यद्वा, मीमांसकानां मते पदेषु वर्णानाम्, वाक्येषु च पदानां प्रतीतिः, तथैवान्तःकरणे वर्तमानायां सम्वादविसम्वादरूपायां वैखर्यं शाब्दिकनयानुसारेण वर्णपदयोरभावः, यद्वा मीमांसकमतानुसारेण वर्णाः पदानि च प्रतीयन्ते । यथा कश्चिद् बाह्यां वैखरीं बाह्येन श्रोत्रेण वागिन्द्रियेण च शृणोति, तदुच्चारयति च, तथैव मननशीलः पुरुषो मार्गं गच्छन्, आसनमासीनः, उत्थितो वेति सर्वासु क्रियासु मानसवागिन्द्रियेण कण्ठोरसोः सन्धाने हृद्देशे शब्दमुच्चारयति, मानसश्रोत्रेन्द्रियेण च शृणोति । अत एव लोके उच्चैः पठमानं छात्रं कश्चिद्वदति -'मनसा पठ' इति । अत एव उच्यते "विचारः कस्याञ्चिद् भाषायां क्रियते" इति। परन्तु मनसा तेषामेव शब्दानामुच्चारणं कर्तुं शक्यते, येषां बाह्येन श्रोत्रेन्द्रियेण, वागिन्द्रियेण च श्रवणमुच्चारणञ्च जायेते, नान्येषाम् । नैयायिकानां निकाये

वर्णात्मकस्य शब्दस्येदं मानसिकमुच्चारणं श्रवणं वा सामान्यलक्षणो ज्ञानलक्षणश्च अलौकिकौ व्यापारौ वक्तुं शक्येते । यश्च यं शब्दं मनसोच्चारयति, स एव तं शब्दं मनसा शृणोति, मनसैव च तस्यार्थं वेत्तीत्यस्माद्धेतोरयं व्यापारो लौकिकः प्रोच्यते । एवं रीत्या शब्दस्य श्रोता, प्रवक्ता, मननशीलश्चेति त्रयः पुरुषाः बाह्यभ्यान्तरभेदेन द्विविधवैखरीशब्देनैवार्थमवगच्छन्ति । मानसवैखर्या अपि संस्कारो बुद्धावेव, न तु मध्यमायां वाचि । अत एव पतञ्जलिना "परः सन्निकर्षः संहिता' (१।४।१०८) इति पाणिनिसूत्रस्य **भाष्ये—**

बुद्धौ कृत्वा सर्वाश्चेष्टाः कर्ता धीरस्तन्वन्नीतिः ।
शब्देनार्थान् वाच्यान् दृष्ट्वा बुद्धौ कुर्यात् पौर्वापर्यम् ॥ इति ।

बुद्धाविति प्रोक्तम् । आभ्यन्तरे स्फोटे तस्य संस्कारे तु स्फोटे पौर्वापर्यं कर्तव्यमित्युच्येत, किन्तु नोक्तम् । तथा च "बुद्धौ" शब्देन वाच्यान् अर्थान् दृष्ट्वा तत्रैव बुद्धावेव वर्णानां पौर्वापर्यं निर्धारयितव्यम् । इत्युत्तरार्धस्य श्लोकस्य तात्पर्यम् ।

मध्यमानादान्तःसम्वादविसम्वादरूपशब्दयोश्चेदमेवान्तरं यन् मध्यमानाद उभयोः (बाह्याभ्यन्तरवैखरीशब्दयोः) उपादानभूतः, केवलमव्यक्तात्मकनादस्वरूपः कर्णपिधाने सति च श्रूयते । अन्तःसम्वादविसम्वादरूपश्च शब्दो मध्यमानादस्य कार्यभूतो वर्णपदात्मकश्च विद्यते ।

ऋषीणां निकायेऽर्थावबोधकशब्दस्वरूपम्

मानसवैखरीतः परं मध्यमानादस्य, ततः परञ्च पश्यन्त्याश्च स्वरूपं विद्यते । वेदान्तिभिर्यत्तत्त्वं ब्रह्मपदेन व्यपदिश्यते, तदेव तत्त्वं शाब्दिकैः परा वाग् यद्वा पश्यन्ती वागित्युच्यते । यथा पूर्णब्रह्मणः पूर्णसंसाररूपेण परिणामे सत्यपि तत् पूर्णरूपेणावशिष्यते । उक्तञ्च—

ॐ पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥ इति ।

यथा प्रलयानन्तरं जगतो ब्रह्मणि लीनेऽपि तत्र वृद्धिर्न दृश्यते, एवं परमशब्दतत्त्वविषयेऽपि बोद्धव्यम् । संख्यातीतवाक्यरूपेण विवर्तमाना अपि परा वाग् वृद्धिह्रासरहिता स्वस्वरूपेणावतिष्ठते । इदञ्च पराख्यमलौकिकं तत्त्वमलौकिका एव जना उपासते । तथा चोक्तं भर्तृहरिणा **वाक्यपदीयस्य** ब्रह्मकाण्डे—

वैकृतं समतिक्रान्ता मूर्तिव्यापारदर्शनम् ।
व्यतीत्यालोकतमसी प्रकाशं यमुपासते ॥ १९ ॥ इति ।

अस्यायमर्थः—वैकृतं वैकृतध्वनिसम्बन्धि मूर्तिव्यापारदर्शनम् = मूर्तेर्देशस्य व्यापारस्य क्रियायाः क्रियोपलक्षितकालस्य दर्शनमनुभवम्, देशकालभेदमिति यावत्, समतिक्रान्ताः = स्फोटेऽनारोपयन्तः, आलोकतमसी = लोकेऽर्थावबोधकत्वाद्

वाक्यस्फोटः प्रकाशः, अर्थानवबोधकत्वाच्च ध्वन्यात्मको निरर्थकश्च शब्दस्तमः, तं व्यतीत्य = अतिक्रम्य स्थितं यं प्रकाशं मध्यमानादाख्यं यद्वा पराख्यं शब्दतत्त्वं समुपासते = जानन्ति ।

उपासनया प्रकाशात्मकं पराख्यमिदं शब्दतत्त्वं ये ऋषयः प्रत्यक्षं कृतवन्तस्ते तु श्रोत्रेन्द्रियेण बाह्यशब्दस्य श्रवणाभावेऽपि सर्वं विजानन्ति । ते ऋषयः शब्दं प्रत्यक्षीकर्तुं बाह्यनिबन्धनं नापेक्षन्ते । पश्यन्त्याख्ये शब्दतत्त्वे सततं समेषां शब्दानां भानं तेषां हृदि जायते ।

किञ्च, पराख्यं शब्दतत्त्वं प्रत्यक्षं कुर्वाण ऋषिः सर्वानपि भावान् वेत्ति । तथा चोक्तं भर्तृहरिणा **वाक्यपदीयस्य** ब्रह्मकाण्डे—

> आविर्भूतप्रकाशानामनुपप्लुतचेतसाम् ।
> अतीतानागतज्ञानं प्रत्यक्षान्न विशिष्यते ॥ ३७ ॥
> अतीन्द्रियानसम्वेद्यान् पश्यन्त्यार्षेण चक्षुषा ।
> ये भावान् वचनं तेषां नानुमानेन बाध्यते ॥ ३८ ॥ इति ।

अत्र कारिकायां प्रकाशपदेन तस्यैवार्थस्य ग्रहणम्, यस्यार्थस्य ब्रह्मकाण्डे "वैकृतं समतिक्रान्ता" इति कारिकायां प्रकाशपदेन ग्रहणम् । "आविर्भूतप्रकाशानाम्", "अतीतानागतज्ञानं पश्यन्त्यार्षेण चक्षुषा" इत्युक्त्या च आभ्यन्तरस्फोटाख्यस्य यद्वा पश्यन्त्याख्यस्य प्रकाशस्य साक्षात्कर्ता ऋषिः । बाह्यविषयस्येन्द्रियेण संयोगाभावेऽपि सर्वविषयं जानाति । यथा गृहीतसंकेतेन वैखरीशब्देन सर्वो विषयो ज्ञायते, तथैव आविर्भूतप्रकाशा ऋषयोऽपि मध्यमाशब्देन यद्वा पश्यन्तीशब्देन सत्त्वगुणोद्रेकविशिष्टबुद्धौ दृश्यमानं सर्वब्रह्माण्डं जानन्ति । लोकेऽर्थाद् ऋषिसम्प्रदायेऽर्थावबोधकः शब्दो मध्यमाख्यः, यद्वा पश्यन्त्याख्यो वेदितव्यः । यद्यपि प्रकाशात्मको नादात्मकश्च मध्यमाख्यः शब्दोऽस्माभिरपि कर्णपिधानेन श्रूयते, अस्माकमपि सार्वत्रिकं ज्ञानं जायेत; तथापि यथा अगृहीतसंकेतकं शब्दं शृण्वन्तोऽपि वयं तद्वाच्यार्थं न जानीमस्तथैव मध्यमानादनिष्ठप्रकाशस्यानेकजन्मसञ्चितकुत्सितकर्मभिः पिहितत्वात्तन्निष्ठनादं शृण्वन्तोऽपि न तद्वाच्यार्थं जानीमः । आविर्भूतप्रकाशानां महर्षीणां हृदयं मलशून्यत्वात्तत्प्रत्यक्षत्वे न किमपि प्रतिबन्धकम् ।

एते ऋषयो युक्त-युञ्जानभेदतो द्विधा भवन्तीति श्रीविश्वनाथन्यायपञ्चाननभट्टाचार्यप्रणीतायां **कारिकावल्याम्** अलौकिकसन्निकर्षप्रतिपादनावसरे व्याख्यातम् । तथा चोक्तम्—

> योगजो द्विविधः प्रोक्तो युक्त-युञ्जानभेदतः ।
> युक्तस्य सर्वदा भानं चिन्तासहकृतोऽपरः ॥ ५५ ॥

युक्तस्य तावद् योगजधर्मसहायेन मनसा आकाशपरमाण्वादिनिखिलपदार्थानां ज्ञानं सर्वदैव भवति । द्वितीयस्य चिन्ताविशेषोऽपि सहकारी । शाब्दिकानां मतानुसारं समाध्यवस्थायामपि पश्यन्त्याख्यशब्दस्य भानाद् युक्तयुञ्जानइत्युभयविधयोगिनां यज्ज्ञानमलौकिकसन्निकर्षेण जायते तत्तु पश्यन्तीद्वारैवेति बोद्धव्यम् । युञ्जानयोगी तु समाधितो बहिर्वृत्तिकः सन् श्रोत्रेन्द्रियद्वारेण गृहीतसंकेतं शब्दं लब्ध्वाऽर्थं वेत्ति । ऋषिसम्प्रदायेऽर्थावबोधनं सूक्ष्मं शब्दस्वरूपं यद्यप्याधुनिकभाषावैज्ञानिका भौतिकशास्त्रिणश्च न जानन्ति, तथापि रावर्टमहोदयेन भाषायाः सूक्ष्मं स्वरूपं स्वीकृतम्—इति पूर्वं प्रतिपादितम् । तदनुरुध्य भारतीयं शब्ददर्शनं च आश्रित्य सूक्ष्मं शब्दस्वरूपं व्याख्यातम् ।

सारांशः

अत्र समासत एवं बोध्यम्—यदर्थावबोधकशब्दस्य स्थूलसूक्ष्मभेदेन द्विविधं स्वरूपम् । सूक्ष्मशब्दश्च परापश्यन्तीमध्यमाभेदेन त्रिविधः । लोके स्थूलवैखरीशब्देनार्थप्रतीतिः, न तु आभ्यन्तरस्फोटेन । आभ्यन्तरस्फोटेन, यद्वा पश्यन्तीशब्देन तु तत्साक्षात्कर्तॄणां तपःसमाध्यादिभिः सञ्जायते । समाधौ लौकिकं सन्निकर्षं विनाप्यर्थावभासः सञ्जायते । आभ्यन्तरस्फोटस्य वाचकत्वं मन्यमानस्य प्राचीनस्य तथा आधुनिकस्य च अपेक्षया इदमेव नवीनत्वमत्र बोध्यम् ।

अत्र ध्वनेः सञ्चारस्य, श्रोत्रेण तद्ग्रहणस्य च प्रक्रियां ध्वन्यभिलेखनयन्त्रस्योदाहरणद्वारा च बुद्धौ तस्याभिलेखनप्रक्रियाञ्च व्यावृत्तवान् । लोकेऽर्थावबोधकशब्दस्य मूलभूतः शब्दः, यद्वा अक्रमरूपेण सूक्ष्मस्वरूपेण मूलाधारादिदेशे स्थितः शब्दो लोके गृहीतसंकेतेन अर्थावबोधकशब्दस्वरूपेण वक्त्रा कथमभिव्यज्यते ? इत्यादिकं प्रतिपादयिष्यते ।

यद्वा, ये पुनर्जन्मनि विश्वासमस्वीकुर्वाणाः, आधुनिका भाषावैज्ञानिकाः अथ च भौतिकवैज्ञानिका बाह्यं भौतिकमेव जगद् इयत्तया मन्यमानाः सन्ति, तेषां मतानुसारं शरीरान्तः किं तत्त्वं विद्यते यद् वैखरीशब्दरूपेण मुखाद् बहिरभिव्यज्यते ? ध्वन्यभिलेखनयन्त्रे वायुर्विद्युद् वा ध्वनिरूपेण परिणमते । अत्र यन्त्रे परावाङ् नाम न किमपि तत्त्वं विद्यते । तथैव रीत्या देहान्तर्भागे किं तत्त्वं विद्यते यद् वृद्धजनैरभिव्यवहृताः श्रोत्रद्वारा च श्रोतुर्बुद्धिदेशं गत्वा तत्र ये ध्वनयोऽङ्किताास्तद्रूपेण परिणमन्ते ? एतत्सर्वं श्रीभर्तृहरिकृत**वाक्यपदीयस्य** ब्रह्मकाण्डे "वायोरणूनां ज्ञानस्य", "स मनोभावमापद्य" इत्यादिकारिकाणां साहाय्येन व्याख्यास्यते ।

वर्ण-शब्दयोः सम्बन्धः

यद्यपि रामो गच्छतीत्याद्यखण्डवाक्यस्फोटादेव वर्तमानकालिकरामकर्तृकोत्तरदेशसंयोगानुकूलव्यापाररूपार्थस्यावगतिर्जायते । कस्यचिदर्थस्यावगतिर्वाक्यादेव न तु गच्छतीत्यादिक्रियाभिः । लोके व्यवह्रियमाणभाषायाश्च प्रारम्भो वाक्यादेव बभूव, न तु पूर्वं ककारादिवर्णाः परस्परं पृथक्तया प्रादुर्भूताः, ततो रकाराकारमकारेति वर्णत्रयं समूह्य रामादिसंज्ञानाम्, गकारादिवर्णत्रयञ्च सङ्कलय्य गच्छतीत्यादिक्रियाणां निष्पत्तौ सत्यां "रामो गच्छति" इति वाक्यस्य निष्पत्तिर्जाता ।

विभिन्नभाषासु च वाक्यं संहितप्रधानमेवासीत्[1], न तु व्यवहितप्रधानम्। प्रतिपदमर्थावबोधसम्भवाद् वाक्येषु रामादिपदानामसत्यत्वमेव स्वीक्रियते। एवं रामादिशब्देष्वपि केवलं रकारादिवर्णेन दशरथापत्यरूपार्थासम्भवाच्च तेष्वपि वर्णप्रतीतिर्भ्रान्तिमूला। तथा चोक्तं **वाक्यपदीयस्य** ब्रह्मकाण्डे—

पदे न वर्णा विद्यन्ते वर्णेष्ववयवा न च।
वाक्यात् पदानामत्यन्तं प्रविवेको न कश्चन ॥

वाक्येषु पदेषु च वर्णा न विद्यन्ते। तथा सति वर्णेष्वपि विभागकल्पनाऽऽपत्तिः। एवमग्रिमपरिच्छेदे वर्णमाला, वर्णाभिव्यक्तिप्रक्रियेत्यादिविचारो न समीचीनः, तथापि व्याकरणशास्त्रप्रक्रियानिर्वाहाय वाक्ये पदेषु च पदानां वर्णानाञ्च कल्पना क्रियते। अन्यथा सर्वोऽपि प्रक्रियावादः सार्थकतां प्राप्तुं न प्रभविष्यति। इदञ्च तथ्यं नागेशेनापि स्वीकृतम्।

वस्तुतस्तु रामादिशब्देषु वर्णा न सन्तीति वैयाकरणानां न तात्पर्यम्, अपि तु सन्ति; परन्तु प्रत्येकं वर्णा अर्थस्य न बोधकाः। सूक्ष्मसंस्कारजनका ध्वन्यन्तरेण क्रमश उपचीयमानस्य बोधकार्हत्वमुपगच्छन्ति। अतस्तेषामसत्यत्वमिति तात्पर्यम्। किञ्च मीमांसका वर्णसमूहमेव शब्दं मन्यन्ते। तथा चोक्तं **वाक्यपदीयस्य** ब्रह्मकाण्डे—

"न वर्णव्यतिरेकेण पदमन्यच्च विद्यते" इति।

शब्दनित्यत्ववादी भगवान् पतञ्जलिरपि शब्देषु वर्णानामस्तित्वं स्वीकुर्वन् प्रतीयते। तथा चोक्तं **महाभाष्यस्य** प्रत्याहाराह्निके अ इ उ ण् सूत्रे—

"नित्येषु नाम शब्देषु कूटस्थैरविचालिभिर्वर्णैर्भवितव्यम्" इति।

अत्र शब्देषु वर्णानामनस्तित्वस्वीकारे इदं भाष्यं न सङ्गच्छते। तदेवं ये वाक्यस्य पदस्य वा पारमार्थिकसत्तां, तत्र च वर्णानामसत्यत्वम्, अङ्गीकुर्वन्ति, तेषां मतानुसारं शास्त्रीयप्रक्रियानिर्वाहदृष्ट्या ये च सत्यत्वं मन्यन्ते, तेषां मते परमार्थतः शब्देष्ववयवीभूतवर्णानां सत्तां स्वीकर्तुं समापतति। उभयथा वर्णानां शब्दैः सह अवयवावयविरूपसम्बन्धस्य सत्त्वाद् वर्णमाला-वर्णाभिव्यक्तिप्रक्रियादीनां विचारः परमावश्यकः प्रतिभाति ॥

●

---

१. "संहिति से व्यवहिती—भारोपीय परिवार की भाषायें इसका ज्वलन्त उदाहरण है कि किस प्रकार वे पहले संहितप्रधान थी। और पीछे धीरे धीरे पदप्रधान अर्थात् व्यवहितप्रधान होती गई। लिथुआनिअन भाषा आज भी पूर्णरूप से संहित कही जा सकती है। उसकी तुलना वैदिक संस्कृत से की जा सकती है"।

—श्यामसुन्दरदासः, 'भाषारहस्ये',

द्वितीयः परिच्छेदः

वर्णविज्ञानम् (अक्षरसमाम्नायः)

१. वर्णमालाभिधं प्रथमं प्रकरणम्।
२. वर्णाभिव्यक्तिप्रक्रियेति द्वितीयं प्रकरणम्।
३. वर्णविभाजनमिति तृतीयं प्रकरणम्।
४. वर्णविकासवाद इति चतुर्थं प्रकरणम्।

वर्णविज्ञानपरिच्छेदे

वर्णमालाभिधं प्रथमं प्रकरणम्

वर्णाः (अक्षराणि)

प्राचीनवैयाकरणग्रन्थेष्वष्टौ स्फोटाः वर्णिताः । तद्यथा—वर्णस्फोटः, पदस्फोटः, वाक्यस्फोटः । प्रत्येकं जातिव्यक्तिभेदेन द्विविधमिति षट् । अखण्डपदस्फोटः, अखण्डवाक्यस्फोटश्चेत्येतद् द्वयमिति मिलित्वा भवन्त्यष्टौ स्फोटाः । अखण्डवाक्यस्फोटादेव शाब्दबोधो जायते । वाक्येषु वर्णपदयोः कल्पना मृषा; तथापि अज्ञानिनां कृते बोधसौकर्याय वाक्येषु पदकल्पना, पदेषु वा प्रकृति-प्रत्ययकल्पना क्रियत इति वैयाकरणानां राद्धान्तः । उक्तं च कौण्डभट्टनिर्मिते **वैयाकरणभूषणसारे** स्फोटनिर्णयस्थले—

वाक्यस्फोटोऽतिनिष्कर्षे तिष्ठतीति मतस्थितिः ।
साधुशब्देऽन्तर्गता हि बोधका न तु तत्स्मृताः ।। १ ।।

मतस्थितिः वैयाकरणानां भाष्यकारादीनाम् । तत्र वर्णाः साधुशब्देऽन्तर्गता वाचका न वेति विप्रतिपत्तिः । नैयायिकादीनां मते ते वाचकाः सन्ति, वैयाकरणानां मते नेति । भवतु नाम, व्याकरणसम्प्रदाये वाक्येषु वर्णादिस्फोटानामसत्यत्वम्, अन्यश्च सम्प्रदाय एतद्विपरीतं मन्यत इत्युभयमते आवापोद्वापद्वारा वाक्येषु पदानाम्, पदेषु च प्रकृतिप्रत्यययोः कल्पना क्रियते । अत उभयेषां मते वर्णादिस्फोटानामावश्यकता । तत्र वर्णज्ञानं विना न कस्यचिदपि स्फोटस्य ज्ञानं सुलभम् । अत एव सर्वे वैयाकरणाः स्वग्रन्थादौ सर्वप्रथममक्षरसमाम्नायमेव व्याचख्युः । पातञ्जलमहाभाष्यस्य पस्पशाह्निके वर्णसमाम्नायविषये—"अथ किमर्थो वर्णानामुपदेशः ?" इत्येवं प्रश्नं विधाय "वृत्तिसमवायार्थ उपदेशः, अनुबन्धकरणार्थश्च, इष्टबुद्ध्यर्थश्च"—इतीदं प्रयोजनं वर्णसमाम्नायस्य स्वकण्ठरवेण प्रोक्तं भगवता पतञ्जलिना । वृत्तिसमवायार्थः—वृत्तिः = व्याकरणशास्त्रे प्रवृत्तिः, समवायः = वर्णानामानुपूर्व्येण सन्निवेशः । वृत्तिश्च समवायश्च अर्थः = प्रयोजनं यस्यासौ वृत्तिसमवायार्थः । इष्टबुद्ध्यर्थः—अणादिप्रत्याहारेषु कियन्तो वर्णाः प्रत्याहृता इत्येवमिष्टबुद्ध्यर्थं वर्णानामुपदेशः ।

द्वितीयाह्निके च "किमर्थमुपदिश्यते ?" इत्येवं वर्णविषये प्रश्ने कृते सति—

वर्णज्ञानं वाग्विषयो यत्र च ब्रह्म वर्तते ।
तदर्थमिष्टबुद्ध्यर्थं लघ्वर्थं चोपदिश्यते ।। २ ।।

"वर्णा येन शास्त्रेण ज्ञायन्ते तद् वाचो विषयः । शास्त्रेण वाग् विषीयते—आबद्ध्यते; शास्त्रेण तस्याः परिज्ञानात् ।) **यत्र च ब्रह्म वर्तते**—ब्रह्म—वेदः, पदे

वर्तते । तस्य च व्याकरणशास्त्रं विषयः । **तदर्थम्**—शास्त्रप्रवृत्त्यर्थम् । **इष्टबुद्ध्यर्थम्** = कलादिदोषरहितवर्णज्ञानार्थम् ।" इति तत्र कैयटः ।

"सोऽयमक्षरसमाम्नायो वाक्समाम्नायः पुष्पितः फलितश्चन्द्रतारकवत् प्रतिमण्डितो वेदितव्यो ब्रह्मराशिः, सर्ववेदपुण्यफलावाप्तिश्चास्य ज्ञाने भवति । मातापितरौ चास्य स्वर्गे लोके महीयेते ।"—इत्यपि भाष्यमक्षरविषये तत्र प्रोक्तम् । **वाक्समाम्नायः** = एतावद्भिरेव वर्णैर्वाग्व्यवहार इत्यर्थः । पुष्पितः फलितः = दृष्टादृष्टफलाभ्यामभ्युदयनिःश्रेयसाभ्याञ्च पुष्पितः । **चन्द्रतारकवत्** = अनादित्वान्नित्यत्वं वाग्व्यवहारस्य सूचयति । **ब्रह्मराशिरिति** ब्रह्मतत्त्वमेव शब्दरूपतया प्रतिभातीत्यर्थः । **सर्ववेदेति** । सर्ववेदाध्ययनकृतस्य पुण्यस्य यत्फलं तत्प्राप्नोतीत्यर्थः ।

तदित्थं स्फोटज्ञानार्थमक्षराणां यद्वा वर्णानां ज्ञानमपेक्षितम् । तत्र वर्णाक्षरयोर्नास्ति भेदः । उक्तं च **महाभाष्यस्य** द्वितीयाह्निके—"ञ म ङ ण न म् ॥७॥ झ भ ञ्" ॥ ८ ॥ इति सूत्रयोर्व्याख्यावसरे—"वर्णं वाहुः पूर्वसूत्रे" । रूढिरियं वर्णस्येत्यर्थः । **पूर्वसूत्रे**—व्याकरणान्तरे "वर्णा अक्षराणि" इति वचनात् । एवं वर्णाक्षरयोरेकस्मिन्नेव तत्त्वे तात्पर्यमवसीयते ।

वर्णमालापर्यायवाचिशब्दाः

ध्वनिशब्दयोस्तादात्म्यसम्बन्धस्य सत्त्वात्, "ध्वनिरेव शब्दः" इति लोकव्यवहारस्य च सत्त्वात् वर्णमाला ध्वनिमालेत्यपरपर्यायत्वेन व्यवहर्तुं शक्यते । परन्तु ध्वनिमालाशब्दस्यापेक्षया वर्णमालाशब्दो लोके विशेषरूपेण प्रसिद्धिमागतः । पातञ्जल**महाभाष्या**दिग्रन्थेषु वर्णमाला-शब्दार्थे 'अक्षरसमाम्नायः', 'वर्णसमाम्नायः', 'ब्रह्मराशिः', नूतनशब्दशास्त्रिग्रन्थेषु च 'ध्वनिसमूहः' इत्येते शब्दाः प्रयुक्ताः समुपलभ्यन्ते ।

वर्णमालायाः पाठस्य विधिः

भारतीयवर्णमालायाः द्विविधः पाठः समुपलभ्यते—१-लोकप्रसिद्धमातृकापाठः, २-शास्त्रीयप्रक्रियानुसारी च पाठः ।

लोकप्रसिद्धवर्णमालाया वर्गानुसारिणी वर्णमालेत्यपरनाम्नाऽपि व्यवहारः कर्तुं शक्यते । तथा च वर्गः कादिमान्तेषु कवर्गादिकमनुसरति या वर्णानां माला सा वर्गानुसारिवर्णमाला प्रोच्यते । वर्गाश्च पञ्च विद्यन्ते—कवर्ग-चवर्ग-टवर्ग-तवर्ग-पवर्गा इति । तथा चोक्तम्—"पञ्चको वर्गः" (१।१।१२) इति संस्कृत-**सिद्धहेमशब्दानुशासन**मित्यभिधेये व्याकरणग्रन्थे ।

लोकप्रसिद्धवर्णमाला—

लोकप्रसिद्धवर्णमालायां[1] स्वरस्पर्शान्तःस्थोष्मवर्णाः क्रमेण पठ्यन्ते ।

१. ऋग्वेदप्रतिशाख्यस्य प्रथमपटलानुसारेण प्रोक्तम् ।

तद्यथा—

अ आ इ ई उ ऊ ऋ ॠ (ऌ) ए ऐ ओ औ ।

१–क ख ग घ ङ । २–च छ ज झ ञ ।

३–ट ठ ड ढ ण । ४–त थ द ध न ।

५–प फ ब भ म ।

य र ल व श ह ष स अः[1] ⌣क ⌣प अं ॥ इति ॥

एतेषां मध्ये यकारादयो वर्णाः पञ्चवर्गबहिर्भूता विद्यन्ते । लोकप्रसिद्धवर्णमालाया वर्णानामेवं सन्निवेशप्रकारे लोकप्रसिद्धिरेव प्रमाणम् । अग्रे "लौकिकवर्णमालायाः स्वरूपम्" इति स्थलेऽयं विषयः स्फुटरूपेण व्याख्यास्यते ।

शास्त्रीयप्रक्रियानुसारिणी वर्णमाला

शास्त्रे पाणिनीयादिव्याकरणशास्त्रे व्यवहृता या प्रक्रिया सा शास्त्रीयप्रक्रिया, तामनुसरति या वर्णमाला सा शास्त्रीयप्रक्रियाऽनुसारिणी वर्णमाला । शास्त्रीयप्रक्रिया यथा—"इको यणचि", "वृद्धिरादैच्", "अदेङ् गुणः" इत्यादिपाणिनिसूत्रैः "सुधी + उपास्यः" इत्यादिषु यणादिकम्, ह्रस्वस्याकारस्य एङादिप्रत्याहारघटकवर्णानाञ्च गुणादिसंज्ञाविधानम् । इमां यणादिप्रक्रियां सौविध्येन निर्वोढुं पाणिनिर्वर्णसमाम्नाये "हयवरट्" इत्येवं व्यत्यस्तक्रमेण वर्णसमाम्नाये वर्णान् सन्निविविशे ।

व्याकरणशास्त्रस्य शब्दव्युत्पत्तिप्रकारस्य च विभिन्नतया शास्त्रीयप्रक्रियानुसारिवर्णमालासु वर्णा विभिन्नक्रमेण सन्निवेशिता विद्यन्ते ।

यथा पाणिनीयव्याकरणेऽक्षरसमाम्नाये—

(१) अ इ उ ण्, (२) ऋ ऌ क्, (३) ए ओ ङ्, (४) ऐ औ च्, (५) ह य व र ट्, (६) ल ण्, (७) ञ म ङ ण न म्, (८) झ भ ञ्, (९) घ ढ ध ष्, (१०) ज ब ग ड द श्, (११) ख फ छ ठ थ च ट त व्, (१२) क प य्, (१३) श ष स र्, (१४) ह ल् ॥ इति ।

शाकटायनव्याकरणे च—

(१) अ इ उ ण् (२) ऋ क् (३) ए ओ ङ् (४) ऐ ओ च् (५) ह य व र ल ण्, (६) ञ म ङ ण न म्, (७) झ भ ञ्, (८) घ ढ ध ष्, (९) ज ब ग ड द श्, (१०) ख फ छ ठ थ च ट त व्, (११) क प य्, (१२) श ष स अं अः क प य्, (१३) ह ल् ॥ इति ।

१. ऋग्वेदप्रतिशाख्यादिषु विसर्जनीयादय ऊष्मसंज्ञया व्यवह्रियन्ते । तथा चोक्तम्—"उत्तरेऽष्टा ऊष्माणः" (ऋग्वेदप्रा०, पटलः १, सू० १०) ।

द्वयोर्वर्णमालयोरक्षरसन्निवेशस्य क्रमभेदः स्पष्टतया दृश्यते । भगवान् पाणिनिर्विसर्जनीयजिह्वामूलीयोपध्मानीयानुस्वारयमान् अक्षरसमाम्नाये नोपदिष्टवान्, तांश्च अयोगवाहान् मन्यते स्म, किन्तु शाकटायनस्तु एतद्विपरीतमक्षरसमाम्नाये ऌकारस्योपदेशाभावम्, "हयवरट्", "लण्" इति सूत्रद्वये पठितव्ये "ह य व र ल ण्" इत्येकमेव सूत्रम्, विसर्जनीयादीनां च सन्निवेशं कृतवान् ।

केचिद् वैयाकरणास्तु शास्त्रीयप्रक्रियानिर्वाहाय स्वशास्त्रेऽक्षरसमाम्नायं न आरभन्ते । लोकप्रसिद्धवर्णमालात एव स्वशास्त्रीयकार्यं निर्वहन्ति स्म । यथा— हेमचन्द्रसूरिः, शर्ववर्मा च । आचार्यो हेमचन्द्रसूरिः हेमशब्दानुशासननामके स्वशास्त्रेऽक्षरसमाम्नायमनारभ्यैव स्वशास्त्रं प्रारब्धवान् । ग्रन्थारम्भे "वर्णाः लोकप्रसिद्धाः, अतस्तेषामुपदेशस्य प्रयोजनं न विद्यते" इत्येवं "लोकात्" (१।१।३) इति सूत्रे प्रत्यपादयत् । तथा च "अनुक्तानां संज्ञानां न्यायानाञ्च लोकाद् वैयाकरणादेः प्रसिद्धिर्ज्ञप्तिश्च वेदितव्या वर्णसमाम्नायस्य च" इति स्वोपज्ञवृत्तौ च तस्य व्याख्या कृता । शर्ववर्माऽपि लौकिकवर्णमालात एव शास्त्रीयप्रक्रियानिर्वाहं कृतवान् । तथा चोक्तम्—"सिद्धो वर्णसमाम्नायः" (कातं०, व्या० १।१।१) इति । "लोकप्रसिद्ध एव वर्णसमाम्नायोऽस्मिन् व्याकरणे गृह्यते, न तु पाणिनिप्रभृतिभिः प्रत्याहारार्थमनुमोदितो व्यत्यस्तक्रमो वर्णसमाम्नायः" इति तत्सूत्रतात्पर्यं बोद्धव्यम् ।

भगवान् पाणिनिस्तु स्वशास्त्रे उभयविधपठितां वर्णमालामाश्रयति । तद्यथा "इको यणचि", "चोः कुः" इत्यादि ।

एवं शाकटायनेत्याद्युपर्युक्तोद्धरणेन "केचिद् वैयाकरणाः शास्त्रीयप्रक्रियानिर्वाहाय शास्त्रीयप्रक्रियानुसारिणीमक्षरमालां व्यवाहरन्, केचिच्च लोकप्रसिद्धमातृकाकापाठेनैव शास्त्रीयं कार्यं निर्वहन्ति स्म । कश्चिच्च उभयविधां वर्णमालामाश्रयत्" इति वक्तुं शक्यते ।

लौकिकवर्णमालायाः प्राचीनत्वम्, उपजीव्यत्वञ्च

लोकप्रसिद्धवर्णमाला चान्यापेक्षया प्राचीनतरा विद्यते । अयं विषयः "लोकप्रसिद्धमातृकापाठेनैव वर्णज्ञानसम्भवात् माहेश्वरो वर्णसमाम्नायः किमर्थः ? इत्याशयकाद् "अथ किमर्थो वर्णसमाम्नायः ?" इति पस्पशाह्निकस्थ**महाभाष्यात्** "चोः कुः", "स्तोः श्चुना श्चुः" इत्यादिपाणिनिसूत्रेभ्यश्च निःसन्देहतयाऽनुमीयते । पाणिन्यादिभ्यः पूर्वमेव लौकिवर्णमालायाः सत्तायां स्वीकृतायामेव "चो कुः" इत्यादिसूत्रप्रणयनमुपयुज्यते, नान्यथा । किञ्च श्रीमद्**भागवते** एकस्य श्लोकस्योत्तरार्द्धेनाऽपि अस्या वर्णमालायाः प्रचीचनत्वं प्रमाणीभवति । तथा चोक्तम्—

"स्पर्शेषु यत्षोडशमेकविंशं निष्किञ्चनानां नृप तद्धनं विदुः ॥ इति ।
(श्रीमद्भा० २-९-६)

1750 LIBRARY

सृष्टेरादौ ब्रह्मा स्पर्शवर्णानां मध्ये षोडशवर्णं तकारम्, एकविंशं वर्णं पकारञ्च "तप तप" इति द्विर्वारं गदितम् उपाश्रृणोत इति पूर्वार्द्धेनाऽन्वयः । कादिमान्तेषु क्रमशः सन्निविष्टाक्षरायां लौकिकवर्णमालायामेव ककारात् प्रारभ्य गणनायां सत्यां तकारः षोडशसंख्याकः, पकारश्च एकविंशसंख्याको भवति, न तु व्यत्यस्तक्रमायां शास्त्रीयवर्णमालायाम् ।

इयञ्च लौकिकवर्णमाला सर्वेषां वैयाकरणानामुपजीव्यं विद्यते । शाकटायनादयः शाब्दिका इमां वर्णमालमाश्रित्य स्वशास्त्रेष्वक्षरसमाम्नायं शास्त्रीयप्रक्रियां लाघवेन निर्वोढुं पेठुः । स्वस्मिन् शास्त्रे शाकटायनादिपठितो व्यत्यस्तक्रमोऽक्षरसमाम्नाय उपजीवकः, लोकप्रसिद्धमातृकापाठश्च उपजीव्योऽस्तीति तयोरुपजीव्योपजीवकरूपसम्बन्धः स्वीकर्तव्यः ।

उभयविधवर्णमालयोर्वैशिष्टचम्

लोकप्रसिद्धवर्णमालायाः, अ इ उ ण् इत्यात्मिकायाः सूत्रात्मकवर्णमालायाश्चेत्युभयोरपि वर्णमालयोराधारः स्वरूपञ्च उच्चरितभाषैव विद्यते । वर्णमालायाम् अकारादिवर्णानां यदुच्चारणम्, तदेवोच्चारणं भाषायामपि क्रियते । यथा वर्णमालायां कवर्णस्य ककारोच्चारणं तथैवोच्चारणं भाषायां "कमलं शोभते" इत्यादिवाक्यघटककमलशब्देष्वपि क्रियते । आंग्लेत्याद्यन्यभाषायामिदं वैशिष्टचं न दृश्यते । तासु भाषासु वर्णमालायां वर्णानामुच्चारणमन्यत्, भाषायाञ्च तद्भिन्नमेवोच्चारणं क्रियते । यथा आंग्लवर्णमालायां C वर्णः सी इत्युच्चार्यते, परन्तु भाषायां छिदिर्धात्वर्थ (Cut) कटशब्दे केन्द्रार्थवाचके Center सेन्टर-शब्दे च क्रमशः ककारसकारावुच्चार्येते । अतएव वर्णमालायां भाषायाञ्चेत्युभयत्रापि वर्णानां विरूपोच्चारणस्य सत्त्वात् तेषां वर्णमालायां वैज्ञानिकत्वरूपवैशिष्टचाभावः सर्वैः स्वीक्रियते, अस्माकञ्च अक्षरसमाम्नाये विरूपोच्चारणस्याभावाद् वैज्ञानिकत्वं सुतरां सिद्धचति ।

शास्त्रीयप्रक्रियानुसारिवर्णमालाया विशिष्टतरत्वम्

वर्णमालायां भाषायाञ्च वर्णानां समानोच्चारणरूपमुभयोर्वर्णमालयोर्यद् वैशिष्टचं दृष्टिगोचरीभवति, तदतिरिक्तमपि तयोः परस्परमन्योऽन्यापेक्षया विशिष्टतरत्वं दृश्यते । शास्त्रीयवर्णमालाम् "अ इ उ ण्" इत्यादिसूत्रघटकह्रस्वाकारादीनामत्वावच्छिन्ने सकलेऽकारे शक्तिः पाणिन्यादिभिः स्वीक्रियते । तथा च एकेन ह्रस्वाकारेणाष्टादशाकाराणाम् "ए ओ ङ्" इत्यादिसूत्रघटकदीर्घैकाराभिः द्वादशानामेकाराणां ग्रहणं क्रियते । अत एव पाणिनिना "ह्रस्वस्यैवाकारस्य ग्रहणं स्यात् न तु दीर्घादीनाम्" इत्येतदर्थं "तपरस्तत्कालस्य" (पा० अ० १.१.७०) इति सूत्रं प्रणीय तद्द्वारा "अदेङ् गुण." इत्यादिसूत्रेषु तपरेण अकारेण केवलं ह्रस्वस्याकारस्य, तात्परेण एकारेण च केवलम् एकारस्यैव ग्रहणं क्रियते । अन्यथा "अ इ उ ण्" इत्यादिसूत्रघटकाकारादिभिर्दीर्घाकारादीनां ग्रहणाभावे स्वतः सिद्धे तद्वारणाय

"तपरस्तत्कालस्य" इति सूत्रारम्भो न कर्तव्यः, किन्तु कृतः । तेनावगम्यते यच्छास्त्रीयवर्णमालायामेकेन ह्रस्वाकारादिना समेषामकाराणां ग्रहणं जायते । तथा च शास्त्रीयवर्णमालायां ह्रस्वस्वरेण दीर्घस्वराणां ग्रहणं लाघवरूपं विशिष्टतरत्वं लौकिकवर्णमालापेक्षया निःसन्देहतया स्वीकर्तव्यम् ।

अस्यां वर्णमालायां लौकिकवर्णमालापेक्षया द्वितीयञ्च विशिष्टतरत्वं प्रत्याहारनिर्माणशक्तिरूपं विद्यते । "अ इ उ ण्", "ऋॢ क्" इत्यादिसूत्रघटकणकारादिना सह अकारादयोऽण्-प्रत्याहारं विदधति, तेन "अण्" इत्यादिसार्धैकमात्रिकाकारादिना "अ इ उ" इत्यादीनां बहूनां वर्णानामवबोधो जायते । इयञ्च प्रत्याहारनिर्माणरूपा शक्तिर्लौकिकवर्णमालायां न दृश्यते, अतस्तदपेक्षयाऽस्मिञ्छास्त्रीयाक्षरसमाम्नाये द्वितीयविशिष्टतरत्वं विद्यते ।

लोकप्रसिद्धवर्णमालाया विशिष्टतरत्वम्, तस्याञ्च क्रमशो वर्णसन्निवेशस्याधारः

एवमेव लौकिक्या वर्णमालाया अपि शास्त्रीयाक्षरसमाम्नायापेक्षया विशिष्टतरत्वं विद्यते । तच्च वैशिष्ट्यं कण्ठादिस्थानक्रमेण कादिवर्णानां सन्निवेशरूपं प्रोच्यते । अस्यां वर्णमालायाञ्च क्रमशो वर्णसन्निवेशस्याधारोऽपि कण्ठादिस्थानक्रमरूप एव । तथा च कण्ठादिस्थानक्रमेणैव सर्वे कवर्गादयोऽस्यां वर्णमालायां संन्यविश्यन्त । तद्यथा—आस्ये कण्ठ-जिह्वामूल-तालु-मूर्ध-दन्त-ओष्ठेत्येव क्रमेण स्थानानि अवधार्यन्ते । कादिपञ्चवर्गाणां मध्ये कवर्गो जिह्वामूलात्, केषाञ्चिन्मते च कण्ठस्थानादभिव्यज्यते, अतः कादिवर्गाणां मध्ये कवर्गः सर्वप्रथममस्यां वर्णमालायां पठ्यते । चवर्गस्य च तालुस्थानादभिव्यज्यमानतया तालुस्थानस्य च कण्ठजिह्वामूलोभाभ्यामनन्तरं सत्त्वात् कवर्गानन्तरं चवर्गः समुपदिश्यते । एवं टवर्गादयोऽपि स्थानक्रमेणास्यां वर्णमालायां सन्निविष्टा दृश्यन्ते ।

"य र ल व्" इत्यन्तःस्थवर्णा अपि स्वाभिव्यक्तिजनकस्थानक्रमेण अस्यां वर्णमालायामुपादिश्यन्त । यकारादिचतुर्वर्णानां मध्ये यकारस्य तालुस्थानादभिव्यज्यमानतया, यकारादिचतुर्वर्णाभिव्यक्तिजनकतालुमूर्धदन्तमूलौष्ठानां मध्ये तालुस्थानस्य सर्वप्रथमं सत्त्वाद् अन्तःस्थासु यकारः सर्वप्रथमं पठ्यते । रेफस्य च मूर्धस्थानाद् अभिव्यक्तित्वेन, मूर्धस्थानस्य च तालुनोऽनन्तरं सत्त्वाद् रेफो यकारात् पश्चाद् व्यवह्रियते । एवमेव लकार-वकारयोरपि क्रमशः सन्निवेशविषये समूहनीयम् ।

श ष[1] स ह (ह श ष स) इत्यूष्मसंज्ञकवर्णाः स्थानक्रमेण सन्निविष्टा दृश्यन्ते । शकारस्य तालुस्थानादभिव्यक्तेः सत्त्वाच्छ ष सेति वर्णत्रयाभिव्यक्तिजनकतालुमूर्धदन्तस्थानेषु तालुस्थानस्य पूर्वं सत्त्वात् तालव्यः शकारो वर्णमालायां ष से ति वर्णद्वयापेक्षया प्रथममुपादिश्यत । एवं पूर्वोक्तमूर्धन्यषकारादिविषयेऽप्यनुसन्धानीयम् ।

यद्यप्येवं वर्णमालायां वर्णानां स्थानक्रमेण सन्निवेशस्वीकारे "श ष स ह" इत्यूष्मवर्णानां मध्ये हकारस्य कण्ठस्थानादभिव्यक्तेः सत्त्वात् कण्ठस्य च तालवादिभ्यः पूर्वं सत्त्वाद् अयं वर्णः पूर्वं पठितव्यः, तदनन्तरं शकारादयः । तथा च, ह श ष स इत्येवं पाठः समीचीनः प्रतिभाति । तथाऽपि—

> "हकारं पञ्चमैर्युक्तमन्तःस्थाभिश्च संयुतम् ।
> औरस्यं तं विजानीयात् कण्ठ्यमाहुरसंयुतम् ॥"
> (पा॰ शि॰–१६ श्लो॰)

इति शिक्षोक्तेर्हकारस्य संयुक्तावस्थायां हृदयस्थानादप्यभिव्यक्तेः सत्त्वात् हृदयस्थानस्य च आस्यबहिर्भूतत्वेन हकारोऽपि आस्यान्तर्भूतस्थानाभिव्यज्यमानवर्णेभ्यो बहिरेव पठ्यते । किञ्च लौकिकवर्णमालामूष्मवर्णानां सन्निवेशस्य "ह श ष स" इत्ययमपि द्वितीयः क्रमः **ऋग्वेदप्रातिशाख्यस्य पार्षदग्रन्थे** दृश्यते । अस्मिन् सन्निवेशक्रमे च हकारस्य कण्ठस्थानादभिव्यक्तेः सत्त्वात् कण्ठस्य च तालवादिभ्यः पूर्वं सत्त्वादस्य वर्णस्य शकारादिभ्यः पूर्वं पाठः समीचीन एव प्रतिभाति ।

यद्यपि वर्णमालायां स्थानक्रमेण वर्णानां सन्निवेशस्वीकारेऽन्तःस्थासंज्ञकोष्मसंज्ञकवर्णानां मध्ये शकारयकारयोरुभयोरपि तालुस्थानात्, षकाररेफयोर्मूर्धस्थानाद्, सकारलकारयोश्च दन्तमूलस्थानादभिव्यज्यमानतया, शकारयकारादीनाञ्च परस्परं तालवादिरूपसमानस्थानस्य सत्त्वाद् वर्णमालयां यकारादिचतुर्वर्णानाम्, आहोस्वित् शकारादिचतुर्वर्णानां पूर्वं पाठः कर्तव्य : ? इति जिज्ञासा समुदेति चेच्छ्रूयताम्—वर्णमालायामन्तःस्थावर्णानन्तरमूष्मवर्णानां पाठः पुराकालतो व्यवस्थापितः । किञ्च "य र ल व" इति चत्वारो वर्णा अन्तःस्था उच्यन्ते । "अन्तः = मध्ये तिष्ठन्तीत्यन्तःस्थाः" इत्यन्तःस्थाशब्दस्य व्युत्पत्तिः क्रियते । केषामन्त इति चेत् ? स्पर्शवर्णोष्मवर्णयोर्मध्ये । एवञ्च अन्तःस्थाशब्दव्याख्यानुसारेणोष्मवर्णेभ्यः पूर्वमन्तःस्थावर्णानां सन्निवेशः पूर्वमक्रियत ।

इयञ्च व्यवस्थाऽतीव प्राचीना विद्यते—इत्यत्र सन्देहलेशोऽपि न कर्तव्यः । अत्र च (आं ह्रीं क्रौं) यं रं लं वं शं षं सं हं सं हं सः" इति प्राणप्रतिष्ठामन्त्र एव प्रमाणम् । अस्मिन् मन्त्रे हंसपदस्य जीवपदवाच्यार्थे शक्तिर्विद्यते । हंसपदे हकारानन्तरं सकारो व्यवह्रियते । अतो मन्त्रे "हं" इत्यनन्तरं "सं" इति वर्णः पुनः पठितः ।

स्वरा अपि स्वाभिव्यक्तिजनकस्थानक्रमेणास्यां वर्णमालायां सन्निविष्टाः; कण्ठताल्वोष्ठस्थानेषु कण्ठस्य पूर्वं सत्त्वात् तस्मादभिव्यज्यमानस्याकारस्य स्वरेभ्यः सर्वप्रथमं सन्निवेशः कृतः । कण्ठस्थानादनन्तरं तालुस्थानस्य सत्त्वात्

---

१. "शल ऊष्माण" इति सिद्धान्तकौमुद्यां भट्टोजीदीक्षितोक्तमतानुसारेण शकारादिवर्णचतुष्टयमेवोष्मसंज्ञकम् । तदनुसृत्य मया मूले "शषसहेत्यूष्मसंज्ञकवर्णाः" इत्युक्तम् ।

तदभिव्यज्यमानस्यैकारस्याकारात् पश्चादुपदेशोऽभूत्। एवमेव कण्ठताल्वोष्ठ-स्थानेषु ओष्ठस्य कण्ठताल्वनन्तरं सत्त्वाद् इकारात् पश्चाद् उकारः पठ्यते।

यद्यपि कण्ठादिस्थानानि "कण्ठतालुमूर्धदन्तौष्ठम्" इत्येवं क्रमेण विद्यन्ते। तथा च ताल्वनन्तरं मूर्धस्थानं दन्तमूलस्थानञ्च क्रमशो विद्यते, न तु ओष्ठः। तथा च स्थानक्रमेण वर्णसन्निवेशस्वीकारे ऋकारऌकारानन्तरमुकारः पठितव्यः। तथा च "अ आ इ ई ऋ ॠ ऌ उ ऊ ए ऐ ओ औ" इत्येवमकारादीनां क्रमिकः सन्निवेशो युक्तः प्रतीयते; तथापि ऋकारऌकारस्वरयो रेफलकारयोः संश्लेषस्य सत्त्वात् तौ वर्णौ स्वरव्यञ्जनोभयात्मकौ स्तः। ऋऌवर्णयोः स्वरत्वं व्यञ्जनत्वञ्च।

"ऋलोर्मध्ये भवत्यर्धमात्रा रेफलकारयोः।
तस्मात् स्पृष्टता न स्यात् सम्भवे ऋ ऌ कारयोः"।

इत्यत्र **याज्ञवल्क्यशिक्षा**दिषु विशदरूपेण प्रतिपादितम्। "अ इ उ" इति स्वरत्रयं तु निर्व्यञ्जनं स्वरात्मकञ्च विद्यते। अतो वर्णमालायां पूर्वम् "अ आ इ ई उ ऊ" इति शुद्धस्वराः समुपादिश्यन्त। तदनन्तरञ्च स्वरव्यञ्जनो-भयात्मकयोः ऋऌवर्णयोः।

ऋकार-ऌकाराभिव्यक्तिजनकमूर्धदन्तस्थानयोर्मूर्धस्थानस्य दन्तस्थानापेक्षया पूर्वं सत्त्वात् तस्मादभिव्यज्यमान ऋकारः पूर्वम्, तदनन्तरं ऌकारश्च व्यवह्रियेताम्।

एवम् "ए ऐ ओ औ" इति सन्ध्यक्षराभिव्यक्तिजनककण्ठताल्वोष्ठ-स्थानां मध्ये कण्ठतालुस्थानयोः ओष्ठस्थानापेक्षया पूर्वभावितया, तदभिव्यज्य-मानैकारैकारयोः पाठः ओकारौकारापेक्षया पूर्वं कृतः। कण्ठताल्वोष्ठस्थानानां मध्ये ओष्ठस्थानस्य कण्ठतालुस्थानद्वयापेक्षया परसत्त्वात् तस्मात् कण्ठ-ओष्ठस्थाना-भ्याम् अभिव्यज्यमानौकारौकारौ एकारैकाराभ्यां परस्तात् पठ्येते।

ऋऌवर्णयोः सन्निवेशक्रमः

यद्यपि ऋकारऌकारौ रेफ-लकाराभ्यां संश्लिष्टतया स्वरत्वव्यञ्जत्वोभय-धर्माविष्टौ स्तः। तथा च "एषा ह्याचार्यस्य शैली लक्ष्यते— तुल्यजातीयाँस्तुल्यजाती येषूपदिशति, अचोऽक्षु हलो हल्सु"—(महा० भा०, प्रत्याहा०) इति **महाभाष्यो-क्त**रीत्या स्वरत्वधर्मविशिष्टवर्णानां पंक्तिमध्ये स्वरत्वव्यञ्जनत्वेत्युभयधर्मविशिष्ट-वर्णयोः सन्निवेशो नोपयुज्यते, तथापि ऋकार-ऌकारयोः संश्लिष्यमाणरेफलकारयो-रन्तःस्थासंज्ञकत्वात् अन्तस्थसंज्ञकवर्णानाञ्च द्वयोर्मध्ये पाठ उपयुज्यते। अतः ऋऌ-वर्णौ "अ आ इ ई उ ऊ, ए ऐ ओ औ" इतिसन्ध्यक्षरासन्ध्यक्षरसमूहयोर्मध्ये पठितौ। यथा "य र ल व" इत्येषामन्तःस्थासंज्ञकत्वात् स्पर्शोष्मसंज्ञकवर्णयोर्मध्ये सन्निवेशः, तथैव "अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ[1] ए ऐ ओ औ" इत्यत्रापि ऋऌवर्णौ अन्तस्थासंज्ञकरेफलकाराभ्यां संश्लिष्यमाणतया सन्ध्यक्षरासन्ध्यक्षरयोर्मध्ये पठ्येते।

१. शुक्लयजुःप्रातिशाख्ये दीर्घोऽपि।

अं अः —**प्रपञ्चसारतन्त्रे** अनुस्वारविसर्गौ स्वरत्वेन गृहीतौ। तत्र स्वराणां षोडश संख्या प्रोक्ता। तदनुसारमनुस्वारविसर्गौ लौकिकवर्णमालायां स्वरेषु पठ्येते। तथा च, अनुस्वारविसर्गयोर्मध्येऽनुस्वारस्य नासिकास्थानादभिव्यज्यमानतया, नासिकायाश्च आस्यबहिर्भूततया, अनुस्वारशब्दस्य च "स्वरमनुसरतीत्यनुस्वारः" इति व्युत्पत्त्या, अनुस्वारस्य च सर्वत्र स्वरस्योर्ध्वं सत्त्वाद् वर्णमालायामपि स्वर-पाठादनन्तरमनुस्वारं व्याजहार। एवं विसर्गोऽपि यत्र कुत्रापि समुपलभ्यते, तत्र स स्वरेभ्यः परमेव दृश्यते, न तु स्वरात्पूर्वम्। अतो वर्णमालायामपि विसर्गः स्वरेभ्यः परमेव व्यवहृतः।

केचित्तु अनुस्वारजिह्वामूलीयोपध्मानीयविसर्गान् व्यञ्जनानि मन्यन्ते। यथा **ऋग्वेदप्रातिशाख्ये** "उत्तरेऽष्टा ऊष्माणः" (ऋ० वे० प्रा०, प० १, सू० १०) इति सूत्रे। विसर्जनीयादीनामपि ऊष्मपदेन ग्रहणात् तेषां व्यञ्जनत्वं ज्ञायते। विसर्जनीयादीनां मध्ये "अ ह विसर्जनीयाः कण्ठे"—(कात्या० शुक्लय० प्रा० ७१) इति सूत्रे, "प्रथमपञ्चमौ[1] च द्वा ऊष्मणाम्" (ऋ० वे० प्राति० पट १, सू० ३९) इति सूत्रे च विसर्जनीयस्य कण्ठस्थानतया विसर्जनीयो जिह्वामूलादिभ्यः पूर्वं लौकिकवर्णमालायामुपदिश्यते। जिह्वामूलीयस्य च जिह्वामूलादभिव्यज्य-मानतया[1], अस्य स्थानस्य च कण्ठादनन्तरं भवत्वात् सोऽपि (≍क इति) कण्ठ-स्थानीयविसर्गानन्तरम्, ≍प इत्युपध्मानीयस्य ओष्ठस्थानाद्[2] अभिव्यक्तेः सत्त्वेन कण्ठ्यजिह्वामूलीयादनन्तरमुपध्मानीयश्च, "अं" इत्यनुस्वारस्य[3] नासिकातोऽभिव्य-ज्यमानतया, तस्याश्चास्यबहिर्भूतत्वेन सोऽपि (अनुस्वारोऽपि) ऊष्मभ्यः पश्चात् पठ्यन्ते स्म। तद्यथा **ऋग्वेदस्य पार्षदग्रन्थे**—

"अः ≍क ≍प अं" इति॥

एवं लोकप्रसिद्धमातृकायां सर्वे वर्णाः कण्ठादिस्थानक्रमेण सन्निविष्टाः प्रतीयन्ते। तथा च सर्वेषां क्रमशः सन्निवेशस्याधारोऽपि कण्ठादिस्थानक्रम एव। अस्या वर्णमालाया अन्यवर्णमालापेक्षया स्थानक्रमानुसारि वर्णसन्निवेशरूपं वैशिष्ट्यमतिरिच्यते। इदं वैशिष्ट्यमांग्लेत्यादियोरोपीयवर्णमालायां न दृश्यते। आंग्लवर्णमालायां कण्ठस्थानाभिव्यज्यमानस्य A (अ) अकारस्य सन्निवेशानन्तरम् औष्ठस्थानीयस्य B (ब) बकारस्य, एवं शास्त्रीयाक्षरसमाम्नायेऽपि "झ भ ञ्" इत्यादिसूत्रेषु तालव्यझकारानन्तरमोष्ठस्थानीयभकारस्य च सन्निवेशो दृश्यते।

१. "ऋकारऌकारावथ षष्ठ ऊष्मा जिह्वामूलीयाः प्रथमश्च वर्गः" (शौन० ऋ० प्रा०, प० १, सू० ४१)।
२. "शेष ओष्ठ्योपवादय नासिक्यान्" (शौन० ऋ० प्रा०, प० १, सू० ४७)।
३. "नासिक्ययमानुस्वारान्"—(शौन० ऋ० प्रा०, प० १, सू० ४८)।
वाराणसेयसंस्कृतविश्वविद्यालयस्य सरस्वतीभवनग्रन्थालये हस्तलिखितशौनकीयर्ग्वेद-प्रातिशाख्यात् सर्वं सूत्रं समुद्धृतम्।

किन्तु कवर्गादिक्रमेण पठितायां वर्णमालायां कण्ठादिस्थानक्रमेणैव सर्वे वर्णाः सन्निविष्टाः समुपलभ्यन्ते। कण्ठादिस्थानक्रमानुसारेण स्वराणां सन्निवेशस्वीकारे कस्यचित् कथञ्चित् काचिद् विचिकित्सा समुदीयात्, किन्तु कादिमान्तेषु कण्ठादिस्थानक्रमेण सन्निवेशस्वीकारे सन्देहलेशोऽपि न सम्भाव्यते। कादिमान्तेषु प्रत्येकं वर्गेषु ककारादिवर्णा गलविवरस्य स्वरतन्तुद्वयस्य वा सङ्कोचविकासानुसारेण सन्निविष्टाः। प्रत्येकं वर्गस्य प्रथमद्वितीयवर्णयोः समुच्चारणे गलविवरं विव्रियते, तृतीयचतुर्थपञ्चमवर्णानां समुच्चारणे तु सम्व्रियते। अतः प्रत्येकं वर्गे विवारप्रयत्नकयोः "क ख" इत्यादिवर्णयोरेकत्र सम्वारप्रयत्नकानां "ग घ ङ" इत्यादिवर्णानाञ्च एकत्र सन्निवेशः कृतः। सौविध्यानुसारेण प्रथमं विवारप्रयत्नकानाम्, ततः परं सम्वारप्रयत्नकानाञ्च सन्निवेशः कृतः। विवारप्रयत्नकानां सम्वारप्रयत्नकानाञ्च मध्ये केचिद् अल्पप्राणाः, केचिच्च महाप्राणाः। अल्पप्राणप्रयत्नवतोर्मध्ये एकस्य महाप्राणप्रयत्नकस्य सन्निवेशः प्रत्येकं वर्गेषु विहितः। तद्यथा "क ग" इति वर्णद्वयमल्पप्राणप्रयत्नकम्। अतस्तयोर्मध्ये एकस्य महाप्राणवतः खकारस्य सन्निवेशः। "ग ङ" इति वर्णद्वयञ्च अल्पप्राणप्रयत्नकम्। अतस्तयोर्मध्ये महाप्राणप्रयत्नकस्य 'घ'वर्णस्याभिनिवेशो विहितः।

एवं चवर्गादिविषयेऽपि समूहनीयम्।

न च "ख ग" इति वर्णद्वयं महाप्राणकम्, "क ग" इत्यल्पप्राणयोर्मध्ये घकारस्यैव सन्निवेशः क्रियताम्, तथा च, 'क घ ग ख ङ' इत्येवं पाठः क्रियताम्? एवं प्रत्येकं वर्गेषु जकारादीनां "च ज छ झ ञ" इत्येव सन्निवेशः क्रियताम्? काऽत्र क्षतिरिति वाच्यम्? अवैज्ञानिकत्वापत्तेः। घवर्णः सम्वारप्रयत्नकः, खकारश्च विवारप्रयत्नकः, अतस्तयोः पाठः क्रमशः सम्वारविवारप्रयत्नवतां मध्ये एव समीचीनः। विवारप्रयत्नवतां मध्ये येऽल्पप्राणाः ये च महाप्राणास्तेषां परस्परं क्रमत्वं पूर्वापरत्वं वा, एवं सम्वारप्रयत्नकानां मध्ये येऽल्पप्राणा ये च महाप्राणास्तेषां परस्परं क्रमत्वं विद्यते। यथा—क ख। अत्र विवारप्रयत्नकः 'क' वर्णोऽल्पप्राणः, 'ख' वर्णश्च महाप्राणः। अतः प्रथमं ककारस्य तदनन्तरं खकारस्य सन्निवेशः। 'ग घ ङ' इति सम्वारप्रयत्नवतां मध्ये "ग ङ" वर्णौ अल्पप्राणौ, घकारश्च महाप्राणः। अतो "ग ङ" इत्यल्पप्राणयोर्मध्ये महाप्राणवतो घकारस्य सन्निवेशो व्यवस्थापितः।

एवं चवर्गादिषु चकारादीनां सन्निवेशस्य व्यवस्था वेदितव्या।

अत्र विषये नूतनानां शब्दशास्त्रिणां सम्मतम्, तत्र युक्तायुक्तत्वविचारश्च

अमुमेव प्रसङ्गमाश्रित्य भाषावैज्ञानिकानां मतं पर्यालोच्यते। एतेषां मतानुसारेण वर्णमालायां सर्वे वर्णाः [1]सम्बन्धानुसारेण सन्निविष्टाः सन्ति।

१. "वर्णमाला में कण्ठ, तालव्य, मूर्धन्य और दन्त्य वर्णों को क्रम से रखा जाता है, इससे यह न समझना चाहिए कि कण्ठ के बाद तालु और तब मूर्धा आता है। प्रत्युत कण्ठ्य और तालव्य तथा मूर्धन्य और दन्त्य वर्णों के परस्पर सम्बन्ध को देखकर यह वर्णक्रम रखा गया है। वाक् से वाच का और विकृत से विकट का सम्बन्ध स्पष्ट ही है"—श्यामसुन्ददासकृतं भाषारहस्यम्, २५९ पृ०।

यथा—"वाक्, वाग्" इत्यत्र "वाच्"शब्दघटकचकारस्य "चोः कुः" (२।२।३०) इत्यनेन ककारादेशाच्चवर्ग-कवर्गयोः परस्परं सम्बन्धस्य सत्त्वाद् वर्णमालायां कवर्गानन्तरं चवर्गस्य, विकृतशब्दघटकतकारस्य च "विकट"शब्दे टकारादेशेन तवर्गटवर्गयोः परस्परं सम्बन्धस्य सत्त्वाद् टवर्गानन्तरं तवर्गस्य सन्निवेशः कृतः, न तु कण्ठादिस्थानक्रमेण।

परन्तु तेषामिदं मतमविचारितरमणीयमेव प्रतिभाति। वर्णमालायां वर्णानां परस्परं सम्बन्धानुसारेण सन्निवेशस्वीकारे "लिट्, लिड्" इत्यादि शब्देषु "हो ढः" (पा० अष्टा० ८।२।३१) इत्यनेन हकारस्य ढकारादेशात्, टवर्ग-हकारयोः परस्परं सम्बन्धस्य च सत्त्वात् टवर्गानन्तरं हकारस्य "षढोः कः सि" (पा० अष्टा० ८।२।४१) इति ढकारस्य ककारादेशाच्च तयोः परस्परं सम्बन्धस्य सत्त्वात् कवर्गानन्तरं टवर्गस्य षकारस्य च सन्निवेशः स्यात्, किन्तु न कृतः। एवं गत्यर्थक'गम्लृ'धातुनिष्पन्ने 'गच्छति'शब्दे मकारस्य च "इषुगमियमां छः" (पा० अष्टा० ७।३।७३) इत्यनेन छकारादेशाच् चवर्गपवर्गयोः परस्परं सम्बन्धस्य सत्त्वात् चवर्गानन्तरं पवर्गस्य पाठः कर्तव्यः, किन्तु न कृतः। कृतश्च तालव्यचवर्गानन्तरं मूर्धन्यटवर्गस्य पाठः। एवं "तच्चकार" इत्यादि शब्दे "तत् + चकार" इति विग्रहे "स्तोः श्चुना श्चुः" (पा० सू० ८।४।४०) इति तकारस्य चकारादेशात् तयोः परस्परं सम्बन्धस्य सत्त्वात् चवर्गानन्तरं तवर्गः पठितव्यः, किन्तु न पठितः। पठितश्च चवर्गानन्तरं टवर्गः। एवञ्च वर्णमालायां वर्णानां क्रमिकसन्निवेशविषये तेषां या युक्तिः, यश्च हेतुर्विद्यते, तत्र महान् व्यभिचारो दृश्यते। कण्ठादिस्थानक्रमेण वर्णानां सन्निवेशस्वीकारे तु न कोऽपि व्यभिचारः समापतति।

लौकिकवर्णमालायाः स्वरूपम्

एवं कण्ठादिस्थानक्रमेण वर्णानां सन्निवेशस्य निश्चये जाते सति अस्या वर्णमालायाः स्वरूपमपि प्रायेण निश्चप्रचं जातम्। शास्त्रीयप्रक्रियाऽनुसारिण्या वर्णमालाया विभिन्नव्याकरणग्रन्थेषु विभिन्नं स्वरूपमुपलभ्यते। लौकिकवर्णमालायास्तु स्वरूपं प्रायेण एकरूपमेव दृश्यते। यत्किमप्यन्तरं दृष्टिपथं समायाति, तत् केवलं स्वराणाम्, विसर्जनीयजिह्वामूलीयोपध्मानीयानुस्वाराणाम्, हकारस्य च सन्निवेशविषये विद्यते; किन्तु कादिमान्तेषु अन्तस्थोष्मणां च सन्निवेशः सर्वत्र समानरूपेणैव समुपलभ्यते। अकारादिस्वराणां सन्निवेशभेदेन लौकिक्या वर्णमालाया द्विविधं स्वरूपं दृष्टिपथं समायाति—

१. अकारादिस्वरपूर्वकसन्निविष्टकादिव्यञ्जनक्रमरूपम् ।

२. कादिव्यञ्जनपूर्वकसन्निविष्टाकारादिस्वरक्रमरूपञ्च ।

अत्र तावत् प्रथमं स्वरूपं विविच्यते । अकारादिस्वरपूर्वकसन्निविष्ट-कादिव्यञ्जनक्रमरूपा लौकिकवर्णमालाऽन्यापेक्षया प्राचीनतरा विद्यते । तत्र पूर्वं स्वराणां तदनन्तरञ्च व्यञ्जनानां सन्निवेशो व्यधीयत । अयं क्रमश्च लौकिक्या एव वर्णमालायाः, नान्यस्याः । अत्र प्रमाणम् **ऋग्वेदप्रातिशाख्यस्य** "एते स्वराः" (पट० १, सू० ३) इति सूत्रोपरि कृतम् उव्वटाचार्यस्य भाष्यमेवोपन्यस्यते । उव्वटाचार्यः 'एते स्वराः" (ऋ० वे० प्रा० १।३) इति सूत्रस्य व्याख्यावसरे **ऋग्वेदपार्षदोक्त**वर्णसमाम्नायं लौकिकं प्रोक्तवान् । "एते स्वराः" (ऋ० वे०) प्रा० १।३) इति सूत्रस्य भाष्ये—"ननु कथं वर्णसमाम्नायमनुपदिश्यैव 'अष्टौ समानाक्षराण्यादितः" (१।१) इति । उपदिष्टस्य हि व्यपदेश एवमुपपद्यते आदित इति, नानुपदिष्टस्य । तथा—"चत्वारि सन्ध्यक्षराणि उत्तराणि" (१।२) इत्युत्तरव्यपदेशो नैव घटते" इति । इत्येवं पूर्वपक्षं समुत्थाप्य "नैष दोषः; उपदिष्टो वर्णसमाम्नायो लौकिको विद्यते । तत्र यावन्तो वर्णा अस्यां शाखायां समुपयोक्ष्यन्ते तावतीं संज्ञां कर्तुं तमेव वर्णसमाम्नायमुररीकृत्याऽऽह—"अष्टौ समानाक्षराण्यादितः' (१।१) इति । तथा तामेवानुपुर्वीमङ्गीकृत्य—"चत्वारि सन्ध्यक्षराणि" (१।२) इत्युत्तरशब्दमाह । "इत्युत्तरपक्षे उपदिष्टो वर्णसमाम्नायः, तमेव वर्णसमाम्नायम्, तामेवानुपूर्वीमङ्गीकृत्य" इत्यादिकं प्रोक्तवान् । अत्र भाष्ये "उपदिष्टो वर्णसमाम्नायः" इत्यस्य, यस्योपरि उव्वटाचार्यादपि पूर्वजन्मा श्रीविष्णु-मित्रो वर्गद्वयवृत्तिं कृतवान्, तस्मिन् **ऋग्वेदपार्षदग्रन्थे** "उपदिष्टो यो वर्णसमाम्नायः स लौकिको विद्यते" इति तात्पर्यमवधार्यते । **ऋग्वेदपार्षदग्रन्थे** च पूर्वं स्वरास्ततः स्पर्शास्तेभ्यश्च परमन्तःस्थाः, ततश्च परमूष्माण उपादिश्यन्त । तद्यथा—

"एवं शास्त्रप्रयोजनमुक्त्वा शास्त्रसम्व्यवहारार्थं वर्णक्रमार्थं च अक्षर-समाम्नायमाह—

१—अकारर्कारावि उ ए ओ ऐ औ ।

२—पदाद्यन्तयोर्न ऌकारः स्वरेषु ।

३—आकारादीन् दीर्घरूपान् द्वितीयान् ह्रस्वेषु ।

४—पञ्चस्वपि तानि सन्ति ।

५—कखौ गघौ ङ । ६—चछौ जझौ ञ । ७—टठौ डढौ ण ।

८—तथौ दधौ न । ९—पफौ बभौ म । य र ल वाः ।

ह श ष साः ।

अः ≍ क ≍ प अं ।

इति वर्णराशिः, क्रमश्च ॥ १० ॥

लौकिकवर्णसमाम्नायस्यैनमेव क्रममाश्रित्य भगवान् शौनकः [1]आदितोऽष्टा-क्षराणां (अ आ ऋ ॠ इ ई उ ऊ इत्येषाम्) समानाक्षरसंज्ञाम् एकारादीनाञ्च सन्ध्यक्षरसंज्ञाम्, कादीनाञ्च व्यञ्जनस्पर्शादिसंज्ञां यथावश्यकं क्रमशश्च कृतवान् ।

अकारादिस्वरपूर्वकसन्निविष्टकादिव्यञ्जनक्रमरूपाया लौकिकवर्णमालायाश्च द्वौ भेदौ स्तः । तयोर्मध्ये प्रथमो भेद उपर्युक्तः । प्रथमप्रकारके लौकिकेऽक्षर-समाम्नाये ह्रस्वाकारदीर्घाकाराभ्यां परम् ऋकारस्य, एकारात् परमोकारस्य, ऐकारात्परम् औकारस्य, एवं शकारात्पूर्वं हकारस्य च सन्निवेशो दृश्यते ।

द्वितीयप्रकारकेऽकारादिस्वरपूर्वकसन्निविष्टकादिव्यञ्जनक्रमरूपे लौकिकेऽ-क्षरसमाम्नाये च ह्रस्वाकारेकारोकारदीर्घाकारैकारौकारेभ्यो ह्रस्वदीर्घ ऋकारयोः, एकारात्परमैकारस्य, ओकाराच्च परमौकारस्य, सकारस्य चोत्तरं हकारस्य सन्निवेशो विद्यते । शेषं च सर्वं पूर्ववदेव बोध्यम् । लौकिकवर्णसमाम्नायस्यास्मिन् क्रमविषये "एते स्वराः" (ऋ० वे० प्रा० प० १, सू० ३) इति सूत्रस्योव्वटा-चार्यकृतभाष्यम्, तथा लौकिकव्यवहारश्च प्रमाणे स्तः । उव्वटाचार्यः—"एते स्वराः" इति सूत्रस्य भाष्ये "ननु यदि लौकिकोऽत्र वर्णसमाम्नायो गृह्यते, एवं तर्हि तयाऽनुपूर्व्या भवितव्यम् । तत्र च ऊकारात्परौ ऋॠकारौ समामनन्ति—"उ ऊ ऋ ॠ" इति । तथा ऐकारात्पूर्वमेकारम्, औकारत्पूर्वमोकारम्—"ए ऐ ओ औ" इति । सकारात्परं हकारं समामनन्ति—शषसह" इति । इत्येवं पूर्व-पक्षं समुत्थाप्य—"सोऽयमाचार्यप्रवृत्त्या पाठक्रमोऽनुमीयमानो लौकिकवर्णसमाम्ना-यस्य द्विधा पाठं गमयति । अतोऽयं लौकिको वर्णसमाम्नायो गृह्यते । तथा तयाऽऽनुपूर्व्या तन्न दुरुक्तमिति । "उभे अप्येते आनुपूर्व्यौ लौकिकस्य वर्णसमाम्ना-यस्य द्रष्टव्ये" इत्युत्तरपक्षे "द्विधापाठम्, उभे अप्येते आनुपूर्व्यौ" इत्येवमुक्तवान् । "द्विधापाठं गमयति" इत्यत्र द्विधापाठपदेन लौकिकवर्णसमाम्नायस्य प्रथमः पाठक्रमः **ऋग्वेदपार्षदग्रन्थोक्तः** द्वितीयश्च पाठक्रमः "ननु यदि लौकिकः— श ष स ह" इति पूर्वपक्षे प्रदर्शितो गृह्यते ।

१—(१)	**अष्टौ समानाक्षराण्यादितः**	(ऋ० प्रा० प०	१।सू० १)
(२)	**ततश्चत्वारि सन्ध्यक्षराण्युत्तराणि**	,,	१।२।
(३)	**एते स्वराः**	,,	१।३।
(४)	**सर्वः शेषो व्यञ्जनान्येव**	,,	१।६।
(५)	**तेषामाद्याः स्पर्शाः**	,,	१।७।
(६)	**पञ्च ते वर्गाः**	,,	१।८।
(७)	**चतस्रोऽन्तःस्थास्ततः**	,,	१।९।
(८)	**उत्तरेऽष्टा ऊष्माणः**	,,	१।१०।

एवं लौकिकवर्णसमाम्नायस्य अकारादिस्वरपूर्वकसन्निविष्टकादिव्यञ्जनक्रमरूपं यत्स्वरूपं विद्यते, तस्य भेदद्वयं प्रतिपादितम्। द्वितीयन्तु प्रतिपाद्यमानं स्वरूपं कादिव्यञ्जनपूर्वकं सन्निविष्टाकारादिस्वरक्रमरूपमवशिष्यते। लौकिकवर्णमालाया अस्मिन् पाठक्रमे स्वरेभ्यः पूर्वं स्पर्शसंज्ञककादिव्यञ्जानानाम्, तेभ्यः परम् अन्तःस्थासंज्ञकयकारादिवर्णचतुष्टयस्य, तेषामुत्तरं च ऊष्मसंज्ञकशकारादिवर्णचतुष्टयस्य, तदनन्तरं स्वराणां पाठः क्रियते। स्वरेभ्यश्च उत्तरं जिह्वामूलीयोपध्मानीयानुस्वारविसर्गाः क्रमशः पठ्यन्ते। अस्या वर्णमालाया इदं द्वितीयं स्वरूपं १६०० षोडशशताब्दीतः, यद्वा ततोऽपि किञ्चित्पूर्वं प्रारभ्यत इति भट्टोजीदीक्षितकृतसिद्धान्तकौमुद्या अनुमीयते। भट्टोजीदीक्षितः षोडशतमे[1] विक्रमाब्दे सञ्जातः। अयं महाभागः सिद्धान्तकौमुद्याः संज्ञाप्रकरणे सर्वप्रथमं स्पर्शसंज्ञक[2]वर्णानां, ततः परमन्तःस्थोष्मणां, तेभ्यश्चोत्तरं स्वराणां जिह्वामूलीयोपध्मानीयानुस्वारविसर्गाणां व्याख्यानं कृतवान्। अन्यत्र शुक्लयजुःप्रातिशाख्यादिषु तु "तत्र स्वराः, प्रथमम्" (शु० यजु० प्रा० ८।१) "अष्टौ समानाक्षराण्यादितः" (ऋ० वे० प्रा० १।१) इत्येवं स्वराणामेव व्याख्यानं दृश्यते।

अतोऽनुमीयते यद् भट्टोजीदीक्षितसमये लौकिकवर्णमालायां पूर्वं व्यञ्जनानां तदनन्तरञ्च स्वराणां पाठक्रम आसीदिति।

मन्ये तावत्–अर्थाभिव्यक्तिशक्तेर्व्यञ्जनेष्वेव[3] सत्वाच् छिशून् कादिव्यञ्जनान्येव स्वरेभ्यः पूर्वं शिक्षयन्ति शिक्षकाः। परन्तु यां वर्णमालां शिशून् शिक्षयन्ति, तस्यां जिह्वामूलीयोपध्मानीययोरभावः, हकारादुत्तरं च 'क्ष त्र ज्ञ" इति वर्णत्रयस्य नूतनप्रवेशो दृश्यते। केषुचिदपि प्रातिशाख्यादिषु न कोऽप्येवं सङ्केतः समुपलभ्यते, येन वर्णमालायां तेषां सन्निवेशस्य प्राचीनत्वमनुमीयते।

---

१. "ये सोलहवीं शती में हुए" (वाचस्पति गैरोलाकृत—संस्कृत साहित्य का संक्षिप्त इतिहास—प्रकाशक, चौखम्बा विद्याभवन, वाराणसी–प्रथमसंस्करण–पृ० सं० ३७१)। "अतः भट्टोजीदीक्षित का जन्म विक्रम की सोलहवीं शताब्दी की प्रथम दशति में मानना चाहिए"–युधिष्ठिर मीमांसक कृत "संस्कृत व्याकरण शास्त्र का इतिहास"—पृ० सं० ४४७।

२. "कादयो मावसानाः स्पर्शाः, य र ल वा अन्तःस्थाः, श ष स हा ऊष्माणः, अचः स्वराः, अ ≍ क ≍ प इति प्रागर्धविसर्ग-सदृशौ जिह्वामूलीयोपध्मानीयौ, अं अः इत्यचः परावनुस्वारविसर्गौ—वै० सिद्धा० कौमु० संज्ञाप्रकरणे। अस्य "लोकप्रसिद्धपाठापेक्षमिदं चतुर्दशसूत्र्यां मावसानत्वायोगात्" तत्त्वबोधिन्यां व्याख्या कृता।

३. व्यञ्जयन्ति प्रकटान् कुर्वन्त्यर्थान् इति व्यञ्जनानि इत्येवं सर्वः शेषो व्यञ्जनानि (ऋ० प्राति० पट० १, सू० ७) इति सूत्रस्य भाष्ये व्यञ्जनशब्दस्य व्युत्पत्तिः। तदनुसृत्य मूले—अर्थाभिव्यक्तिशक्तेरिति उक्तम्।

श्री गौरीशङ्कर[1] हीराचन्द ओझा महोदयानां मतानुसारम् ई० पू० चतुर्थशताब्द्या अनन्तरं "क्ष त्र ज्ञ" इत्येषां स्वतन्त्रवर्णरूपेण वर्णमालायां सन्निवेशः सञ्जातः। तन्त्रग्रन्थेषु च "क्ष ज्ञ" इत्यनयोर्मातृकासु स्वतन्त्रवर्णरूपेण गणना क्रियते।

अत्र तारतम्यस्य पर्यालोचनम्

वस्तुतस्तु ऋग्वेदस्य पार्षदग्रन्थे यद्वा "एते स्वराः" (ऋग्वेदप्राति० १।३) इति सूत्रस्य उव्वटकृतभाष्ये लौकिकवर्णसमाम्नायस्य यत्स्वरूपं प्रोक्तं तदेव तस्य वास्तविकं प्राचीनञ्च स्वरूपं विद्यते। तमेव लौकिकवर्णसमाम्नायमाश्रित्य स्वशाखानुसारेण यावन्तो वर्णा उपयोक्ष्यन्ते तावतां वर्णानां तावतीं संज्ञां कुर्वन्ति स्म। यथा "क ख ग घ" इति वर्णचतुष्टयस्य पञ्चमवर्णपरे मध्ये पूर्वसदृशस्य वर्णस्य 'यम' संज्ञा क्रियते, तद्यथा—"पलिक्क्नी, चख्ख्नतुः, अग्ग्निः, घ्घ्नन्ति" इत्यत्र नकारे परे पूर्वसदृशाः कादिवर्णा यमाः प्रोच्यन्ते। तत्र स्वराणां विसर्जनीयादीनाञ्च सन्निवेशविषये यथाकामं मतभेदा भवन्तु, यथा **तैत्तिरीयप्रातिशाख्ये** "षोडश आदितः स्वराः" इति प्रथमप्रश्नस्य प्रथमाध्याये प्रथमसूत्रे आदितः षोडशस्वराणां[2] न्यासम्, अन्तस्थानन्तरञ्च "परे षडूष्माणः" (१।१।९) इति सूत्रे 'अ ≍ क श ष स अ ≍ प ह' इत्येवं जिह्वामूलीयादीनाञ्च सन्निवेशं समुपदिष्टवान्। परन्तु कादिमान्तेषु व्यञ्जनाम्, अन्तःस्थासंज्ञकवर्णानाञ्च सन्निवेशः सर्वत्र (प्रातिशाख्येषु) समानरूप एव दृश्यते। अतः सर्वत्र प्रातिशाख्येषु प्राकृतेत्यादिभाषायाञ्च वर्णमालायाः कादिमान्तस्वरूपविषये बहुशस्तारतम्यं स्फुटरूपेण दृष्टिपथं समायाति।

नूतनशब्दशास्त्रिणां मतानुसारं लौकिकवर्णसमाम्नायस्य कादिमान्तं स्वरूपम्, तत्र सारासारविमर्शश्च

तत्र वर्णमालायां कादिस्पर्शवर्णानां पूर्वोक्तः सन्निवेशक्रमः स्वरूपञ्च यथापूर्वमधुनाऽपि समुपलभ्येते। केषाञ्चिन् नूतनशब्दशास्त्रिणां मतानुसारेण

---

१. "ई० पूर्व चौथी शताब्दी के पीछे लेखशैली में अक्षरों के रूप में कई परिवर्तन होते होते संयुक्ताक्षर 'क' 'ष' में क और ष का मूलरूप अस्पष्ट होकर उसका विलक्षण ही रूप 'क्ष' बन गया, तब बौद्धों ने 'क्ष' को भी वर्णों अर्थात् मातृकाओं (सिद्धिमातृकाओं) में स्थान दिया। इसी तरह पीछे से संयुक्ताक्षर ज् और न के रूप अस्पष्ट होकर उसका विलक्षण रूप 'ज्ञ' बन गया, तब उसको भी लोगों ने वर्णों में स्थान दिया। तन्त्र-ग्रन्थों में 'क्ष' और 'ज्ञ' की वर्णों अर्थात् मातृकाओं में संज्ञा की गई है। परन्तु ये दोनों सर्वथा वर्ण नहीं, और उनके घटक दो दो अक्षरों के मूल रूप न रहने पर एक ही विलक्षण नया संकेत बन जाने से ही उनके वर्णों में गणना हुई। जैसे कि वर्तमान काल में नागरी की वर्णमाला में 'त्र' की भी।"—ओझाकृत "प्राचीन भारतीय लिपिमाला", "ब्राह्मी लिपि" इति प्रकरणे पृ० सं० ४७५।

२. अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ अं अः।

स्थानदृष्टचा[1] टवर्गादुत्तरं चवर्गस्य पाठः कर्तव्यः; यतो हि साम्प्रतं चवर्गोच्चारणे कर्तव्ये जिह्वाया टवर्गाभिव्यक्तिजनकमूर्धस्थानात्परं कठोरतालोः संस्पर्शः सञ्जायते। तथा च वर्णमालायाः कादिमान्तं स्वरूपं कवर्ग-टवर्गाभ्यामुत्तरं चवर्गस्य, ततः परञ्च तवर्ग-पवर्गयोः क्रमशः सन्निवेशरूपं स्यात्। तथा च १. भारोपीयकालः, २. भारतीयशुद्धतालव्यकालः, ३. घर्षस्पर्शतालव्यकालः, ४. दन्ततालव्यघर्षस्पर्शकालः—इत्येवं चवर्गस्य चत्वार ऐतिहासिककालाः, चतुर्षु कालेषु च विभिन्नानि चत्वारि ऐतिहासिकस्थानानि कल्पयन्ति।

वस्तुतस्तु तेषामयं विचारोऽसमीचीन एव प्रतिभाति; यतो हि—

यथा पुत्रवती स्नेहाच्चुम्बते निजमौरसम्।
एवं वर्णाः प्रयोक्तव्या युञ्जन् इति निदर्शनम्॥

इति **याज्ञवल्क्यशिक्षोक्त**दिशा चवर्गीय-ञकारस्योच्चारणप्रक्रियाप्रामाण्यानुसारेण चवर्गस्योच्चारणे कण्ठसमीपस्थकोमलतालौ, शुद्धतालौ, कठोरतालौ, दन्तेषु च स्पर्शः समकालिक एव सिद्धयति, न तु विभिन्नकालिकः। यतो हि पुत्रं स्नेहाच्चुम्बने जिह्वाया दन्तमूलेषु कठोरतालौ, कोमलतालौ च स्पर्शः सञ्जायते। एवं पुत्रचुम्बनरीत्या चवर्गीयञकारस्योच्चारणेऽपि तत्तत्स्थानेषु जिह्वास्पर्शः सञ्जायते। चवर्गस्य तालुस्थानत्वं तु तत्र तद्वर्गोच्चारणे कर्तव्ये वायुसंयोगाश्रय-

---

१. "च के उच्चारण में जिह्वोपाग्र ऊपरी मसूड़ों के तालवग्र का इस प्रकार स्पर्श करता है कि एक प्रकार की एक रगड़ होती है। अतः यह घर्ष स्पर्श अथवा स्पर्शसंघर्षी मानी जाती है। तालु की दृष्टि से देखें तो कण्ठ के आगे टवर्ग आता है और उसके आगे चवर्ग का स्थान आगे की ओर बढ़ गया है।"—श्यामसुन्दरदासकृते भाषारहस्ये २६१ पृ०।

"प्राचीन काल में शुद्ध तालव्यों का स्थान पीछे की ओर रहा होगा। तालव्य ध्वनियों के चार ऐतिहासिक काल माने जाते हैं। पहला भारोपीय काल जब तालव्य कण्ठ के बहुत पास उच्चरित होते थे। दूसरा काल था भारतीय शुद्धतालव्यों का, तीसरा काल था घर्षस्पर्शतालव्यों का, चौथा काल था दन्ततालव्य घर्षस्पर्श वर्णों का।" —श्यामसुन्दरदासस्य भाषारहस्यम् (पृ० सं० २६१।)

२. "विद्वानों का मत है कि मूर्द्धन्य वर्ण भारोपीय भाषा में नहीं थे। भारत में आने पर इनका प्रादुर्भाव हुआ। सम्भवतः तवर्ग को ही भारत के मूल निवासी इस प्रकार जीभ उलट कर और कुछ पीछे ले जाकर बोलते थे कि वह वर्ग मूर्धन्य टवर्ग बन गया। कुछ भी हो, वेद में मूर्द्धन्य ध्वनि का बहुत कम प्रयोग हुआ है।"

—श्यामसुन्दरदासस्य भाषारहस्यम् (पृ० सं० २५९)

"दूसरी ओर संस्कृत में नितान्त नवीन ध्वनियों का एक वर्ग ही उत्पन्न हो गया था। और वह था मूर्धन्य ध्वनियों का"। ज्यूल्लाख, भारतीय आर्यभाषा।

तया प्रोक्तम्। एवं विचार्यमाणे सति वर्णमालायाः कादिमान्तं स्वरूपं यथापूर्वमधुनाऽपि विद्यते।

एवमेव मूर्द्धन्यवर्णानां विषयेऽपि श्रीमतां ज्यूल्लाखमहोदयसदृशामनुसन्धानं भाषाशास्त्रिष्वतीव प्रशंसां प्राप्तम्। "भारत-योरोपीयभाषासु टवर्गादिमूर्धन्यवर्णानां प्रागभाव आसीत्। भारतवर्षमागते सति बहुकालानन्तरं मूर्धन्यवर्णाः प्रादुरासन्। जिह्वाग्रं प्रतिवेष्टय तवर्गमेव एवमुच्चारयितुं प्रारब्धवन्तः, येन स वर्गष्टवर्गरूपम् अदधात्। इरानीभाषायाम् "इस्त" इत्यादिशब्देषु इकारादिपूर्वकसकार एव भारतीये "इष्ट" इति शब्दे षकारः, तद्योगे तकारस्य च टकारः सञ्जातः।" इत्येवं टवर्गविषये तेषामियं धारणा सर्वैः स्वीक्रियते (आधुनिकभाषाविद्भिः)। न केवलं टवर्गविषय एव, किन्तु समस्तमूर्धन्यवर्णानां विषये तैरेवमभिमतं [1]स्वीक्रियते भारतीयवर्णमालायां कवर्गाद्यन्यवर्णापेक्षया टवर्गस्यार्वाचीनत्वस्वीकारे तेषां मतानुसारेण यानि कारणानि प्रतीयन्ते, तानि निम्नाङ्कितानि सन्ति—

१. भारतेरानीयेत्यादिभाषायां मूर्धन्यवर्णानां नितरामभावो दृश्यते। यथा संस्कृतभाषायां "घटः" इत्युच्यते, किन्तु फ्रेञ्चभाषायां "घात्स" इति व्यवह्रियते। संस्कृते "षट्", लेतिनभाषायां 'सेक्स' अरबीभाषायाञ्च 'खक्स्' इति समुच्चार्यते। संस्कृतभाषीये 'स्थाणु' शब्दे टवर्गीयमूर्धन्यणकारो दृश्यते, किन्तु अरबीभाषायां 'स्तूना' शब्दे तस्याभावो दृष्टिपथ समायाति। एवञ्च, अरबीभाषायामधुनाऽपि टवर्गस्योपलब्ध्यभावात् "भारतीयवर्णमालायां टवर्गोऽन्यवर्णापेक्षयाऽर्वाचीनः"—इति वक्तुं शक्यते। अन्यथा टवर्गस्य स्वेतरकादिवर्गाणां समकालिकत्वे तु भारतेरानीत्यादिभाषायाः भारतेरानीपरिजनाङ्गभूतत्वे भारतीयवर्णमालायामिव इरानीभाषायामपि तस्योपलब्धिः स्यात्, किन्तु नोपलभ्यते।

२. टवर्गस्य च स्वतन्त्रसत्ताकेष्वपि शब्देषु न दृश्यते। हकारशकारचवर्गीयवर्णानामादेशरूप एव टवर्गः समुपलभ्यते। यथा विराज्शब्दघटकजकारस्य

---

१. जिस आर्य तत्त्व ने नवीन वर्ग की रचना सम्भव बनाई, वह है स, जो स्वयं सामान्य भारत ईरानी में उससे निकला है। जिसके पहले इ उ ऋ (और उनके संयुक्तरूप) और क आते हैं। जिसके साथ स्थापित सम्पर्क के कारण प्राचीन दन्त्यों में परिवर्तन होता हैं। फलतः ईरानी में उदाहरणार्थ "इस्त" एक ऐसे समुदाय से अनुरूपता रखता है, जिसमें अन्त्य त शकार ध्वनि के अनुकूल हो जाते हैं। दोनों ही दन्त्यों से पृथक् ही और मूर्द्धन्यों का देशी रूप धारण कर लेते हैं। भारत-ईरानी भाषा का "न" भारत वर्ष में र हो जाता है।··········कर्ता एकवचन विट् जो रूप की दृष्टि से विश स वास्तव में वित्स से निकला है। और करण बहुवचन विड्भिः (अरबी—विज्वां) ऐसे उदाहरण हैं।

—फ्रेञ्चभाषातो लक्ष्मीसागरवार्ष्णेयद्वारा हिन्दीभाषायामनूदिते ज्यूल्लाखकृते 'भारतीय आर्यभाषा'—(पृ० सं० ५७)।

षकारादेशे, तस्य च डकारादेशे सति "विराड्" इति, लिह् शब्दघटकहकारस्य च ढकारादेशस्तस्य च चर्त्वे "लिट्" इत्यादिशब्दा निष्पद्यन्ते। एवं विश्शब्दावयवशकारस्य "व्रश्चभ्रस्ज"—इति सूत्रेण षत्वे, तस्य च "झलां जशोऽन्ते" इति टकारादेशे 'विट्' इति रूपं समुपलभ्यते। तृतीयादिषु बहुवचने तु "विड्भिः" इति। परन्तु अरबीभाषायां "विजव्या" इत्येवं रूपं समुपलभ्यते।

३. टवर्गादिमूर्धन्यवर्णानामन्यवर्गापेक्षया ऋग्वेदादिषु अल्पीयान् एव प्रयोगः समुपलभ्यते।

एवं पूर्वोक्तहेतुभिर्भारतीयवर्णमालायां कादिमान्तेषु स्पर्शवर्णानां चत्वार एव वर्गा आसन्, न तु पञ्च वर्गाः। तदनुसारेण च वर्णमालायां स्पर्शवर्णानां प्राक्तनं पाठस्वरूपं कण्ठतालव्यदन्त्यौष्ठवर्णानां क्रमशः उत्तरोत्तरं पाठरूपम्, यथा अवेस्ताभाषायाम्[1]। रेफषकारयोरभावाच्च अन्तःस्थोष्मवर्णानां पाठस्वरूपं य ल व श स ह इत्येवमासीदिति। तथा च नूतनशब्दशास्त्रिणां मतानुसारेण [2]इदं द्वितीयस्वरूपमासीदिति तात्पर्यमवबुद्धचते। एवं भारतयोरोपीयभाषासु टवर्गादिमूर्धन्यवर्णानामभावाद् भारतीयभाषासु टवर्गस्य बहुकालानन्तरं विकासः सञ्जातः—इत्यस्मिन् विषये ये पूर्वोक्ता हेतवः समुपस्थापिताः, तदुपरि विचारः प्रस्तूयते।

वस्तुतस्तु मूर्धन्यवर्णानामन्यवर्णापेक्षया अर्वाचीनत्वस्वीकारे या युक्तयः, ज्यूब्लाखमहोदयानां तात्पर्यानुसारेण समुपस्थापिताः, ता सर्वाः पूर्वपक्षीयाः, एकदेशीयाश्च सन्ति। वस्तुतः सिद्धान्तरूपेण ज्यूब्लाखमहोदया अपि मूर्धन्यवर्णान् अन्यवर्णसमकालिकान् अङ्गीकृतवन्तः। अयं विषयः टिप्पण्यामुद्धृतानां[3] ज्यूब्लाखमहोदयप्रोक्तानां वाचां प्रामाण्येनातिशयेन स्फुटीभवति।

किञ्च, भारतवर्षेऽपि काश्चिदेवं भाषाः समुपलभ्यन्ते, यासु केचिद् वर्णा न दृश्यन्ते। यथा तमिलभाषायां स्पर्शवर्णानां मध्ये प्रतिवर्गं प्रथमपञ्चमवर्णौ एव

१. अबेस्ताध्वनिसमूहमध्ये स्पर्शवर्णानां पाठो यथा—

कण्ठ्यः	क	ख.	ग	घ	
तालव्यः	च	छ	ज	झ	
दन्त्यः	त	थ	द	द	ध
ओष्ठ्यः	प	फ	व		
अनुनासिकः	ङ	ञ	न	म	इत्यादि।

२. एतेषां मतानुसारेण प्रथमं स्वरूपं चवर्गं निरूपयन् इतः पूर्वमेव प्रतिपादितवान्। तदपेक्षयेदं द्वितीयं स्वरूपमिति बोद्धचम्।

३. "अब्त में इस सम्भावना का उल्लेख कर देना आवश्यक है जो काफी आश्चर्यजनक है कि विदेशी शब्दों में भी कुछ मूर्धन्य मिलते हैं। अस्तु, न ती स्थूणा और स्थाणु की, न गुण की व्याख्या करने का साहस हो सकता है"।

—ज्यूब्लाख, भारतीय आर्यभाषा (पृ० सं० ६३)।

समुपलभ्येते, न तु द्वितीयतृतीयचतुर्थाः। एतावता प्रतिवर्गं द्वितीयखकारादिवर्णानां कालान्तरं विकासः सञ्जात इति वक्तुं न शक्यते। यद्यपि तमिल-भाषीयास्तामिलभाषां संस्कृतप्रभवां न मन्यन्ते, तथापि तस्योपरि संस्कृतस्य भूयान् प्रभावः परिलक्ष्यते। पुनश्च भारतयोरोपीयभाषासु काश्चिदेवं भाषाः सन्ति, यासु मूर्धन्यवर्णानां मध्ये केचित्समुपलभ्यन्ते। तथा आंग्लभाषायां 'ट्रेण्ड' इत्यादिशब्देषु टकाररेफादीनां बाहुल्यं दृश्यते। एवं विदेशिभाषासु कतिपयमूर्धन्यवर्णानां समुपलब्धेः सत्त्वात् "भारतीयवर्णमालायां टवर्गोऽर्वाचीनः" इत्येवं कथनं वाचा विग्लापनमात्रमेवास्ति।

"टङ्का, टीका, जठर, डिम्भ, टक्का" इत्यादिशब्देषु टकारादीनां स्वतन्त्रसत्तायाः सत्त्वात्, अनादिशब्दरूपत्वाच्च टवर्गस्य स्वतन्त्रसत्ता न विद्यते, अतः सोऽअर्वाचीनः" इति वचनं विश्वासपदवीं नैव आटीकते।

एवं रीत्या सिद्धान्ततयाऽऽयमेवार्थो निर्णीतो यद् भारतयोरोपीयभाषाणां मध्ये भारतीयभाषायां मूर्धन्यवर्णाः प्राक्तनास्तवर्गादिसमकालिकाश्च सन्ति। तेन लौकिकवर्णमालायाः कादिमान्तेषु यत्स्वरूपम्, तदपि प्राचीनसममेवास्तीत्यत्र सन्देहलेशोऽपि सारासारविचारासामर्थ्यमेव प्रकटीकरोति, न तु बुद्धिनैपुण्यम्।

लौकिकवर्णमालायां वर्णानां संख्या तत्र तथ्यातथ्यविवेचनञ्च

अस्या लौकिकवर्णमालाया यत्स्वरूपम् **ऋग्वेदपार्षदग्रन्थे** प्रतिपादितम्, तदनुसारेण एकपञ्चाशदेव वर्णा विद्यन्ते, तत्र "पञ्चस्वपि तानि सन्ति" (ऋ० प्रा० व० ९) शौनकप्रोक्तपार्षदग्रन्थस्यास्मिन् सूत्रे ऌकारस्यापि दीर्घत्वमुक्तम्। "अकारादीन् दीर्घरूपान् ह्रस्वेषु" (ऋ० प्रा० व० ८) इति सूत्रे ह्रस्वदीर्घस्वरयोर्भेदः प्रतिपादितः। तथा च आकाराद्यौकारान्ताश्चतुर्दश स्वराः, तत उत्तरे पञ्चविंशतिः स्पर्शाः, चत्वारश्च अन्तःस्था, अष्टौ ऊष्माणश्च—एते सर्वे मिलित्वा एकपञ्चाशत्संख्याका भवन्ति।

प्रातिशाख्यादिषु च इमान् लौकिकवर्णमालावर्णान् आश्रित्य स्वशाखानुसारेण लोके वा यावन्तौ वर्णा उपयोक्ष्यन्ते, तावतां वर्णानां तावतीं संज्ञां कुर्वन्ति स्म। यथा पञ्चमवर्णपरे मध्ये पूर्वसदृशा ये ककारादिघान्तवर्णाः सन्ति, तेषां 'यम' संज्ञा क्रियते। देवदत्तशब्दे च "गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम्" (पा० सू० ८।२।८६) इति सूत्रेण च लोके देवदत्तशब्दघटकदकारोत्तरेकारस्य, द्वितीयदकारोत्तरगुरुसंज्ञकस्य ह्रस्वाकारस्य, तथा तकारोत्तरह्रस्वाकारस्य च पर्यायेण प्लुतसंज्ञ' दूरात्सम्बोधने सति विधीयते।

केचिदाचार्यास्तु प्लुतादिभेदेन स्वरादिभेदमङ्गीकृत्य पञ्चषष्टिं [1]त्रिःषष्टिं वा वर्णान् गणयन्ति स्म। यथा शुक्लयजुःप्रातिशाख्ये—ह्रस्वदीर्घप्लुतभेदेन त्रयोविंशतिः स्वराः, कादिहान्तेषु त्रयस्त्रिंशद् व्यञ्जनानि ≍क ≍प अं अः हुं इति

१. "त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः शम्भुमते मताः"। (पा० शि०, श्लो० ३)।

पञ्चायोगवाहाः "कुं खुं गुं घुं" इति चत्वारश्च यमाः । सर्वेषाञ्च योगे पञ्चषष्टि-संख्या जायते । एवं रीत्या वर्णानां संख्याविषये महान् मतभेदः प्रतीयते ।

एवं रीत्या वर्णानां संख्याविषये विविधाचार्याणां यद्विविधं मतं दृश्यते, तद्विषये समन्वयात्मकं कमपि विचारं प्रस्तौमि । **पाणिनीयशिक्षायां** "त्रिःषष्टिश्चतुः-षष्टिर्वा" (पा० शि० ३) इत्यत्र वर्णानां यत्त्रिःषष्टित्वं चतुःषष्टित्वं वा, तथा— **शुक्लजुप्रातिशाख्ये** "एते पञ्चषष्टिर्वर्णा ब्रह्मराशिरात्मवाचः" (शु० य० प्रा० ८।१५) इति सूत्रे यत्तेषां पञ्चषष्टित्वं प्रोक्तम्, तत्तु स्वशाखानुसारेण वैदिकवर्णान्, लौकिकवर्णमालाघटकवर्णांश्च संख्याय प्रोक्तम्, न तु केवलं लौकिकवर्णमाला-घटकान् वर्णानेव । केचिद् वर्णाः केवलं लोके, केचिच्च लोके वेदे उभयत्राऽपि प्रयुज्यन्ते । तद्यथा–'यम'वर्णाः केवलं वेदे, अकारादयः स्वराः, कादयश्च व्यञ्जनानि लोके वेदे उभयत्रापि समुपलभ्यन्ते । वेदानां विभिन्नशाखानुसारेणायं वर्णसंख्या-भेदः, न तु लोकप्रसिद्धवर्णानुसारेण ।

वस्तुतस्तु अयं भेद आभासमात्रं (नाममात्रम्) विद्यते, न तु तत्त्वतः । प्लुतस्वरस्य ह्रस्वदीर्घस्वरेभ्यो व्यतिरिक्ता सत्ता न प्रतीयते । ह्रस्वदीर्घयोरेव लोके वेदे वा यथावश्यकं प्लुतसंज्ञा विधीयते । अतएव "एहि कृष्ण ३ अत्र गौश्चरति" "सक्तून् पिब देवदत्त३" इत्यनयोर्वाक्ययोः कृष्णशब्दघटकणकारोत्तर-ह्रस्वाकारस्य देवदत्तशब्दावयवतकारोत्तरस्य ह्रस्वस्याकारस्य एव, "हे३ राम, है३ राम" इत्यत्र च व्यञ्जनसहितैकारयोरेव प्लुतसंज्ञा क्रियते । अन्यथा ह्रस्वदीर्घाभ्यां व्यतिरिक्तायां सत्तायां "श्रीरामलक्ष्मी" इत्यादिशब्दघटकह्रस्वा-कारादेरिव प्लुतस्य स्वतन्त्रसत्ता समुपलभ्येत । तथा च 'ङीप्', 'ङीष्' इत्यादि-स्त्रीप्रत्ययेषु यो हि दीर्घः स्वरो दृश्यते, स कस्यचित् संज्ञाभूतो यद्वा आदेशरूपो न विद्यते, किन्तु तस्य स्वतन्त्रसत्ताऽवगम्यते ।

किञ्च, प्लुतस्वरस्य स्वतन्त्रसत्ताया अभावादेव पाणिनिपठितेषु धातुषु प्लुतस्वरस्याऽभावो ह्रस्वदीर्घस्वरयोरेव प्रयोगः कृतः; एवं ककारादयो ये यमाः सन्ति, तेऽपि वर्णमालाघटककाकारादिभ्योऽभिन्ना एव अङ्गीकर्तव्याः ।

किञ्च, यथा ह्रस्वादीनां उदात्तानुदात्तस्वरितसंज्ञा यथावश्यकं विधीयते, तदनुसारेण च "इन्द्रशत्रुर्वर्धस्व" इत्यादावर्थभेदश्च सञ्जायते, तथैव रीत्या "देव-दत्त३ कृष्ण३" इत्यादिशब्दघटकह्रस्वाकारादीनामेव "गुरोरनृतोऽनन्त्य०" (पा० सू० ८।२।८६) इत्यादिसूत्रेण त्रिमात्रिकप्लुतसंज्ञा विधीयते । तदनुसारेण च "देवदत्त कृष्ण३" इत्यादेः सम्बोधनावस्थायां स्वाभिमुखीकरणरूपोऽर्थो देवदत्तादिपदार्था-तिरिक्तोऽपि जायेत । यद्यपि "अरुण + अम्बुजम् = अरुणाम्बुजम्, वारि + इष्टः = वारीष्टः, भानु + उदयः = भानूदयः, जल + इच्छा = जलेच्छा, उप + एति = उपैति, कमल + उदयः = कमलोदयः, प्रष्ठ + ऊहः = प्रष्ठौहः" इत्यादिशब्देषु क्रमशो दीर्घा-कारादयो ह्रस्वाकारादीनां दीर्घादिरूपैकादेशाः सन्ति, तथा च दीर्घस्वराणामपि ह्रस्वातिरिक्ता सता न दृष्टिपथमारोहति, तथाऽपि "दाशृ शीकृ भू तेकृ पैणृ लोकृ

शीट्टृ" इत्यादिषु क्रमशो दान-सेचन-सत्ता-शङ्का-गति-दर्शन-गवार्थकेषु पाणिनि-पठितेषु भ्वादिधातुषु दीर्घाकारादयः स्वतन्त्रवर्णरूपेणैव समुपलभ्यन्ते, तथा तेषां ह्रस्वाकारादीनामिव तेभ्यो (ह्रस्वाकारादिभ्यः) भिन्नैव सत्ता स्वीकर्तुमापतति । (प्लुतस्वरास्तु) एवंभूता न क्वचिद् दृश्यन्ते । एवं रीत्या प्लुतादीनां ह्रस्वाद्यपेक्षया भेदस्य आभासमात्रे सिद्धे सति वर्णानां संख्याविषये तत्त्वतः सर्वेषामाचार्याणा-मेकमेव मतं प्रतिभाति । त्रिमात्रिकप्लुतस्वरस्य ह्रस्वदीर्घस्वरयोः कुक्षौ गणनायाम्, यमसंज्ञककादिवर्णानाञ्च ककारादिष्वन्तर्भावाच्च मुख्यतया वर्णानां पञ्चाशदेव संख्या स्वीकर्तुं युज्यते ।

वैदिकवर्णमाला

एवं रीत्या एते एव वर्णा वेदेष्वपि समुपलभ्यन्ते । **प्रातिशाख्यादिषु** च इमां लौकिकवर्णमालामेवाश्रित्य स्वशाखानुसारेण यावन्तो वर्णा उपयोक्ष्यन्ते, तावतां वर्णानां तावती संज्ञा कृता । प्लुतस्वराणां यमादीनाञ्च पृथक् सत्तास्वीकारे तु पूर्वो-क्तानुसारेण यथाशाखं वर्णा बोद्धव्याः ।

अत्र भाषाशास्त्रिणां दृष्टिः

नूतनभाषाशास्त्रिणस्तु द्वापञ्चाशदेव[1] वर्णान् वैदिकवर्णमालायां मन्यन्ते । एतेषां मते त्रयोदश स्वराः, एकोनचत्वारिंशद् व्यञ्जनानि—एते सर्वे सम्भूय द्वापञ्चाशत्संख्याका जायन्ते । एतेषां मते—वेदे 'ड, ढ' इति वर्णद्वयस्य भेदद्वयं विद्यते । १. ड ल, २. ढ ह" इति । एको डकारो डकाररूपेण व्यवह्रियते, द्वितीयश्च लकाररूपेण । तदयथा—'ईडे" इत्यत्र डकारस्य लकारः, "ईले" इत्येवम् । एवमेक-स्य ढकारस्य डकाररूपेण द्वितीयस्य च हकाररूपेणोच्चारणं क्रियते । तद्यथा— "मीढुषे" इत्यत्र ढकारस्य "मीहुषे" इत्येवं हकारः समुच्चार्यते । एवं डल-वर्णयोः प्रत्येकं भेदद्वयम् (चत्वारः संख्यया) तदवशिष्टान् त्रयोविंशच्च कादिवर्णान्, जिह्वा-मूलीयादीनामपि व्यञ्जनसंज्ञापक्षे तानादाय एकोनचत्वारिंशत्संख्या व्यञ्जनानां जायते । मन्ये तावदेते भाषाशास्त्रिणोऽपि प्लुतादीनां ह्रस्वादिस्वरेषु, यमसंज्ञक-कादिवर्णानाञ्च ककारादिषु अन्तर्भावं कृत्वा वैदिकवर्णानामिमां संख्यां निर्धारित-वन्तः; यतो हि प्लुताकारादीनां यमानाञ्च गणना तेषां ग्रन्थेषु न दृश्यते ।

---

१. धीरेन्द्रवर्मकृते "हिन्दी भाषा का इतिहास" इति ग्रन्थे ७५, ७९, ७७ पृष्ठानि द्रष्टव्या-नि । तथाच—"वैदिकभाषा में ५२ मूल ध्वनियाँ हैं । १३ स्वर तथा ३९ व्यञ्जन हैं" इत्येव तत्र प्रोक्तम् ।

श्रीमैकडोनलकृतस्य "वैदिक ग्रामर" इत्यभिधेयग्रन्थस्य "वैदिकभाषायाः ध्वनयः" "The sounds of the Vedic Language. इति स्थलं पञ्चषष्ठपृष्ठयोर्द्रष्टव्यम् । तत्र "वैदिकभाषायां सर्वे मिलित्वा द्वापञ्चाशद् ध्वनयः सन्ति" । "There are altogether 52 Sounds" इत्येवं रीत्या वैदिकध्वनयो व्याख्याताः ।

प्राकृतवर्णमाला

पूर्वोक्तवर्णमालायां (लोकसिद्धायाम्) निर्दिष्टाः प्रत्येकं[1] वर्णाः उच्चारणासामर्थ्याद् विविधरूपेण विकीर्णाः सञ्जाताः। तदनुसारेण पूर्वोक्तवर्णमालामाश्रित्य एकारादिस्वराणां द्विविधो भेदो विविधाश्च वर्णमाला दृष्टिपथं समायाताः। यथा प्राकृत-पालि-व्रजेत्यादीनां वर्णमाला। आधुनिकशब्दशास्त्रिभिः कैश्चिद् नेमीचन्द्रेत्यादिप्राकृतवैयाकरणैश्च प्राकृतवर्णमालायां द्वाचत्वारिंशद् वर्णाः प्रतिपादिताः। तद्यथा—ऋकारलृकारौ विहाय ह्रस्वदीर्घभेदेन[2] अकाराद्युकारान्ताः षट् स्वराः, एकाराद्योकारान्ताश्च चत्वारि सन्ध्यक्षराणि, एतेषां योगेन सर्वे सम्भूय दशसंख्याका जायन्ते। जिह्वामूलीयोपध्मानीयविसर्गान् तालव्यशकारं मूर्द्धन्यषकारञ्च विहाय कादिहान्तेषु सर्वाणि व्यञ्जनानि, अनुस्वारश्च समुपलभ्यन्ते। तानि सर्वाणि संख्यया द्वात्रिंशद् भवन्ति। द्वात्रिंशद् व्यञ्जनानि दश स्वराश्चेति सर्वे द्वाचत्वारिंशत्संख्यासु युज्यन्ते।

परन्त्वेतद्विपरीतं **पाणिनीयशिक्षायां** तु प्राकृतभाषायां त्रिःषष्टिश्चतुःषष्टिर्वा वर्णाः प्राकृतभाषायां शम्भुमते स्वीकृताः। तद्यथा—

त्रिषष्टिश्चतुः षष्टिर्वा वर्णाः शम्भुमते मताः।
प्राकृते संस्कृते चापि स्वयं प्रोक्ताः स्वयम्भुवा॥ (पा० शि० ३) इति।

अनेनोद्धरणेन इदमेव वक्तुं शक्यते यत् पाणिनिसमये प्राकृतभाषायां सर्वे वर्णा आसन्, किन्तु कालान्तरे शकारादीनां दर्शनाभावः सञ्जातः, यतो हि **पाणिनीयशिक्षायां** प्राकृत-संस्कृतभाषयोर्वर्णानां गणना पृथक्त्वेन न कृता। "प्राकृते संस्कृते चापि"—(श्लो० ३) इति श्लोकानन्तरम् "स्वरा विंशतिरेकश्च"—(श्लो० ४) इत्येवमुभयोर्भाषयोर्वर्णा अपृथक्त्वेन संख्याताः। एवञ्च, संस्कृत-प्राकृतभाषयोः समाना वर्णा आसन्, किन्तु कालान्तरे प्राकृतभाषायां केषाञ्चिन्न्यूनता जातेत्येव **पाणिनीयशिक्षा**—नेमिचन्द्रादिकृत**प्राकृतव्याकरण**ग्रन्थयोरनुशीलनेन सारांशो निःसरति[2]।

पालिवर्णमाला

पालिभाषाया वर्णमालायां तु प्राकृतापेक्षया न्यूना एव वर्णाः समुपलभ्यन्ते।

१. भाषाविज्ञानन्यायशास्त्रयोश्च शब्दानित्यत्वपक्षे वचनमिदं संघटते। व्याकरणशास्त्रस्य च मते शब्दनित्यत्वपक्षे तु लोकप्रसिद्धवर्णमालायाः प्राकृतादिभाषीयवर्णमालाभिः सह न जन्यजनकरूपसम्बन्धः, सर्वासां भाषाणामनादित्वात् सर्वेषां वर्णानाम् आदिनिधनरहितत्वात्।

२. प्राकृतवर्णानां व्याख्यानं नेमिचन्द्रशास्त्रिकृतम् "अभिनव प्राकृतव्याकरण" इत्यभिधेयं ग्रन्थमाश्रित्य कृतम्।

स्वराणां[1] मध्ये ह्रस्वदीर्घऋकारयोः, लृवर्णस्य, ऐकारौकारयोश्च दर्शनाभावः। एकारस्य ओकारस्य च ह्रस्वदीर्घभेदेन [2]भेदद्वयं दृश्यते। व्यञ्जनेषु च शषविसर्गा न व्यवह्रियन्ते। श ष स इति वर्णत्रयस्य स्थाने केवलं सकार एव प्रयुज्यते। परन्तु[3] पश्चिमोत्तरदिशोर्मध्ये (वायव्यकोणे) समुपलभ्यमानेषु शिलालेखेषु त्रयाणामपि प्रयोगः समुपलभ्यते।

पालि**मोग्गलानव्याकरणे** तु पालिवर्णमालायाम् एकारादीनां ह्रस्वरूपाभावः, ऐकारः औकारश्च दृश्येते। वकारात्पूर्वं हकारानन्तरञ्च ळकारस्य पाठात् ळद्वयं विद्यते। एवञ्च सर्वे मिलित्वा त्रयश्चत्वारिंशद् वर्णा जायन्ते। तथा चोक्तम् "अ आदयो तितालिस वण्णा होन्ति"। इति।

कच्चायनव्याकरणे तु पालिवर्णमालायाम् ऐकारस्य औकारस्य च दर्शनाभावो विद्यते। व्यञ्जनानि च मोग्गलानपठितवर्णमालायामिव समुपलभ्यन्ते। एते सर्वे मिलित्वा कच्चायनव्याकरणानुसारेण पालिवर्णमालायां केवलम् एकचत्वारिंशदेव वर्णा गणनायां समायान्ति।

मन्ये तावद् एकारस्य ओकारस्य च ह्रस्वरूपं पालिभाषायां यथाकामं न मन्येत, किन्तूच्चारणे तयोः ह्रस्वस्वरूपमप्युपलभ्यते। श्रीधीरेन्द्रवर्मादय उच्चारणस्वरूपमादाय एव ह्रस्वदीर्घभेदेन तयोः (एकारस्य, औकारस्य च) भेदद्वयमुक्तवन्तः। ते कच्चायनव्याकरणमनुसृत्य ऐकारस्य औकारस्य च पालीभाषायामभावं मन्यन्ते। पदान्तविसर्गस्य विकल्पेन लोपः, लोपाभावपक्षे च स (विसर्गः) पूर्वरूपे जाते सति ओकाररूपं भजते। शेषाश्च सर्वे वर्णाः संस्कृतभाषावद् बोद्धव्याः।

पालि-प्राकृतवर्णमालयोस्तुलना

पालिप्राकृतभाषयोश्च वर्णमालायां विशेषभेदो न दृश्यते। मागधीं प्राकृतभाषां विहाय तद्भिन्नासु यकारशकारौ न व्यवह्रियेते। मागधीप्राकृतभाषायाञ्च शकारसकारयोः स्थाने केवलं सकार एव प्रयुज्यते। षकारविसर्गयोश्च प्राकृते सुतरामभावो दृश्यते।

१. पालिमोग्गलानव्याकरणम्, कच्चायनव्याकरणम्, डा० धीरेन्द्रवर्मकृतम् "हिन्दी भाषा का इतिहास" इति ग्रन्थञ्च आश्रित्य पालिवर्णानां व्याख्यानं कृतम्। एतद्विषये तस्य ग्रन्थस्य ८१तमे पृष्ठे द्रष्टव्यम्।

२. कच्चायनव्याकरणं पालिमोग्गलानव्याकरणमपि च द्रष्टव्ये। कच्चायनव्याकरणे वर्णमालायाम् एकारस्य ओकारस्य ह्रस्वभेदो न दर्शितः।

३. डा० श्यामसुन्दरदासकृते भाषारहस्ये "पालि ध्वनिसमूह" इति स्थले मूलोक्तवाक्यार्थाभिप्रायकं वाक्यं लिखितं विद्यते, तदनुसृत्य मूलोक्तमिदं वाक्यम्।

अपभ्रंशभाषाया वर्णमाला

पालिप्राकृतभाषायां व्याकृता यावन्तो वर्णाः समुपलभ्यन्ते, तावन्त एव वर्णा अपभ्रंशेष्वपि प्रायेण विद्यन्ते। उच्चारणासामर्थ्यादिकारादिस्वराणां ह्रस्वरूपमपि व्यवह्रियते। तदनुसारेण लोकप्रसिद्धवर्णमालापठितस्य एकारादेर्यथाऽवश्यकं ह्रस्वसंज्ञाऽपि क्रियते। तथा च, एकारादिस्वराणां ह्रस्वदीर्घभेदेन भेदद्वयमस्यां भाषायां बोद्धव्यम्। व्यञ्जनानाञ्च संख्या सप्तत्रिंशद् विद्यते। दश स्वरा व्यञ्जनानि च निम्नाङ्कितानि—

दी० ह्र० दी० ह्र०

स्वराः—अ आ इ ई उ ऊ ए ऐ ओ औ = दश स्वराः। व्यञ्जनानि—कादिमान्तेषु सर्वे स्पर्शसंज्ञकाः, ततः परमन्तःस्थासंज्ञकाः, तत उत्तरम् ऊष्मणां मध्ये 'स' इत्येक एव वर्णाश्च दृष्टिगोचरीभवन्ति। केचिच्छब्दशास्त्रिणः (श्रीश्यामसुन्दरदासकृते भाषारहस्ये[1]) "न्ह म्ह" इत्यनयोः नकार-मकार-हकारेभ्यः पृथक् सत्तां स्वीकुर्वन्ति। परन्तु हेमचन्द्रविरचितेऽपभ्रंशव्याकरणे तयोः पृथग्गणना नावलोक्यते।

व्रजेत्याधुनिकभाषासु वर्णमाला

एवमकारादयो वर्णाः मध्यकालिकपालि-प्राकृत-अपभ्रंशभाषासूच्चारणासामर्थ्यादिदोषवशाद् विकीर्यमाणाः व्रज-अवधी-महाराष्ट्र-गुर्जर-पञ्चनदेत्यादिदेशोद्भूतभाषाष्वतिशयेन दोषयुक्ताः सञ्जाताः। एतासु देशजभाषासु प्रायेण सर्वे वर्णाः समुपलभ्यन्ते। व्रजदेशे व्यवह्रियमाणा या व्रजभाषाया वर्णमाला सा पालीत्याद्यपेक्षया स्वरस्य बाहुल्यं भजते। तत्र अकारादय्लृकारान्ताः सर्वे समानाक्षरसंज्ञकाः स्वराः, तेषाञ्च दीर्घरूपाणि, लृकारः, सन्ध्यक्षरसंज्ञका एकाराद्यौकारान्ताः स्वराः, एकारस्य औकारस्य च ह्रस्वरूपे, "ऐ औ" इत्यनयोश्च "अ ए अ ओ" "इत्येवं सन्धिविग्रहात्मकं रूपञ्च दृश्यन्ते।

अस्यां भाषायाम् अपभ्रंशादद्यपेक्षया व्यञ्जनानामपि बाहुल्यं दृश्यते। कादिमान्ताः सर्वे स्पर्शाः, सर्वे च अन्तःस्थोष्मसंज्ञका वर्णाः, तथा जिह्वामूलीयादीनां मध्ये केवलमनुस्वार-विसर्गौ च बहुशो व्यवह्रियमाणा दृष्टिपथं समायान्ति। लोकप्रसिद्धवर्णमालापठितनकार-मकारयोर्हकारेण सह पर्यायेण योगे सति "न्ह म्ह" इति वर्णद्वयस्य, एवं रेफलकारयोः हकारेण सह संयोगे "र्ह ल्ह" इति वर्णद्वयस्य च नकाररेफादिभ्यः पृथक् सत्तामङ्गीकुर्वन्ति। अस्यां भाषायां डकारढकारयोः "ड़, ढ़" इत्येवमपि रूपं दृश्यते।

---

१. तत्र "अपभ्रंश का ध्वनिसमूह" इति स्थले अपभ्रंशवर्णानां वर्गीकरणं द्रष्टव्यम्। अत्र यकार-वकारौ अर्धस्वरत्वेन स्वीकृतावित्यपि बोद्धव्यम्।

व्रजादिवर्णमालायां ड़कारढ़कारयोर्विचारः

यथा वेदेषु "द्वयोः स्वरयोर्मध्यमेत्य सम्पद्यते स डकारो ळकारः" इति नियमानुसारेण "अग्निमीळे" इत्यादिषु डकारो ळकारः सम्पद्यते। तथैव रीत्या व्रज-हिन्दीत्याद्याधुनिकभाषास्वपि द्वयोः स्वरयोर्मध्यमेत्य डकारो ड़कारः ढकारश्च ढ़कारः सम्पद्यते। तथा च "गुडः", "गूढः" इत्याद्युच्चारणे कर्तव्ये 'गुड़', 'गूढ़' इत्युच्चारणं क्रियते। ड़कारढ़कारेति व्यञ्जनद्वयं [1]पालि-शौरसेनीसंज्ञकप्राकृतभाषयोर्व्यवह्रियमाणं सद् व्रजावधीत्यादिक्षेत्रीयभाषासु दृष्टिगोचरीजातम्।

राष्ट्रभाषाया हिन्दीवर्णमाला

एवम् अवधी-भोजपुरीत्यादिभाषास्वपि वर्णमालायां प्रायेण पूर्वोक्ताः सर्वे वर्णाः समुपलभ्यन्ते। अधुना राष्ट्रभाषापदवीमारूढाया हिन्दीभाषाया समुपलभ्यमानानां वर्णानां व्याख्यानमवशिष्यते। अस्यां वर्णमालायां लोकप्रसिद्धवर्णमालापठितानां वर्णानां मध्ये शकारं विहाय सर्वे वर्णा व्यवह्रियन्ते। अस्या भाषाया भेदद्वयं विद्यते—१. प्राचीनहिन्दी, २. नवीनहिन्दी च। १. प्राचीनहिन्दीवर्णमालायाम् अपभ्रंशभाषासूपलभ्यमानाः सर्वे स्वराः उपयुज्यन्ते। अपभ्रंशभाषायाम् "ऐ औ" इत्यनयोरभावाद् हिन्दीभाषायाञ्च तेषामुपयोगात् तदपेक्षयाऽस्यां भाषायाम् "ऐ औ" इत्यनयोः सन्ध्यक्षरयोः "अए[1] अओ" इत्यनयोः, ड़ ढ़ व न्ह म्ह इत्येतेषाञ्च नवीनं विकासं शब्दशास्त्रिणः स्वीकुर्वन्ति। वैदेशिकानां सम्पर्काच्च "क़ ख़ ग़ ज़ फ़, ऑ" इत्येषां वर्णानां[2] सन्निवेशः सञ्जातः। एतेषां संघर्षिवर्णानां विषये यन्निरूपयितव्यम्, तदग्रे "वर्णानां विभाजनम्" इति स्थले विशदरूपेण प्रकाशमुपनेष्यते।

हिन्दीभाषाया देवनागरलिप्यां "ऋ ष[3] ञ" इत्येते वर्णाः कृष्ण-कष्ट-चञ्चलेत्यादिशब्देषु लिख्यन्ते, परन्तु "क्रिस्न, कश्ट, चन्चल" इत्येवमुच्चारणं हिन्दीभाषिभिः क्रियते। अत एतेषामपि अस्यां भाषायामभावः प्रायो बोद्धव्यः।

दैनिककार्येषु च व्यवह्रियमाणभाषायां विशेषरूपेण निम्नाङ्किताः वर्णाः प्रयुज्यन्ते। तद्यथा—

अ ए ओ एँ ओँ ऍं ऑं इ उ ए अ र्ह ल्ह।

---

१. धीरेन्द्र वर्मा एम० ए० कृतस्य "हिन्दी भाषा का इतिहास" इति ग्रन्थस्य ८२ पृष्ठे "नई विकसित ध्वनियां" इति स्थलं द्रष्टव्यम्।

२. उपर्युक्तग्रन्थे तत्रैव (८२ पृष्ठे) निरूपितमिदम्।

३. श्यामसुन्दरदासकृते भाषारहस्ये २८९ पृष्ठे, धीरेन्द्र वर्म एम० ए० कृतस्य च "हिन्दी भाषा का इतिहास" इति ग्रन्थस्य ८२ पृष्ठे "ऋ ष ञ संस्कृततत्सम शब्दों में लिखे जाते हैं" इत्यादिवाक्यानि द्रष्टव्यानि।

२. नवीनहिन्दीभाषायां साहित्यिकहिन्दीत्यपरनामाभिधेयायाम् सम्वृत-ह्रस्वाग्रसम्वृतदीर्घाग्रादिसंज्ञकाः[१] स्वराः, स्पर्शस्पर्शसंघर्षीत्यादिसंज्ञकानि च व्यञ्जनानि व्यवह्रियन्ते। एतेषामप्यग्रे "वर्णानां विभाजनम्" इत्यत्र विशदरूपेण व्याख्यानं करिष्यते।

उपसंहारः (सारांशः)

एवं रीत्या प्राकृत-पाल्यपभ्रंश-व्रज-अवधीत्यादिभाषाणां वर्णमालासु लोकप्रसिद्धवर्णमालाघटितानां[२] सर्वेषां वर्णानाम् मध्ये केचिद् दोषैः विकीर्यमाणाः केचिच्च अविकीर्यमाणाः समुपलभ्यन्ते। यदा अर्धकादिदोषेण[३] व्यवकीर्णाः अवच्छिन्ना जातास्तदा त एव एकारादयो ह्रस्वसंज्ञां लेभिरे। यदा च विवृतरूपशुद्धोच्चारणे कर्तव्ये सम्वृतरूपदोषेणाऽवच्छिन्नास्तदा त एव एकारादिवर्णा हिन्दीत्यादिभाषासु सम्वृतसंज्ञां भेजिरे। यदा च त एव दोषावच्छिन्ना एकारादयः सम्वृतत्वादिदोषैरनवच्छिन्नाः, विवृतत्वादिगुणेन युक्ता जायन्ते, तदा शुद्धा उच्यन्ते। विकासवादिनो नूतनशब्दशास्त्रिणोऽपि "एकारादिवर्णा एव ह्रस्वएकारादिरूपेण व्यकासन्" इत्येवं मन्यन्ते।

एतेषां वर्णानां कथं समभिव्यक्तिर्जायते? शरीरान्तश्च किं तत्त्वम्, यद् अकारादिवर्णात्मना बहिरभिव्यज्यते? यद्यप्ययं विषयः शब्दस्वरूपाख्ये प्रथमपरिच्छेदे परादिवाचां निरूपणावसरे व्याख्यातस्तथाप्यग्रे स्पष्टार्थं तदभिव्यक्तिप्रक्रिया, तेषां विभाजनं च मतभेदप्रस्थापनपुरःसरं विस्तरशः प्रतिपादयिष्यते।

---

१. आधुनिकभाषावैज्ञानिककृताः स्वराणां संज्ञाः।

२. लोकपदेनात्र वृहस्पतीत्यादिवैयाकरणानां ग्रहणं बोध्यम्। तथा च "हैमशब्दानुशासन" नामके व्याकरणे "लोकात्" (१।१।३) इति सूत्रस्य स्वोपज्ञवृत्तौ—'लोकात्' पदस्य वैयाकरणादेरित्येवं व्याख्यानं कृतम्। लोकप्रसिद्धवर्णमालेत्यस्य वैयाकरणेषु प्रसिद्धा वर्णमालेत्यर्थो बोद्धव्यः। लोकप्रसिद्धवर्णमाला च कादिपञ्चवर्गवत्येव, न तु पाणिनीयादिशास्त्रपठिता "अ इ उ ण्" इत्यादया:। यतो हि "अ इ उ ण्, ऋ ऌ क्" इत्येवंरूपा वर्णमाला केवलं पाणिनीयसम्प्रदाये एव प्रसिद्धा, न तु हेमचन्द्र-शर्ववर्मेत्यादिसम्प्रदायेषु।. कादिपञ्चवर्गवती वर्णमाला तु सर्वत्र प्रसिद्धा। अत एव पाणिनिरपि "चोः कुः", "स्तोः श्चुना श्चुः" इत्येवं प्रयुंक्ते। नैयायिकमीमांसकादयोऽपि वैयाकरणनिकाये प्रसिद्धां वर्णमालामेवाश्रित्य व्यवहरन्ति।

३. तथा चोक्तं भर्तृहरिणा वाक्यपदीयस्य ब्रह्मकाण्डे—

"दैवी वाग् व्यवकीर्णेयमशक्तैरभिधातृभिः"। इति।

द्वितीयपरिच्छेदस्य द्वितीयं प्रकरणम्

२. वर्णाभिव्यक्तिप्रक्रिया

वायोः शब्दत्वापत्तिं स्वीकुर्वतां शिक्षाप्रातिशाख्यकाराणां निकाये या वर्णाभिव्यक्तिप्रक्रिया दृष्टिपथं समायाति, तया सह [१]जीव-भाषा-भौतिकमिति विज्ञानत्रयविदुषां सम्प्रदाये व्यवहृताया अकारादिवर्णाभिव्यक्तिप्रक्रियायाः किञ्चित्सामञ्जस्यं परिलक्ष्यते। अकारादिवर्णान् वायोः परिणामभूतान् मन्यमानानां मतानुसारं वक्तुः घटपटादिशब्दोच्चारणेच्छया हृदि सञ्जातेन प्रयत्नेन समुदीरितः प्राणवायुः कण्ठताल्वादिस्थानेष्वभिहतः सन् शब्दरूपेण परिणमते। तथा चोक्तं **वाक्यपदीयस्य** ब्रह्मकाण्डे—

लब्धक्रियः प्रयत्नेन वक्तुरिच्छानुवर्तिना।
स्थानेष्वभिहतो वायुः शब्दत्वं प्रतिपद्यते॥

प्राणवायुर्वर्णानामुपादानं कारणमित्यस्याः कारिकायास्तात्पर्यं विद्यते।

जीवादिवैज्ञानिकास्तु "प्राणवायोः कण्ठस्थितेन स्वरतन्तुना सह यदा आघातः सञ्जायते, तदा अकारादिवर्णाभिव्यक्तिः" इत्येवं मन्यन्ते। एतेषां मतानुसारम् "अकारादिवर्णा कण्ठताल्वादिस्थानेषु स्वरतन्तौ च प्राणवायोराघातजन्याः" इति स्वीकाराद् वायुर्वर्णानां निमित्तं कारणम्, न तूपादानम्। परन्तूभयोर्मतयोर्वर्णाभिव्यक्तिप्रक्रियायां कण्ठादिस्थानेषु वायुसंयोगस्य अन्वयव्यतिरेकाभ्यां वर्णानामभिव्यक्तेरनभिव्यक्तेश्च दर्शनात् सामञ्जस्यमपि समायाति। शब्दकार्यवादिभिर्नैयायिकैः सह तु एतेषामाधुनिकानां वर्णाभिव्यक्तिप्रक्रियाविषये सम्यक्तया सामञ्जस्यं परिलक्ष्यते। यतो हि एते नैयायिका अपि वायु वर्णस्य निमित्तमेव कारणं मन्यन्ते, न तूपादानम्। तदुक्तं **वाक्यपदीयस्य** ब्रह्मकाण्डे—

यः संयोग-विभागाभ्यां करणैरुपजन्यते।
स स्फोटः शब्दजाः शब्दा ध्वनयोऽन्यैरुदाहृताः॥ १०२॥

करणैः कण्ठताल्वादिभिः सह संयोगविभागाभ्यां वायुसंयोगविभागाभ्यां यः उपजन्यते, स स्फोटः। अत्र स्फुटतया वायुर्वर्णस्य निमित्तं कारणं प्रतीयते।

---

१. सूचना—ध्वनिविज्ञानग्रन्थेषु यद्वा भाषाविज्ञानग्रन्थेषु एवं संकेतो न समुपलभ्यते, येन "अणव एव, शब्दरूपेण परिणमन्ते" इत्यस्य निर्देशः समुपलभ्येत। अतः "वायोरणूनां ज्ञानस्य शब्दत्वापत्तिरिष्यते" इति भर्तृहर्युक्तकारिकायाम् अणोः शब्दत्वापत्तिं बिहाय शेषयोर्द्वयोरेव शब्दत्वापत्तिर्भौतिकविज्ञानदृष्टचा व्याख्यास्यते।

"परमाणूनां परिकम्पनाद् ध्वनिः समुत्पद्यते" इत्येतावन्मात्रं भौतिकानां मतानुसारं वक्तुं पार्यते। तत्तु पूर्वम् "आधुनिकविज्ञानदृष्टचा परायाः वाचस्तत्त्वम्" इत्यत्र व्याख्यातम्।

वर्णविवक्षया प्राणवायुर्यदा कण्ठादिस्थानमभिहन्ति, तदा अकारादिवर्णा अभिव्यज्यन्ते ।

वस्तुतस्तु भौतिकैः स्वरतन्तौ वायुसंघाताद् वर्णाभिव्यक्तौ या प्रक्रिया प्रतिपादिता, ततोऽन्यत्र ध्वनेः पुनरुत्पादनस्थले[1] (Into the Gramophone) या प्रक्रिया दृश्यते, तत्र वर्णाभिव्यक्तौ वायोरुपादानत्वं दृश्यते[2] । ध्वनिलेखनयन्त्रे ध्वनिपेटिकोपरि (On the Soundbox) संस्थापिते मण्डलके (On the Record) बह्व्यो रेखा अङ्किता भवन्ति । तत्र प्रत्येकं रेखासु ध्वन्यनुरूपा वक्राकृतिका नदी-पर्वतोपत्यकादिवद् उच्चावचा गर्ता निर्मीयन्ते । ध्वनिपेटिकायां वायुं प्रपूर्य मण्डलकोपरि ध्वनिपेटिकासंश्लिष्टां सूचिकाञ्च सन्निधाप्य ततो मण्डलकं यन्त्रद्वारा परितो भ्राम्यति । मण्डलकस्य परिभ्रामणेन तत्र संस्पृष्टसूचिकायामुच्चावच-ध्वनिगर्तानुरूपं कम्पनं जायते । ध्वनिगर्तानुरूपपरिकम्पितसूचिका च क्रमशः एवं कम्पनानुरूपं वायुं कम्पयति । तेन घटरूपेण मृत्तिकाया इव वायोरपि ध्वनिरूपेण परिवर्तनं जायते । ध्वनिगर्तानुरूपपरिकम्पितसूचिकास्पन्दनानुरूप-परिकम्पिता ध्वनिरूपं लभमाना वायुतरङ्गाश्च ध्वन्यभिलेखनयन्त्रस्थं ध्वन्युत्ते-जकयन्त्रं[3] प्राप्योच्चध्वन्यात्मना सर्वैः श्रूयते । अत्र ध्वन्यभिव्यक्तौ सूचिका निमित्त कारणम्, वायुश्चोपादानम् । एवं रीत्याऽन्तःकरणेऽपि वक्ता यं शब्दं प्रयोक्तु-मिच्छति, तच्छब्दानुसारिप्रयत्नं कुरुते । येन क्रमेण वक्तुरिच्छानुवर्ती प्रयत्नः सञ्जायते, तेनैव क्रमेण स्थानेष्वभिहते वायावपि शब्दाकृतिकपरिणामः सञ्जायते । तदुक्तं **वाक्यपदीयस्य** ब्रह्मकाण्डे—"लब्धक्रियः प्रयत्नेन" इति । अत्र प्रक्रियायां वर्णाभिव्यक्तौ वायोरुपादानत्वं स्पष्टतया प्रतीयते ।

परन्त्वेषा सर्वा प्रक्रिया वैखर्यामेव शब्दस्येयत्तां जानतां स्थूलदृशां सरणिम-नुसरति । शब्दस्य सूक्ष्मातिसूक्ष्मस्वरूपं साक्षात्कुर्वतां मनीषिणां वर्णाभिव्यक्तेर्वि-लक्षणा प्रक्रिया दृश्यते । सूक्ष्मवाक्स्वरूपं ज्ञानमेव अकारादिध्वन्यात्मना आविर्भ-तीति तेषां राद्धान्तः । तदुक्तं **वाक्यपदीयस्य** ब्रह्मकाण्डे—

अथायमान्तरो ज्ञाता सूक्ष्मवागात्मना स्थितः ।
व्यक्तये स्वस्य रूपस्य शब्दत्वेन विवर्तते ॥ इति ॥

---

१. "ध्वनि का पुनरुत्पादन—ध्वनिके पुनरुत्पादन के लिये ऊर्जा कसी हुई कमानी से प्राप्त होती है । जिसके कारण रेकार्ड निश्चित रुप से घूमता हैं । नालियों में कटे वक्र रूप से सूई में कम्पन होता है । यह कम्पन तनुपट पर पहुच कर वायु में उसी प्रकार की तरंगें उत्पादित करता है और इस प्रकार ध्वनि पुनरुत्पादित होती है । —के० पी० घोष—"माध्यमिक भौतिक", भाग २, पृ० ६३ ।

2. An Instrument for recording and reproducing the Living voice.

3. Microphone.

"सूक्ष्मवागात्मना स्थितस्य ज्ञानस्य कथं कादिध्वन्यात्मनाऽभिव्यक्ति-र्निष्पद्यते ?"—इतीमं विषयं समवगन्तुं शरीराद् बहिर्देशे भौतिकवैज्ञानिकैः प्रतिपादितः प्रक्रियात्मको विद्युद्ध्वन्योः परस्परं परिवर्तनस्य विधिः समवगन्तव्यः । ततः सूक्ष्मवागात्मज्ञानस्य तेजसा पाके निष्पन्ने सति स्थूलध्वन्यात्मना निष्पत्तिः समवगन्तुं पार्यते । भौतिक[1]वैज्ञानिकैरकारादिध्वनावूर्जः स्वीक्रियते ।[2]

ऊर्जसो लक्षणम् - अभारवत्त्वं निर्गतकाठिन्यं, द्रव्यं स्थानान्तरितं रूपान्तरञ्च कर्तुं क्षमवत्त्वमिति । यथा सौरप्रकाशः विद्युद्, अग्निरिति । अस्मत्प्रकोष्ठे यः सौरादिप्रकाशस्तमोपनोदादिकार्येषु प्रयुज्यते तस्मिन् भारवत्त्वं काठिन्यञ्च नानुभूयेते, केवलं तापमात्रं, तण्डुलादिद्रव्येषु च विक्लित्यादिजनकत्वं प्रत्यक्षीक्रियते । न च ध्वनौ केवलमभारवत्त्वस्य निर्गतकाठिन्यस्य च प्रतीतेर्द्रव्यं स्थानान्तरितं रूपान्तरञ्च कर्तुं शक्तेरभावस्य च सत्त्वात् ध्वनावूर्जोलक्षणस्याव्याप्तिदोषापत्तिः । तेन ध्वने-रूर्जस्त्वं न सिद्ध्यतीति वाच्यम् ? विषापहरणादिषु शब्दशक्तेरनुभवात् "परा-श्रव्यध्वनेश्च" आधुनिकविज्ञानदृष्ट्याः पराया वाचस्तत्त्वम्" इत्यत्र रासायनिको-पयोगस्य यद् व्याख्यानम्, तेन ध्वनेरूर्जस्त्वं सिद्ध्यति । ऐन्द्रजालिको मारणमोह-नादिसामर्थ्यविशिष्टसावरादिमन्त्राणां वा प्रयोगकुशलो यं यथारूपं कर्तुं समीहते, तं तथा विदधाति । एवमग्नौ तमोपनोदादिसामर्थ्यवद् विषापहरणादिषु नियत-शक्तिकानां शब्दानां सामर्थ्यदर्शनाद् ध्वनेरूर्जस्त्वं समीचीनमेव ।

अकारादिध्वन्यूर्जसो विद्युद्रूपेण[3], ध्वनिधर्मसमाविष्टविद्युदूर्जसश्च ध्वनिरूपेण परिवर्तनं कर्तुं शक्यते । अयं विषयो ध्वनिविज्ञानादिग्रन्थेषु बहुशो

१, २—टेलीफोन—

इस यन्त्र को ग्रेहाम बेल (Graham ball) ने १८७६ में तैयार किया । इसमें एक स्थायी चुम्बक होता है जिसके ध्रुवों के पास इस्पात का पतला डायफ्राम रहता है । डायफ्राम का व्यास लगभग २ इञ्च और मोटाई–००६ और –०१२ इञ्च के बीच होती है । इसका मध्यभाग दोनों ध्रुवों को छाए हुए, पर उनसे इतना दूर रहता है कि खिंचकर या कम्पन में यह ध्रुवों से सट न जाय । डायफ्राम की ओर दृढ़ता से कसी रहती है । चुम्बक के ध्रुवों के छोरों पर कुण्डल (Coil) लिपटी रहती है । डायफ्राम में तनाव रहता है और सामान्य स्थिति में चुम्बक की ओर थोड़ा खिंचा रहता है । चुम्बकीय क्षेत्र में होने से डायफ्राम होकर चुम्बकीय फ्लक्स निकलता है । फ्लक्स का धन बी हो तो डायफ्राम पर लगने वाला बल बी का अनुपाती होता है ।

३. "डायफ्राम जब ध्रुवों के पास जाता है या उनसे दूर हटता है तो फ्लक्स भी बढ़ता घटता है । फ्लक्स के परिवर्तन के अनुरूप ही ध्रुवों पर लिपटी हुई कुण्डली की विद्युद्धारा में परिवर्तन होता है । इसी लिये जब डायफ्राम ध्वनि पड़ने से वह कम्पन करता है तो उसी के अनुरूप कुण्डली की धारा में दोलन होता है । इस रीति से

व्याख्यातः। यथारीत्या देहाद् बहिर्देशे ध्वनिं विद्युति परिवर्त्य देशान्तरेषु प्रेष्यते। ध्वनिधर्मसमाविष्टा विद्युच्च देशान्तरेषु यदा ध्वनिग्राहकयन्त्रैर्गृह्यते, तदा तस्यास्तत्र ध्वनिरूपेण परिवर्तनं सञ्जायते। एवं देहान्तरालेऽपि हृदिस्थितं सूक्ष्मवागात्मकं ज्ञानं विद्युति परिवर्त्य तद्रूपेण कण्ठादिस्थानेषु प्रेष्यते। कण्ठादिस्थानेषु सूक्ष्मवाग्धर्मसंश्लिष्टाया विद्युतश्च कादिध्वनिरूपेण परिणामः निष्पद्यते। ततः श्रूयते—'क' इति, 'ख' इति।

तथा चोक्तं **वाक्यपदीयस्य** ब्रह्मकाण्डे—

स मनोभावमापद्य तेजसा पाकमागतः।
वायुमाविशति प्राणमथासौ समुदीर्यते ॥ ११३ ॥
अन्तःकरणतत्त्वस्य वायुराश्रयतां गतः।
तद्धर्मेण समाविष्टस्तेजसैव विवर्तते ॥ ११४ ॥ इति।

अत्र 'तेजः' पदेन कायाग्नेर्ग्रहणं कर्तव्यम्। कायाग्निमेवात्र विद्युत्स्थानापन्नं विजानीयात्। यतो हि प्रकाशविद्युद्दावाग्नीत्यादयः सर्वेऽग्नेरेव भेदाः, न तु तद्भिन्नाः। "ज्ञानस्य एव शब्दरूपेणाभिव्यक्तिः" इत्येवं शाब्दिका मन्यन्ते। ज्ञानमप्येका ऊर्जःशक्तिर्विद्यते। सूक्ष्मशब्दस्वरूपेण स्थितं घटपटादिविषयकं ज्ञानं "कम्बुग्रीवादिमद्रूपार्थे घटशब्दः प्रयोक्तव्यः, पटशब्दश्च न प्रयोक्तव्यः" इत्येवं सङ्कल्पात्मकमनसा सह संयोगे सति तद्रूपेण परिणमते। "स मनोभावमापद्य" इत्यस्येदमेव तात्पर्यं विद्यते। ज्ञानञ्च सूक्ष्मवाक्स्वरूपमेवेति सूक्ष्मवाग्ज्ञानयोर्नास्ति भेदः। तथा चोक्तं **वाक्यपदीयस्य** ब्रह्मकाण्डे—

अथायमान्तरो ज्ञाता सूक्ष्मवागात्मना स्थितः ॥ इति ॥

सूक्ष्मशब्दस्वरूपस्य घटपटादिविषयकज्ञाननिष्ठोर्जसो मनोरूपेण परिवर्तने जाते सति मनोऽपि सूक्ष्मशब्दनिष्ठधर्मेण समाविष्टं जायते। सूक्ष्मशब्दनिष्ठधर्मसमाविष्टस्य मनसश्च कायाग्निना यदा सम्बन्धः सञ्जायते, तदा कायाग्नौ कम्पनं प्रादुर्भवति। यथा बहिःप्रदेशे दूरध्वनिप्रेषकयन्त्रे[1] इस्पातनिर्मितेऽतीव सूक्ष्मे तन्तौ यदा ध्वनिः समापतति, तदाऽतिशयकम्पनशीलं[2] नामकं तत्त्वं पुनः पुनः सङ्कुचति विकसति च। अतिशयकम्पनशीलनामकतत्त्वस्य सङ्कोचविकासौ ध्वन्यनुरूपावेव भवतः। येन क्रमेण ध्वनिनाऽतिशयकम्पनशीलनामकं तत्त्वं परिकम्पते,

ध्वनि की ऊर्जा विद्युत की ऊर्जा में बदलती है। इसके विपरीत, माइक्रोफोन के साथ जुटे हुए टेलीफोन की कुण्डली में धारा का दोलन हो तो उसी के अनुरूप डायफ्राम में कम्पन होता है जिससे ध्वनि उत्पन्न होती है"।

—श्री ललितकिशोरसिंह, एम० एस० सी०, "ध्वनि विज्ञान", पृ० २३५–२३६।

1. Telephone.
2. Flux.

तेनैव क्रमेण कुण्डलीनिष्ठविद्युद्धारायां परिकम्पनं जायते। तेन ध्वनिनिष्ठोर्जसो विद्युदूर्जोरूपेण परिवर्तनं निष्पद्यते। एवं रीत्याऽन्तःकरणेऽपि विवक्षया सूक्ष्मशब्दसमाविष्टं सङ्कल्पविकल्पात्मकं मनस्तत्त्वं येन क्रमेण जठराग्निमभिहन्ति, तेनैव क्रमेण जठरनिष्ठे विद्युति परिकम्पनं समुत्पद्यते। तेन सूक्ष्मध्वन्यूर्जसो विद्युदूर्जोरूपेण परिवर्तनं जायते। "स मनोभावमापद्य तेजसा पाकमागतः" इति भर्तृहर्युक्तेरिदमेव उपर्युक्तं तात्पर्यं विद्यते। अन्तःकरणनिष्ठध्वनिधर्मसमाविष्टविद्युतस्तु कण्ठताल्वादिस्थानेषु अकारादिध्वनिरूपेण परिवर्तन सञ्जायते।

सूक्ष्मवाग्धर्मसमाविष्टमनसा जठराग्नौ कम्पने जाते सति सूक्ष्मवाचस्तेजोरूपेण यदा परिवर्तनं जायते, तदा तैजसः शब्दः प्राणवायुमाध्यमेन ऊर्ध्वं समुत्तिष्ठति। अन्तःकरणनिष्ठसूक्ष्मध्वन्यनुरूपपरिकम्पितं तेजश्च वायुस्तद्धर्मेण (मनोधर्मेण दाहधर्मेण च) समाविष्टः सन् ध्वनिग्राहक[1]यन्त्रस्थानापन्नम् अनुनादक[2]यन्त्रस्थानापन्नञ्च, कण्ठताल्वादिस्थानं प्रापयति। "वायुमाविशति प्राणमथासौ समुदीयते" इत्यस्य चेदमेव उपर्युक्तं तात्पर्यं वेदितव्यम्। कण्ठताल्वादिस्थानानि च वायुमाध्यमेन समागतं सूक्ष्मवाग्धर्मसमाविष्टेन मनसा क्रमशः प्रकम्पितं तेजस्तरङ्गमकारादिध्वनिरूपेण परिणमन्ते। यद्वा—

अन्तःकरणतत्त्वस्य वायुराश्रयतां गतः।
तद्धर्मेण समाविष्टस्तेजसैव विवर्तते ॥

इति भर्तृहर्युक्त्यनुसारेण अन्तःकरणतत्त्वस्याश्रयतां गतस्तद्धर्मेण सूक्ष्मवाक्संविष्टमनोधर्मेण दाहधर्मेण च समाविष्टो वायुरेव ऊर्ध्वं कण्ठताल्वादिस्थानं गच्छति। कण्ठताल्वादिस्थानेष्वपि च विद्युद् विद्यते। तत्तद्वर्णाभिव्यक्तिजनककण्ठादिस्थानानि च स्वनिष्ठतेजसः साहाय्येन (विद्युद्द्वारा वा) अन्तःकरणात् समागतं दाहादिधर्मेण समाविष्टं वायुमकारादिध्वनिरूपेण परिणमन्ते। "अन्तःकरणतत्त्वस्य" इत्यस्याः कारिकायाः "विभज्य स्वात्मनो ग्रन्थीन् श्रुतिरूपैः पृथग्विधैः" (११५) इत्यस्याश्च कारिकाया इदमेव तात्पर्यं विद्यते। यथा "देहाद् बहिःप्रदेशे ध्वनिग्राहकयन्त्रध्वनिप्रेषकयन्त्रेण प्रेषितं विद्युत्तरङ्गं प्रगृह्य स्वनिष्ठविद्युच्छक्तिसाहाय्येनैव तत्तरङ्गं ध्वनिरूपेण परिणमते। एवमन्तःकरणात् प्रेषितो दाहधर्मेण सवृत्तिकमनोधर्मेण समाविष्टो वायुतरङ्गः कण्ठताल्वादिनिष्ठतेजःसाहाय्येन ध्वनिरूपेण परिणामं लभते। ततः श्रूयते—क इति, ख इति च। अन्तःकरणनिष्ठसूक्ष्मवागात्मज्ञानसमाविष्ट-मनोऽनुसारिप्रकम्पितं तेजः, तत्प्रकम्पितो वायुर्वा ध्वन्यभिलेखनयन्त्रेष्विव मुखे तत्तद्ध्वनिरूपं संलभते। यथा अस्माकं मुखात् समुद्गीर्णा वाक् ध्वन्युत्तेजकयन्त्राभिव्यक्तध्वन्यपेक्षया सूक्ष्मा, तथैवान्तःकरणनिष्ठा वाक् कण्ठताल्वाद्यभिव्यक्तध्वन्यपेक्षया सूक्ष्मा, अनुनादकयन्त्ररूपेषु कण्ठ-

1. Receiving Instrument of the Sound.
2. Loudspeaker.

तालवादिषु तदपेक्षा बहुगुणिता सञ्जायते। अन्तःकरणे सूक्ष्मवाचो विद्युद्रूपेण सूक्ष्मवाग्धर्मसमाविष्टविद्युतश्च कण्ठादिस्थानेषु ध्वनिरूपेण अभिव्यक्तिः सञ्जायते।

यद्वा, यथाऽग्निना जलं वाष्परूपेण परिणामं लभते, वाष्पद्वारा च विष्टन-नामकं यन्त्रं गतिमत् सञ्जायते। वाष्पस्य विष्टनयन्त्रेण संयोगे जाते सति स यान्त्रिकोर्जोरूपेण विपरिणमते। यान्त्रिकोर्जसश्च विद्युदुत्पादके यन्त्रे[1] विद्युद्-ऊर्जोरूपेण, काचनिर्मितकुप्पिकायां[2] विद्युदूर्जयाश्च[3] केनचित् पदार्थेन संयोगे जाते सति प्रकाशनामकोर्जोरूपेण परिणामः सञ्जायते। अयं विषयो डोलाण्डवार-कृते "परमाणुशक्तिः" इत्यभिधेये ग्रन्थे बहुशः प्रतिपादितः। एवं सूक्ष्मवागात्मज्ञान-निष्ठोर्जसो मनसा सह संयोगे सति तस्या मनोरूपेण, मानसशक्तेश्च तेजसा सह संयोगे सति तस्याः कायाग्निरूपेण, कायाग्नेश्च प्राणवायुना सह संयोगे वायु-निष्ठोर्जोरूपेण परिवर्तनं क्रमशः सञ्जायते। सूक्ष्मवाक्संश्लिष्टमनोधर्मेण दाह-धर्मेण च समाविष्टो वायुर्यदा कण्ठताल्वादिस्थानं लभते, तदा तत्र कण्ठताल्वा-दिनिष्ठोर्जःसहकारेण तस्य वायोः ध्वन्यूर्जोरूपेण परिणामः सञ्जायते। ततः श्रूयते—अ इति, आ इति च। यथा जलस्य क्रमशः स्वविजातीयविद्युदूर्जोरूपेण परिवर्तनम्, एवं वायोरपि कण्ठताल्वादिरूपयन्त्रे स्वविजातीयध्वनिरूपेण परि-णामो निष्पद्यते।

रसायनशास्त्रदृष्ट्या भौतिकविज्ञानदृष्ट्या च वर्णाभिव्यक्तिप्रतिपादि-कायाः "स मनोभावमापद्य" इत्यस्याः, "अन्तःकरणतत्त्वस्य" इत्यस्याश्च कारिकाया इत्थमेव व्याख्यानं कर्तुं शक्यते। इत्थमेव च आस्याद् वर्णा अभिव्यज्यन्ते।

वस्तुतस्तु अयं श्रोत्रग्राह्योऽकारादिशब्दो न वायोः परिणामः, न वा तैजसो-र्जसः परिणामः। किन्तु शब्दस्य प्राणे बुद्धौ च या अतीव सूक्ष्मा शक्तिर्विद्यते, सा एव वक्तुर्विवक्षया कण्ठताल्वादिरूपानुनादकयन्त्रे स्वपरश्रोत्रग्राह्यस्थूलध्वन्यात्मना कादिभेदं प्रपद्यते। तदुक्तं **वाक्यपदीयस्य** ब्रह्मकाण्डे—

> तस्य प्राणे च या शक्तिर्या च बुद्धौ व्यवस्थिता।
> विवर्तमाना स्थानेषु सैषा भेदं प्रपद्यते॥ ११३॥ इति।

अन्तःकरणनिष्ठा भाषणशक्तिः सा एव बहिर्वाग्जालरूपेण विवर्तमाना विशेषरूपेण ध्वन्यात्मना वर्तमाना श्रोतृभिः वक्तृभिश्च श्रूयते, उच्चार्यते च। प्राणिनामन्तःकरणे भाषणस्येयम् ईशप्रदत्ता शक्तिः सृष्टेः प्रारम्भकालत एव विद्यते।

---

१. डाइनामा।
२. वल्व।
३. भौतिकैः "ऊर्जा" इत्यकारान्तः स्त्रीलिङ्गः शब्दः प्रयुज्यते, तदनुसारं षष्ठीविभक्त्येक-वचने "ऊर्जायाः" इत्युक्तम्।

किञ्च, येऽपुनर्जन्मवादिनो यद्वा विकासवादिनः, ये च पुनर्जन्मनि विश्वासं भजमाना भाषावैज्ञानिकाः, एते सर्वे "मनुष्यः प्रारम्भकालत एव 'आह पूह' इत्यादिवत् किञ्चिद् भाषमाण आसीत्। तत एव च भाषाया विकासः, न तु सर्वथा मूकावस्थायाम्" इत्येवं मन्यन्ते। शब्दस्य प्राणस्थायां बुद्धिस्थायाश्च बहिर्भवन-रूपाया नादात्मिकायाः शक्तेरस्वीकारे तन्न संघटते; तदभावे 'आह पूह' इत्यादि-शब्दानामभिव्यक्तेरसम्भवात्। सृष्टौ यदाऽन्येषामङ्गानां रचना जाता, तदा कण्ठस्थस्वरतन्तूनामपि निर्माणं बभूव। न तु पूर्वं मनुष्यः कण्ठस्थस्वरतन्तुविहीन आसीत्, सृष्टेः सहस्राब्देषु व्यतीतेषु तस्य निर्माणं जातमित्येवं वक्तुं पार्यते, न वा कोऽप्याधुनिक ऐतिहासिक एवं क्वचिदुक्तवान्। अतः कण्ठस्थस्वरतन्तूनां सार्थक्याय "शब्दस्य प्राणस्था बुद्धिस्था च या अतीव सूक्ष्मा अक्रमिकरूपा नादात्मिका आवि-र्भाव-तिरोभावरूपा शक्तिर्विद्यते, तस्या अनादिकालत एव अव्यवच्छिन्नरूपेण सत्ता स्वीकर्तव्या। आस्यानि कण्ठताल्वादिस्थानानि मूषासदृशानि विद्यन्ते। यथाऽग्निना द्रवीभूतं ताम्रं मूषायां सिक्तं सत् कम्बुग्रीवादिमद्घटादिरूपेण विवर्तं लभते। मूषायां यदि मनुष्यस्य मूर्तिर्निमिता स्यात्, तर्हि मनुष्याकारेण परिणतिं लभते। अग्निना द्रवीभूतं मूषासिक्तं यदा ताम्रं काठिन्यदशां लभते, तदा तत्तद्घटाद्या-कृतिं न मुञ्चति। एवं शिक्षकेण "ककारमुच्चारय, खकारं पठ" इत्येवं प्रशिक्ष्यमाणः शिशुः शिक्षितं वर्णमुच्चारयितुं कण्ठताल्वादिस्थानं जिह्वया यदा स्पृशति, तदा शब्दस्य प्राणस्था शक्तिः मूषास्थानापन्नकण्ठताल्वादिस्थानं प्राणवायुमाध्यमेन लभते। तत्र "क, ख" इत्यादिवर्णरूपेण परिवर्तते। यथा वा आकृति-विशेषरहितात् स्वर्णपिण्डात् गुरुणा शिक्षितः स्वर्णकारः (पश्यतोहरः) नानारूपाणि कटककुण्डलानि निर्मिमीते। एवं केनचित् शिक्षितो बालोऽकारादि-वर्णमुच्चारयितुं यदा यतते, तदा शब्दस्याविर्भाव-तिरोभावरूपा शक्तिः कण्ठ-ताल्वादिस्थानेषु स्वरव्यञ्जनरूपेण अभिव्यक्तिं लभते। अत एव भर्तृहरिणा **वाक्यपदीयस्य** ब्रह्मकाण्डे—

> आण्डभावमिवापन्नो यः क्रतुः शब्दसंज्ञकः।
> वृत्तिस्तस्य क्रियारूपा भागशो भजते क्रमम्॥ ५१॥

इत्यस्यां कारिकायां "भागशो भजते क्रमम्" इत्युक्तम्। यथा अण्डे भव आण्डो रसो मयूरपक्षादिरूपेण परिणामं लभते; एवं शब्दस्य क्रियारूपा आविर्भाव-तिरोभावरूपा वृत्तिः शक्तिः कादिवर्णरूपेण क्रमं भजते। अतएव श्रीमद्**भागवतस्य** द्वादशस्कन्धे षष्ठाध्याये—

> ततोऽभूत्त्रिवृदोङ्कारो योऽव्यक्तप्रभवः स्वराट्॥
> ... ...
> ततोऽक्षरसमाम्नायमसृजद् भगवानजः।
> अन्तःस्थोष्मस्वरस्पर्श-दीर्घह्रस्वादिलक्षणम्॥ ४३॥

इत्यत्र "ततोऽभूत्", "ततोऽक्षरसमाम्नायमसृजद्" इत्येवमुक्तम् । यथा मृत्पिण्डाद् घटादिकं निर्मीयते, एवमुपादानभूतादाविर्भावतिरोभावरूपशक्तिमतो हृद्याकाशाद् अभिव्यक्तनादात् त्रिवृदोङ्कारस्य तस्माच्च वर्णसमाम्नायस्य सृष्टिं चकार । अनेन सर्वोऽपि विवर्तवादः परिणामवादः, सत्कार्यवादो वा रुचिवैचित्र्यात् स्वीक्रियतां नाम, सर्वेषामेकत्रैव तात्पर्यम्, । यथा सुवर्णनिर्मितं कटकुण्डलादिकमग्निना द्रवीभूतं सत् काठिन्यदशाञ्च प्राप्य पुनः पिण्डरूपं लभते, तत्पिण्डञ्च पुनर्विद्राव्य कुण्डलादिरूपेण परिवर्तितं क्रियते; एवं वृद्धजन-समुच्चरितः "घटः पटः" इत्येवं क्रमरूपेण समुच्चारयति । तदुक्तं **वाक्यपदीयस्य** ब्रह्मकाण्डे—

यथैकबुद्धिविषया मूर्तिराक्रियते पटे ।
मूर्त्यन्तरस्य त्रितयमेवं शब्देऽपि दृश्यते ॥ ५२ ॥ इति ।

अत्र सक्रमः शब्द एव श्रोतुर्बुद्धिदेशं गत्वाऽक्रमरूपं दधाति । स एव अक्रमः शब्दः पुनः सक्रमरूपेण बहिः प्रस्फुटति । अत्राऽपि पक्षे बाह्यस्फोट एव बुद्धिदेशं गत्वाऽर्थमवबोधयतीत्यस्य दाढर्चं जायते । न च प्राणस्थाया बुद्धिस्थायाश्च शब्दशक्तेः, यद्वा परादिनामभिः प्रसिद्धाया वाचोऽकारादिवर्णरूपेण परिणतिस्वीकारे तस्या वृद्धिह्रासापत्तिरिति वाच्यम्; लौकिकोपादानेभ्यस्तस्या विलक्षणरूपत्वात् । यद्वा शब्दस्य प्राणस्था शक्तिः प्रदीपज्योतिर्वद् विद्यते । यथा एकस्मात् प्रदीपाद् सहस्रदीपेषु प्रज्वलितेष्वपि तस्य प्रदीपस्य प्रकाशे न्यूनता न समापतति, तथैवात्रापि वेदितव्यम् ।

कार्यकारणयोर्भेदवादिनः केचिदाचार्या उपादानभूतकादिभेदशून्यनादात्मकशब्द-कार्यभूतकादिभेदविशिष्टशब्दयोः स्वतो भेदं स्वभावान्यत्वम्, केचित्तु बुद्धिभेदादभेदस्य भेदं मन्यन्ते, न तु वास्तविकरूपेण । तथा चोक्तं **वाक्यपदीयस्य** ब्रह्मकाण्डे—

आत्मभेदस्तयोः केचिदस्तीत्याहुः पुराणगाः ।
बुद्धिभेदादभेदस्य भेदमेके प्रचक्षते ॥ ४५ ॥ इति ॥

युक्तञ्चैतत् । तथा कपालेन जलाहरणरूपकार्यस्यासम्भवः, घटेन तस्य सम्भवश्चेति तयोर्भेदत्वम्, मृद्घटसामानाधिकरण्येन प्रतीतिरिति तयोरभेदत्वं च सिद्धचतः । एवं स्वरव्यञ्जनभेदेन भेदं प्राप्ता या वैखरी, कादिभेदशून्यो यश्च मध्यमानादस्तयोः स्वतः स्वरूपभेदत्वम्, उभयोर्ध्वन्यात्मकत्वाच्च स्वरूपैक्यं प्रतीयेते । उपादानभूताया मध्यमाया वाचो यद्वा पश्यन्त्याः पराया वाचो ध्वन्यात्मकता—

समाहितात्मनो ब्रह्मन् ब्रह्मणः परमेष्ठिनः ।
हृद्याकाशादभून्नादः ... ... ।
बिन्दोस्तस्माद् भिद्यमानाद्रवो व्यक्तात्मकोऽभवत् ॥
(प्रपञ्च० प्रथमप० श्लो० ४३)

इति श्रीमद्भागवतात् प्रपञ्चसारतन्त्राच्च ज्ञायते । नादध्वनिशब्दानां परस्परं पर्यायवाचित्वं विद्यते । तदुक्तममरकोषस्य शब्दादिवर्गे—

शब्दे निनादनिनदध्वनिध्वानरवस्वनाः ।
स्वाननिर्घोषनिर्ह्रादनादनिस्वाननिस्वनाः ॥ २३ ॥ इति ॥

किञ्च, तस्या निर्विकल्पज्ञानात्मकताऽपि तान्त्रिकैः स्वीक्रियते । अयं विषयः प्रथमपरिच्छदे "पराया वाचः स्वरूपम्" इत्यत्र शब्दस्वरूपप्रकरणे प्रतिपादितः । यथा जीवेश्वरयोरल्पज्ञत्वसर्वज्ञत्वधर्मयोः अल्पत्वसर्वत्वांशौ विहाय केवलज्ञानमात्रमादाय स्वरूपैक्यम्, ते समादाय च स्वरूपभेदः, एवं लोके घटपटाद्यर्थावबोधिकाया वैखर्या वाचः सविकल्पज्ञानत्वस्य, पराया वाचश्च निर्विकल्पज्ञानत्वस्य च सविकल्पकत्वं निर्विकल्पकत्वञ्च विहाय स्वरूपैक्यम्, ते समादाय च स्वरूपभेदः । एवं कार्यकारणयोर्भेदाभेदत्वं निष्पन्नम् ।

उपादानभूतो नादात्मकः पराख्यः शब्दो वक्तुर्विवक्षया संस्कृतेन प्राणवायुना नाभ्यादिस्थानमतिक्रम्य कण्ठताल्वादिस्थानेषु स्वरव्यञ्जनरूपेण कथमभिव्यज्यते ? इति "शब्दस्वरूपम्" इत्यत्र पूर्वं निरूपितम् । "शब्दस्य प्राणस्था बुद्धिस्था च नादात्मिका शक्तिरेव परिणामं लभते" इत्यत्र काचिद् अपराऽपि प्रक्रिया विद्यते, यस्याः पराख्यशब्दस्य स्वरव्यञ्जनात्मना परिणतेः प्रक्रियया सामञ्जस्यम्, ज्ञानस्य शब्दत्वापत्तेः, यद्वा, वायोः शब्दत्वापत्तेः प्रक्रियया सह भेदश्च दृष्टिपथं समायाति । अस्यां प्रक्रियायां मनःप्रेरितकायाग्निनिष्ठदाहधर्मसमाविष्टो वायुः सूक्ष्ममक्रमं शब्दं कण्ठादिस्थानं प्रापयितुं माध्यमं (साधनं) यद्वा निमित्तं कारणं विद्यते; यतो हि शब्दस्य बहिर्भवनरूपा शक्तिः प्राणेष्वेव तिष्ठति । सा च प्रक्रिया प्रोक्ता भगवता पाणिनिना—

आत्मा बुद्धया समेत्यार्थान् मनो युंक्ते विवक्षया ।
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् ॥

मारुतस्तूरसि चरन् मन्द्रं जनयति स्वरम् ।
प्रातःसवनयोगं तं छन्दो गायत्रमाश्रितम् ॥

कण्ठे माध्यन्दिनयुगं मध्यमं त्रैष्टुभानुगम् ।
तारं तार्तीयसवनं शीर्षण्यं जागतानुगम् ॥

सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य मारुतः ।
वर्णाञ्जनयते तेषां विभागः पञ्चधा स्मृतः ॥
(पा० शि०, श्लो० ६-९)

'आत्मा' पदेनात्र अन्तःकरणस्थितो जीवात्मा गृह्यते । केचित्तु सांख्यमतमवलम्ब्य चेतनस्य निर्विकल्पकत्वेन कर्तृत्वासम्भवात् चित्सान्निध्यात् समुपलब्धचेतनशक्तिविशिष्टमन्तःकरणम् आत्मपदस्य वाच्यार्थं गृह्णन्ति । तत्तु "आत्मा बुद्धया" इत्यत्र बुद्धिपदेन "मनो युंक्ते" इत्यत्र च मनःपदेन अन्तःकरणरूपार्थस्यो-

क्तत्वादात्मपदेन पुनस्तस्यैवार्थस्य ग्रहणे पुनरुक्तःवापत्तेर्न समीचीनम् । अत आत्मपदेन जीवात्मन एवात्र शिक्षायां ग्रहणं सम्मतम् ।

किञ्च, जीवात्मनः कर्तृत्वं भोक्तृत्वञ्च उक्तं न्यायादिशास्त्रे । विषमीकारास्तु —"आत्मा अन्तःकरणमित्यपव्याख्यानम्; आत्मापदस्य जीवपरत्वे बाधकाभावात्" इत्याहुः । आत्मा = जीवात्मा बुद्ध्या अर्थान् समेत्य "अयमर्थो वक्तव्यः अस्यार्थस्य अयं शब्दो वाचकः, अयमर्थश्च न वक्तव्यः" इति निश्चयात्मिकया अन्तकरणवृत्त्या पदार्थान् सङ्कलय्य विवक्षया मनो युंक्ते = वक्तुमिच्छया सह मनो युक्तं विदधाति । मनः कायाग्निमाहन्ति = विवक्षया संयुक्तं मनश्च कायाग्नौ समाघातं कुरुते । अभिघाते कृते च कायाग्निः प्रदीप्तः सञ्जायते । कायाग्नौ प्रदीप्ते सति प्राणवायुरपि दाहधर्मेण समाविष्टत्वात् सन्तप्तः सन् उर्ध्वङ्गमनरूपक्रियावान् सञ्जायते । "स प्रेरयति मारुतम्" इति पाणिन्युक्तेरिदमेव तात्पर्यं विद्यते ।

किञ्च, क्रियोत्पादकता शक्तिरग्नावेव विद्यते । चुल्ह्युपरिसंस्थिते पात्रे पूरितं जलमग्निसंयोगेन सन्तप्तः सन् क्रियाशीलत्वं भजते । एवमन्तःकरणेऽपि अग्निसंयोगेन सन्तप्तः सन् प्राणवायुरपि ऊर्ध्वारोहणरूपक्रियां लभते । ऊर्ध्वं गत्वा मूर्ध्न्यभिहतः सन् वक्त्रमापद्य वर्णान् जनयते, प्रादुर्भावयतीत्यर्थः । "वर्णान् जनयते" इति **पाणिनिशिक्षायां** "जनयते" इत्यत्र प्रयोजकव्यापारार्थं "हेतुमति च" (३।१।२६) इति प्रादुर्भावार्थकजनीधातोर्णिच्प्रत्ययो न तु स्वार्थे; चुरादिगणे तस्य पाठाभावात् । किञ्च, चुरादेराकृतिगणत्वस्वीकारेऽपि स्वार्थे णिच्प्रत्यये सति "वर्णा जनयन्ते" इत्येव प्रयोगः समीचीनः; जनीधातोरकर्मकत्वात् । 'देवदत्तो यज्ञदत्तं ग्रामं गमयति' इत्यत्र देवदत्तस्य प्रेरणया यज्ञदत्तो ग्रामं गच्छति, न तु देवदत्त एव ग्रामं गच्छति; तथैव "सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य मारुतः । वर्णान् जनयते" इत्यत्र वायुः प्रेरयति वर्णाश्च जायन्ते, प्रादुर्भवन्तीति । वायुप्रेरणया वर्णाः प्रादुर्भवन्ति, न तु वायुरेव वर्णरूपेण जायते । वर्णाभिव्यक्तौ वायुर्माध्यमं निमित्तञ्च कारणं विद्यते, न तूपादानम् । यथा वायुर्गन्धं देशाद् देशान्तरं प्रवहति, तथैव सूक्ष्मं शब्दं हृद्देशाद् वक्त्रं प्रापयति ।

परन्तु अन्तःकरणे वायुमाध्यमेन शब्दः कण्ठताल्वादिस्थानं यथा रीत्या प्राप्नोति, आस्यान्निर्गतश्च स शब्दो यथारीत्या श्रोतृकर्णपर्यन्तं गच्छति, तयोः प्रक्रिययोर्भेदो विद्यते । भौतिकशास्त्रिणां मतानुसारं ध्वनिमाध्यमं स्थानान्तरितं न जायते । प्रत्युत ध्वनिसञ्चारस्य माध्यमीभूतस्य प्रत्येकं कणाः स्वस्थाने यद्वा स्वकेन्द्रस्थानमभितः कम्पिता भवन्ति । ध्वनिरेव च वायोः प्रत्येकं कणं कम्पयन् श्रोतुः कर्णप्रदेशं गच्छति । परन्त्वन्तःकरणे तु मनोऽभिहतकायाग्निसन्तप्तोर्ध्वारोहणशीलो वायुरेव सूक्ष्मं शब्दमादाय वक्त्रं प्रापयतीति तयोरन्तरं बोद्धव्यम् । अत एव पाणिनिना —"स उदीर्णः, वक्त्रमापद्य मारुतः" इत्युक्तम् । क्वचित्तु ध्वनिमाध्यमस्य सञ्चरणमपि स्वीक्रियते । अतस्तेन सहास्याः कारिकायाः साम्यं स्वीकार्यम् ।

स च सूक्ष्मः शब्दः वक्तुर्विवक्षया वायुमाध्यमेन आस्यं प्राप्य तत्तत्स्थानकरणव्यापाराभ्यां वर्णात्मनाऽभिव्यज्यते । **वाक्यपदीयस्य** ब्रह्मकाण्डे—

कारणेभ्यो विवृत्तेन ध्वनिना सोऽनुगृह्यते । इति ॥

अत्र "कारणेभ्य" इत्युक्तम् । बाह्यस्फोटस्य वाचकत्ववादिनां मतानुसारेण "स्थानकरणप्रयत्नादिनिमित्तकारणेभ्योऽन्तःसूक्ष्मध्वन्यपेक्षया विवृत्तेन विशेषरूपेण वर्तमानेन घटादिशब्दघटकघकारादिध्वनिरूपेण बहिर्देशे स शब्दोऽनुगृह्यते, श्रोत्रेन्द्रियेण गृह्यते" इत्यर्थः । अत्र कारिकायां स्पष्टतया "कारणेभ्यो विवृत्तेन" इत्युक्त्या वर्णाभिव्यक्तौ ताल्वादिस्थानजिह्वादिकरणस्पृष्टादिप्रयत्नानां च विचारः आनुषङ्गिकः प्रतिभाति ।

आभ्यन्तरस्फोटस्य वाचकत्वस्वीकर्तॄणां मतानुसारेऽपि "कण्ठताल्वादिव्यापारेण स्थूलेन नादात्मना प्राप्तविवर्तेन कत्वादिध्वनिना स शब्दः स्फोटः अनुगृह्यते = अभिव्यज्यते" इत्येवं पूर्वोक्तकारिकायाः व्याख्यास्वीकारेऽपि कण्ठादिस्थानानां विचारः परमावश्यकतां भजते ।

किञ्च, ये शब्दं वायोः परिणामं स्वीकुर्वन्ति, ये च शब्दं परमाणूनां प्रचयरूपं मन्यन्ते, ये च ज्ञानस्य शब्दत्वापत्तिं व्याचक्षते, तेषां समेषां मतानुसारेणापि कण्ठादिस्थानेभ्य एव वर्णाभिव्यक्तेः सत्त्वात् तेषां पर्यालोचनं प्रतिपाद्यविषयाविरुद्धमेव प्रतिभाति ।

अत्र पर्यन्तं भौतिकविज्ञानं **वाक्यपदीयञ्च** समाश्रयन् आस्याद् बहिः हृदयप्रदेशाद्, यद्वा मूलाधाराद् आस्यपर्यन्तं या प्रकिया वर्णाभिव्यक्तौ जायते सा प्रतिपादिता । अतः परं भाषाविज्ञानम्, क्वचिच्च भौतिकमपि शास्त्रं तथा प्राचीनाः पाणिनीयादिशिक्षाः प्रातिशाख्यानि च समाश्रयन् आस्यान्तर्गतानां कण्ठताल्वादिस्थानानां जिह्वादिकरणानाञ्च स्वरूपम्, अकारादिवर्णोच्चारणे च तेषामवस्थाविशेषम्, आस्याद् बहिर्भूते काकलकस्याधस्तात् कण्ठदेशे गलविवरस्य या परिस्थितिर्जायते, तत्सर्वं प्रतिपादयितुं प्रयत्यते । अग्रे "वायुप्रतिघातानुसारेण वर्णस्थानस्वीकारे पाणिनिसम्मतिः" इत्येतादृशं वाक्यं बहुत्र प्रयोक्ष्यते । ये शब्दस्य प्राणस्थायाः शक्तेः तत्तत्स्थानेषु स्वरव्यञ्जनात्मना विवर्तनं मन्यन्ते, तेषां मतानुसारेण "वायुप्रतिघातानुसारेण" इत्यस्य "शब्दं हृदयदेशात् कण्ठदेशं प्रापयितुं माध्यमीभूतस्य वायोः संयोगानुसारेण" इति तात्पर्यमवगन्तव्यम् ।

वस्तुतस्तु सर्वे स्वरव्यञ्जनात्मकाः शब्दाः स्वमूलभूतायां परायां वाचि सूक्ष्मरूपेण तिलेषु तैलवद् विद्यमानास्तेषां ध्वनिरपि तत्र परास्वरूपेऽतीव सूक्ष्मः श्रोत्रेन्द्रियातीतश्च । परायां वाचि स्थितानामकारादिवर्णानां सूक्ष्मध्वनिर्येन क्रमेण आत्मसंयोजितमनसां प्रकम्पितेन कायाग्निना प्रेरितो वायुः नाभिहृदयादिस्थानं प्रापयति, तेन क्रमेण पूर्वस्मादुत्तरोत्तरमकारादिवर्णानां ध्वनिरपि (वैकृतध्वनिरपि) सम्वर्धते । कण्ठादिस्थानादभिव्यज्यमानश्च उच्चैः श्रूयते, **उच्चार्यते** च ।

अत्रैव सत्कार्यवादस्य सिद्धान्तो दृढीभवति। अकारादयो वर्णाः स्वाभिव्यक्तेः पूर्वमेव स्वमूलस्वरूपे विद्यमाना एव वैखर्यात्मनोच्चार्यन्ते, श्रूयन्ते च, न तु परायां वाचि अविद्यमानं किमपि तत्त्वम्, न वा परा वागेव अकाराद्यात्मना परिणतिं विवर्तं वा लभते। सत्कार्यवादस्य सिद्धान्तं **वाक्यपदीय**कारा अपि स्वीकुर्वन्ति। तद्यथा — वाक्यपदीयस्य ब्रह्मकाण्डे—

अरणिस्थं यथा ज्योतिः प्रकाशान्तरकारणम्।
तद्वच्छब्दोऽपि बुद्धिस्थः श्रुतीनां कारणं पृथक्॥ ४६॥

येन क्रमेणाकारादयो वर्णाः स्वमूलतः कण्ठताल्वादिस्थानेनाभिव्यज्यन्ते, तद्व्यत्यस्तक्रमेण ते स्वमूलभूतस्वस्वरूपे लीनाः सूक्ष्मस्वरूपेण स्थिता भवन्ति। तद्यथा—परा पश्यन्त्यात्मना, पश्यन्ती मध्यमात्मना, मध्यमा च सक्रमरूपेण वैखर्यात्मना अभिव्यज्यते, एवं व्यत्यस्तक्रमेण वैखरी मध्यमात्मना मध्यमा च पश्यन्त्यात्मना, पश्यन्ती च परावागात्मना स्वस्वरूपं प्रत्यावर्तते। तत्र च सूक्ष्मरूपेण लीना भवति। एवमनया रीत्याऽहर्निशमकारादिवर्णानां सक्रमाक्रमे प्रत्यावर्तनावर्तने भवतः। उक्तञ्च **वाक्यपदीयस्य** ब्रह्मकाण्डे—

यथैकबुद्धिविषया मूर्त्तिराक्रियते पटे।
मूर्त्यन्तरस्य त्रितयमेवं शब्देऽपि दृश्यते॥ ५२॥ इति॥

अस्याञ्च प्रत्यावर्तनावर्तनक्रियायाम् अकारादिवर्णानां केवलं वैकृतध्वनिरेव सम्वर्द्धते, ह्रासञ्च लभते। प्राकृतश्च सर्वदा स्वस्वरूपे एव तिष्ठतीति मदीयोऽनुभवः। मध्यमादयवस्थायामक्रमिकत्वाद् मात्राकालादीनां प्रतीतिर्न जायते।

न च ध्वनिग्राहकयन्त्रेषु परावाङ्नामकं न किमपि तत्त्वं विद्यते, किन्तु विद्युदादिसाधनेन तत्र शब्दा अभिव्यज्यन्ते। अतस्तत्र ध्वनिग्राहकयन्त्रे विद्युदादितत्त्वमेव शब्दात्मनाऽभिव्यज्यते इति वाच्यम्; शब्दस्वरूपाख्ये प्रथमपरिच्छेदे "आधुनिकविज्ञानदृष्टचा पराया वाचस्तत्त्वम्" इत्यत्र पराख्यवाचः सर्वत्र व्यापकत्वस्य प्रतिपादनात्। ध्वनिग्राहकयन्त्रादिष्वपि पराख्यशब्दतत्त्वमनुस्यूतम्। ध्वनेः स्थायिकरणयन्त्रेषु (Into the record) मानवोच्चरितः शब्दोऽङ्कितः सन् पुनरक्रमिकरूपेण परात्मना विराजते। अभिव्यक्तिक्षणे च ध्वनिग्राहकयन्त्रेषु सूक्ष्मरूपेण बौद्धशब्दवत् स्थितः शब्दो विद्युदादिसाधनेन अभिव्यज्यते। यथा बुद्धौ आत्मनि वा यस्य ध्वनेः समवायसम्बन्धेन संस्कारः स्थायित्वं वा न जातम्, बुद्धिस्थसंस्कारविहीनतद्ध्वन्यात्मना परावाङ् नाभिव्यज्यते। अत एव प्राचीनवैयाकरणैः प्रातिपदिकार्थलक्षणे —"स्वविषयकश्रावणप्रत्यक्षस्वनिष्ठशक्तिग्रहाहितोद्बुद्धसंस्कारसमवायित्वेत्येतदुभयसम्बन्धेन प्रातिपदिकनिष्ठव्याप्यतानिरूपितव्यापकतावदुपस्थितीयविषयताश्रयतावानर्थः प्रातिपदिकार्थः" इत्यत्र स्वविषयकश्रावणप्रत्यक्षस्वनिष्ठशक्तिग्रहाहितोद्बुद्धसंस्कारसमवायित्वेत्यनयोः समावेशः कृतः। एवं ध्वनिस्थायिकरणयन्त्रेऽपि यस्य ध्वनेः संस्कारो न जातः, न

परावाक् तद्ध्वन्यात्मनाऽभिव्यज्यत इति दृष्टान्तदार्ष्टिकान्तयोः समन्वयः। अयं समन्वय ऋषिभिः युक्तयुञ्जानयोगिभिश्च कर्तुं न शक्यते; वाह्यशब्दसंस्कारं विनैव तेषां सर्वज्ञानात्। कण्ठताल्वादिस्थानेभ्यो वर्णानामभिव्यक्तेः प्रक्रिया मानवेष्वेव, यद्वा चेतनावत्सु प्राणिष्वेव, न त्वन्यत्र। अत एव अद्यतनसमये ध्वनिग्राहकयन्त्रादिषु कण्ठादिस्थानं विनैव वर्णानामभिव्यक्तिः।

वर्णाभिव्यक्तिजनकस्थान-करण-प्रयत्नाः

वर्णाभिव्यक्तिजनकस्थानम्— वर्णाभिव्यक्तिजनकस्थानं द्विविधं विद्यते—आस्याद्बहिर्भूतम्, आस्यान्तर्भूतञ्च। आस्याद् बहिर्भूते च द्वे स्थाने विद्यते—१ उरः, २. नासिका च।

२. आस्यान्तर्भूतञ्च स्थानम्—(१) ओष्ठः, (२) दन्तमूलम्, (३) वर्त्सः (४) मूर्धा, (५) तालु, (६) जिह्वामूलम्, (७) प्राक्काकलभागः कण्ठः—इमानि मुख्यस्थानानि।

वायोः स्थानानि—त्रीणि स्थानानि[१] वायोर्भवन्ति—उरः, कण्ठः, शिरः।

करणम्

करणमपि द्विविधं विद्यते—(१) आस्याद्बहिर्भूतम्, (२) आस्यान्तर्भूतञ्च। १ आस्याद् बहिर्भूतम्—(१) सम्वृतम्, (२ विवृतञ्च। सम्वृतविवृतकरणाभ्याम् उरःस्थानादिषु वायोः सम्वरणं विवरणञ्च जायेते। इमे सम्वृतविवृताख्ये करणे प्रयत्नपदवाच्येऽपि स्तः। प्रयत्नस्य करणाश्रितत्वात् सोऽपि (प्रयत्नोऽपि) करणपदेनोच्यते। वायुं सम्वर्तुं विवर्तुञ्च शक्तिरुरःप्रदेशे (आधुनिकचिकित्सकानां मते वक्षःस्थलीयपेशीषु) विद्यते। अतः सम्वृतविवृतप्रयत्नाश्रयीभूता वक्षःस्थलीयपेशी विद्यते। तत्र वायोः सम्वरणम्, उच्छ्वसनम्, वायोर्विवरणञ्च अन्तःश्वसनमुच्यते। इमे सम्वृतविकृताख्ये[२] करणे प्राणवायोर्भवतः, न तु वर्णानाम्।

२—आस्यान्तर्भूतं करणम्—(१) ह्रस्वस्थिमूलम्, (२) हनुमध्यभागः, (३) जिह्वामध्यादिभागाः, (४) ओष्ठः। इमान्यङ्गानि आस्यान्तर्भूतानि करणानि उच्यन्ते। प्रयत्नभेदेन करणस्यापि भेदो जायते। यथा— स्पृष्टं करणम्, अस्पृष्टं करणमित्यादि।

---

१. त्रीणि स्थानानि—(शु० य० प्राति०, अ० ९-सू० १०)।

२. वायोरुच्छ्वसनक्षणे हृदयभस्त्रिकायामाकुञ्चनम्, तदनुसारेण च वायोरप्याकुञ्चनं जायते, अतो वायोराकुञ्चनमेव सम्वृतत्वम्। अन्तःश्वसनक्षणे तु हृदयभस्त्रिकायाः प्रसारणम्, तदनुसारेण च वायोरपि प्रसारणं जायते, अतो वायोः प्रसारणत्वमेव विवृतत्वम्, विवृतत्वमेव च अन्तःश्वसनम्। इमौ प्रयत्नौ मुखान्तर्भूतसम्वृतविवृतप्रयत्नाभ्यां भिन्नौ स्तः। उक्तं च
"द्वे करणे" (शु० य० प्रा० १-११) इति। सम्वृतविवृताख्ये वायोर्भवतः।

प्रयत्नः

प्रयत्नोऽपि द्विविधः—१ आभ्यन्तरः, २—बाह्यश्च ।

१. आभ्यन्तरश्चतुर्धा—(१) स्पृष्टम्, (२) ईषत्स्पृष्टम्, (३) विवृतम्, (४) सम्वृतम् ।

२. बाह्यश्च अष्टधा—(१) सम्वारः, (२) नादः, (३) घोषः, (४) अघोषः, (५) अल्पप्राणः, (६) महाप्राणः, (७) विवारः, (८) श्वासः ।

उदात्तानुदात्तस्वरितानां बाह्यप्रयत्नत्वविचारः

अष्टावेव बाह्यप्रयत्नाः वर्णानां विद्यन्ते । तत्र केचिदुदात्तानुदात्तस्वरित-स्वरान् अपि बाह्यप्रयत्नेषु गणयन्ति । तेषां मते एकादश बाह्यप्रयत्नाः सन्ति । वस्तु-तस्तु उदात्तादिकं वर्णधर्मो न तु प्रयत्नः । यथा ह्रस्वत्वं दीर्घत्वं प्लुतत्वं वा ह्रस्व-दीर्घप्लुतस्वराणां धर्मविशेषो विद्यते, एवमुदात्तत्वानुदात्तत्वस्वरितत्वमपि ह्रस्वो-दात्त-ह्रस्वानुदात्त ह्रस्वस्वरितस्वराणां धर्मो विद्यते । अत एव "समाहारः स्वरितः" इति सूत्रस्य "उदात्तानुदात्तत्वे वर्णधर्मौ समाह्रियेते यस्मिन् सोऽच् स्वरितसंज्ञः" इत्येवं वार्त्तिकं वार्त्तिककाराः प्राहुः । उदात्तादीनां स्वरधर्मसत्त्वादेवोदात्तादिभेदे-नाकारादीनामष्टादशभेदाः सिद्ध्यन्ति, नान्यथा । अत एव भाष्यकारः "तुल्यास्य०" इति सूत्रे भाष्ये विवाराद्यष्टानामेव प्रयत्नानां बाह्यप्रयत्नतया गणनां कृतवान्, न तु उदात्तादीनाम् । सवर्णसंज्ञा तु आभ्यन्तरसाम्याद् भवति । अतो ह्रस्वोदात्त-दीर्घोदात्तादीनां परस्परं सवर्णत्वे उदात्तानुदात्तस्वरितत्वानि न प्रतिबन्धकानि सन्ति । उदात्तादीनां बाह्यप्रयत्नत्वाभावादेव भाषावैज्ञानिका अपि विवाराद्यष्ट-प्रयत्नानामेव विश्लेषणं कुर्वन्ति । स्वराणां बाह्यप्रयत्नस्तु हश्प्रत्याहारवद् विद्यते । तथा च स्वराणां सम्बारनादघोषप्रयत्नाः स्वीकर्तव्याः । एतेषामुच्चारणे कृते सति कण्ठविवरे सङ्कोचः, स्वरतन्तुद्वयस्य परस्परं संयोगः, स्वरतन्तुषु च नादात्मक-घोषो जायते । कर्णशष्कुल्यौ हस्ताभ्यां पिधाय्य इकाराद्युच्चारणे नादात्मको घोषः (झङ्कारः) श्रूयते । आकारोच्चारणे कृते च न श्रूयते । अत आकारस्य विवार-श्वासाघोषप्रयत्नाः स्वीकर्तव्याः । तदतिरिक्तानां तु सम्बारादिप्रयत्ना बोध्याः । भट्टोजिदीक्षितकृत**वैयाकरणसिद्धान्तकौमुद्यां** संज्ञाप्रकरणे "तुल्यास्य" इति सूत्रे तु "खयां यमाः खयः ᳲ क ᳲ पौ विसर्गः शर एव च"—इत्यस्मिन् श्लोके समेषां स्वराणां सम्वारनादघोषप्रयत्नाः प्रोक्ताः । प्रत्येकं स्वरस्य चतुर्थश्च बाह्य-प्रयत्नो महाप्राणो विद्यते । एवञ्च "तुल्यास्य०" इति सूत्रस्थभाष्ये परिगणितानां बाह्यप्रयत्नानां मध्ये सम्वारादिप्रयत्ना एव स्वराणामपि बाह्यप्रयत्नाः सन्ति ।

एते वक्तुरिच्छानुवर्तिनः प्रयत्नाः कण्ठादिस्थानेषु वायुं सयोज्य हकारादीना-मभिव्यक्तिं कुर्वन्ति । अतः कण्ठादिकम् अकारादीनामभिव्यक्त्याधारभूतं स्थानं विद्यते । तथा चोक्तम्—"अष्टौ स्थानानि वर्णानाम्" (पा० शि० १३) इति ।

कण्ठादिस्थानानामनुनादकत्वप्रतिपादनम्

[१]**तैत्तिरीयप्रातिशाख्य**मते तु कण्ठोरसोर्मध्यदेशे शब्दा निष्पद्यन्ते, कण्ठादि-स्थानेषु च तस्य प्रतिध्वनिर्जायते । तथा च कण्ठादिस्थानानि शब्दस्य प्रतिध्वनि-कारकाणि, यद्वा अनुनादकयन्त्ररूपाणि ।

[२]एवमेव भौतिकवैज्ञानिका अपि तैत्तिरीयप्रातिशाख्यमिव कण्ठदेशमेव शब्दनिष्पत्तिस्थानम्, कण्ठादिस्थानानि च अनुनादकयन्त्ररूपाणि मन्यन्ते ।

पाणिनीयादिशिक्षासु तु कण्ठादिकमकारादिवर्णानां स्थानरूपेणैव स्वी-क्रियते स्म । तथा चोक्तम्—"अष्टौ स्थानानि वर्णानामुरः कठः शिरस्तथा" —(पा० शि० १३) इत्यादि ।

एतेषां कण्ठादिस्थानानां जिह्वादिकरणानाञ्च योगे वर्णोच्चारणोपयोगीनि दशाङ्गानि गण्यन्ते—(१) उरः, (२) कण्ठः, (३) नासिका, (४) जिह्वामूलम्, (५) तालु, (६) मूर्धा, (७) दन्तमूलम्, (८) ओष्ठः, (९) जिह्वा, (१०) अधोहन्वस्थि चेति । तत्र जिह्वामध्यादिभागानां जिह्वायाम्, हन्वस्थिमध्य-हन्वस्थिमूलयोश्च हन्वस्थ्यन्तर्भावो विद्यते ।

आधुनिकशब्दशास्त्रिणश्च केचित् सप्तविंशत्यङ्गानि, केचिच्च षड्विंशत्य-ङ्गानि वर्णोच्चारणोपयोगीनि मन्यन्ते । तद्यथा—

भाषावैज्ञानिकमते वर्णोच्चारणोपयोग्यङ्गानि

१—अन्नप्रणाली, २—स्वरयन्त्रम्, ३—स्वरतन्त्री, ४—काकलकम्, ५—अभिकाकलकम्, ६—श्वासप्रणाली, ७—मुखविवरम्, ८—अलिजिह्वा, ९—नासिकाविवरम्, १०—कण्ठः, ११—श्वासमार्गः, १२—कोमलतालु, १३—मूर्धा, १४—जिह्वा, १५—कठोरतालु, १६—वर्त्सः, १७—ऊर्ध्वदन्ताः, १८—श्वासग्रहणस्योत्तममार्गः, (नासान्तराले) १९—नासिका, २०—ऊर्ध्वोष्ठः, २१—अधरोष्ठः, २२—अधोदन्तः, २३—अधोवर्त्सः, २४—जिह्वाग्रभागः, २५—मध्यजिह्वा, २६—पश्चजिह्वा, २७—जिह्वामूलञ्चेति सप्तविंशत्यङ्गानि भवन्ति ।

---

१. "वायुशरीरसमीरणात् कण्ठोरसोः सन्धाने" (तै० प्रा०, अ० १२, सू० २) कण्ठोरसोः सन्धाने मध्यदेशे शब्दोत्पत्तिर्भवति, तस्य प्रतिश्रुत्कानि भवन्त्युरः, कण्ठः शिरो मुखं नासिके" इति । (अध्याय २ । सूत्र ३ ।) प्रतिश्रुत् = प्रतिध्वनिः ।

२. "संगीत के अन्य यन्त्रों की तरह कण्ठ भी ध्वनि उत्पन्न करने का एक यन्त्र है । फेफड़े की वायु का झोंका कण्ठ में बनी स्लिट से निकल कर ध्वनि उत्पन्न करता है । और कण्ठ मुँह नाक आदि के बने कोटर अनुनादक का काम करते हैं" ।

श्रीललितकिशोरसिंह, एम० एस० सी०, "ध्वनिविज्ञान", पृ० स० २०६ ।

कण्ठस्य च मुख्यतया चत्वारो भागाः सन्ति— १. चुल्लिकोपास्थि, २. मुद्रिकोपास्थि, ३. त्रिकोणिकोपास्थि, ४. स्वरयन्त्रच्छदः।

केचिच्च भाषावैज्ञानिकाः श्वासप्रणालीश्वासमार्गयोश्च नासिकायामन्तर्भावं कृत्वा षड्विंशत्येवाङ्गानि मन्यन्ते। एतेषां मध्येऽभिकाकलकं (कण्ठच्छदः स्वरयन्त्रस्य पिधानं वा) श्वासप्रणाल्या महान् प्रहरी विद्यते। अस्य कार्यद्वयं विद्यते—

१. जलस्य भोजनस्य वा निगरणवेलायां श्वासमार्गस्य मुखं पिहितं करोति। श्वासमार्गस्य कण्ठच्छदेन पिहितत्वाज् जलं भोजनं वा श्वासमार्गं न प्रविशति। तेन प्राणिनां प्राणरक्षा जायते। अन्यथा भोजनस्य निगरणवेलायां कण्ठच्छदेन श्वासमार्गस्य समवरोधाभावे भोजने श्वासप्रणालीं प्रविष्टे सति प्राणहानिः सम्भाव्यते।

२. स्वरतन्त्रीं प्रकम्प्य ध्वनिं निःसारयति। अयं कण्ठच्छदो वर्तुलाकारो झिल्लिकापटेन निर्मितो विद्यते।

पूर्वोक्ताङ्गानां कण्ठादिष्वन्तर्भावः

एतेषामङ्गानां प्रत्यङ्गत्वेन कण्ठादिष्वन्तर्भावो विद्यते। अत एव शिक्षाकारैः—"अष्टौ स्थानानि" इत्युक्तम्। (१) फुस्फुसादीनां हृदये, (२) स्वरयन्त्रादीनाञ्च कण्ठे, (३) कण्ठच्छदस्य कण्ठे, (४) कोमलतालुनश्च तालौ, (५) कठिनतालुनश्च मूर्धनि, (६) दन्तादीनाञ्च दन्तमूले, (७) ओष्ठद्वयस्य च एकस्मिन्नोष्ठे, (८) श्वासप्रणाल्यादीनाञ्च नासिकायामन्तर्भावः। एवं जिह्वामध्यादिभागस्य जिह्वायामन्तर्भावः कर्तुं शक्यते। इमान्यङ्गानि वर्णोच्चारणेऽतीवोपयुक्तान्यावश्यकानि च सन्ति। अतस्तेषामपि विषये प्राचीन-नवीनपद्धत्या विचार आवश्यको विद्यते।

वायुसंयोगाश्रयस्थाननिरूपणम्

वर्णोच्चारणेच्छायां कण्ठान्तर्भागे कोमलतालु-कठोरतालु(मूर्ध)-दन्तमूलान्तर्भागेषु वायुसंयोगो जायते। यथा तालुनोऽधःपटलं विवरात्मकं सावकाशं च विद्यते। अतएव जिह्वा चतुर्दिक्षु भ्रमितुं शक्नोति। एवं तालवन्तर्भागो दन्तमूलान्तर्भागश्च विवरात्मकौ विद्येते। न केवलं ताल्वन्तर्भागो विवरात्मकः, अपि तु ललटान्तर्भागे यावन्त्यस्थीनि सन्ति, तानि सर्वाणि विवरात्मकानि विद्यन्ते। अतएव योगिनः[1] प्रयाणकाले प्राणवायुं तालुमूलाद् भ्रुवोरन्तरमुन्नीय मूर्धानं नयन्ति। तत्र विवराभावे तालुमूलाद् भ्रुवोरन्तरम्, भ्रुवोर्मध्याच्च मूर्धदेशं प्राणवायुर्गन्तुं न सम्भवति। एवं तालुन ऊर्ध्वपटलं दन्तमूलान्तर्भागश्च विवरात्मका विद्यन्ते। तत्र विवरे नासिकाविवरवद् रोमाभिश्लेष्मिका झिल्ली[2] विद्यते। शब्दप्रयुयुक्षायां समुत्थितः प्राणवायुर्मूर्धदेशाज्झिल्लिकामयदन्तमूलान्तर्भागं, तालुन ऊर्ध्वभागं च समागत्य प्रतिहन्ति। जिह्वामध्यादिकरणानाञ्च सम्बन्धस्तालुनोऽधःपटलेन वर्णोच्चारणक्षणे जायते। वायुसंयोगश्च तालुन ऊर्ध्वपटलेन कथं जायते ? इति अग्रे "स्पृष्टादिप्रयत्नस्य वायुप्रतिघातस्य च विभिन्नाधिकरणत्वप्रतिपादनम्" इति स्थले स्पष्टतया प्रतिपादयिष्यते।

करणप्रयत्नयोरभेदत्वप्रतिपादनम्

तत्तत्स्थानेषु वायुसंयोगस्तत्तत्करणैस्तत्तत्प्रयत्ने कृते जायते। व्याकरणशास्त्रे करणप्रयत्नयोरभेदो विद्यते। तथा च करणमेव प्रयत्नः, प्रयत्न एव च करणम्। तत्र यद्यपि करणशब्दस्य "क्रियतेऽनेनेति करणम्" इति करणव्युत्पत्या, प्रयत्नशब्दस्य च "प्रकृष्टो यत्नः प्रयत्नः" इत्यर्थे प्रपूर्वकयत्-धातोर्भावार्थकनङ्प्रत्ययव्युत्पत्त्या द्वयोर्भेदः समायाति, तथापि जिह्वामध्यादिभागस्य प्रयत्नाश्रयतया तादात्म्येनाभेदत्वप्रतीतिर्जायते। अत एव भगवान् भाष्यकारः पतञ्जलिः "नाज्झलौ" इति सूत्रस्थमहाभाष्ये "सिद्धमनच्त्वात्" इति वार्त्तिकव्याख्यावसरे "स्पृष्टं स्पर्शानां करणम्" इत्युक्तवान्। अन्यथा करणप्रयत्नयोर्भेदे सति "स्पृष्टं स्पर्शानां प्रयत्नः" इति वक्तव्यम्, किन्तु नोक्तम्, उक्तञ्च—"स्पृष्टं स्पर्शानां करणम्" इति।

स्पृष्टादिभेदेन[1] करणं चतुर्विधम्—(१) स्पृष्टम्, (२) ईषत्स्पृष्टम्, (३) विवृतम्, (४) सम्वृतमिति। केचिद् ईषद्विवृतमपि करणं मन्यन्ते। अत्र पक्षे "नाज्झलौ" इति सूत्रस्यावश्यकता न विद्यते। यद्वा आधाराधेयरूपेण करणप्रयत्नयोर्भेदेऽपि न काचित् क्षतिः। प्रयत्नानामाधारः करणम्, आधेयाश्च प्रयत्नाः। उक्तञ्च "तुल्यास्यप्रयत्नं सवर्णम्" (१।१।९) इति पाणिनीयसूत्रस्य **महाभाष्ये**—

१. नाभ्यां स्थितं हृद्यधिरोप्य तस्मादुदानगत्योरसि तं नयेन्मुनिः।
ततोऽनुसन्धाय धिया मनस्वी स्वतालुमूलं शनकैर्नयेत ॥
तस्माद् भ्रुवोरन्तरमुन्नयेत निरुद्धसप्तायतनोऽनपेक्षः।
स्थित्वा मुहूर्तार्धमकुण्ठदृष्टिर्निर्भिद्य मूर्ध्नं विसृजेत् परं गतः ॥
—श्रीमद्भा० २।२।२०,२१।

२. "नासिका की गुहा से जुड़ी हुई चेहरे की अस्थियों के खाली स्थान होते हैं,जिन्हें विवर (सेमिसेस) कहते हैं। (प्लेट ६, चित्रनं० १८) इनमें भी नासिका के समान रोमाभिश्लेष्मिका झिल्ली होती है।"—एडिथ एप्राउलकृते "मानव शरीर की वैज्ञानिक" पुस्तके। पृ० सं० ६७।

१. "नाज्झलौ" (१।१।१०) "स्पृष्टं स्पर्शानां करणम्", "ईषत्स्पृष्टमन्तस्थानाम्, विवृतमूष्मणाम्। ईषदित्यनुवर्तते। स्वराणाञ्च विवृतम्, ईषद् इति निवृत्तम्"।
(पात० म० भाष्यम्)

"नैष दोषः, न हि लौकिकमास्यम् । किन्तर्हि ? तद्धितान्तमास्यम्, आस्ये भवम् आस्यम् । किं पुनरास्ये भवम् ? स्थानं करणञ्च" इति ।

अत्र केषाञ्चिन्मते करणं स्पृष्टतादि, कस्यचिन्मते च जिह्वाया अग्रोपाग्रमध्यमूलानि । अयञ्च मतभेदो मदुक्तरीत्यैव समाधेयः ।

वस्तुतस्तु "प्रारम्भो यत्नस्य प्रयत्नः" इत्येवं तुल्यास्येति पाणिनीयसूत्रस्य **महाभाष्ये** प्रयत्नस्य विशेषितत्वात् पूर्वं स्पृष्टतादयश्चत्वारः प्रयत्नाः, पश्चान्मूर्ध्नि प्रतिहते निवृत्ते च प्राणवायौ विवारादयो बाह्या एकादश प्रयत्ना उत्पद्यन्ते ।

अत्र करणविषये पुनः किञ्चिद् विस्तरशः प्रतिपादयिष्यते । करणानि त्रीणि विद्यन्ते - (१) अधोजिह्वा, (२) अधोहन्वस्थि, (३) ओष्ठश्च । हन्वस्थ्नो मूलभागः, मध्यभागश्च अकारादीनां करणम्, जिह्वामध्यादिभागाश्च चवर्गादीनां करणानि विद्यन्ते ।

जिह्वा—

प्रातिशाख्येषु[1] भाषाविज्ञानग्रन्थेषु च करणानाम्मध्ये जिह्वायाः प्राधान्यं दृश्यते ।

ऋगादिप्रातिशाख्येषु कवर्गादिवर्णोच्चारणे तत्तत्स्थानेषु जिह्वायाः स्पर्शस्य या प्रक्रिया दृश्यते, तदनुसारेण अस्या मुख्यतया चत्वारो भागाः स्वीकर्तुं शक्यन्ते । तद्यथा—अमरेशनिर्मित**वर्णरत्नप्रदीपिका**ऽनुसारेण —मूलमध्याग्रेतित्रयो भागाः, चतुर्थस्य प्रतिवेष्टिताग्रभागस्य च योगेन चत्वारो भागाः क्रियन्ते ।

शुक्लयजुःप्रातिशाख्ये तु कवर्गस्य हनुमूलं करणं स्वीकृतम् । तथा चोक्तम् "ऋः कौ जिह्वामूले" (१।६५), "जिह्वामूलीयानुस्वारा हनुमूलेन" (१।८३) इति । अतस्तदनुसारेण मध्य-अग्र-प्रतिवेष्टिताग्रेति त्रय एव भागाः कर्तुं शक्यन्ते । भाषावैज्ञानिकास्तु मुख्यतया षड् भागान् कल्पयन्ति । तद्या—पार्श्वमध्याग्रेति त्रयो भागाः, मूलतलग्रहेति त्रयो भागाश्चेति सर्वेषां योगे षड् भागा जायन्ते[2] ।

---

१. ऋवर्णोऽथ कवर्गश्च जिह्वामूलीय एव च ।
जिह्वामूलं वदन्त्येषां जिह्वामूलञ्च कारणम् ॥ २७ ॥
इवर्णोऽथ चवर्गश्च एऐकारौ यशौ सह ।
तालुस्थाना भवन्त्येषां जिह्वामध्यं तु कारणम् ॥ २८ ॥
षकारोऽथ टवर्गश्च मूर्धन्याः परिकीर्तिताः ।
जिह्वायाः प्रतिवेष्ट्याग्रमेतेषां कारणं स्मृतम् ॥ २९ ॥
लृलसिताः स्मृता दन्त्या जिह्वाग्रकरणा हि ते ।
रेफश्च दन्तमूलोत्थो जिह्वाग्रेण विधीयते ॥ ३० ॥
—अमरेशनिर्मिता वर्णरत्नप्रदीपिका ।

१. प्रभुनारायणशर्मकृते भाषाविज्ञानतत्त्वग्रन्थे १९ पृष्ठे, यद्वा २३ पृष्ठे द्रष्टव्यम् ।

द्वितीयञ्च करणं हन्वस्थि । द्वे हन्वस्थिनी विद्येते—(१) ऊर्ध्वहन्वस्थि, (२) अधोहन्वस्थि च । तत्र ऊर्ध्वहन्वस्थि करणं भवितुं न क्षमम्; यतो हि ऊर्ध्वहन्वस्थि तन्तुभिरेवं दृढतया कीलितं (सन्नद्धमित्यर्थः) विद्यते, येनेतस्ततो भ्रमितुं तस्मिन् शक्तिर्न विद्यते । अतोऽधोहन्वस्थि एव करणं भवितुं क्षमम् । अधोहन्वस्थि च ऊर्ध्वाधः, इतस्ततश्च भ्रमितुं क्षमं विद्यते । तत्र हन्वस्थ्नो मूलभागो मध्यभागश्च कवर्गादीनामुच्चारणे कर्तव्ये चेष्टां कुरुतः ।

तृतीयं करणम्—ओष्ठः । प्रातिशाख्यादिषु पवर्गस्य स्थानकरणविषये "समानस्थानकरणा नासिक्यौष्ठ्याः, एतेषां यदेव स्थानं तदेव करणम्" इत्येवं लिखितं विद्यते । वस्तुतस्त्वधरोष्ठः करणम्, ऊर्ध्वोष्ठश्च पवर्गादेः स्थानं विद्यते; यतो हि अधरोष्ठस्य संयोगाभावे पवर्गस्योच्चारणं कर्तुं शक्यते, किन्तु ऊर्ध्वोष्ठस्याभावे कथमपि पकारादीनामुच्चारणं न सम्भवति । अस्य परीक्षणोपायः–स्वहस्तेनाधरोष्ठं गृहीत्वाऽधो विकृष्य च जिह्वाग्रभागमूर्ध्वोष्ठेन संयोज्य पकारादेरुच्चारणस्य चेष्टायां तेषामुच्चारणं जायते, परन्तुअधरोष्ठं हस्तेन अगृहीत्वा तत्र जिह्वाग्रभागस्य संयोगे कृते पवर्गोच्चारणस्य चेष्टायामपि न तेषामुच्चारणं जायते । अत्र तावदिदमेव कारणमस्ति यत् जिह्वाग्रभागस्योर्ध्वोष्ठेन सह संयोगे सति तत्र (ऊर्ध्वोष्ठान्तर्भागे) वायुसंयोगो जायते, अधरोष्ठेन सह च संयोगे तत्र (अधरोष्ठे) वायुसंयोगो न जायते । अत ऊर्ध्वोष्ठः पकारादेः स्थानम्, अधरोष्ठमेव करणं मन्येत, न तूभयं स्थानं करणं स्वीक्रियेत । प्रातिशाख्यादिषु तु ओष्ठद्वयस्यापि स्थानकरणत्वोभयप्रतिपादनं तु "ऊर्ध्वदन्तच्छदोऽपि ओष्ठ उच्यते, अधोदन्तच्छदश्चापि ओष्ठः" इति नामैक्यादुक्तम् । ऊर्ध्वोष्ठेन सह जिह्वाग्रस्य सम्बन्धेन पवर्गोच्चारणे सत्यपि जिह्वाग्रस्य करणत्वं नोक्तम्, यतो हि तत्र जिह्वाग्रस्य संश्लेषे सति पवर्गस्य कृच्छ्रेणोच्चारणं जायते । अधरोष्ठस्य संश्लेषे सति तु सुखेन पवर्गः समुच्चार्यते ।

केवलमधरोष्ठस्य करणत्वस्वीकारे द्वितीयं कारणम् - "अधरोष्ठस्याधोहन्वस्थ्ना सह सम्बन्धाद्, अधोहन्वस्थ्नश्च सर्वतो भ्रमितुं सामर्थ्यस्य सत्त्वात् तेन सह अधरोष्ठोऽपि ऊर्ध्वमधो गन्तुं शक्यते, ऊर्ध्वोष्ठस्य तु ऊर्ध्वहन्वस्थ्ना सह सम्बन्धाद्, ऊर्ध्वहन्वस्थ्नश्च तन्तुभिर्दृढतया सन्नद्धत्वाद् भ्रमितुमसामर्थ्याद् ऊर्ध्वोष्ठ ऊर्ध्वमधो भ्रमितुं न शक्नोति" । एतैः करणैस्तत्तत्प्रयत्ने कृते तत्तत्स्थानेषु वायुसंयोगाद् वर्णाः समुच्चार्यन्ते, अतः प्रयत्नाश्रयः करणम्, वायुसंयोगाश्रयश्चताल्वादि स्थानं विद्यते ।

अकारादिवर्णानां कण्ठादिस्थाननिश्चयस्य प्रक्रमः

कण्ठादिस्थानस्य, प्रयत्नभेदस्य च अनुसन्धानानन्तरं स्वभावत इयं जिज्ञासा समुदेति यद् अकारादिवर्णानां कण्ठस्थानत्वे को हेतुः ? कवर्गस्य जिह्वामूलमेव स्थानं स्वीक्रियते, तालुस्थानं कथं न स्वीक्रियते ? नकारादीनां नासिकास्थानत्वे को हेतुः ? यदि च नकारो नासिकया समुच्चार्यते, तर्हि नकारोच्चारणे नासिकायां का क्रिया भवति ? स्पृष्टादिप्रयत्ननिश्चयस्य कः प्रक्रमः ? इत्यादि । तैत्तिरीय-

प्रातिशाख्ये जिह्वाया उपसंहाराद्यनुसारेण[1] वर्णस्थानं समुपादिष्टम्, उपसंहाराद्यनुसारेणत्यत्रादिपदेन जिह्वास्पर्शस्य[2] ग्रहणं कर्तव्यम्। इकारोच्चारणे कर्तव्ये जिह्वामध्यस्य तालावुपसंहाराद् इकारस्य तालुस्थानम्[3]। एवमेकारस्यापि बोद्धव्यम्[4]। उवर्णोच्चारणे कर्तव्ये द्वयोरोष्ठयोरुपसंहारादुकारस्य स्थानमोष्ठं निष्पद्यते। एवं व्यञ्जनवर्णानामपि मध्ये कवर्गाद्युच्चारणे कर्तव्ये जिह्वामूलेन हनुमूले स्पर्शात् कवर्गादीनां स्थानं हनुमूलादिकं स्वीक्रियते[5]। हकारविसर्जनीययोश्च कण्ठस्थानं मन्यते, किन्तु करणं किमपि न विद्यते।

एवमाधुनिकशब्दशास्त्रिणोऽपि तत्तद्वर्णानां स्थानं जिह्वादिस्पर्शाद्यनुसारेण प्रतिपादयन्ति। यथा टवर्गोच्चारणे कर्तव्ये जिह्वाग्रभागस्य दन्तमूलेषु कठोरतालौ वा संश्लेषाट्टवर्गो दन्त्यो मूर्धन्यो वा विद्यते। मुखे मूर्धस्थानाभावात् "टवर्गो मूर्धन्यः" इत्येवं कथनं तेषां मते काल्पनिकं विद्यते। चवर्गं शकाराविकारं च कठोरतालव्यं प्रतिपादयन्ति। कवर्गञ्च कोमलतालुजन्यं सिद्धान्तत्वेन मन्यन्ते। चवर्गविषये च "प्राचीनकाले चवर्गस्योच्चारणं कोमलतालुना, अधुना च कठोरतालुना समुच्चार्यते। एवं कवर्गोच्चारणे कर्तव्ये जिह्वायाः कोमलतालुना संश्लेषात् "कवर्गस्तालव्यः[6]" इत्याधुनिकशब्दशास्त्रिणां नवीनं महत्त्वपूर्णञ्च अनुसन्धानं विद्यते। यद्यप्याधुनिकशब्दशास्त्रिणां **तैत्तिरीयप्रातिशाख्या**दिभिर्वर्णस्थानविषये वैषम्यं प्रतिभाति, किन्तु जिह्वास्पर्शाद्यनुसारेण कवर्गादिवर्णस्थाननिश्चयविधौ समन्वयः कर्तुं शक्यते। यतो हि उभयोर्मते कवर्गादिवर्णस्थाननिश्चये जिह्वास्पर्श एव कारणम्, आधारो वा विद्यते।

अत्र विषये युक्तायुक्तत्वविचारः

वस्तुतस्तु सूक्ष्मदर्शिनो मुनयः स्थानेषु वायुप्रतिघातानुसारेण कवर्गादिवर्णानां स्थानं निर्दिष्टवन्तः। यद्वर्णोच्चारणे कर्तव्ये करणप्रयत्नाभ्यां यत्र वायुसंयोगस्तत् तद्वर्णस्य स्थानं स्वीकर्तव्यम्। तत्तत्स्थानेन सह जिह्वास्पर्शेन प्रयत्नस्यैव निश्चयः कर्तव्यः, तस्य च स्पृष्टादिप्रयत्नकोटावेव गणना कर्तव्या। जिह्वास्पर्शाद्यनुसारेण तत्तद्वर्णस्य स्थानास्वीकारे कारणद्वयं विद्यते—

१. स्वराणां यत्रोपसंहारस्तत्करणम्—तै० प्रा० २.३१।
२. अन्येषां यत्र स्पर्शनं तत्स्थानम्—तै० प्रा० २।३३।
३. तालौ जिह्वामध्यमिवर्णे—तै० प्रा० २।२१।
४. एकारे च—तै० प्रा० २।२३।
५ हनुमूले जिह्वामूलेन कवर्गं स्पर्शयति—तै० प्रा० २।२४।
६. "कोमलतालु (लुचलुचे) तालुपर उत्पन्न हुई ध्वनियों को आज भी कण्ठ्य कहते हैं। यद्यपि यह नाम बहुत उपयुक्त नहीं, क्योंकि यह स्थान कण्ठ से बहुत भिन्न है"।
—डा० बाबूराम सक्सेनाकृते सामान्यभाषाविज्ञाने पृ० ७३।

(१) उभयनिष्ठत्वम्, (२) असम्भवत्वरूपञ्चेति।

उभयनिष्ठत्वहेतुः—यथा कपालद्वयसंयोगो नैकस्मिन् कपाले वर्तते, अपितु द्वयोः कपालयोः, यतो हि संयोगो द्विष्ठो न तु एकस्थः; तथैव रीत्या वर्णोच्चारणात् प्राग् जिह्वास्पर्शो हि उभयत्र जायते—तात्वादिस्थानेषु, जिह्वामध्यादिभागेषु च। स्पर्शस्य उभयनिष्ठत्वाज्जिह्वामध्यादिभागा अपि वर्णानां स्थानानि स्युः। तथा च शिक्षाकारैः "तवर्गो दन्तमूलीयो जिह्वाग्र्यश्च" इत्येवं रीत्या स्थानं निर्देष्टव्यम्, किन्तु न निर्दिष्टम्, निर्दिष्टञ्च तवर्गस्य दन्तमूलं स्थानम्, जिह्वाग्रञ्च करणम् इति। ताल्वादीनां स्थानत्वेन, जिह्वामध्यादीनाञ्च करणत्वेन निर्देशः कृतः।

असम्भवत्वहेतुः—त्वया तत्तत्स्थानेषु जिह्वास्पर्शेन तत्तदुच्चार्यमाणवर्णानां स्थाननिश्चयः क्रियते। उच्चारणात्प्राक् तालुदेशे जिह्वास्पर्शाच्चवर्गस्य तालव्यत्वम्, मूर्धस्थाने जिह्वास्पर्शात् टवर्गस्य मूर्धन्यत्वम्, दन्तस्थाने जिह्वाग्रस्पर्शात्तवर्गस्य दन्त्यत्वम्, ओष्ठद्वयस्य च परस्परं स्पर्शात् पवर्गस्य ओष्ठस्थानत्वं स्वीक्रियते। एवञ्च त्वद्रीत्या ङ ञ ण न म इत्यनुनासिकवर्णानां नासिकास्थानं न कदापि भवितुं शक्यते। मुखनासिकान्तराले नकारादीनां स्थानान्तरस्वीकारपक्षेऽपि तत्र जिह्वायाः स्पर्शादिव्यापारो भवतुं नार्हति। आधुनिकभाषावैज्ञानिकैः शिक्षाकारैश्च ङकारादीनां नासिकास्थानं स्वस्ववर्गाऽभिव्यक्तिजनकस्थानञ्च स्वीक्रियेते, तथैवानुभूयेते च। ङकारादिपञ्चवर्णाश्च स्पर्शवर्णा अप्युच्यन्ते। यदि भवता जिह्वास्पर्शानुसारेण तत्तद्वर्णस्थानं स्वीक्रियते, तर्हि ङकाराद्युच्चारणे कर्तव्ये नासिकायां जिह्वायाः, कथं स्पर्शो जायते ? किं जिह्वाग्रं संकुच्य श्वासविवरमार्गं प्रविश्य तत्र (नासिकायाम्) स्पृशति, आहोस्वित् तालुदेशं भित्त्वा तत्र स्पर्शः सम्पद्यते ? इत्युभयमपि भवितुं न सम्भवति। एवञ्च नासिकादेशे जिह्वास्पर्शादिव्यापाराभावेऽपि ङकारादिवर्णानामुच्चारणस्य शक्यतया, जिह्वास्पर्शानुसारेण तत्तद्वर्णस्थाननिश्चयो न कर्तव्यः, किन्तु स्थानेषु वायुप्रतिघातानुसारेणैव। स्थानेषु वायुप्रतिघातानुसारेण तत्तद्वर्णस्थानस्वीकारे तु मकाराद्यनुनासिकवर्णोच्चारणे कर्तव्ये द्वाभ्यामोष्ठाभ्यां स्पृष्टप्रयत्ने कृते सति वायुः सर्वगामित्वाद् ओष्ठादिस्थानं नासिकादेशञ्चेत्युभयत्रापि प्रतिहन्ति, ततश्च मकारादयः परश्रोत्र-स्वश्रोत्रग्राह्या भवन्ति।

कं खं अं इत्याद्यनुनासिकवर्णानामपि भागस्य मुखेन, भागस्य च नासिकयोच्चारणं क्रियते। कं इत्यादिषु क् इत्याद्यंशस्य जिह्वामूलस्य हनुमूलेन स्पर्शादुच्चारणं कर्तुं शक्यते "०" इत्यंशस्य नासिकया कथमुच्चारणं सम्भवति ! नासिकायाः कोटिशः संकोचनादिक्रियाभिः "०" इत्यंशो न उच्चारयितुं शक्यते। किन्तु नासिकया यदा वायुसंयोगः सञ्जायते, तस्मिन् क्षण एव "०" इत्यंशः समुच्चार्यते। एवञ्च वायुसंयोगानुसारि तत्तद्वर्णस्थानस्वीकारपक्षे "०" इत्यस्य नासिकास्थानं स्वीकर्तुं शक्यते।

वर्गपञ्चमवर्णयुक्तस्य, अन्तःस्थवर्णयुक्तस्य च हकारस्य स्थानमुरः प्रोक्तम् । जिह्वादिव्यापारानुसारेण तत्तद्वर्णस्थानस्वीकारे तथाभूतस्य हकारस्योरः स्थानं न सम्भवति । बहूपायेनापि जिह्वा उरःस्थानं स्प्रष्टुं न समर्था । वायुप्रतिघातानुसारेण तत्तद्वर्णस्थानस्वीकारपक्षे तु वायोस्तत्र प्रतिघातात् तथाभूतस्य स्थानमुरः प्रदेशः सरलतया स्वीकर्तुं शक्यते ।

वायुप्रतिघातानुसारेण वर्णस्थानस्वीकारे पाणिनिसम्मतिः

एवमुपर्युक्तहेतुद्वयस्य विवरणानुसारं वायुसंयोगानुसारेण तत्तद्वर्णस्थाननिश्चयः, जिह्वास्पर्शानुसारेण च स्पृष्टादिप्रयत्नस्य प्रक्रमः स्वीकर्तव्यः । सूक्ष्मदर्शिनः पाणिन्यादिमहर्षयोऽपि वायुसंयोगानुसारेणैव विभिन्नवर्णानां स्थानं निर्दिष्टवन्तः । अत्र "मुखनासिकावचनोऽनुनासिकः" (१।१।८) इति सूत्रमेव प्रमाणं विद्यते । वर्गेषु वर्गचतुष्टयस्य जिह्वामूलादीनां तत्तस्थानेषु स्पर्शेन कथमप्युच्चारणसम्भवेऽपि ङकारादीनां वायुसंयोगं विना नासिकया कथमप्युच्चारणं न सम्भाव्यते । एवं वायुप्रतिघातानुसारेण वर्णस्थानस्वीकारे पाणिनीयं सौत्रं प्रमाणं समुपस्थापितम् ।

पाणिनीयशिक्षायां तु—

सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य मारुतः ।
वर्णान् जनयते"—इत्यनेन तद्वचनं दृढतां भजति ।

एतदेव स्पष्टयत्याचार्यो भर्तृहरि**र्वाक्यपदीयस्य ब्रह्मकाण्डे—**

लब्धक्रियः प्रयत्नेन वक्तुरिच्छानुवर्तिना ।
स्थानेष्वभिहतो वायुः शब्दत्वं प्रतिपद्यते ॥ १०८ ॥

अत्र कारिकायाम् "स्थानेष्वभिहतः" इत्युक्तम् । वायोरभिघातः कण्ठादिस्थानेष्वेवेति अकारादिवर्णोच्चारणे करणप्रयत्नाभ्यां कण्ठादिस्थानेष्वेव वायोरभिघातात् अकारादिवर्णानां कण्ठादिकमेव स्थानमिति सूचितम् । यथा कपालद्वयसंयोगः कपालद्वये, न तु एकस्मिन् कपाले भवति; एवं कण्ठादिस्थानेषु वायुप्रतिघातोऽपि कण्ठादिस्थाने वायौ च परस्परं जायते । वायुः स्पृष्टादिप्रयत्नेन कण्ठादिस्थानेष्ववरुद्धः सन् कण्ठादिस्थानमभिहन्ति, तदनन्तरं स्वयमेव प्रतिहतो भवति । यथा कश्चित् स्वहस्तेन काष्ठं ताडयति, काष्ठेऽभिघातो भवति, तस्य हस्तोऽपि प्रतिहतो जायते । एवं वायुतत्तद्वर्णस्थानयोः परस्परं प्रतिघातविषयेऽपि बोद्धव्यम् ।

वायुसंयोगानुसारमकारादिवर्णस्थानस्वीकारे तैत्तिरीयप्रातिशाख्यविरोधपरिहारः

यद्यपि **तैत्तिरीयप्रातिशाख्ये** जिह्वोपसंहाराद्यनुसारेणैव अकारादिवर्णानां स्थानं निश्चितम् । तथा चोक्तम्— "स्वराणां यत्रोपसंहारस्तत्स्थानम्" (तै० प्रा० २।३१), "अन्येषां यत्र स्पर्शनं तत्स्थानम्" (२।३३) इति । तथापि "नासिक्या नासिकास्थानाः" (तै० प्रा० २।४९), "मुखनासिक्या वा" (तै० प्रा० २।५०)

इत्यपि सूत्रद्वयमुक्तम् । "वर्गवच्च वर्गेषु" (२।५१) इति सूत्रे ङकारादीनां स्ववर्गवत्करणं प्रोक्तम् । नकारोच्चारणे कर्तव्ये "जिह्वाग्रेण तवर्गे दन्तमूलेषु" (तै० प्रा० २।३८) इत्यनुसारेण दन्तमूलेषु जिह्वाग्रेण स्पर्शात् नकारो दन्त्यो भवितुमर्हति, किन्तु नासिकायां जिह्वायाः स्पर्शाभावान् नासिक्यः कथं भवितुमर्हति ! कोटिशो व्यापारेषु सत्स्वपि नासिकयोः परस्परं स्पर्शो भवितुं नार्हतीति तु पूर्वमेव प्रतिपादितम् । अस्यां दशायां "मुखनासिक्या वा" इति सूत्रं व्यर्थमेव स्यात् । तदेव च सूत्रं व्यर्थीभूय ज्ञापयति—"वायुप्रतिघातानुसारेणापि तत्तद्वर्णस्थानं निश्चेतव्यम्" इति । एवं नकाराद्युच्चारणे कर्तव्ये जिह्वाग्रेण दन्तमूलेषु स्पर्शे कृते सति वायुर्दन्तमूलेष्वपि प्रतिघातं करोति । नासिकायामपीति "नासिक्या नासिकास्थानाः", "मुखनासिक्या वा" इति सूत्रद्वयं सार्थक्यं भजते । एवञ्च जिह्वास्पर्शाद्यनुसारेण स्पृष्टादिप्रयत्नस्वीकारे, वायुसंयोगानुसारेण हकारादिवर्णस्थानस्वीकारे **तैत्तिरीयप्रातिशाख्यस्य** सम्मतिरेवास्ति ।

जिह्वास्पर्शाद्यनुसारेण स्पृष्टादिप्रयत्ननिश्चये पातञ्जलभाष्यसम्मतिः

एवं पूर्वोक्तपरीक्षणानुसारेण तत्तद्वर्णोच्चारणे कर्तव्ये वायुसंयोगानुसारेण तत्तद्वर्णस्थानं जिह्वास्पर्शाद्यनुसारेण च स्पृष्टादिप्रयत्नानां बोधः कर्तव्यः । भगवान् भाष्यकारः पतञ्जलिरपि जिह्वास्पर्शाद्यनुसारेणैव प्रयत्नं निर्दिष्टवान् । अत्र "नाज्झलौ" (१।१।१०) इति सूत्रस्थ**महाभाष्यमेव** प्रमाणम् । तत्र "स्पृष्टं स्पर्शानां करणम्, ईषत्स्पृष्टमन्तःस्थानाम्, विवृतमूष्मणाम्" इत्युक्तम् । शकारादीनां करणानि जिह्वामध्यादिभागाः ईषद्विवृतानि प्रयत्ना विद्यन्ते, न तु करणम् ।

स्पृष्टादिप्रयत्नस्य वायुप्रतिघातस्य च विभिन्नाधिकरणत्वप्रतिपादनम्

स्पृष्टादिप्रयत्नाः तात्वादिस्थानेषु वायुप्रतिघातार्थं क्रियन्ते । वायुप्रतिघातः, तदर्थं क्रियमाणः स्पृष्टादिप्रयत्नश्च-इत्युभावेकस्मिन्नधिकरणे न भवतः । अत्र विषये सर्वेषामाचार्याणां सम्मतिर्विद्यते । तथा च अकारहकारविसर्जनीयानां[1] कण्ठस्थानम्, हनुमध्यञ्च करणं प्रोक्तम् । तथा च हनुमध्येन विवृते प्रयत्ने कृते सति कण्ठदेशे वायुसंयोगादकारादयः समुच्चार्यन्ते । एवमेवाकारोच्चारणे कर्तव्ये जिह्वामध्यभागेन विवृतो यत्नः क्रियते, वायुसंयोगश्च तालुदेशे । एवमुकारोच्चारणे कर्तव्येऽधोदन्तच्छदेन विवृतो यत्नः क्रियते, वायुसंयोगश्चोर्ध्वदन्तच्छदे जायते । औष्ठ्यवर्णानामधरोष्ठ एव करणमित्यस्य पवर्गाभिव्यक्तिप्रक्रियायां सम्यक्तया निरूपणं कृतमस्ति । अत्र तावन्निभाल्यताम्— यदि वायुसंयोगः, तदर्थं क्रियमाणश्च विवृतप्रयत्नः—इत्युभावेकस्मिन्नधिकरणे स्याताम्, तर्हि अकारादीनां स्थानं कण्ठः,

---

१. "अवर्णश्च विसर्गश्च हकारश्चापि केवलः ।
कण्ठ्या वर्णाः स्मृता ह्येषां हनुमध्यं तु कारणम्" ॥ ३३ ॥
अमरेशनिर्मितवर्णरत्नप्रदीपिका ।

वच्छेदेन यस्मिन् स्थाने, यस्योपश्लिष्टदेशे वा स्पर्शस्तदन्येषां स्थानम्" इति तात्पर्यं विद्यते। एवं पूर्वोक्तरीत्या "अन्येषां यत्र स्पर्शनम्" (तै० प्रा० २।३३) "इत्याद्यार्षसूत्राणामनुसन्धानेन इदमेवायातं यच् चवर्गाद्युच्चारणे कर्तव्ये केवलं यावत्कोमलताल्वादिस्थानमेव सम्यक् स्पृशेत् न तु ताल्वैकदेशम्, न वा तालूपश्लिष्टस्थानम्–इत्येवं न विद्यते, किन्तु ताल्वैकदेशं तालूपश्लिष्टस्थानं वा स्पृशेत्" इत्येवं तात्पर्यं विद्यते।

स्पर्शवर्णानामभिव्यक्तिप्रक्रियायाः सामान्यपरिचयः

कवर्गाद्युच्चारणेच्छायां हनुमूलेनोर्ध्वजिह्वामूलैकदेशे तदुपश्लिष्टस्थाने तालौ वा स्पर्शे सति ऊर्ध्वजिह्वामूलस्योपरिभागे वायुसंयोगः, चवर्गोच्चारणेच्छेयां जिह्वामध्यभागस्य ताल्वैकदेशेन तालूपश्लिष्टस्थानेन वा संश्लेषः, तालुन ऊर्ध्वपटले च वायुसंयोगः, टवर्गोच्चारणे कर्तव्ये च मूर्धैकदेशेन, मूर्धोपश्लिष्टस्थानेन वर्त्स्वभागेन संश्लेषः, मूर्धोपरिभागे च वायुसंयोगः, तवर्गोच्चारणेच्छायां दन्तमूलान्तर्भागे वायुसंयोगः, दन्तमूलस्य बाह्यभागे च जिह्वाग्रसंश्लेषः। पवर्गोच्चारणेच्छायाञ्च ओष्ठद्वयस्य परस्परं संश्लेषः, तदुपश्लिष्टस्थाने च वायुसंयोगः; यद्वा, ओष्ठद्वयस्य परस्परं संयोगे सति ओष्ठान्तर्भागस्थासु रक्तसंवाहिनीषु नाडीषु वायुप्रतिघातः। अत एव ओष्ठ्यवर्णोच्चारणक्षणे ओष्ठद्वयं बाह्याभ्यन्तरतः प्रफुल्लं प्रतीयते।

मूर्ध्न्यभिहतस्य प्राणवायोस्तालुमार्गेण कण्ठादिस्थानेषु गमनप्रकारः

कवर्गशब्दाद्युच्चारणेच्छायां प्रयत्नेन प्रेरितः प्राणवायुर्हृदयस्थानात् सुषुम्नाख्यनाड्या[1] ब्रह्मरन्ध्रं मध्यमस्तकं वा गच्छति। मोक्षेच्छया ब्रह्मरन्ध्रं भित्वा बहिर्निर्गतः सन् प्राणवायुः ब्रह्म (परमात्मानं) प्रापयति। अकारादिशब्दोच्चारणेच्छायाञ्च स एव प्राणवायुस्तालुमार्गेण कण्ठादिस्थानं प्राप्तः सन् ककारादिशब्दत्वं प्रतिपद्यते।

अत्रेदमवधेयम्—तालुना "तरन्त्यनेन वर्णाः" इति व्याख्यानुसारेण कार्यद्वयं सम्पाद्यते—१. बुभुक्षायां जिह्वासाहाय्येन भोज्यादिचतुर्विधभोजनस्य कण्ठविवरमार्गेणोदरेऽवतारणम्, अत एव यस्य जिह्वा न विद्यते स "तालुजिह्व[2]" इत्युच्यते। स तालुनैव कथञ्चिज्जलादिनिगरणं प्रतिपादयति।

२. द्वितीयञ्च कार्यम्—शब्दोच्चारणेच्छायां हृदयदेशाद् ब्रह्मरन्ध्रं समागतं प्राणवायुं कण्ठादिस्थानेष्ववतार्यते। भोजनादिनिगरणं तालुनोऽधः पटलात् (यत्र जिह्वासंश्लेषो जायते) क्रियते, तालुन ऊर्ध्वपटलाच्च कण्ठादिस्थानेषु

---

१. "समीरिताः समीरेण सुषुम्नारन्ध्रनिर्गताः"—प्रपञ्चसारः, तृतीयपटलम्।

२. तालुजिह्वः=पुं० स्त्री; तालु एव जिह्वा यस्येति विग्रहः। तस्य जिह्वान्यूनत्वेऽपि तालुनैव रसास्वादनात्तथात्वमिति बोद्धव्यम्।

वर्णोऽवतार्यते। भोजनादिनिगरणं तालुनोऽधः पटलात् (यत्र जिह्वासंश्लेषो जायते) क्रियते, तालुन ऊर्ध्वपटलाच्च कण्ठादिस्थानेषु वायोरवतरणं भवति, यतो हि मूर्धस्थानात् कण्ठादिस्थानेष्ववतीर्यमाणस्य प्राणवायोस्तालुनोऽधः पटलेन, उदरे भोजनादीनाञ्च निगरणं तालुन ऊर्ध्वपटलेन न सम्भाव्यते।

जिह्वामूले कवर्गस्याभिव्यक्तिप्रक्रिया

तत्र "नह्यन्तरेणाचं व्यञ्जनस्योच्चारणमपि भवति" इत्युक्त्या प्रतिस्पर्शवर्णोच्चारणे आभ्यन्तरप्रयत्नद्वयं कर्तव्यं भवति। मात्रिकाणां "क् ख् ग्" इत्यादिस्पर्शवर्णानां कृते पूर्वं जिह्वया स्पृष्टप्रयत्नः, तदनन्तरं यत् स्वराश्रयेण अर्धमात्रिकं व्यञ्जनमुच्चार्यते तदर्थं द्वितीयो विवृतो नाम आभ्यन्तरप्रयत्नः क्रियते। तत्र विवृते प्रयत्ने कृते सति स्पृष्टस्थानं त्यक्त्वा विवृतो भवति, तदनन्तरं प्रतिस्पर्शवर्णोच्चारणं जायेत। एवञ्च पूर्णमात्रिकेषु 'क ख ग' इत्यादिषु 'क् ख्' इत्याद्येतन्मात्रस्य स्पृष्टप्रयत्नः, "अ" इत्येतन्मात्रस्य च विवृतप्रयत्नो विद्यते। कवर्गाभिव्यक्तिप्रक्रियाज्ञानात्पूर्वं "तालौ जिह्वामध्येन चवर्गे" (तै० प्रा० २–६६) इत्यादौ सर्वत्र "तालौ इत्यादिष्वौपश्लेषिकाधिकरणं विद्यते" इत्यवधेयम्। तत्र कवर्गस्य जिह्वामूलं स्थानं करणञ्च—इत्युभयमपि[1] प्रोक्तम्। अत्र ऊर्ध्वजिह्वामूलं स्थानम्, अधो जिह्वामूलञ्च करणं बोद्धव्यम्; यतो हि समेषां स्पर्शवर्णानामुच्चारणे कर्तव्येऽधोजिह्वा एव ताल्वादिस्थानं स्पृशति।

> आद्यः करणविन्यासः प्राणस्योर्ध्वसमीरणम्।
> स्थानानामभिघातश्च न विना शब्दभावनम्॥ इति।

भर्तृहरिकारिकोक्तरीत्या सर्वप्रथममधोऽजिह्वामूलमूर्ध्वजिह्वामूलैकदेशम्, ऊर्ध्वजिह्वामूलोपश्लिष्टस्थानं (तालु) वा स्पृशति तत्क्षणाव्यवहितोत्तरकाले ब्रह्मरन्ध्रतः समागतस्य प्राणवायोश्चोर्ध्वजिह्वामूलान्तर्भागे (ऊर्ध्वजिह्वामूलस्योर्ध्वपटले) संयोगः सञ्जायते। कण्ठदेशस्थस्वरतन्तवश्च वितत्य काठिन्यं विदधति। अधोजिह्वामूलस्योर्ध्वजिह्वामूलोपश्लिष्टस्थानेन सम्बन्धे सति स्वरतन्तूनां तननं जायते, अतस्तेषु काठिन्यं समायाति। स्वरतन्तुषु काठिन्योत्पादने वायुसंयोगः कारणं न विद्यते, यतो हि वायुसंयोग ऊर्ध्वजिह्वामूलान्तर्भागे विद्यते। स्वरतन्तूनां परस्परं तननात् प्रफुल्लनात्, काठिन्याच्च श्वासमार्गोऽवरुद्धः सञ्जायते।

---

१. "ऋवर्णोऽथ कवर्गश्च जिह्वामूलीय एव च।
जिह्वामूले भवन्त्येषां जिह्वामूलं तु कारणम्"॥

अत्र विचार्यताम्—यद्यधोजिह्वामूलमेव कवर्गस्य करणं स्थानमित्युभयमपि स्यात्तर्हि कवर्गोच्चारणे कर्तव्येऽधोजिह्वामूलं कथं स्वात्मानं (जिह्वामूलं) स्प्रष्टुमर्हति; यतः स्वात्मानं गच्छतीतिवत् स्वात्मानं स्पृशतीति प्रयोगोऽपि न भवति।

अतः कण्ठदेशं वायुर्गन्तुं न प्रभवति, किन्तु जिह्वामूलान्तर्भागमेव निघ्नँस्तिष्ठति। कोष्ठकञ्च भेत्तुं यतते। यद्यपि —

"उदानः कण्ठदेशे स्यात् व्यानः सर्वशरीरगः"।

इत्युक्त्या वर्णोच्चारणेच्छायाः पूर्वमपि कण्ठदेशे वायुः समुपतिष्ठते, तथापि वक्तुरिच्छानुवर्तिना प्रयत्नेन हृद्देशात् समुत्थितः मूर्धानं प्रतिहत्य प्रत्यावृत्तो यो वायुः स्वरतन्तूनां तननात्, प्रफुल्लनात् स्थौल्याच्चेत्यादिहेतुभिः श्वसनमार्गस्यावरोधात्तस्य वायोः कण्ठदेशे संयोगो न जायते। अकारादिस्वरेण सह कवर्गस्योच्चारणेच्छायामधोजिह्वामूले संस्पृष्टस्थानं यस्मिन्नेव क्षणे विजहाति, तस्मिन्नेव क्षणे स्वरतन्तूनां तननस्य न्यूनतया तेषु शैथिल्यं समायाति श्वासमार्गश्चानवरुद्धः सञ्जायते। ऊर्ध्वजिह्वामूलान्तर्भागावरुद्धः प्राणवायुश्च स्वरतन्तून् चस्वरयन्त्रं प्रकम्प्य मुखविवरेण बहिर्निःसरति। तथा च यावत्कालम् अधोजिह्वामूलं संस्पृष्टस्थानेन वियुज्य स्वस्थानं गच्छति, तावत्कालम् अ-स्वरविशिष्टककारस्याभिव्यक्तिर्जायते, यदा च अधो जिह्वामूलं पूर्णरूपेण स्वस्थानं प्राप्तं भवति, तदा क-शब्दो न श्रूयते, किन्त्वकार एव श्रूयते। एवं च क-शब्दोच्चारणे कर्तव्ये ऊर्ध्वजिह्वामूले वायुसंयोगात्तस्य स्थानं जिह्वामूलं निष्पद्यते।

कवर्गोच्चारणे कर्तव्येऽधोजिह्वामूले वायुसंयोगासम्भवात् तत् कवर्गस्य स्थानं न सम्भवति। अधोजिह्वामूले वायुसंयोगाभावे कारणं तु यत्कारणं कण्ठदेशे वायुसंयोगाभावे विद्यते, तदेवात्रापि। किञ्च, अधोजिह्वामूलस्योर्ध्वजिह्वामूलोपश्लिष्टस्थानेन सम्बन्धे सति स्वरतन्तूनां तननात् काठिन्याच्च तेषु (स्वरतन्तुषु) स्थूलत्वे समायाते श्वासमार्गस्यावरोधेऽपि यथाकथञ्चिद् वायोरतीव सूक्ष्मत्वात् कण्ठदेशे प्रवेशेऽप्यधोजिह्वामूलेन संयोगो दुर्लभः, यतो हि अधो जिह्वामूलम् ऊर्ध्वजिह्वामूलोपश्लिष्टस्थानेन संयोगात् सावच्छिन्नं जायते, अतस्तत्र वायुसंयोगस्यावसर एव नास्ति। ऊर्ध्वजिह्वामूलान्तर्भागस्तु (ऊर्ध्वजिह्वामूलस्योपरिभागः) निरवच्छिन्नः सावकाशश्च विद्यते। अतस्तत्र वायुसंयोगः सम्भाव्यते।

अकारादिस्वररहितकेवलककारस्य तूच्चारणं न भवति। केवलं ककारादिशब्दस्याभिव्यक्तौ यत्ने कृते वायुस्तत्तत्स्थानेषु प्रतिघातमात्रं करोति। जिह्वा च स्थानेन सह संश्लिष्टावस्थायामेव तिष्ठति। अतोऽकाराद्याश्रयेणैव ककारादीनामुच्चारणं कर्तुं शक्यते इत्यवधेयम्।

कवर्गादिशब्दानां मूर्धस्थानत्वप्रतिपादनम्, तत्खण्डनञ्च

यद्यप्येवं ककारादिवर्णानां वायुप्रतिघातानुसारेण जिह्वामूलादिस्थाननिश्चये सति "सोदीर्णो मूर्ध्न्यभिहतः–" इति शिक्षाऽनुसारेण मूर्धदेशे वायुप्रतिघातात् सर्वेषां शब्दानां मूर्धस्थानत्वं समापतति; तथापि वर्णाभिव्यक्तेः प्रागव्यवहितक्षणे तत्र वायुप्रतिघाताभावान्न समेषां वर्णानां मूर्धस्थानत्वम्। तथा च यद्देशावच्छेदेन वायुसंयोगं विना न यद्वर्णाभिव्यक्तिः, तद्देशस्तद्वर्णस्य स्थानत्वमङ्गीकार्यम्।

कवर्गस्य कण्ठस्थानत्वविचारविमर्शः

भगवतः पाणिनेः सूत्रात्मिकायां शिक्षायाम्, "स सर्गः श्लेषितः कण्ठे वायुना कादिमीरयेत्" इति **प्रपञ्चसारे** तृतीयपटले, **वैयाकरणसिद्धान्तकौमुद्या**दिग्रन्थेषु च कवर्गः कण्ठस्थानीयः प्रतिपादितो विद्यते। किन्तु श्लोकात्मिकायां **पाणिनीयशिक्षायाम्**, सम्प्रत्युपलभ्यमानप्रातिशाख्यादिषु च कवर्गस्य जिह्वामूलं स्थानं प्रोक्तम्। एवं च कण्ठजिह्वामूलयोः परस्परं भेदाद् "जिह्वामूले तु कुः प्रोक्तः" इति **पाणिनीय**शिक्षया सह "अकुहविसर्जनीयानां कण्ठः" इत्यस्यविरोधः समायाति।

नागेशस्तु "अकुहविसर्जनीयानां कण्ठः" इत्यत्र कण्ठपदस्य कण्ठस्थानतत्समीपजिह्वामूलस्थानोभयपरत्वं स्वीकृत्येमं विरोधं परिहृतवान्[1]।

अत्र विषये सारासारनिर्णयः

वस्तुतस्तु कवर्गोच्चारणे कर्तव्येऽधोजिह्वामूलस्योर्ध्वजिह्वामूलेन संश्लिष्टे सति कण्ठदेशस्य प्राक्काकलकभागोऽपि ऊर्ध्वजिह्वामूलस्यातीव पार्श्ववर्ती जायते। प्राक्काकलकभागस्योर्ध्वं जिह्वामूलमुपवर्तितया तत्रापि यत्किञ्चिद् वायुः प्रतिहन्यते। अतो भट्टोजीदीक्षितादिभिः कवर्गस्य कण्ठस्थानत्वमङ्गीकृतम्। कण्ठपदस्य जिह्वामूलपरत्वकथनं न युज्यते; यतो हि कण्ठपदस्य कुत्रापि जिह्वामूलार्थपरत्वं न प्रतिपादितम्। जिह्वामूलस्य कण्ठदेशमुपवर्तितया तत्सामीप्यात् कण्ठपदस्य जिह्वामूलार्थे लक्षणयाऽऽरोपं कृत्वाऽपि कण्ठपदस्य जिह्वामूलकण्ठोभयपरत्वप्रतिपादनं न युज्यते; यतो हि भट्टोजीदीक्षितः कण्ठस्थानं जिह्वामूलस्थानं च भिन्नं भिन्नं मन्यते। अतएव "क ख" इति प्रागर्धविसर्गसदृशस्य जिह्वामूलीयस्य स्थानं जिह्वामूलम्, कवर्गस्य च स्थानम् "अकुह०" इति कण्ठं मन्यते। अतः "अकुहविसर्जनीयानां कण्ठः" इत्यत्र कण्ठपदं कण्ठपरम्। "जिह्वामूले तु कुः प्रोक्तः" (पा० शि० १८) इत्यत्र जिह्वामूलपदं जिह्वामूलार्थे विद्यते। "अकुह०" "जिह्वामूले कुः प्रोक्तः"—इत्यनयोर्विरोधपरिहारस्य "जिह्वामूले तु कुः" इति श्लोके 'तु' शब्दद्योत्यार्थं निश्चित्य कर्तव्यः। "जिह्वामूले तु कुः" इति शिक्षायां "तु" शब्दः पक्षान्तरार्थस्य द्योतको विद्यते। तथा चोक्तं **मेदिनीकोशे**—

तुः पादपूरणे भेदे समुच्चयेऽवधारणे।
पक्षान्तरे नियोगे च प्रशंसायां विनिग्रहे ॥ इति ॥

तथा च "जिह्वामूले तु कुः" इति शिक्षावचनस्य "जिह्वामूले कुः, पक्षान्तरे कण्ठे कुः प्रोक्तः" इति व्याख्या कर्तव्या। एवं व्याख्यायां "अकुहः..." "जिह्वामूले..." इत्यनयोर्न विरोधः।

---

१. अत्र कण्ठपदं कण्ठस्थानतत्समीपजिह्वामूलस्थानोभयपरम्। नागेशकृते लघुशब्देन्दुशेखरे संज्ञाप्रकरणे "तुल्यास्य०" (१।१९) इति सूत्रं द्रष्टव्यम्।

वस्तुतस्तु भट्टोजीदीक्षितेनापि कवर्गस्य जिह्वामूलमेव स्थानमङ्गीकर्तव्यम् । कवर्गस्य कण्ठस्थानत्वस्वीकारे न किमपि तात्पर्यं विद्यते । "जिह्वामूले तु कुः" इति **पाणिनीयशिक्षायां** 'तु' शब्दः पादपूरणार्थे विद्यते । भाषावैज्ञानिकेन डा० बाबूरामसक्सेनामहोदयेनापि कवर्गस्य कण्ठस्थानत्वं प्रत्याख्यातम् । अतः कवर्गस्य जिह्वामूलीयत्वमेव समुचितमित्यग्रे विशदरूपेण निरूपितम् ।

कवर्गस्य जिह्वामूलीयत्वपक्षेऽयोगवाहत्वापत्तिनिराकरणम्

यद्यपि कवर्गस्य जिह्वामूलीयत्वस्वीकारे तस्यायोगवाहत्वं समापतति । विसर्जनीयजिह्वामूलीयोपध्मानीयानुस्वारयमा अयोगवाहा उच्यन्ते । एवं विसर्जनीयादयो वर्णसमाम्नाये प्रत्याहारेषु च अनुपदिष्टत्वात् "उर ≍ केऽणः" इत्यादिप्रयोगेषु च णत्वकार्यस्य निर्वाहकत्वाद् अयोगवाहा उच्यन्ते । तथापि प्रत्याहाराह्निके "यदयुक्ता वहन्ति, अनुपदिष्टाश्च श्रूयन्ते" इति वाक्ये "अनुपदिष्टाः" इति कथनेन, कवर्गस्य च वर्णसमाम्नाये समुपदेशादिदं विज्ञायते यत् "के पुनरयोगवाहाः ? विसर्जनीयजिह्वामूलीयोपध्मानीयानुस्वारयमाः" इत्यत्र जिह्वामूलीयपदेन कवर्गस्य ग्रहणं नास्ति, किन्तु 'क' इति ककारात् प्रागर्धविसर्गसदृशस्यैव ग्रहणम् ।

यद्यपि [1]**याज्ञवल्क्यशिक्षायां** कवर्गस्य, "≍क" इत्यस्य च उभयोरपि स्थानं जिह्वामूलं प्रोक्तम्, तथापि "के पुनरयोगवाहाः ? विसर्जनीयजिह्वामूलीय—" इत्यत्र ज्ञापनादिना '≍क' इत्यस्यैव जिह्वामूलीयस्य ग्रहणं बोद्धव्यम् । किञ्च "अट्कुप्वाङ्नुम्व्यवायेऽपि" (८.४ २) इति सूत्रे 'कु' रित्यस्य ग्रहणेनापि "अयोगवाहेषु जिह्वामूलीयपदेन कवर्गो न गृह्यते" इति ज्ञाप्यते । यतो हि "अयोगवाहानामट्सुणत्वम्" इति वार्त्तिकेऽयोगवहानामट्सूपदेशः कृतः । जिह्वामूलीयकवर्गस्याप्यट्प्रत्याहारेषूपदेशादङ्ग्रहणेन कवर्गस्यापि ग्रहणे सिद्धे "अट्कुप्वाङ्" इति सूत्रे व्यर्थमेव कुग्रहणं स्यात् । पूर्वोक्तज्ञापकद्वयेन "भाष्यकारः क वर्गं जिह्वामूलीयं न मन्यते, किन्तु कण्ठ्यं मन्यते" इति विपरीतज्ञापनं तु **याज्ञवल्क्यशिक्षा**दिना सह विरोधापत्त्या न कर्तव्यम् ।

कवर्गस्य जिह्वामूलीयहनुमूलीयत्वयोश्च पक्षे भाषावैज्ञानिकैः सह समन्वयः

कवर्गस्य जिह्वामूलीयत्वस्वीकारे भाषावैज्ञानिकैः[2] सह अंशतः समन्वयो भवितुं शक्यते । आधुनिकशब्दशास्त्रिणः कवर्गम् कोमलतालुजन्यम्, प्रातिशाख्यकाराश्च कवर्गं जिह्वामूलाभिजन्यं मन्यन्ते । जिह्वामूले च द्वे वर्तेते—एकं जिह्वामूलं

१. "सप्त जिह्वामूलीयाः—ऋ ॠ ऌ इत्यृवर्णः, ≍ क क ख ग घ ङ" इति ।

२. "कोमल तालु (लुचलुचे तालु) पर उत्पन्न हुई ध्वनियों को आज भी कण्ठ्य कहते हैं । यद्यपि यह नाम बहुत उपयुक्त नहीं क्योंकि यह स्थान कण्ठ से भिन्न है ।" —बाबूराम सक्सेना, एम० ए०, डी०लिट्० कृते सामान्यभाषाविज्ञाने, पृ० सं० ७३ ।

कोमलताल्वैकदेशे तालुमूले विद्यते—या च मुखे विस्फारिते सति कोमलतालुनि लम्बायमाना दृश्यते । उक्तञ्च श्रीमद्**भागवते**—

"मुखतस्तालु निर्भिन्नं जिह्वा तत्रोपजायत" । (२।१०।१८) इति ।

तत्रेत्यस्य तालावित्यर्थः । जिह्वामूलं कवर्गस्य स्थानं करणमित्युभयमपि विद्यते—इति पूर्वमेव प्रतिपादितम् । केवलमधोजिह्वामूलमेव स्थानं करणमित्युभयमपि भवितुं न शक्यते; यतो हि कवर्गस्य स्पृष्टः प्रयत्नो विद्यते । अधोजिह्वामूलमेव स्वमात्मानं स्प्रष्टुं न शक्नोति । एवमूर्ध्वजिह्वामूलमपि स्वात्मानं स्प्रष्टुं न समर्थम्; यतो हि स्पर्शो द्विष्ठो भवति । अत एकं जिह्वामूलमपरजिह्वामूलं स्पृशति । तत्रोर्ध्वजिह्वामूलस्याधोजिह्वामूले स्पर्शोऽसम्भवः, अतोऽधोजिह्वामूलमेवोर्ध्वजिह्वामूलं स्पृशतीति कवर्गस्योर्ध्वजिह्वामूलं स्थानम्, अधोजिह्वामूलञ्च करणं निष्पद्यते । तत्र कवर्गस्य जिह्वामूलीयत्वात्, जिह्वामूलस्य च कोमलतालौ विद्यमानात् "कवर्गस्तालव्यः, कवर्गो जिह्वामूलीयः" इत्युभयव्यपदेशो भवितुमर्हति । एवं कवर्गस्य स्थानविषये भाषावैज्ञानिकैः सह समन्वयो भवितुमर्हति ।

तैत्तिरीयप्रातिशाख्यानुसारेण तु कवर्गस्य कोमलतालुजन्यत्वमतिशयेन दृढतां भजति । **तैत्तिरीयप्रातिशाख्ये** कवर्गस्थानं हनुमूलम्, करणञ्च जिह्वामूलं प्रोक्तं । जिह्वामूलपदेन अधोजिह्वामूलस्य, हनुमूलपदेन च ऊर्ध्वहनुमूलस्य ग्रहणं बोध्यम् । यतो हि अधोजिह्वामूलम् अधोहन्वस्थिमूलमाश्रितम्, तस्य चेष्टया तदपि चेष्टावद् । "हनुमूले जिह्वामूलेन कवर्गे स्पर्शयति" (तै० प्रा० २।३५) इत्येतत्सूत्रघटके "हनुमूले" इत्यत्र औपश्लेषिकाधिकरणार्थे सप्तमी । अथ अधोजिह्वामूलेन ऊर्ध्वहनुमूलैकदेशे तदुपश्लिष्टकोमलतालौ, ऊर्ध्वजिह्वामूले वा कवर्गोच्चारणे कर्तव्ये स्पर्शो विधेयः । एवं "हनुमूले" इत्यत्र औपश्लेषिकाधिकरणमङ्गीकृत्य नूतनैर्भाषाविद्भिः सह प्राचां समन्वयः ।

परन्तु हिन्दीभाषीयश्चवर्गः कठोरतालव्यः, संस्कृतभाषीयः कवर्गः कोमलतालव्यः इत्येवं भाषाभेदेन वर्णस्थानभेदो न कल्पनीयः; यतो हि देवभाषायां कवर्गाद्युच्चारणे कर्तव्ये यस्मिन्नेव[1] स्थाने वायुप्रतिघातः सञ्जायते, तस्मिन्नेव[2] स्थाने हिन्दीभाषायामपि कवर्गाद्युच्चारणे कर्तव्ये वायुप्रतिघातः सञ्जायते । केवलं वायुप्रतिघातभेदो विद्यते । संस्कृतभाषायाम् "कष्ट" इत्यादिषु पदेषु ककारस्य "संयोगे गुरु" इति गुरुसंज्ञकत्वात् तदुच्चारणे कर्तव्ये अतिशयेन वायुः प्रतिहन्यते, हिन्दीत्यादिभाषासु च "कलियाँ" इत्यादिशब्देषु ककारस्यागुरुत्वयाऽल्प एव वायुः पीड्यते । एवं वायुपीडनभेदेन कवर्गादीनां भेदः कल्पयितुं शक्यते, किन्तु स्थानभेदकल्पनमयुक्तमेव विद्यते ।

१, २—यस्मिन् तस्मिन्नत्यत्र औपश्लेषिकाधिकरणम् । औपश्लेषिकपदेनञ्चैकदेशावच्छिन्नस्य, तत्समीपस्थदेशस्य च अर्थो ग्रहीतव्यः ।

एवं "कवर्गं तालव्यं ब्रूयात्, न तु कण्ठ्यम्" इत्येतावतांशेनैव प्रातिशाख्येन सह श्रुतार्थापत्त्या समन्वयो भवितुं शक्यते। परन्तु तालौ जिह्वाया जायमानत्वाज्, जिह्वामूलस्य च तत्र भवत्वात् स देशो जिह्वामूलपदेनैवोच्यते। यथा एकस्यैवाकाशस्य घटमठाद्युपाधिवशाद् "घटाकाशो मठाकाशः" इत्यादिव्यपदेशो भवति, एवं तालुनो यस्मिन् देशे ऊर्ध्वं जिह्वा जाता, स देशो जिह्वामूलोपाधिवशाज्जिह्वामूलमुच्यते। एवञ्च, उपाधिवशाज्जिह्वामूलं तालुस्थानाद् भिन्नं विद्यते।

चवर्गादेरभिव्यक्तिप्रक्रिया

एवं चवर्गादेरभिव्यक्तिरपि विवक्षया तात्वादिस्थानस्याधोभागे जिह्वायाः संश्लेषे सति तत्तत्स्थानस्य च ऊर्ध्वभागे वायुसंयोगे सति अकारादिस्वरेण सहोच्चारणस्य चेष्टायां सत्याम्, तत्तत्स्थानेभ्यो जिह्वासंश्लेषस्य विमोके सति सञ्जायते। परन्तु पवर्गस्याभिव्यक्तिप्रक्रिया कवर्गादिस्पृष्टवर्णाभिव्यक्तिप्रक्रियातो विलक्षणा प्रतिभाति। अन्येषां स्पृष्टवर्णानामभिव्यक्तौ जिह्वायास्तत्तत्स्थानैः सह संश्लेषाद् वायुस्तालुनोऽधोभागे न समवतरति; परन्तु पवर्गाभिव्यक्तौ केवलमोष्ठद्वयमेव व्यापृणोति, जिह्वा तु निर्व्यापारा प्रशान्ता सती शेते। अतः प्राणवायुः सृक्विणीद्वयस्य परस्परं यत्र संश्लेषस्तत्स्थानं विहाय परिशेषं सर्वमोष्ठस्य स्थानं पवर्गाभिव्यक्तेः प्राग्वायुः संस्पृशति, अभिहन्ति च। परस्परं संश्लिष्टयोरोष्ठप्रान्तयोः सम्बन्धविच्छेदे सति पवर्गोऽभिव्यज्यते।

ङञणनमकाराणामभिव्यक्तिप्रक्रिया

ङकाराद्यनुनासिकवर्णानां नासिका एव वर्गाभिव्यक्तिजनकतात्वादि च स्थानं विद्यते। तत्र ङकाराद्युच्चारणे कर्तव्ये पूर्वं जिह्वाया मूलादिभागाः तत्तद्वर्णाभिव्यक्तिजनकस्थानं संश्लिश्य कोष्ठकं रचयन्ति, तदनन्तरं मूर्धदेशात् प्रत्यागतो वायुस्तत्तद्वर्णाभिव्यक्तिजनकस्थानेष्ववरुद्धः सन् प्रतिघातं करोति। अकारादिस्वरसहितङकाराद्युच्चारणस्य चेष्टया संश्लिष्टस्थानेन सह जिह्वायाः सम्बन्धविच्छेदेन कोष्ठके भिद्यमाने सति वायुः स्वरयन्त्रं निहत्य नासिकाविवरेण निःसरति। यावत्कालं जिह्वा संश्लिष्टस्थानं त्यक्त्वा स्वस्थानं गच्छति, तावत्कालं ङकारादिश्रुतिर्भवति। अत्र ङकाराद्युच्चारणे कर्तव्ये पूर्वं वायुः कण्ठादिस्थानान्यभिहन्ति, तदनन्तरमभिव्यक्तिवेलायां स्वरयन्त्रं प्रतिहत्य नासिकाविवरं निघ्नन् बहिर्निःसरति। अत्र विनिगमकश्च ङकाराद्युच्चारणे कर्तव्ये सर्वप्रथमं तत्तस्थानेषु जिह्वायाः स्पर्शमेव। यथा चवर्गोच्चारणे कर्तव्ये प्राग् जिह्वायाः स्थानेन सह संश्लेषे जाते सति वायुः सर्वप्रथमं तालुस्थानेऽवरुद्धः सन् प्रतिघातं करोति, स्थानेन सह जिह्वासम्बन्धविच्छेदानन्तरश्च स्वरयन्त्रं निघ्नन् मुखविवरेण बहिर्निःसरति, तदनन्तरं चवर्गश्च श्रूयते। एवं ङकाराद्युच्चारणे कर्तव्ये जिह्वायाः स्थानेन सह संश्लेषे सति वायुः कोष्ठकेऽवरुद्धः सन् प्रतिहतो भवति। पश्चात् कोष्ठके भिद्यमाने सति स्वरतन्तुं प्रकम्प्य किञ्चिन्नासिकाविवरेण किञ्चिच्च मुखाद् बहिर्निःसरति। एवं

ङकाराद्युच्चारणात् प्राक् जिह्वामूलादिभागस्य सर्वप्रथमं स्थानैः सह संश्लेषात् पूर्वं स्थानेषु वायु संयोगः, तदनन्तरमुच्चारणवेलायां नासिकया सयोगः स्वीकार्यः।

एवं "कं खं" इत्याद्यनुस्वाराणां, पलिक्क्नीत्यादियमानामभिव्यक्तिविषये पूर्वोक्तदिशा विचारणीयम्। एतेषां स्थानञ्च नासिका विद्यते। "अयोगवाहाः विज्ञेयाः" (पा० शि० २२) इति शिक्षायां तु अयोगवाहपदेन "यमानुस्वाराणाञ्च" (पा० शि० २२) इत्यत्र यमानुस्वराणां नासिकास्थानस्य प्रतिपादनेनानयोर्ग्रहणं न कर्तव्यम्, किन्त्वन्येषां विसर्जनीयादीनामेव कर्तव्यम्। तेन "यमानुस्वारनासिक्यानां नासिके" (शु० य० प्रा०) इत्यनेन न विरोधः। वस्तुतः पूर्वोक्तङकाराद्यभिव्यक्तिप्रक्रियानुसारेणानुनासिकपदस्य "अनु पश्चान्नासिका व्याप्रियतेऽस्मिन्नित्यनुनासिकः" इत्येवं यौगिकत्वं समायाति।

कवर्गाद्यभिव्यक्तौ गलविवरस्य परिस्थितिः

कवर्गाद्यभिव्यक्तौ मुखान्तर्गता या प्रक्रिया जायते सा व्याख्याता। कवर्गाभिव्यक्त्यनन्तरं गलविवरे स्वरतन्तुद्वये वा विशेषा परिस्थितिः समुत्पद्यते। "प्रत्येकं वर्गेषु पञ्च वर्णाः" इति समेषां विदितचरम्। 'क ख' इति प्रथमद्वितीयवर्णयोरभिव्यक्त्यनन्तरं स्वरतन्तुद्वयं परस्परं विवृतं जायते। स्वरतन्तुद्वयस्य परस्परं विवृतत्वाद् वायुमार्गस्यावरोधः पूर्णतया न जायते। वायुमार्गस्यांशिकरूपेणावरोधाच्छ्वासवायुः सरलतया निःसरति। स्वरतन्तुद्वयस्य परस्परमतिशयेन संश्लेषाभावाद् अनयोर्वर्णयोः समुच्चारणं श्वासात्मकं जायते। अनयोरुच्चारणस्य श्वासात्मकत्वाच्च घोषो न समुत्पद्यते। अकारादिस्वरेण सह "क ख" इत्यनयोरुच्चारणे यद् घोषत्वं प्रतीयते, तत्तु अकारादिस्वरसम्पर्कात्।

"ग घ ङ" इत्येषामुच्चारणे तु स्वरतन्तुद्वयस्य परस्परं संश्लेषः, कण्ठविवरस्य च सम्वरणं जायते। कण्ठविवरस्य परस्परं सङ्कोचात् प्राणवायुः स्वरतन्तुं घर्षयन् बहिर्निःसरति। स्वरतन्तुद्वयस्य परस्परं वायुना पूर्णरूपेण घर्षणाच्चैतेषां वर्णानामुच्चारणे नादात्मकता प्रतीयते।

एवं प्रत्येकं वर्गाणां प्रथमद्वितीयवर्णयोः, तृतीयचतुर्थपञ्चमवर्णानाञ्च समुच्चारणे गलविवरस्य परिस्थितिः कवर्गवद् वेदितव्या। कवर्गस्य प्रथमद्वितीयपञ्चमवर्णानामिव अल्पप्राणता, द्वितीय-चतुर्थवर्णयोरिव महाप्राणता च अन्येषामपि वर्गाणां वेदितव्ये।

आभ्यन्तरस्थानप्रयत्नयोरैक्येऽपि विभिन्नवर्णानामभिव्यक्तिर्बाह्यप्रयत्नस्य नाभिदेशस्थप्रयत्नस्य, अथ च वक्तुर्विवक्षाया भेदाज्जायते। यथा कवर्गघटिताः खकारादयः। ककारखकारयोर्यद्यपि समाना एव बाह्यप्रयत्नाः, तथाप्येकस्याल्पप्राणता द्वितीयस्य तु महाप्राणता विद्यते। अपरश्च महत्कारणं वक्तुर्विवक्षाभेदो विद्यते। अत एव आभ्यन्तरस्थानप्रयत्नयोः, विवारादिबाह्यप्रयत्नानाञ्च समत्वेऽपि प्राण-

स्याल्पत्वमहत्त्वभेदवशाद्, नाभिप्रदेशस्यप्रयत्नभेदाच्च "क ख" इति परस्परं विलक्षणवर्णौ अभिव्यज्येते । इत्थमन्येषामपि वर्णानां विषये समूहनीयम् ।

बाह्यप्रयत्नानामैक्येऽपि विभिन्नवर्णस्याभिव्यक्तिस्तु ताल्वादिस्थानस्य, यद्वा आभ्यन्तरप्रयत्नस्य भेदाद् बोद्धया । यथा "क च ट त प" इति वर्णपञ्चकम् । एतेषां जिह्वामूलीयादिस्थानभेदो विद्यते ।

क्लिष्टकोष्ठक-कोमलकोष्ठकवर्णनिर्देशः

एते कवर्गादिस्पृष्टवर्णाः क्लिष्टकोष्ठका मन्तव्याः; यतो हि एतेषामुच्चारणे कर्तव्येऽन्यवर्णापेक्षया जिह्वायाः स्थानेष्वत्यन्तं संश्लेषः, वायुप्रतिघातश्च गम्भीरतया जायेते । यकारादिवर्णचतुष्टयं[1] तु कोमलकोष्ठकं मन्येत । एतेषामुच्चारणे कर्तव्ये स्थानेष्वीषत्स्पर्शः, ईषच्च वायुप्रतिघातो जायते । कोमलकोष्ठकवर्णानां स्थानानि क्रमेण तालुमूर्धदन्तौष्ठाः, करणञ्च जिह्वामध्यादिभागाः सन्ति । ईषत्स्पृष्टश्च प्रयत्नो बोद्धयः । ताल्वादिस्थानैः सह जिह्वामध्यादिकरणानामीषत्संश्लेषे सति तत्तस्थानेषु वायुना प्रतिघातादभिव्यज्यन्ते । एवं विवृतप्रयत्नकस्य शकारादिवर्णचतुष्टयस्यापि[2] स्थानेषु वायुप्रतिघातादिनाऽभिव्यक्तिर्बोध्या ।

यण्-शलोरभिव्यक्तौ गलविवरस्य परिस्थितिः

यणां हकारस्य चाभिव्यक्तौ गलविवरस्य सैव परिस्थितिर्जायते या परिस्थितिः स्पर्शसंज्ञकानां प्रत्येकं वर्गाणां तृतीय-चतुर्थपञ्चमवर्णानां समुच्चारणे जायते । एतेषां (हकारं विहाय) वर्गाणां प्रथम-तृतीय-पञ्चमवर्णवद् वेदितव्याऽल्पप्राणता ।

शलाम् (हकारं विहाय) अभिव्यक्तौ तु स्पर्शसंज्ञकानां प्रत्येकं वर्गाणां प्रथम-द्वितीयवर्णोच्चारण इव गलविवरस्य परिस्थितिर्वेदितव्या । एतेषां महाप्राणताऽपि प्रतिवर्गं द्वितीय-चतुर्थवर्णवद् वेदितव्या ।

कोष्ठकभेदकवर्णविचारः

एतेषां कवर्गादीनामुच्चारणात् प्राग् जिह्वामूलादीनां तत्तद्वर्णाभिव्यक्तिजनकस्थानैः सह संश्लेषो जायते, अतस्तेषां वर्णानां कोष्ठकसंज्ञा कृता । कवर्गादीनां परश्रोत्रग्राह्यता कोष्ठकभेदनं विना न जायते । यावत्कालं जिह्वामूलादिभागस्तत्तत्स्थानं संस्पृश्य तिष्ठति, तावत्कालं कवर्गादिकं न श्रूयते । कोष्ठकभेदनान्तरमेव कवर्गादीनां परश्रोत्रग्राह्यता निष्पद्यते । कोष्ठकभेदनञ्च स्वरसहितोच्चारणं बिना न शक्यते । केवलं "क् ख् ग्" इत्यादीनामुच्चारणमेव न भवति । केवलं 'क्' इत्यस्योच्चारणचेष्टायां जिह्वा ताल्वादिस्थानैः सह संसक्ता एव चेष्टते । किन्तु यस्मिन्नेव क्षणे 'अ' इति स्वर उच्चार्यते, तस्मिन्नेव क्षणे जिह्वासंश्लेषविच्छेदात्

१. "य, र, ल, व" इत्येते वर्णाः ।
२. "श, ष, स, ह" ,, ,, ।

कोष्ठकं भिद्यते, कोष्ठकभेदनान्तरं कवर्गादीनां परश्रोत्रग्राह्यता स्वश्रोत्रग्राह्यता वा निष्पद्यते । अतोऽकारादिस्वरेषु कोष्ठकभेदनसामर्थ्यं विद्यते । अत एव कवर्गाद्यभिव्यक्तिप्रक्रियाया निरूपणे "अकारादिस्वरसहितकवर्गोच्चारणचेष्टायाम्, अकारादिस्वरसहितचवर्गोच्चारणचेष्टायाम्" इत्याद्युक्तम् ।

एतेऽकारादिस्वराः विवृतप्रयत्नका अप्युच्यन्ते । एतेषामेतदेव विवृतत्वं यत् स्वशक्त्या व्यञ्जनवर्णानां कोष्ठकं विवार्य स्वयमुच्चारिता भवन्ति, स्वाभिव्यक्त्यर्थं कस्यचित्साहाय्यं नापेक्षन्ते । अतः स्वरा व्यञ्जनापेक्षया शक्तिमत्तमाः सन्ति । अत एव **नारदशिक्षायाम्**—

> दुर्बलस्य यथा राष्ट्रं हरते बलवान्नृपः ।
> दुर्बलं व्यञ्जनं तद्वद्धरते बलवान् स्वरः ॥ इति ॥

तथा च बलवान् स्वरः कोष्ठकं भित्त्वैव हर्तुं समर्थः, नान्यथा । यथा बलवान् राजा यावत्कालं दुर्गं न विदारयति, तावत्कालं दुर्गे सुरक्षितं राजानं पराजित्य तद्राज्यं हर्तुं न प्रभवति । दुर्गे विदारित एव तद्राज्यमधि हर्तुं शक्नोति । एवमकारादिस्वरो यावत्कालं जिह्वायाः ताल्वादिस्थानैः सह संश्लेषेण निर्मितं कोष्ठकं न भिनत्ति, तावत्कालं कोष्ठके सुरक्षितं कवर्गादिव्यञ्जनं हर्तुं न शक्नोति । कोष्ठके विदारित एव कवर्गादिकं हर्तुं समर्थः । एवं कवर्गादिवर्णा अकारादिस्वराधीनाः । कवर्गादिव्यञ्जनानामकारादिस्वराधीनत्वादेव "न ह्यन्तरेणाचं व्यञ्जनस्य पुनरुच्चारणं भवति" इत्युच्यते । "धुक्, धुग्" इत्यादिषु "क् ग्" इत्यर्धमात्रिककारादीनामुच्चारणमुकारादिस्वराश्रयेणैव भवति । अर्धमात्रिकव्यञ्जनात् पूर्वं स्वरस्य सत्त्वे कवर्गादिवर्णस्य "क" इत्याद्यर्धमात्रिकम् उच्यते । अर्धमात्रिकव्यञ्जनात् परं स्वरस्य सत्त्वे तु "धु" इत्यादि पूर्णमात्रिकमुच्चार्यते । यथा 'धुक्, धुग्" इत्यत्र धकारात् परमुकारस्य सत्त्वाद् "धु" इति पूर्णमात्रिकम्, ककारात्परं कस्यचिदपि स्वरस्यासत्त्वात्, तत्पूर्वञ्च उस्वरस्य सत्त्वात् 'क्' इत्यर्धमात्रिकमुच्चार्यते । यदि धकारक्कारयोर्मध्ये उस्वरो न स्यात्, तर्हि नैव धकारस्य, न वा ककारस्योच्चारणं सम्भवतीति व्यञ्जनानां स्वराधीनत्वं सर्वथा सिद्धयति । स्वराणां तूच्चारणं न कस्यचिदधीनं विद्यते । अत एव "स्वयं राजन्त इति स्वराः" इति स्वरशब्दस्य व्याख्या क्रियते ।

अकारादिस्वराणामभिव्यक्तिः

स्वराणां मध्येऽकारः प्रथमः स्वरो विद्यते । अकारोच्चारणेच्छायां सर्वप्रथममधोहनुमध्यभाग एवं यत्नं करोति, येन अकारोच्चारणे कर्तव्ये कण्ठदेशं वायुः प्रतिहन्यात् । अधोहनुमध्यभागस्य चेष्टया समुत्थितो वायुः सुषुम्नारन्ध्रं प्रविश्य ततश्च प्रत्यावर्त्य तालुमार्गेण (श्वासविवरमाध्यमेन) कण्ठदेशं प्राप्य प्रतिहन्ति । ततोऽकारः परश्रोत्रेण स्वश्रोत्रेण वा गृह्यते । अकारोच्चारणवेलायामपि विवृतप्रयत्नस्य सुरक्षितत्वाद् यावत्कालमकारोच्चारणेच्छा भवति

तावत्कालमकार उच्चारयितुं शक्यते। अतवजातप्रवच्छिन्नस्य सकलाकारस्य स्वयमेवाभिव्यक्तिर्जायते।

इकारादिस्वराणामप्येवमेव ताल्वादिस्थानप्रयत्नवायुप्रतिघातादिना अभिव्यक्ति वेदितव्या।

अकारादिस्वराभिव्यक्तौ गलविवरस्य परिस्थितिः

अकारादिस्वराणामुच्चारणे गलविवरं स्वरतन्तुद्वयञ्च परस्परं सम्वृतं सञ्जायेते। स्वरतन्तुद्वयस्य सम्वरणात् तत्र वायोः संघर्षणाच्च नादः, नादाच्च घोषः समुत्पद्यते। अतएव स्वराः सम्वारनादघोषप्रयत्नकाः। उक्तञ्चैतद् भट्टोजीदीक्षितविरचितायां **वैयाकरणसिद्धान्तकौमुद्यां** संज्ञाप्रकरणे— 'खयां यमाः खयः" इति श्लोकस्य व्याख्यावसरे। तद्यथा– "अन्येषां तु संवारो नादो घोषश्च"। अन्येषामित्यस्य "अचां हशां तद्यमानाञ्च" इत्यर्थः।

द्वितीयपरिच्छेदस्य तृतीयं प्रकरणम्

३. वर्णविभाजनम्

जगति व्यवहृतासु सर्वास्वपि भाषासु मुख्यतया वर्णानां भागद्वयं विद्यते— १. स्वरः, २. व्यञ्जनञ्च।

स्वरव्यञ्जनयोः सामान्यो विभागः

प्रातिशाख्यकाराः समानाक्षरादिभेदैः स्वरान् भागद्वये विभक्तवन्तः। तद् यथा—(१) समानाक्षराणि, (२) सन्ध्यक्षराणि च। अकाराद्यृकारान्ताः स्वराः समानाक्षरसंज्ञकाः (समानमेकमक्षरं येषु ते समानाक्षराः), एकाराद्यौकारान्ताश्च सन्ध्यक्षरसंज्ञकाः प्रोच्यन्ते। वस्तुतस्तु समानाक्षरादिसंज्ञादृशा स्वराणां भागत्रये विभागः कर्तव्यः। तद्यथा—(१ समानाक्षरः, (२) स्वरव्यञ्जनोभयात्मकः, (३) सन्ध्यक्षरश्च। स्वरव्यञ्जनोभयात्मकञ्च "ऋ ऌ" इतिवर्णद्वयं बोद्धव्यम्।

व्यञ्जनवर्णाश्च सामान्यरूपेण भागत्रये विभक्ताः। तदित्थम्— (१) स्पर्शाः, (२) अन्तस्थाः, (३) ऊष्माणश्च इति। कादयो मावसानाः स्पर्शाः, यकारादिवान्ता अन्तःस्थाः, शकारादयश्चत्वारो वर्णाः, विसर्जनीय[1] जिह्वामूलीयोपध्मानीयानुस्वाराश्च ऊष्माणः प्रोच्यन्ते। स्पर्शवर्णानामुच्चारणे जिह्वाया स्तत्तत्स्थानेषु स्पर्शास्ते स्पर्शसंज्ञया, ऊष्मवर्ण-स्पर्शवर्णयोर्मध्ये अन्तस्थानाञ्च पाठात्तेऽन्तःस्थसंज्ञया, शकारादीनामुच्चारणे च वायौ उष्णताया आधिक्यात् ते ऊष्मसंज्ञया व्यवह्रियन्ते। इति स्पर्शादयोऽन्वर्थाः संज्ञाः सन्तीति बोद्धव्यम्। एवं समानाक्षरेत्यादिका अपि पूर्वोक्ताः संज्ञा अन्वर्थिका एव अवगन्तव्याः। इदं च वर्णानां सामान्यं विभाजनं व्याख्यातम्।

अकारादिवर्णानां विशेषरूपेण विभाजनम्

अकाराद्यक्षराणां पूर्वोक्तातिरिक्ताः विशेषरूपेण पञ्च विभागाः **पाणिनीयशिक्षादिषु** दृष्टिपथमवतरन्ति। तद्यथा—

वर्णान् जनयते तेषां विभागः पञ्चधा स्मृतः।
स्वरतः कालतः स्थानात् प्रयत्नानुप्रदानतः॥
इति वर्णविदः प्राहुर्निपुणं तं निबोधत॥ (पा० शि० १०)

---

१. "उत्तरे अष्ट ऊष्माणः" (ऋ० प्राति० प० २, सू० १०) इत्यस्योव्वटभाष्ये विसर्जनीयादीनामप्यूष्मसु ग्रहणं विद्यते। **महाभाष्य**कारपतञ्जल्यादयस्त्विमान् अयोगवाहसंज्ञया व्याचक्षत। तथा चोक्तम्—"के पुनरयोगवाहाः? विसर्जनीयजिह्वामूलीयोपध्मानीयानुस्वारयमाः" इति पस्पशाह्निकेऽयोगवाहोपदर्शाधिकरणे।

इति स्मर्यते। उदात्तादिमात्रादिकाल-कण्ठादिस्थान-आभ्यन्तरबाह्यप्रयत्न-भेदेन वर्णाः पञ्चप्रकाराः अवबुध्यन्ते इति तत्तात्पर्यं स्पष्टतया प्रतिस्फुटति।

कालतो विभाजनम्

यद्यपि **पाणिनीयशिक्षायां** सर्वप्रथमं स्वरत एव अकारादीनां विभागो व्याख्यातस्तदनुसारेण स्वरतो विभाजनं सर्वप्रथमं प्रतिपादयितुमापतति, तथापि पाणिनेरष्टाध्याय्याम् उदात्तादिसंज्ञाविधायकसूत्राणां प्रणयनात् पूर्वं निमेषादि-कालनियन्त्रितह्रस्वादिसंज्ञाविधायकसूत्राणां प्रवचनात्, तेनैव क्रमेण च भट्टोजी-दीक्षितप्रणीतायां **सिद्धान्तकौमुद्याम्** अकाराद्यक्षराणांविभागस्य प्रतिपादनात् तामेव सरणिमाश्रित्य पूर्वं कालत एव विभाजनं व्याचक्षे।

अर्धमात्रादिभेदेन[1] चत्वारः कालाः अकाराद्यक्षरेषु दृश्यन्ते। ते यथा–१. अर्ध-मात्राकालः, २. एकमात्राकालः, ३. द्विमात्राकालः, ४. त्रिमात्राकालश्च।

एतेषां मध्येऽर्धमात्राकालो व्यञ्जनेषु भवति। व्यञ्जनानाञ्च विभागः स्वरेभ्योऽनन्तरं व्याख्यास्यते। एक-द्वि-त्रिमात्रकालाः स्वराणां स्मर्यन्ते, ते च क्रमशः ह्रस्वदीर्घप्लुतसंज्ञया व्यवह्रियन्ते। निमेषकालपरिमिता अकाराद्य्लृकारान्ताः स्वरा ह्रस्वसंज्ञाम्, तद्द्विगुणकालपरिमिता आकाराद्यौकारान्ताः दीर्घसंज्ञाम्, निमेषकालत्रयपरिमिताश्च स्वराः प्लुतसंज्ञां भजन्ते।

मात्राकालपरिमाणम्

अव्यवहितोत्तरत्वेन त्रिःसमुच्चारिते ककारसहितोकारात्मके कुक्कुटरुते क्रमश एकद्वित्रिमात्राकालानां प्रसिद्धिर्विद्यते। अतएव भगवान् पाणिनिर्ह्रस्वादि-संज्ञाविधायके "ऊकालोऽच्" (१।२।२७) इति सूत्रे "ऊकालः" इति प्रोक्तवान्, न तु 'उकाल' इति प्रोक्तवान्। **याज्ञवल्क्यादिशिक्षासु** मात्राकालस्य परिमाणं बहुशो व्याख्यातम्। तद्यथा **याज्ञवल्क्यशिक्षायाम्**—

> निमेषो मात्राकालः स्याद्, विद्युत्कालस्तथा परे।
> अक्षरात्तुल्ययोगाच्च, मतिः स्यात् सोमशर्मणः॥ इति॥

अत्र याज्ञवल्क्यो मात्राकालस्य लक्षणत्रयं व्याचष्टे। तद्यथा—(१) निमेषः, (२) विद्युत्कालः, (३) अक्षरात्तुल्ययोगाच्च इति। निमेष इत्यस्य निमेषपरिमितः, विद्युत्काल इत्यस्य च यावत्कालं चपला विद्योतते तावत्कालपरिमित इति तात्पर्यं बोद्धव्यम्। "अक्षरात्तुल्ययोगात्" इत्यत्र ल्यब्लोपे पञ्चमी विद्यते। तेनैकव्यञ्जन-मुच्चार्य अग्रे असन्ध्यक्षरयोगं प्राप्य यावान् कालो मध्ये परिसमाप्यते तावान् एक-

१. एकमात्रो भवेद्ध्रस्वो द्विमात्रो दीर्घ उच्यते।
त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनं चार्धमात्रिकम्॥(या० व० शि० १६)

मात्रायाः कालोऽवगन्तव्यः। इति। तस्य च द्विगुणस्त्रिगुणश्च कालो द्वित्रिमात्रयोः क्रमशो निष्पद्यते।

एवञ्च एकमात्राकालादिभेदेन अकाराद्यक्षराणि भागचतुष्टये विभक्तानीति प्रस्फुटं जातम्।

२. स्वरतो विभाजनम्

उदात्तानुदात्तस्वरितभेदेन च स्वरास्त्रयः स्मृताः। एते उदात्तादयोऽकारा-दीनां धर्मा ह्रस्व-दीर्घ-प्लुतसंज्ञकेष्वेवावतिष्ठन्ते। अत उदात्तादिभेदेन अकाराद्योकारान्ताः वर्णा एव विभाजयितुं शक्याः, न तु व्यञ्जनानि। उदात्तादीनां लक्षणम् "उच्चैरुदात्तः", "नीचैरनुदात्तः", "समाहारः स्वरितः" इत्यादिपाणिनीयसूत्रेषु बहुशो व्याख्यातम्। ह्रस्वादिभेदेन एते उदात्तादयोऽपि बेभिद्यन्ते। तद्यथा—ह्रस्वदीर्घप्लुतभेदेन उदात्तत्रयम्, अनुदात्तत्रयम्, स्वरित-त्रयञ्च। एते च सर्वे सम्भूय नवभेदा जायन्ते। अनुनासिकाननुनासिकभेदेन तेषा-मष्टादश संख्या युज्यते। श्रीभट्टोजीदीक्षितस्य कौमुद्यनुसारम् अकाराद्यृकारान्ता ह्रस्वोदात्तादिभेदेन अष्टादश प्रकाराः, दीर्घाभावाच्च ऌकारो द्वादशभेदः। ह्रस्वा-भावच्च एकारस्य ओकारस्य द्वादश, एवमैकारस्य औकारस्य च द्वादश भेदा अवगन्तव्याः। **शुक्लयजुःप्रातिशाख्यादिषु** ऌकारस्य दीर्घदर्शनात् तस्याऽपि अष्टादशभेदान् स्वीकर्तुमापतति।

उदात्तादिवर्णधर्माणां वैशिष्टयम्

यद्यपि उदात्तत्वादीनां वर्णधर्माणामाभ्यन्तरप्रयत्नेभ्यो भिन्नतया सवर्ण-संज्ञायामनुपयोगाद् गौणत्वं प्रोक्तम्, तथाऽपि लोके वाक्यार्थविगतौ, वाक्यतात्पर्य-बोधे वा तेषामेव प्राधान्यं लोके वेदे च बहुत्र दृष्टिगोचरीभवति। यथा लोके यदि कश्चिद् उदात्तस्वरेण कमपि किञ्चित् प्रवक्ति, तदा तस्य वाक्यस्य क्रोधादि-तात्पर्यद्योतनपूर्वकोऽर्थोऽवभासते, अनुदात्तस्वरेण समुच्चारिते तु तद्भिन्नमेवार्थं प्रत्येति। किं बहुना, चीनदेशे एकस्यैव वर्णस्योदात्तादिभेदेन अर्थोऽतितरां बेभिद्यते। यथा—"क्वेइ क्वोक" शब्दे इकारस्य उदात्तस्वरेण उच्चारणे सति "दुष्टो देशः" इत्यर्थोऽवगम्यते, तस्य च अनुदात्तस्वरेण समुच्चारणे तु "विशिष्टदेशः" इत्यर्थः पूर्वार्थापेक्षया भिन्न एव जायते। एवमफिरिकीभाषायामपि एकस्यैव शब्दस्य अर्था भेदं प्राप्नुवन्ति।

वेदेष्वपि उदात्तादिभेदेन एकस्यैव पदस्यार्थभेदो बहुशो दृष्टिपथं समायाति।

१. "ऐसे वाक्यों में स्वर भी बड़ा अर्थभेद उत्पन्न करते हैं। जैसे क्वेइ क्वोक का उच्चारण करने में यदि इ पर उदात्त स्वर रहता है तो उसका अर्थ होता है दुष्ट देश और यदि उसी 'इ' पर अनुदात्त स्वर रहता है तो उसका मान्य अथवा विशिष्ट देश अर्थ होता है"।—प्रभुनारायणशर्मकृते भाषाविज्ञानतत्त्वे एतदीयोंऽशो द्रष्टव्यः।

तथा चोक्तम्—"दुष्टः शब्दः स्वरतो वर्णतो वा" इति एकदा वृत्रासुर इन्द्रस्याभिचारं प्रारब्धवान्। तस्मिन्नभिचारयज्ञे "इन्द्रशत्रुर्वर्धस्व" इति मन्त्र ऋत्विजा समूहितः। इन्द्रशत्रुपदे शत्रुशब्दः शातयित्रर्थे विद्यते। "इन्द्रशत्रुः" इत्यत्र उकारस्यान्तोदात्तत्वे सति "इन्द्रस्य नाशको भव" इत्यर्थः समुपलभ्यते। आद्युदात्ते (इकारस्योदात्ते) कृते तु "इन्द्र एव शातयिता नाशको यस्य स भव" इत्यर्थः पूर्वापेक्षया भिद्यते। ऋत्विजा "इन्द्रस्य नाशको भव" इत्यर्थेऽन्तोदात्ते कर्तव्ये आद्युदात्तः प्रयुक्तः, तेन इन्द्र एव वृत्रासुरस्य नाशकोऽभूद्, वृत्रासुरो व्यापादितश्च। एवम्प्रकारेण स्वरभेदेन अर्थभेदस्य बहून्युदाहरणानि समुपस्थापयितुं शक्यन्ते। तथा चात्र प्रसङ्गवशाद् उदात्तादिस्वरवैशिष्टचप्रतिपादनपूर्वकं तद्भेदेन अकारादिभेदं व्याचक्षि।

कण्ठादिस्थानभेदेन वर्णानां विभागः

अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा।
जिह्वामूलञ्च दन्ताश्च नासिकोष्ठौ च तालु च॥
(पा० शि० १३)

इति पाणिनीयशिक्षानुसारेण अकारादिवर्णानां कण्ठादिस्थानस्य अष्टसंख्यायाः सत्त्वात् तदनुसृत्य मतभेदपुरःसरं तेषामष्टौ भागाः क्रियन्ते, तद्यथा—

१. कण्ठ्यः—"अ ह" इति वर्णद्वयम्। [1]ऋगादिप्रातिशाख्यानुसारेण विसर्जनीयोऽपि कण्ठ्यः।

अ—पातञ्जलमहाभाष्ये चतुर्थाह्निके "तुल्यास्यप्रयत्नं सवर्णम्" (१।१।९) इति सूत्रे केषाञ्चिदाचार्याणां मतेऽकारस्य सर्वमुखस्थानत्वं प्रोक्तम्। तद्यथा—"सर्वमुखस्थानमवर्णमेक इच्छन्ति", "अवर्णनिष्पत्तौ सर्वमेव मुखं व्याप्रियते"– इति।

ह—ऋक्प्रतिशाख्ये[2] केषाञ्चिन्मतानुसारेण हकारस्य स्थानमुरः, तैत्तिरीयप्रतिशाख्ये[3] तु "परवर्तिस्वरस्य प्रथमो भागो यत्स्थानकस्तत्स्थानको हकारः" इत्युक्तम्।

विसर्जनीयः—विसर्जनीयस्यापि स्थानविषये मतभेदो दृश्यते। [4]कण्ठोरःस्थानकम्, आश्रयस्थानभागिनश्च विसर्जनीयं मन्यन्ते।

---

१. "ऋकारल्कारावथ षष्ठ ऊष्मा च जिह्वामूलीयाः प्रथमश्च वर्गः।" (ऋ०प्रा०, प० १।४१)।
२. "केचिदेता उरस्यौ" —ऋ० प्रा० प०१।४०।
३. "उदयस्वरादिसंस्थानो हकार एकेषाम्"—तै० प्रा० २।४७।
४. "प्रथमपञ्चमौ च द्वा ऊष्माणम्"—ऋ० प्रा० १३९।
"अयोगवाहा विज्ञेया आश्रयस्थानभागिनः"—पा० शि०, श्लो०२२।

२. जिह्वामूलीयः—कवर्गः। प्रातिशाख्येषु[1] च ≍ केति ऊष्मसंज्ञकोऽपि जिह्वामूलीयः प्रोक्तः।

कवर्गः—मतभेदेन कवर्गस्य हनुमूल-कण्ठस्थाने[2] अप्याचार्यैः स्वीकृते।

३. तालव्याः—इकारश्चवर्गः, यकारशकारौ च।

४. मूर्धन्याः—रेफऋकारौ, टवर्गश्च।

रेफः—अस्य वर्णस्य दन्त[3]मूलम्, दन्तमूलात् परम् ऊर्ध्व[4]भागः, [5]वर्त्स्वः, मूर्धा[6] च—इत्यादिस्थानानि मतभेदेन प्रातिशाख्यादिषु दृश्यन्ते।

ऋकारः—अयं वर्णो मतभेदेन जिह्वामूलम्[7], वर्त्स्व[8]मपि स्थानं भजति। टवर्गषकारयोः मूर्धन्यत्वे सर्वे एकमतयः।

५. दन्त्याः—ऌकार–लकार–सकारास्तवर्गश्च। (ऋग्वेदप्रातिशाख्ये[9] तु ऌकारो जिह्वामूलीयः)।

ऌकारस्य वर्त्स्वस्थानमपि केचित् स्वीकुर्वन्ति। तथा चोक्तं **तैत्तिरीयप्रातिशाख्यस्य** द्वितीयाध्याये–"उपसंहृततरे च जिह्वाग्रमृकारर्कारल्कारेषु वर्त्स्वेषूपसंहरति" (१८)। च–शब्देन हन्वोरन्वादेशः ऋकारे ऌकारे च कार्ये हनूपसंहृततरे भवतः। जिह्वाग्रं वर्त्स्वेषु उपसंहरति निक्षिपेत्त वर्त्स्वेषु इति दन्तपंक्तेरुपरिष्टादुच्चप्रदेशेष्वित्यर्थः।

लकारसकारतवर्गान् केचिद् दन्तमूलीयान् केचिच्च दन्त्यान् मन्यन्ते। यथा–

"दन्तमूलीयस्तु तकारवर्गः" (ऋ० वे० प्रा० १/४४)
"ऌलसिता दन्ते" (वाज० प्राति० १/६९)

---

१. "ऋकाराल्कारावथ षष्ठ ऊष्मा च जिह्वामूलीयाः प्रथमश्च वर्गः"—(ऋ० प्रा० प० १।४१)
२. हनुमूले जिह्वामूलेन कवर्गं स्पर्शयति "—तै० प्रा० २।३५
"अकुहविसर्जनीयानां कण्ठः"—भट्टोजीदीक्षितकृतवैयाकरणसिद्धान्तकौमुदीसंज्ञाप्रकरणे "तुल्यास्य०"(१।१।९) सूत्रे द्रष्टव्यम्।
३. "रेफस्य दन्तमूलानि"—अथर्वप्रातिशाख्यम् १।२८।
४. "रेफे जिह्वाग्रमध्येन प्रत्यग्रदन्तमूलेभ्यः"—तै० प्रा० २।४१।
५. "रेफं वर्त्स्यमेके"—ऋग्वे० प्रा० १।४६।
६. "स्युर्मूर्धन्या ऋटुरषाः"—पा० शि०, श्लो० १७।
७. ऋकाराल्कारावथ षष्ठ ऊष्मा च जिह्वामूलीयाः प्रथमश्च वर्गः—ऋग्वे० प्रा० १।४१
८. तैत्तिरीयप्रातिशाख्यम् २।१८।
९. "ऋकारल्कारावथ षष्ठ ऊष्मा जिह्वामूलीयाः प्रथमश्च वर्गः"—ऋ० प्रा० प० १।४१

ऋग्वेदादिप्रातिशाख्ये तवर्गो दन्तमूलीयः प्रोक्तः । तच्च सूत्रम् "दन्तमूलीयस्तु तकारवर्गः"(१/४४)। "जिह्वाग्रेण तवर्गे दन्तमूलेषु"(तैत्तिरीयप्रातिशाख्यम् २·३८) "लृलसिता दन्ते" (वाज०प्रति १/६९)

६. ओष्ठ्या :—उकारः पवर्गः ।

७. नासिक्याः — अं इत्यनुसारः, यमाः ङ ञ ण न म इति पञ्च वर्णाः । एतेषां स्ववर्गानुसार्यपि स्थानं बोद्धव्यम् ।

८. औरस्यः—प्रतिवर्गपञ्चमवर्णैस्तथा अन्तःस्थाभिश्च संयुक्तो हकारः ध्वनिशास्त्रिणस्त्वेनं काकल्यं मन्यन्ते । अनुस्वारयमातिरिक्ता अयोगवाहास्तु (विसर्जनीय-जिह्वामूलीयोपध्मानीयाः) यं वर्णमाश्रयन्ति तद्वर्णस्थानका भवन्ति । एवं **पाणिनीयशिक्षा**नुसारेण कण्ठादिस्थानभेदेन अष्टौ भेदा व्याख्याताः । न च पाणिनीयमते -"वर्णानामष्टौ भेदाः" इत्येवं कथनं न्यूनम् । कण्ठ्योष्ठ्यादिभेदत्रयस्याधिक्यात् पाणिनिमते वर्णानामेकादश भेदाः प्रतीयन्ते इति वाच्यम्; एकारादिवर्णचतुष्टयस्य संयुक्ताक्षरत्वात् । एकारैकारयोरांशिकरूपेण सत्त्वात् तस्यार्धभागः कण्ठवर्णेषु, उत्तरार्धश्च तालव्येषु गणयितव्यौ । एवम् ओकारौकारयोरपि कण्ठ्यादिवर्णेष्वन्तर्भावः कर्तव्यः । "जिह्वामूले तु कुः प्रोक्तो दन्त्योष्ठो वः स्मृतो बुधैः" (१८) इति **पाणिनीयशिक्षायां** दन्त्यपदेन सामीप्याद् ओष्ठ्यस्यापि ग्रहणं कर्तव्यम् । अन्यथा भग्नदन्तस्य तदनुच्चारणापत्तेः । अत एव पाणिनीयसूत्रात्मकशिक्षायां "सृक्वस्थानमेकेषाम्" इत्युक्तम् । एवं वकारस्य ओष्ठ्यवर्णेष्वन्तर्भावः सञ्जातः । याज्ञवल्क्यस्तु रेफं दन्तमूलभवमङ्गीकृत्य, तेन सह "कुं खुं गुं घुं" इति यमाँश्च संख्याय "दशधा वर्णा" इत्येवं व्याचष्ट ।

माल्टादिशब्दे लकारस्य स्थाननिर्णयः

"माल्टादिशब्दे[१] लकारो मूर्धन्यो विद्यते" इत्येवमाधुनिकशब्दशास्त्रिणां गवेषणा विद्यते । माल्टाशब्दश्च कस्यचिद् देशविशेषस्य वाचकः । लकारस्य मूर्धन्यत्वं पाणिन्यादिभिरपि स्वीक्रियमाणं प्रतीयते । तथा च लकाररकारयोः "ऋ लृ वर्णयोः सावर्ण्यं वाच्यम्" इति वार्तिकेन समानस्थानत्वं ध्वन्यते । "वर्णैकदेशाश्च वर्णग्रहणेन गृह्यन्ते" इति "तुल्यास्य०" इति सूत्रस्थभाष्यप्रामाण्येन ऋकारे रेफः, लृकारे च लकारो विद्यते, तयोरपि परस्परं सवर्णसंज्ञा क्रियते । सावर्ण्यं च स्थानप्रयत्नयोरैक्ये भवति, न तु स्थानभेदे, किन्तु स्थानभेदेऽपि रकालकारयोः ऋकारलृकारयोश्च सावर्ण्यं कृतमिति तदेव ज्ञापयति "तयोः समानस्थानत्वमपि वर्तते" इति । एवञ्च रकारलकारौ दन्त्यमूलीयावपि मूर्धन्यावपि च स्तः । अत एव शौनकीयऋग्वेदप्रातिशाख्ये-"दन्तमूलीयस्तु तकारवर्गः","सकाररेफलकाराश्च" इति रकारलकारयोर्दन्तमूलीयत्वं "स्युर्मूर्धन्या ऋटुरषाः" इति **पाणिनीयशिक्षायां** रेफस्य मूर्धन्यत्वं प्रोक्तम् । तत्र रेफस्य मूर्धन्यत्वपक्षे सावर्ण्याल्लृकारस्यापि ग्रहणेन तस्यापि (लकारस्यापि) मूर्धन्यत्वं निष्पद्यते । एवञ्च न केवलमधुनैव लकारस्य मूर्धन्यत्वम्, अपि तु प्राचीनकालेऽपि लकारस्य मूर्धन्यत्वमासीत् ।

१. "जल्दी और माल्टा शब्दों में एक ही लध्वनि प्रयुक्त हुई है। पर परीक्षा करके विशेषज्ञों ने निश्चय किया है कि पहला ल दन्त्य है और दूसरा ईषत् मूर्धन्य है" ।
—डा० श्यामसुन्दरदासस्य भाषारहस्यम् ।

वर्णस्थानभेदस्य समकालिकत्वप्रतिपादनम्

ऋग्वेदादिपुराणान्तानां द्रष्टृप्रवक्त्रोः सामान्याद् वर्णस्थानानि सर्वकालेषु समानरूपाणि बोध्यानि । ऋगादिवेदानां द्रष्टृप्रवक्तृसामान्यत्वं "पात्रचयान्तानुपपत्तेश्च" इति न्यायसूत्रे (४-१-६२) न्यायभाष्यकारेण वात्स्यायनेन प्रोक्तम्—"द्रष्टृ-प्रवक्तृसामान्याच्चाप्रामाण्यानुपपत्तिः । य एव मन्त्रब्राह्मणस्य द्रष्टारः प्रवक्तारश्च, ते खल्वितिहासस्य पुराणस्य धर्मशास्त्रस्य च (४-१-६२) । "मन्त्रायुर्वेदप्रामाण्यवच्च तत्प्रामाण्यम्, आप्तप्रामाण्यात्" (२-१-६९) इत्यत्र "द्रष्टृप्रवक्तृसामान्याच्चानुमानम् । य एव वेदार्थानां द्रष्टारः प्रवक्तारश्च त एवायुर्वेदप्रभृतीनाम्" (२-१-६९) इति च ।

एवमुपर्युक्तेन प्रमाणद्वयेन याज्ञवल्क्यादिशिक्षाणां शुक्लयजुर्वेदादिमन्त्राणाञ्च द्रष्टृप्रवक्तृसामान्याद् वैदिकयुगवदेव शिक्षा-कल्प-प्रातिशाख्य-पुराणादियुगेऽपि(मध्ययुगेऽपि) अकारादिवर्णानामुच्चारणमासीत्; यतो हि शुक्लयजुर्वेदस्य मन्त्राणां द्रष्टा याज्ञवल्क्यः शुक्लयजुर्वेदेऽन्यप्रकारमुच्चारणं चक्रे, स एव याज्ञवल्क्यः **शिक्षायां** (याज्ञवल्क्यशिक्षायाम्) तद्भिन्नप्रकारकमुच्चारणमुपदिशतीति भवितुं न शक्यते ।

येषां वर्णानां स्थानविषये मतभेदो विद्यते, तेषां वर्णानां स्थानविषयकमतभेदाः समकालिकाः । तेषु मतभेदेषु पूर्वापरत्वं न विद्यते[१] । तद्यथा— **तैत्तिरीयप्रातिशाख्ये** तवर्गस्य स्थानं "जिह्वाग्रेण तवर्गे दन्तमूलेषु" (२-३७) इति सूत्रे दन्तमूलम्, कवर्गस्य च "हनुमूले जिह्वामूलेन कवर्गे स्पर्शयति" (२-३५), इति हनुमूलं स्थानं प्रोक्तम् । **याज्ञवल्क्यशिक्षायाञ्च** तवर्गस्य स्थानम् "अष्टौ दन्त्याः", "लृ लॄ लॄ३ इति लृवर्णः, त थ द ध न लकार-सकारा इत्यत्र दन्तः, कवर्गस्य च "ऋ ॠ ऋ३ इत्यृवर्णः, क ख ग घ ङ" इत्यत्र जिह्वामूलं प्रोक्तम् । अयञ्च मतभेदः समकालिको विद्यते । यतो हि तैत्तिरीयप्रातिशाख्यं तित्तिरिमुनिना प्रोक्तम् । तित्तिरिमुनिश्च याज्ञवल्क्यसमकालिको विद्यते । याज्ञवल्क्यो यान् मन्त्रांश्छर्दितवान्, तानेव मन्त्रान् मुनयस्तित्तिरिर्भूत्वा गृहीतवन्तः[२] । एवञ्च तित्ति-

१. पूर्वं रेफस्य स्थानं दन्तमूलमासीत्, पाणिनिकाले च मूर्धजात इत्येवं पूर्वापरत्वं नास्तीत्यर्थः ।

२. "देवरातसुतः सोऽपिच्छर्दित्वा यजुषां गणम् ।
ततो गतोऽथ मुनयो ददृशुस्तान् यजुर्गणान् ॥
यजूंषि तित्तिरा भूत्वा तल्लोलुपतया ददुः ।
तैत्तिरीया इति यजुःशाखाः आसन् सुपेशलाः" ॥ इत्यादि ।
—श्रीमद्भा० १२।६।६४-६५।

रिमुनिना सह याज्ञवल्क्यस्य तुल्यकालत्वं विद्यते। तयोस्तुल्यकालत्वाच्च वर्ण-स्थानविषयकमतभेदोऽपि समकालिकः सिद्धयति। एतेषां मतभेदानां समन्वयश्च "हनुमूले" इत्यादिसप्तम्यन्तस्थले औपश्लेषिकाधिकरणत्वकल्पनया कर्तव्य इति पूर्वमेव सम्यक्तया प्रतिपादितः। अतः पिष्टपेषणस्यावश्यकता न विद्यते।

च-वर्गस्यापि कोमलतालव्य-शुद्धतालव्यत्वादिकस्य समकालिकत्वं युक्त्या साधितम्। चवर्गोच्चारणस्य प्रक्रियां याज्ञवल्क्यः स्वयमेवोपदिदेश। तथा च—

यथा पुत्रवती स्नेहाच्चुम्बते निजमौरसम्।
एवं वर्णाः प्रयोक्तव्या युञ्जान इति निदर्शनम्"।
(या० व० शि० ६३)

इति वर्णोच्चारणाधिकरणे निरूपितम्। "युञ्जानः" (शु० य० वे० ११।१) इति पदे यकारस्य जकारोच्चारणं क्रियते, यतोहि शुक्ल-यजुर्वेद-प्रातिशाख्यादिषु वेदे यकारस्य जकारोच्चारणमुपदिष्टम्। चवर्गस्योच्चारणप्रक्रियायां चुम्बन-दृष्टान्तेनेदमेव समायाति यच्चवर्गोच्चारणे कर्तव्ये जिह्वामध्येन तालौ जिह्वाग्रेण च दन्तमूलेषु स्पर्शः कर्तव्यः; यतो हि पुत्रमुखचुम्बने एवमेव कर्तव्यं भवति। जिह्वामध्यस्य तालौ विशेषेण स्पर्शात् चवर्गस्य स्थानं तालु प्रोक्तम्। एवञ्च कोमलतालव्य-कठिनतालव्य-दन्त्यतालव्यचकारस्यापि समकालिकत्वस्य सिद्धतया तस्य चतुरैतिहासिककालविभाजनमपार्थम्।

एवमेव कवर्गस्य केचित् कण्ठम्, केचिच्च जिह्वामूलं स्थानं मन्यन्ते –इत्येवं सलघुवृत्तिके **शाकटायनव्याकरणे, आपिशलिशिक्षायाञ्च** प्रतिपादितम्। शौनकीय-**ऋक्प्रातिशाख्ये** च कवर्गस्य जिह्वामूलं स्थानं प्रोक्तम्। इत्युभौ पक्षौ समकालिकौ विद्येते। यतो हि वाचस्पति गैरोला महोदयेन शौनकस्य सम्भावितः कालः ३००० वि० पूर्वं निर्धारितः, आपिशलेश्च २९०० वि० पूर्वं निर्धारितः[1]। एवञ्च आधुनिकेतिहासकाराणां मतानुसारेणैषां स्थितिकालस्य शतवर्षस्यान्तरं समायाति। "यः सर्वथा चिरं जीवति वर्षशतं जीवति"—इति पातञ्जल**महाभाष्या**नुसारेण भगवतः पतञ्जलेः काले वर्षशतं मनुष्याणामायुरासीत्। किन्तु पाणिनेः पूर्वं तु वर्ष-शतादधिकमायुरासीदिति "किं पुनरद्यत्वे, यः सर्वथा चिरं जीवति वर्षशतं जीवति" इति **महाभाष्ये** "किं पुनरद्यत्वे" इति पदेन ज्ञायते। अनया रीत्या, शौनकस्य च जीवनकाल एव आपिशल्याचार्यस्यापि जीवनकालः प्रारभ्यत। इत्येतेषा-माचार्याणां समकालिकत्वं समायाति। एतेषां समकालिकतया च वर्णस्थानभेदोऽपि समकालिको विद्यते।

एकस्मिन्नेव सलघुवृत्तिके **शाकटायनव्याकरणे** एकस्यैव रेफस्य मूर्धन्यत्वम्, पक्षान्तरे च दन्तमूलीयत्वं प्रतिपादितं दृश्यते। तथा च रेफस्य दन्तमूलीयत्वं

१. संस्कृत साहित्य का संक्षिप्त इतिहास। (पृ० सं० ३५४)।

मूर्धन्यत्वं च समकालिके शौनकीयऋक्प्रातिशाख्ये च रेफस्य पक्षान्तरे वर्त्सं स्थानत्वं प्रोक्तम्। एवं च वर्णानां स्थानविषये ये ये मतभेदाः सन्ति ते सर्वे समकालिकाः। मतभेदेन च तानि तानि स्थानानि तत्तद्वर्णानां योनयश्च सन्ति। तेष्वेव स्थानेषु तत्तद्वर्णानामभिव्यक्तिः। तेषां मतभेदानाञ्च--"रो दन्तमूले" इत्यादिष्वौपश्लषिका-धिकरणेन समन्वयः कर्तव्यः। रेफस्याभिव्यक्तिर्दन्तमूले वर्त्सभागे मूर्धनि च सम्भवति। तत्र यदा रेफस्योच्चारणे कर्तव्ये जिह्वाग्रेण मूर्धनि स्पर्शः क्रियते, तदा मूर्ध्नोऽधः पटलेन जिह्वाग्रसंयोगः, मूर्ध्न ऊर्ध्वपटलेन च वायुसंयोगः। यदा च दन्तमूले स्पर्शः क्रियते, तदा दन्तमूलस्य बाह्यभागेन जिह्वाग्रसंयोगः, दन्तमूला-न्तर्भागेन च वायुसंयोगः सञ्जायते। एवञ्च रेफस्य योनित्रयं विद्यते। तत्र एकस्मिन् काले एकस्मादेव स्थानाद् रेफोऽभिव्यज्यते,न तु स्थानद्वयाद्। अतः"एकारस्य तालु-कण्ठस्थानवद् रेफस्य दन्तमूलमूर्धानौ स्थाने विद्येते" इति वक्तुं न शक्यते। किन्तु रेफस्य स्थानं दन्तमूलम्, केषाञ्चिन्मते मूर्धा–इत्येव वक्तुं शक्यते। एकारस्य तूच्चा-रणं कण्ठतालूभयस्थानाभ्यां सञ्जायते, अतस्तस्य स्थानं कण्ठतालु वक्तुं शक्यते।

स्थानान्तरिता[1] वर्णाक्षराः

यद्यपि केचिद् आधुनिकशब्दशास्त्रिणः शिक्षादिषु निर्दिष्टवर्णस्थानानां परिवर्तनं मन्यन्ते। "स्थानान्तरिता वर्णाक्षराः" इत्येवं सिद्धान्तत्वेन प्रतिपादयन्ति। केषाञ्चिदुदाहरणमत्र प्रस्तूयते—

आ = इत्यस्य जिह्वामूलं स्थानम् = पुर्तगाली-अरवीभाषयोः।
इ = ओष्ठ्यः (Eu) फ्रांसीसीभाषायाम्।
ई = निम्नदन्त्य ओष्ठ्यश्च = रूसी-तुर्कीभाषयोः।
ओ = ओष्ठ्यो दन्त्यश्च (ओ० उमलाउटनिम्नजर्मनभाषायाम्)
ट = दन्तकाकलकस्थानम् चीनीभाषायां ट्हेलशब्दे।
ड = वर्त्स्यो दन्त्यश्च = स्पेनीभाषायां डचशब्दे।
द = तालव्यः = सिन्धीभाषायां देदी शब्दे।
लृ = तालव्यः =
र = कण्ठ्यः = फ्रांसीसी-जर्मनभाषयोः।
ह = काकलकस्थानम् = स्पेनीभाषायाम्।

एवञ्च उपर्युक्तविवरणेन प्रतीयते यत्पाणिनिना यानि वर्णस्थानानि निर्दि-ष्टानि, तेषां परिवर्तनं जातम्। अस्मद्देशेऽपि शकारं खकारं द्विविधमुच्चारणं कुर्वन्ति षकारस्य। ज्ञकारस्य च पञ्चनद-महाराष्ट्र-बङ्ग-गुर्जरोत्तरप्रान्तेषु क्रमशः

१. "स्थानान्तरिता वर्णाक्षराः"—सीतारामचतुर्वेदिकृतं भाषालोचनम्, पृ० २४६।

"ग्य, द्वच, गो, ग्न, ग्न" इत्युच्चारणं क्रियते। वेदपाठिनश्च 'ज्ञ' इत्येवमुच्चारयन्ति । एतादृशं प्रमाणमुदाहरणानि च वर्णस्थानस्य परिवर्तने समुपस्थापयन्ति ।

वस्तुतस्तु उदाहरणरूपेण फ्रेञ्चादिभाषायां व्यवह्रियमाणा ये वर्णाः समुपस्थापितास्ते सर्वे सम्वृतादिदोषग्रस्ताः । संवृतादिदोषग्रस्ता वर्णाः पाणिनिकालतोऽपि पूर्ववैदिक-युगेऽप्यासन् । अयं विषयोऽग्रे "अर्धकादिदोषग्रस्तानां ह्रस्वानामेकारादिवर्णानाम् ऐतिहासिकं विवरणम्" इत्यस्मिन् स्थले विशदरूपेण प्रतिपादयिष्यते । शिक्षाकाराः, अथ च प्रातिशाख्यकारा ग्रस्तनिरस्तादिदोषशून्यानां स्वरव्यञ्जनवर्णानां कण्ठादिस्थानं शिक्षादिषु निर्दिष्टवन्तः । अतएव भगवान् पतञ्जलिर्**महाभाष्यस्य** पस्पशाह्निके "शब्दानुशासनमिदानीं कर्तव्यम् । किं शब्दोपदेशः कर्तव्यः, आहोस्विद् अपशब्दोपदेशः, आहोस्विदुभयोपदेश इति ?" इत्येवं पूर्वपक्षे शङ्कां समुत्थाप्योत्तरपक्षे च शुद्धस्य शब्दस्योपदेशे पक्षं ग्रहीतवान् । पाणिनिकाले दोषग्रस्तवर्णानामभावे एतत्सर्वमप्रासङ्गिकमापद्यते । अतः "स्थानान्तरिता वर्णाक्षराः" इत्येवं प्रवचनं दुःसाहसमात्रं प्रतिभाति ।

अर्धकादिदोषग्रस्तानां वर्णानामुच्चारणे मुखाद्यङ्गानां या परिस्थितिर्जायते तत्सर्वं वर्णानां विभाजनम्" इत्यत्राग्रे प्रतिपादयिष्यते । अत्र तु विशुद्धवर्णानामेव समुच्चारणविधिर्व्याख्यातः ।

आभ्यन्तरप्रयत्नभेदेन वर्णानां वर्गीकरणम्

"स्वरतः कालतः स्थानात् प्रयत्नानुप्रदानतः" (पा० शि० १०) इति **पाणिनीयशिक्षोक्तेः** "प्रयत्नानुप्रदानतः" इत्यत्र प्रयत्नपदेन स्पृष्टाद्याभ्यन्तरप्रयत्नानाम्, "अनुप्रदान"पदेन "अनु पश्चात् वर्णाभिव्यक्त्यनन्तरं प्रदीयते यत्तदनुप्रदानम्" इति व्युत्पत्त्यनुसारेण विवाराद्यष्टानां बाह्यप्रयत्नानां ग्रहणमामनन्ति । अत्र आभ्यन्तरबाह्यप्रयत्नयोर्मध्ये प्रथमम् आस्यान्तर्भूतप्रयत्नभेदेन वर्णानां विभाजनं प्रतिपाद्यते—

भट्टोजीदीक्षितः "तुल्यास्य०" (पा० सू० १।१।९) इति पाणिनीयसूत्रस्य व्याख्यावसरे चतुर आभ्यन्तरप्रयत्नानमन्यत। ते यथा—स्पृष्टेषत्स्पृष्ट विवृतसम्वृतानिति ।' वरदराजाचार्यस्तु **लघुसिद्धान्तकौमुद्या**मूष्मणामीषद्विवृतप्रयत्नं स्वीकृत्य पञ्चाभ्यन्तरप्रयत्नान् प्रोक्तवान् । **प्रक्रियाप्रपञ्चे** तु "ए ओ" इत्यनयोर्विवृततरम्, "ऐ औ" इत्यनयोश्च विवृततमं प्रयत्नं[1] मत्वा स्पृष्टेषत्स्पृष्टविवृतविवृततरविवृततमसम्वृतानीति षड् आभ्यन्तरप्रयत्नान् व्याख्यातवान् ।

वस्तुतस्तु एङैचोः परस्परं सवर्णसंज्ञावारणाय आभ्यन्तरप्रयत्नस्य षोढा-

---

१. **प्रक्रियाप्रपञ्चे तु "षोढा" इत्युक्त्वा "विवृततरमेङगोः, विवृततमम् ऐचोः" इति विभागः प्रदर्शितः ।**

त्वमेव समीचीनम् । "ऐ औ च्" इति सूत्रारम्भसामर्थ्यात्तयोः[1] सवर्णत्ववारणं तु न समीचीनं प्रतिभाति; यतो हि

"न ह्याप्तवादान्नभसो निपतन्ति महासुराः ।
युक्तिमद्वचनं ग्राह्यं त्वयाऽन्यैश्च भवद्विधैः" ॥

इत्युक्त्या युक्तिमन्तरा सूत्रारम्भसामर्थ्यरूपहेतोर्दुर्बलत्वं प्रतिभाति । भगवान् पाणिनिरपि आभ्यन्तरप्रयत्नस्य षोढात्वं व्याचष्ट । तथा चोक्तम्—

स्वराणामूष्मणाञ्चैव विवृतं करणं स्मृतम् ।
तेभ्योऽपि विवृतावेङौ ताभ्यामैचौ तथैव च ॥ (पा० शि० २१) इति ।

अत्र शिक्षायां "स्वराणामूष्पणाञ्चैव" इत्यत्र स्वरपदेन "तेभ्योऽपि विवृतावेङौ' इत्युक्त्या "ए ओ ङ्, ऐ औ च्" इत्यनयोर्व्यावृत्तेः सत्त्वाद् अकाराद्यॢकारान्ता एव गृह्यन्ते । एतेषाञ्च विवृतं प्रयत्नं जानीयात् । अकाराद्यपेक्षया च एकारस्य ओकारस्य च विवृततरम्, तदपेक्षया च "ऐ औ" इत्यनयोश्च विवृततमं प्रयत्नं जानीयात् । सम्वृतादि-आभ्यन्तरप्रयत्नभेदेन वर्णानां षड् भेदाः । ते च निम्नोक्ताः—

(१) विवृतप्रयत्नकाः—अकाराद्यृकारान्ताः, ऊष्माणश्च ।

(२) विवृततरप्रयत्नकौ—एकार ओकारश्च ।

(३) विवृततमप्रयत्नकौ - ऐकार औकारश्च ॥

(४) सम्वृतप्रयत्नकः - अकारः ।
ह्रस्वस्याकारस्य प्रयोगे सम्वृतम्, प्रक्रियादशायां च विवृतम् अवगच्छन्ति ।

(५) स्पृष्टप्रयत्नकाः—कादिमावसानाः स्पर्शसंज्ञकाः ।

(६) ईषत्स्पृष्टप्रयत्नकाश्च—यकारादिवकारान्ता अन्तःस्थासंज्ञकाः ।
विसर्जनीयजिह्वामूलीया—योगवाहांस्तु पाणिनिमते स्वाश्रयस्थानभागिनो मन्यन्ते ।

बाह्यप्रयत्नभेदेन वर्णानां विभागः

अष्टौ बाह्यप्रयत्नाः, यथा "तुल्यास्य०" इति पाणिनीयसूत्रस्थ**महाभाष्ये** प्रोक्ताः—विवारसम्वारौ, श्वासनादौ, घोषवदघोषवतौ, अल्पप्राणता महाप्राणता चेति ।

---

१. एदैतोरोदौतोश्च न मिथः सावर्ण्यम्, ऐ औ च् इति (पा० सू० ४) सूत्रारम्भसामर्थ्यात् ।" —भट्टोजीदीक्षितस्यवैयाकरणसिद्धान्तकौमुदी, संज्ञाप्रकरणम् । अणुदित्सवर्णस्येतिसूत्रव्याख्यास्थले तत् प्रोक्तम् ।

वर्णानां बाह्यप्रयत्नानुसारेण विभागो यथा—

खयां यमाः खयः ⌒क⌒ पौ विसर्गः शर एव च ।
एते श्वासानुप्रदाना अघोषाश्च विवृण्वते ॥
कण्ठमन्ये तु घोषाः स्युः सम्वृता नादभागिनः ।
अयुग्मा वर्गयमगा यणश्चाल्पासवः स्मृता ॥ इति ॥

खयां यमाः = खय्प्रत्याहारघटका यमसंज्ञकाः कादिवर्णास्ते खयः— खय्प्रत्याहारकुक्षौ सन्निविष्टाश्च सर्वे वर्णाः, जिह्वामूलीयोपध्मानीयविसर्गाः शकारादिहकारान्ताश्च चत्वारो वर्णाः । एते सर्वे श्वासानुप्रदानाः = श्वासः अनुपश्चाद् वर्णाभिव्यक्त्यन्तरं प्रदीयते येभ्यस्ते श्वासानुप्रदानाः श्वासप्रयत्नका इत्यर्थः । अघोषा अपि च विवृण्वते = गलविवरं स्वरतन्तुं वा विवृतं कुर्वन्ति । विवारप्रयत्नका इति तस्य तात्पर्यम् ।

अन्ये तु पूर्वोक्तवर्णातिरिक्ताः हश्प्रत्याहारकुक्षिगताः सर्वे वर्णास्तथा तेषामेव यमाः, अनुस्वारश्च, स्वरसंज्ञका अकारादयश्च सम्वृताः = सम्वारप्रयत्नकाः नादभागिनः = नादं भजन्ति कुर्वन्ति, अतस्ते नादप्रयत्नका अपि; घोषाः = घोषप्रयत्नकाश्च अवगन्तव्याः ।

अयुग्माः = प्रतिवर्गम् अयुग्माः क ग ङ इत्यादयः, प्रतिवर्गं गताः अयुग्मा यमसंज्ञकाः ककारादयश्च यकारादिवकारान्तवर्णाश्च अल्पप्राणप्रयत्नकाः, तदवशिष्टाश्च वर्णा महाप्राणप्रयत्नका भवन्तीति "खयं यमाः" इति श्लोकस्य व्याख्यानम् । एतत्सर्वं भट्टोजीदीक्षितकृतायां **वैयाकरणसिद्धान्तकौमुद्यां** संज्ञाप्रकरणे प्रतिपादितम् ।

बाह्यप्रयत्नानुसारेणेदं वर्णानां विभाजनं सुगमोपायेनोपनिबन्धुं निम्नलिखिता सरणिरपि दृष्टिपथं समायाति । तद्यथा—

खरो विवाराः श्वासा अघोषाश्च ।
हशः सम्वारा नादा घोषाश्च ।
वर्गाणां प्रथमतृतीयपञ्चमा यणश्चाल्पप्राणाः ।
वर्गाणां द्वितीयचतुर्थौ शलश्च महाप्राणाः ।

वस्तुतस्तु बाह्यप्रयत्नानुसारेण घोषाघोषभेदेन वर्णानां द्वौ भागौ विद्येते । श्वासनादौ तदुभयात्मिका च तेषां तिस्रः प्रकृतयः । एतेषामुच्चारणे कण्ठस्य सङ्कोचो विवरणञ्च जायेते । तथा च घोषवर्णानामुच्चारणे कण्ठस्थस्वरतन्तुद्वयं परस्परं संयुज्य सङ्कोचावस्थामापद्यते । तेषाञ्च (घोषवर्णानाम्) स्वरूपं नादात्मकं भवति । अघोषवर्णानामुच्चारणे च स्वरतन्तुद्वयं परस्परं विवृत्य विस्तृतम् आंशिकरूपेण संघटितं जायते, तेषां वर्णानां स्वरूपञ्च श्वासात्मकं भवति । प्रतिवर्गं घादिचतुर्थवर्णानाम्, ऊष्मणां मध्ये च हकारस्य श्वासनादोभयात्मिका प्रकृतिः, अतस्तेषामुच्चारणे घोषाघोषौ उभावपि भवतः । एतत्सर्वं शौनकीय-**ऋग्वेद-**

प्रातिशाख्यस्य त्रयोदशपटले तृतीयसूत्रात् प्रारभ्य षष्ठसूत्रपर्यन्तं निरूपितम् । तानि च सूत्राणि – "ता वर्णानां प्रकृतयो भवन्ति" (१३।३), "श्वासो घोषाणाम्" (१३।४), "इतरेषां तु नादः" (१३।५) । इतरेषां कतराणाम् ? स्वराणां घोषवतां च नादः प्रकृतिर्भवतीति वेदितव्यम्, "सोष्मणां घोषिणां श्वासनादौ" (१३।६) इति । अत्र षष्ठसूत्रे सोष्मपदेन घोषिणां प्रतिवर्गं चतुर्थवर्णानामेव ग्रहणम्, ऊष्मपदेन घोषिणो हकारस्य ग्रहणं वेदितव्यम् । स्वरसंयुक्ताघोषवर्णानां खकारादीनामुच्चारणे यो घोषः श्रूयते, स स्वरस्य, न तु कादिव्यञ्जनस्येति पूर्वमेव प्रतिपादितम् ।

कर्णौ हस्ताभ्यां पिधाय नादात्मकवर्णोच्चारणे कर्णयोर्झंकृतिः श्रूयते, श्वासात्मकवर्णोच्चारणे च झंकृतिर्न श्रूयते ।" इति संक्षेपेण श्वासात्मकनादात्मक-स्वरूपपरिचयोपायो बोद्धव्यः ।

आधुनिकशब्दशास्त्रिणां मतानुसारं वर्णानां वर्गीकरणस्य रीतिः

अमुमेव प्रसङ्गमाश्रित्य नूतनानां ध्वनिशास्त्रिणां मतेऽकारादिवर्णानां वर्गीकरणं प्रस्तूयते । नूतनाः भाषाविज्ञानस्य विद्वांसः प्रायेण उदात्तादिस्वरदृष्टया,[1]ह्रस्वादिनिष्ठैकादिमात्राकालानुसारेण, बाह्यप्रयत्नभेदेन[2] च **पाणिनीयादिशिक्षासु** प्रतिपादितां रीतिमनुसृत्य वर्णविभागान् व्याचक्षते । किन्तु यत्र शिक्षाकाराः आभ्यन्तरप्रयत्नकण्ठादिस्थानानां भेदानुसारेण वर्णविभागं व्यवहरन्ति स्म, तत्र भाषाशास्त्रिणः वर्णानामुच्चारणक्षणे जिह्वायाः परिस्पन्दानुसारेण[3] तेषां वर्गीकरणमधिकं वैज्ञानिकमामनन्ति । केषाञ्चिद् वर्णानामुच्चारणे जिह्वाया अग्रभागोऽग्रे सरति, केषाञ्चिच्च उच्चारणे तस्याः पश्चाद् भागः ऊर्ध्वमुत्तिष्ठति, केषाञ्चिच्च समुच्चारणे जिह्वायास्तत्तद्भागाः कण्ठताल्वादिस्थानानि स्पृशन्ति, ताल्वादिस्थान-जिह्वयोश्च परस्परं घर्षणं जायते । तदनुसारेण केचित् पश्चात्स्वराः, केचिच्च अग्रादिस्वराः, केचिच्च स्पर्शाः प्रोच्यन्ते ।

यद्यपि केचिद् भाषाशास्त्रिणो व्यञ्जनवर्णानां [4]कण्ठादिस्थानभेदेनापि वर्ण-

---

१. अर्धसम्वृत ह्रस्वाग्रस्वरः इत्यादिरीत्या प्रतिपादितेषु स्वरभेदेषु ह्रस्वदीर्घग्रहण कृतवन्तः, तेन तैः एकादिमात्राकालतः स्वरभेदः स्वीक्रियते" इति ज्ञायते ।

२. गोलोकबिहारीधलादिकृतेषु "ध्वनिविज्ञान" इत्यादिग्रन्थेषु विवारादिभेदेन वर्णभेदो व्याख्यातः ।

३. "ध्वनिशास्त्री अन्यस्वरों का वर्गीकरण जिह्वा की स्थिति के अनुसार करना विशेष ठीक समझता है ।" —भोलाशंकरो व्यासः, "संस्कृत का भाषाशास्त्रीय अध्ययन", पृ० सं० ८५ ।

४. यथा श्यामसुन्दरदासकृते भाषारहस्य इति ग्रन्थे "व्यञ्जनों का वर्गीकरण" इति स्थले प्रतिपादितम् ।

विभागमङ्गीकृतवन्तः। स्थानभेदेन च वर्णानामष्टौ भेदान् व्याचक्षते। ते यथा—
१. काकल्यः, २. कण्ठ्यः, ३. मूर्धन्यः, ४. तालव्यः, ५. वर्त्स्यः, ६. दन्त्यः, ७. ओष्ठ्यः, ८. जिह्वामूलीयश्च।

१. काकल्यः—औरस्यं हकारं काकल्यं मन्यन्ते ध्वनिशास्त्रिणः। कण्ठ-मूर्धन्यतालव्यवर्त्स्वाश्च प्रातिशाख्येषु प्रसिद्धा एव गृह्यन्ते। एतेषां सम्प्रदाये कण्ठ्यः कवर्गः कोमलतालव्येत्यपरनाम्नापि प्रसिद्धः। दन्त्योष्ठ्यवर्णानाञ्च अवान्तर-भेदमामनन्ति[१]। ते यथा दन्त्याः। एतेषां १. पुरोदन्त्यः, २. अन्तर्दन्त्यः, ३. पश्चाद्दन्त्यश्च—इत्येवं भेदत्रयं स्वीक्रियते। आंग्लभाषायास्तकारदकारौ दन्त-मूलीयौ हिन्दीभाषायां तकारं पुरोदन्त्यं थकारञ्च अन्तर्दन्त्यं मन्यन्ते। एवमोष्ठ्य-स्यापि अवान्तरं भेदद्वयं विद्यते। तद्यथा—१. ओष्ठ्यः, २. दन्त्योष्ट्यश्च। ओष्ठ्या यथा पकारादयः। दन्त्योष्ठ्यो यथा—पफंकारौ वकारः जिह्वामूलीयश्च क ख ग इति। एवं रीत्या कण्ठादिस्थानभेदानुसारेण तेषां ग्रन्थेषु वर्णविभागो दृष्टिपथं समायाति। तथापि अस्यापेक्षया वर्णोच्चारणकालिकं जिह्वायाः परिस्पन्दमनुसृत्य वर्णविभागं प्रशस्यतरमङ्गीकुर्वन्ति। तद्यथा जिह्वापरिस्पन्दानु-सारेण।

ध्वनिविज्ञानदृष्ट्या वैदिकध्वनीनां विभाजनम्

वैदिकभाषायां सम्वृतादिभेदेन स्वराणां पञ्च भागाः क्रियन्ते ध्वनिशास्त्र-विद्भिः। ह्रस्वदीर्घभेदेन इकारद्वयस्य उकारद्वयस्य च क्रमशः सम्वृतजिह्वाग्रस्वरः, सम्वृतपश्चात्स्वरः—इति भागद्वयम्, एकारस्य ओकारस्य च क्रमशोऽर्धसम्वृत-जिह्वाग्रस्वरः, अर्धसम्वृतपश्चात्स्वरः—इति भागद्वयम्। ह्रस्वदीर्घाकारयोश्च "विवृतपश्चात्स्वरः" इत्येक एव भेदः। सर्वे भागाः समूह्य पञ्चसंख्याका भवन्ति। ह्रस्वदीर्घसम्वृतयोरिकारोकारयोर्भेदद्वयस्वीकारे तु सप्त भेदाः समायान्ति। वेदे संस्कृते च ह्रस्वस्य एकारस्य औकारस्य च अभावो वेदितव्यः। अ+इ=ए, अ+उ=ओ इतीमौ संयुक्तस्वरौ व्यवह्रियेते। ह्रस्वदीर्घऋकारौ ऌकारस्य विशेषस्वरा गण्यन्ते। "०" इत्यनुस्वारस्यापि च स्वरेषु गणना क्रियते। वैदिक-व्यञ्जनध्वनीनां विभागश्च प्रायेण अग्रे करिष्यमाणव्यञ्जनवर्गीकरणवद् बोद्धव्यः[२]।

वस्तुतस्तु ह्रस्वदीर्घाकारयोः पश्चात्स्वरेषु गणना युक्ता न प्रतीयते। ह्रस्व-स्याकारस्य केन्द्रीयस्वरे, दीर्घस्य च विवृताग्रस्वरेषु गणना कर्तव्या। दीर्घाकारस्य च उच्चारणे जिह्वाग्रभागो मुखद्वारं न सम्वृणोति, किन्तु पूर्णरूपेण विवृणोति।

१. उपर्युक्तस्य भाषारहस्येतिग्रन्थस्य "व्यञ्जनों का वर्गीकरण" (पृ० सं० २२९) इति स्थलमाश्रित्य वर्गीकरणं प्रदर्शितम्।

२. वैदिकध्वनीनामिदं वर्गीकरणं सुनीतिकुमारचटर्जीकृतस्य "बंगाली लांग्वेज" इति ग्रन्थस्याधारेण प्रतिपादितम्।

"ताँश्चक्रे" इत्यादिवैदिकशब्देषु सानुनासिकदीर्घाकारस्य तु पश्चात्स्वरेषु गणना कर्तव्या; यतो हि अस्य सानुनासिकस्वरस्योच्चारणे जिह्वायाः पश्चाद्-भागो विशेषरूपेण चेष्टते। एतेषां सम्वृतादिशब्दानामग्रे विशदरूपेण व्याख्या करिष्यते।

जिह्वाग्रादिभेदेन मूलस्वराणां विभाजनम्

वर्णोच्चारणे जिह्वापरिस्पन्दानुसारेण स्वरा भागत्रये विभज्यन्ते[१]—तद्-यथा (१) अग्रस्वराः, (२) पश्चात्स्वराः, (३) केन्द्रीयस्वरश्च।

(१) अग्रस्वराः—अकारस्य दीर्घरूपम्, इकारः, ह्रस्वदीर्घभेदेन च एका-रद्वयम्—इति स्वरचतुष्टयम्। आकारादिस्वरचतुष्टयस्य ये प्रतिपादयिष्यमाणा जपितादिभेदाः सन्ति, तानपि अग्रस्वरान् मन्येरन्। एतेषां स्वराणामुच्चारणे जिह्वाग्रभागोऽग्रे सरति।

(२) पश्चात्स्वराः—उकारः, ह्रस्वदीर्घभेदेन च ओकारद्वयम्, आकारश्च इति स्वरचतुष्टयम्। उकारस्य च ये प्रदर्शयिष्यमाणा जपितादिभेदास्तानपि पश्चात्स्वरेषु जानीयात्। एतेषामुच्चारणे जिह्वायाः पश्चाद्भागो यथावश्यकं समुत्तिष्ठते।

(३) मध्यस्वरः—अकारः। अस्योच्चारणे जिह्वाया मध्यभागः सामान्य-परिस्थितिं दधानः निश्चेष्टस्तिष्ठति।

ह्रस्वादिभेदेन स्वराणां विभाजनम्—यद्यपि वैयाकरणा एकारादीनां ह्रस्वत्वं न अङ्गीकुर्वन्ति, तथाप्याधुनिकाः विभिन्नभाषानुसारेण एकारादिदीर्घ-स्वराणामपि ह्रस्वत्वमामनन्ति।

सम्वृतादिभेदेन मूलस्वराणां वर्गीकरणम्

भाषावैज्ञानिकपद्धत्या अग्रपश्चात्स्वरयोः सम्वृतादिभेदेन प्रत्येकं चत्वारो भागाः कर्तुं शक्यन्ते। ते यथा—१—सम्वृतः, २—अर्धसम्वृतः, ३—अर्धविवृतः ४—विवृतश्च। एतेषां सम्वृतादीनाम् भेदानुसारेण मूलस्वराणाञ्च मुख्यतया

१. श्रीभोलाशङ्करव्यासेन कृतस्य "संस्कृत का भाषाशास्त्रीय अध्ययन" इति ग्रन्थस्य "संस्कृत ध्वनियां तथा स्वर" इति स्थले ये स्वरविभागाः; धीरेन्द्र वर्म एम० ए० कृतस्य "हिन्दी भाषाका इतिहास" इति ग्रन्थस्य च "मूलस्वर" इति स्थले ये स्वरविभागाश्चित्रेषु प्रदर्शितास्तदाधारेण मूले स्वरविभागं व्याचक्षि।
डा० श्यामसुन्दरदासादिकृतेषु भाषारहस्यादिग्रन्थेषु अर्धसम्वृतदीर्घपश्चस्वरः इत्यादि रीत्या कृतेषु स्वरविभागेषु ह्रस्वदीर्घादिर्ग्रहणं कृतम्। मूले मया पृथक्पृथग् दीर्घादिभेदेन स्वरविभागः कृतः।

अष्टौ भेदा ध्वनिविदः सम्पादयन्ति । ते यथा सम्वृतार्धसम्वृतार्धविवृतविवृत भेदेन अग्रस्वराणां पश्चात् स्वराणाञ्च प्रत्येकं चत्वारो भागा भवन्ति । द्वयोश्चतुरश्चतुरो भागान् सङ्कलय्य अष्टौ भेदाः संख्यायन्ते ।

अयञ्च सम्वृतादिभेदो जिह्वाया न्यूनाधिकमात्रासूच्चैर्नीचैरुत्थापनानुसारेण ओष्ठयद्वयस्य च सम्वरणविवरणक्रिये चानुसृत्य निर्धार्यते । कस्यचित्स्वरस्योच्चारणे जिह्वा मुखद्वारं पूर्णतः सम्वृणोति, कस्यचिच्च अर्धमेव । यस्य स्वरस्योच्चारणे एवं क्रिया स्यात् स स्वरः सम्वृतसंज्ञया अर्धसम्वृतसंज्ञया च व्यपदिश्यते । कस्यचित् स्वरस्य च उच्चारणे मुखद्वारम् अर्धरूपेण, कस्यचिच्च उच्चारणे पूर्णरूपेण विवार्यते, यस्य स्वरस्योच्चारणे एवं क्रिया स्यात् स स्वरोऽर्धविवृतसंज्ञां विवृतसंज्ञाञ्च क्रमशो लभते । तद्यथा—अष्टानां मूलस्वराणां मध्ये इकारस्योच्चारणे जिह्वाग्रभागः, उकारस्य च उच्चारणे तस्याः पश्चाद्भागश्च पूर्णरूपेण पूर्णरूपेण समुत्थाय मुखद्वारं सम्वृणुतः, उकारस्योच्चारणे ओष्ठद्वयमपि परस्परं सम्वृतं जायते । अतस्तयोर्मध्ये इकारो ह्रस्वसम्वृतजिह्वाग्रस्वरः, उकारश्च ह्रस्वसम्वृतपश्चात्स्वरो व्यवह्रियेते । एवं दीर्घस्य एकारस्य ओकारस्य च उच्चारणे क्रमशो जिह्वाया अग्रभागः पश्चाद्भागश्च अर्धमेव मुखद्वारं सम्वृणुतः । अतस्तयोर्मध्ये एकारोऽर्धसम्वृतदीर्घजिह्वाग्रस्वरः, ओकारश्च अर्धसम्वृतदीर्घपश्चात्स्वरः प्रोच्येते । एवं ह्रस्वे एकारे ओकारे चेति द्वयोर्व्यवह्रियमाणयोः क्रमशो जिह्वाया अग्रभागः, पश्चाद्भागश्च मुखमर्धमेव व्यावृतं कुरुतः । अतस्तयोर्मध्ये ह्रस्वस्य एकारस्य अर्धविवृतह्रस्वजिह्वाग्रसंज्ञाम्, ओकारस्य च अर्धविवृतह्रस्वपश्चात्स्वरसंज्ञां व्यपदिशन्ति । दीर्घस्य आकारस्य तथा "काँग्रेस", "लॉर्ड" इत्यादिशब्दघटकाकारस्य च उच्चारणे क्रमशो जिह्वाया अग्रभागः पश्चाद्भागश्च विवृतावस्थां भजेते । अतस्तौ स्वरौ क्रमशो विवृतदीर्घाग्रस्वरसंज्ञां विवृतदीर्घपश्चात्स्वरसंज्ञां च प्राप्नुतः । एवं रीत्या मूलस्वराणामष्टौ भेदा व्याख्याताः । एते अष्टौ प्रधानाः स्वराः व्रजावधी-हिन्दीत्यादिभाषासूपलभ्यमाना विविधस्वराणां मूलभूता इति मन्यन्ते ।

आधुनिकवैज्ञानिकापद्धत्या व्रजावधीत्याद्याधुनिकभाषासु स्वरध्वनीनां वर्गीकरणम्

एते एव अष्टौ प्रधानाः स्वरा व्रजेत्याद्याधुनिकभाषासु ह्रस्वदीर्घजपितादिभेदेन विविधभेदान् भजन्ते । ते च सर्वे समूह्य संख्यया सप्तदश अष्टादश वा भवन्ति । ते यथा समासेन प्रोच्यन्ते—अकारस्य भेदाः—(१) अर्धविवृतो मध्यस्वरः, (२) विवृतपश्चात्स्वरः, (आ) आंग्लभाषायाम् प्रयुज्यते । पश्चात्स्वराः—ओकारस्य भेदाः—अर्धविवृतह्रस्व—अर्धविवृत-दीर्घ-सम्वृतह्रस्व-अर्धविवृत-दीर्घ

१. डा० भोलाशङ्करव्यासकृते हिन्दी "संस्कृत का भाषा शास्त्रीय अध्ययन" इति ग्रन्थे (पृ० सं० ८४) "कादरी हिन्दुस्तानी फोनेटिक्स" (पृ० सं० ४८) इति स्थले द्रष्टव्यम् ।

पश्चात्स्वराः (अत्र चत्वारो भेदाः समस्ताः) उकारस्य भेदाः—सम्वृतह्रस्वजपितसम्वृतह्रस्व-सम्वृतदीर्घपश्चात्स्वराः । (अत्र त्रयो भेदाः समस्ताः) ।

अग्रस्वराः—इकारस्य भेदाः—सम्वृतदीर्घसम्वृतह्रस्वजपितसम्वृतह्रस्वाग्रस्वराः (अत्र त्रयो भेदाः समस्ताः) ।

एकारस्य भेदाः—अर्धसम्वृतदीर्घजपितसम्वृतदीर्घअर्धविवृतदीर्घ-अर्धविवृत ह्रस्वाग्रस्वराः (अत्र चत्वारो भेदाः समस्ताः) अर्धविवृतमध्यह्रस्वार्थस्वरसंज्ञकः अ इत्यपि स्वरो विद्यते ।

अर्धविवृतमध्यस्वरः

अ—अस्योच्चारणे जिह्वाया मध्यभागः किञ्चिद् ऊर्ध्वमुत्तिष्ठते, ओष्ठौ च परस्परं वृत्ताकृतिकौ जायेते । अधुना, कमल सरल—इत्यादिशब्देषु क्रमशोऽकारः ककार-मकारोत्तरभूतश्च योऽकारः सोऽर्धविवृतमध्यस्वरसंज्ञो वेदितव्यः ।

अस्य अर्धविवृतमध्यस्वरसंज्ञकस्याकारस्य भेदद्वयं विद्यते—(१) अग्रस्तः, (२) ग्रस्तश्च । हिन्दीभाषायां कमलेत्यादिशब्दानां मध्येऽकारस्य पूर्णरूपेणोच्चारणं क्रियते । अतोऽयं वर्णोऽग्रस्तस्वरसंज्ञया व्यवहृतो मया । परन्तु कमलेत्यादिशब्दानामन्ते योऽकारस्तस्योच्चारणं न क्रियते, "कमल्", "सरल्" इत्येवं हलन्तल्कार एव व्यवह्रियते । परन्त्वस्य नियमस्यापवादोऽपि[1] दृश्यते ।

विवृतदीर्घपश्चात्स्वरः—"आ"—अस्योच्चारणे जिह्वा यद्यपि अधस्तादेव शयाना चेष्टते, तथापि अस्याः पश्चाद्भागः किञ्चिदाभ्यन्तरमिव उत्तिष्ठते, ओष्ठद्वयञ्च पूर्णरूपेण वृत्ताकृतिं न परिधत्ते, किन्तु ह्रस्वस्य अकारस्योच्चारणे यावत्परिमाणं विवार्यते, तदपेक्षयाऽधिकमस्योच्चारणे विवार्यते । उदाहरणं यथा "काल", "दाम" इत्यादिषु काद्युत्तर आकारः ।

आॅ—अयं स्वर आंग्लभाषायां विशेषरूपेण प्रयुज्यते । दीर्घाकारापेक्षयाऽस्योच्चारणस्थानमत्यूर्ध्वम्, प्रधानस्वरस्य ओकारस्यापेक्षया च किञ्चिदेव अधस्ताद् विद्यते । आंग्लभाषायामस्य ह्रस्वरूपम् "अ" इत्यादि व्यवह्रियते, किन्तु हिन्दीभाषायां दीर्घरूपस्य व्यवहारो विशेषरूपेण क्रियते । अस्योदाहरणमधस्ताद्[2] टिप्पण्यां द्रष्टव्यम्[3] ।

अर्धविवृतह्रस्वपश्चात्स्वरः—ओॅ—अस्योच्चारणे ओष्ठद्वयं वृत्ताकारेण विवृतं जायते । जिह्वायाः पश्चाद्भागश्च अर्धविवृतपश्चात्प्रधानस्वरापेक्षया

१. हिन्दीभाषायां "बन्द और खुला हुआ" इत्युच्यते ।
२. काङ्ग्रेस, लार्ड, कान्फ्रेन्स ।
३. सूचना—इतोऽग्रे स्वराणां सर्वाण्युदाहरणानि टिप्पण्यां द्रष्टव्यानि ।

किञ्चिदेव ऊर्ध्वमुत्तिष्ठमानोऽन्तर्भागमपीडितावस्थाञ्च दधाति। अयं स्वरो ब्रजभाषायां विशेषरूपेण व्यवह्रियते।[1]

अर्धविवृतदीर्घपश्चात्स्वरः—औ—अस्योच्चारणे ओष्ठद्वयं वृत्ताकारेण विशेष रूपेण बिवार्यते। प्रधानस्वरस्य ओकारस्यापेक्षया अस्योच्चारणस्थानं किञ्चिदूर्ध्वं विद्यते। अस्य स्वरस्य ओकारौकाराभ्यां भिन्नत्वं स्फुटतया समुच्चारणे प्रतीयते। व्रजभाषायाञ्च विशेषरूपेणायं स्वरो व्यवह्रियते[2]।

अयं स्वर औकारस्य परिवर्तितरूपमवगम्यते। त्वरापूर्वकमुच्चारणेन औकार एव ओ इत्यर्धविवृतरूपेण श्रूयते। यथा "ढौकते[3]" इत्यत्र ढकारोत्तरस्य औकारस्य त्वरावशाद् "ढोकते" इत्युच्चारणं क्रियने वङ्गदेशीयैः।

अर्धसम्वृतह्रस्वपश्चात्स्वरः—ओ—अस्योच्चारणे ओष्ठद्वयस्य वृत्ताकारेण सम्बरणात्– जिह्वायाः पश्चाद् भागस्य च ऊर्ध्वमुत्थापनादयं स्वरोऽर्धसंवृत ह्रस्व पश्चात्नाम्ना व्यवह्रियते। प्रधान स्वरस्य ओकारस्यापेक्षयाऽस्य स्थानं निम्नमेव विद्यते[4]।

अर्धविवृतदीर्घपश्चात् स्वरः—ओ—अस्योच्चारणे ओष्ठद्वयं स्पष्टतया वृत्तात्मकं रूपं परिधत्ते। यस्य ओकारस्य प्रधानस्वरेषु गणना क्रियते, तदपेक्षया किञ्चिद् अधस्ताद् अस्योच्चारणस्थानं विद्यते[5]।

सम्वृतह्रस्वपश्चात्स्वरः—उ—अस्योच्चारणे जिह्वायाः पश्चाद् भागोऽतिशयेन ऊर्ध्वमुत्तिष्ठते, मध्यभागश्च अभिनतो भवति। औष्ठद्वयञ्च पूर्णरूपेण वृत्ताकारं परिदधत् सम्पुटितं जायते[6]।

जपितह्रस्वसम्वृतपश्चात्स्वरः–उ—अस्योच्चारणे स्वरतन्तुद्वयं शिथिलावस्थां परिधत्ते। अतः श्वासस्य बाहुल्यात् 'फुसफुसाहट्' ध्वनिः समुत्पद्यते। प्रधानस्वरस्य ह्रस्वस्य उकारस्योच्चारणे तु स्वरतन्तुद्वयमशिथिलं परस्परञ्च संश्लिष्टं जायते। स्वरतन्तुद्वयस्य परस्परं संश्लेषाद् वायुरतिशयेन न निःसरति। अतोऽस्योच्चारणे धोषः समुत्पद्यते। एवं जपिताजपितस्वरयोर्भेदो वेदितव्यः।

---

१. अवलोकिहों सोच विमोचन को (कवि० वाल० १) वरु मारिए, मोहिं विना पग धोए, हाँ नाथ न नाव चढ़ाइहों जू (कविता०, अयोध्या० ६)
२. व्रज०— वाकों, एसों, गयों, खयों।
३. स्त्रीपदार्थवाचक "औरत" इति शब्दस्य "ओ ँरत" इत्युच्चारणं क्रियते।
४. "पुनि लेत सोई जेहि लागि अरैं" (कविता०, वा० का० ४) "ओहिकेर विटिया" (अवधीभाषायां प्रयुज्यते)
५. ओस, बोतल, चाटो।
६. उस, मधुर, ऋतु।

अयञ्च जपितस्वरो व्रज-अवधीत्यादिदेशजभाषासु बहुशो व्यवह्रियते[1]। अयं स्वरोऽघोषनाम्नाऽपि व्यवहर्तुं शक्यते।

सम्वृतदीर्घपश्चात्स्वरः—ऊ—अस्योच्चारणे जिह्वायाः पश्चाद्भागः कोमलतालुस्थानं स्पृशन्नतीव ऊर्ध्वमुत्तिष्ठते। ओष्ठद्वयञ्च त्वरापूर्वकं वृत्ताकारेण सम्वृतं जायते। एकमात्रिकह्रस्वोकारापेक्षया द्विमात्राकालमस्योच्चारणं क्रियते। एभिः कारणैरयं स्वरः सम्वृतदीर्घपश्चात्स्वरनाम्ना व्यवह्रियते। मूलस्वरस्य उकारस्यापेक्षयाऽस्योच्चारणस्थानं किञ्चिदेव अधस्ताद् विद्यते[2]।

अग्रस्वराः

सम्वृतदीर्घाग्रस्वरः—ई—अस्योच्चारणे जिह्वाग्रभागः कठोरतालुनोऽतीव समीपमुपसर्पति, ओष्ठद्वयञ्च विस्तीर्यते। प्रधानस्वरस्य ईकारस्यापेक्षया हिन्दी-भाषीय-ईकारस्य स्थानम् अल्पमेव अधस्ताद् विद्यते[3]।

सम्वृतह्रस्वाग्रस्वरः—इ—अस्योच्चारणे जिह्वाग्रभागस्ताल्वग्रभागमुपस्थाय अन्तर्मुखभवनतो जायते। ओष्ठद्वयञ्च शिथिलावस्थां भजते[4]।

जपितसम्वृतह्रस्वाग्रस्वरः—इ—अस्योच्चारणस्थानं ह्रस्वेकारतुल्यमेव विद्यते, किन्तु **अयं** स्वरो घोषप्रयत्नकः; यतो हि अस्योच्चारणे वायोराधिक्येन फुसफुसाहटात्मकध्वनिः समुत्पद्यते। व्रजादिदेशजभाषासु शब्दानामन्तेऽयं स्वरो बहुशः प्रयुज्यते[5]।

अर्द्धसम्वृतदीर्घाग्रस्वरः—ई—एकारस्योच्चारणे ओष्ठद्वयं यावद् वितन्यते, तदपेक्षया न्यूनमेवास्योच्चारणे विततं जायते, जिह्वाग्रभागश्च अर्धमेव मुखद्वारं सम्वृणोति[6]।

अर्धसम्वृतह्रस्वाग्रस्वरः—ए—दीर्घस्योच्चारणे जिह्वाग्रभागो यावदुत्तिष्ठति, तदपेक्षया किञ्चिन्न्यूनमुत्थितो जायते, स्वकेन्द्राभिमुखमवनतावस्थाञ्च गृह्णाति[7]।

---

१. व्रजभाषायाम्—आवतउ। अवधी—आतउ, ऊँट्उ मोरउ इत्यादि। श्यामसुन्दरदासकृते भाषारहस्ये जपितह्रस्वः सम्वृतपश्चाद्वृत्ताकारस्वरनाम्ना प्रोक्तः। तदनुसृत्य मया जपितह्रस्वसम्वृतपश्चात्स्वरनाम्ना व्यवहृतोऽयं स्वरः।
२. ऊपर, मसूर, वालू-इत्यादि।
३. ईख, अमीर, आती-इत्यादि।
४. इस, मिलाप, आदि—इत्यादि।
५ आवतइ, (अवधी), गोलइ—इत्यादि।
६. एक, अनेक, चले।
७. अवधेस के द्वारे सकारे गई (कविता० वाल० १), अवधी—ओहिकर वेटवा।

जपितार्धसम्वृतह्रस्वाग्रस्वरः —ए— अस्योच्चारणस्थानं ए-स्वरतुल्यमेव विद्यते।

'ए' इति स्वरो घोषात्मकः; किन्तु 'ए' इति जपितस्वरस्तु अघोषात्मकः—इत्येवान्तरमुभयोर्वेदितव्यम्। अयं स्वरोऽवधीभाषायां विशेषरूपेण प्रयुज्यते। अन्यत्र च अस्य प्रयोगो न दृश्यते।

अर्धविवृतदीर्घाग्रस्वरः—एँ -अस्योच्चारणस्थानं प्रधानस्वरापेक्षया किञ्चिदूर्ध्वं विद्यते। व्रजभाषायाम् ऐकारस्य स्थानेऽयं स्वरः प्रयुज्यते[१]।

कादरीमहोदया एवर्णं संयुक्तस्वरं न मन्यन्ते। यथा—"एव, कैद" इत्यादिशब्देषु ऐकारं मूलस्वरतयाऽङ्गीकृतवन्तः, किन्तु हिन्दीभाषायामस्य त्वरावशादुच्चारणे 'ए' सदृशोऽयं व्यवह्रियते। चेटर्जीमहोदयास्तु वङ्गभाषायाम् एकारं मूलस्वरूपेणाङ्गीकृतवन्तः। वेलीनामकश्च विद्वत्प्रवरः पञ्चसिन्धभाषायां (पञ्जाबीभाषायाम्) "पैर, बैल" इत्यादिशब्देषु ऐवर्णमूलस्वररूपेणाङ्गीकृतवान्।

अर्धविवृतह्रस्वाग्रस्वरः—एँ—अस्योच्चारणे जिह्वाग्रभागः एकारस्य उच्चारणे यावान् विनम्रस्तदपेक्षया किञ्चिन्न्यूनमेव आभ्यन्तरश्च अवनतो भवति। अयं स्वरो व्रजभाषायां विशेषरूपेण व्यवह्रियते[२]।

अर्धविवृतमध्यह्रस्वार्धस्वरः—अ—अ-स्वरेणास्य साम्यं विद्यते। जिह्वामध्यभागः अकारस्योच्चारणे यावानुत्तिष्ठति, तदपेक्षयाऽधिकमस्योच्चारणे ऊर्ध्वं गच्छति। आंग्लभाषायामयं स्वरः उदासीनसंज्ञया व्यवह्रियते। अवधी-पञ्जाबी-(पञ्चनद)-भाषयोश्च अयं स्वरो विशेषरूपेण व्यवह्रियते[३]।

एतावन्त एव स्वराः ग्राम्यभाषासु, यद्वा राष्ट्रभाषायाः साहित्येषु समुपलभ्यन्ते। एतेषां स्वराणामनुनासिकरूपाण्यपि प्रयुज्यन्ते। तान्यपि व्यवहारतो वेदितव्यानि। एवमेव आंग्ल-जर्मन-अरब-फारसादिदेशेषु व्यवह्रियमाणभाषासु एते एव स्वराः केचिदुपलभ्यन्ते, केचिच्च नोपलभ्यन्ते। ये स्वराः समुपलभ्यन्ते तेषां विभाजनमप्येतादृशं वेदितव्यम्। क्वचित्तु इतोऽधिका अपि स्वराः समुपलभ्यन्ते, यथा आंग्लभाषायाम् ऐ अर्धविवृतदीर्घमध्यस्वराः येषां राष्ट्रभाषापेक्षया आधिक्यं दृश्यते। अत्र च यावता प्रयोजनं तावदेव प्रतिपादितम्। एतेषां स्वराणां विषये **प्रातिशाख्य**व्याकरणदृशाऽग्रे विशदरूपेण व्याख्यानं करिष्यते। इतोऽग्रे आधुनिकध्वनिविज्ञानपद्धतया व्यञ्जानानां विभाजनं प्रदर्श्यते।

---

१. एंसो, केसो।

२. सुतगोद कैँ भूपति लै निकसे। (कविता० बाल०१)

३. अवधी—सोरहीं, राम के; पञ्जाबी—रईस वेचारा, नौकर। (हिन्दी—विचारा नौकर)

आधुनिकध्वनिविज्ञानपद्धतया व्यञ्जनानां विभाजनम्

आधुनिकशब्दशास्त्रेषु समुपलभ्यमानान् व्यञ्जनविभागानाश्रित्य निम्नोक्तकोटिषु कादिवर्णा विभाजयितुं शक्यन्ते —

(१) स्पर्शः, (२) प्रतिवेष्टितः, (३) स्पर्शसङ्घर्षी, (४) अनुनासिकः, (५) पार्श्विकः, (६) लुण्ठितः, (७) उत्क्षिप्तः, (८) सङ्घर्षी, (९) अर्धस्वरः।

केचिद् ध्वनिवैज्ञानिका टवर्गं प्रतिवेष्टितम् मन्यन्ते। टवर्गस्य प्रतिवेष्टितत्वं **प्रातिशाख्ये** प्रसिद्धम्। तद्यथा **तैत्तिरीयप्रातिशाख्ये** "जिह्वाग्रेण प्रतिवेष्टय मूर्द्धनि टवर्गे" (तै० प्रा० २।३७) इति सूत्रे समुपलभ्यते। केचिच्च ध्वनिविद्वांसः टवर्गं स्पर्शवर्णं, न तु प्रतिवेष्टितं स्वीकुर्वन्ति। तदनुसारेण अष्टावेव भागाः कादिवर्णानां स्वीकर्तुमापतन्ति।

१. एतेषां मध्ये **स्पर्शाः** चवर्गटवर्गौ विहाय कादिमान्ताः सर्वे वर्णाः। एतेषामुच्चारणे जिह्वायास्तत्तत्स्थानेषु स्पर्शः सञ्जायते। अतस्ते स्पर्शसंज्ञया व्यपदिश्यन्ते।

२. **प्रतिवेष्टितः —टवर्गः**—अस्योच्चारणे जिह्वाग्रं प्रतिवेष्टय कठोरतालौ स्पर्शः क्रियते। अतोऽयं वर्गः प्रतिवेष्टितनाम्ना प्रसिद्धः।

३. **स्पर्शसंघर्षी —चवर्गः**—अस्य वर्गस्य उच्चारणे कर्तव्ये जिह्वाग्रभागस्य दन्तमूलोपरि कठोरतालौ च घर्षणपूर्वकं स्पर्शादयं वर्गः स्पर्शसंघर्षिसंज्ञामलभत।

४. **अनुनासिकः**—"ङ ण न म" इत्यनुनासिकवर्णातिरिक्ताः "न्ह म्ह" इत्यनयोरपि अनुनासिकेषु गणना क्रियते। संस्कृतभाषायां प्रधानतया "ण न म" इत्यनुनासिकत्रयमेव स्वीक्रियते ध्वनिविद्भिः। ङकारजकारौ तु नकारध्वनेरङ्गीभूतौ स्वीकुर्वन्ति।

५. **पार्श्विकः**—ल, ल्ह—लकारोच्चारणे कर्तव्ये जिह्वाग्रभागस्य दन्तमूलोपरि स्पर्शे सति जिह्वाया वामदक्षिणभागाभ्यां वायोर्निःसरणादयं वर्णः पार्श्विकः उच्यते। यथा सल्हा, सलाह, लाभ, वलि—शब्देषु लकारे। वेदे च "मीढ्वे" शब्दे ढकारस्य स्थाने जायमानो ल्हशब्दोऽपि पार्श्विको वेदितव्यः।

६. **लुण्ठितः**—र—अस्योच्चरणे जिह्वाग्रभागः कम्पमानः सन् वर्त्स्वभागं त्रिःस्पृशति। अतोऽयं लुण्ठित उच्यते। यथा अवधीभाभाषायाम् अर्ही, आयरिशभाषायाश्च "वेगोर्रा" शब्दे रेफः।

७. **उत्क्षिप्तः**—ड़कार-ढ़कारौ—अनयोरुच्चारणे जिह्वाग्रभागः उत्क्षिप्य त्वरापूर्वकं कठोरतालौ (मूर्द्धनि) स्पर्शं करोति। यथा जनभाषायां "पेड़" "बढ़िया" शब्दयोः। वेदेषु रेफं केचिद् उत्क्षिप्तं मन्यन्ते।

८. **सङ्घर्षिवर्णः**—अस्योच्चारणे स्वरयन्त्रे सङ्घर्षस्यानुभवाद् इमौ वर्णौ संघर्षिसंज्ञां लभेते। आद्यो हकारः संघोषः, द्वितीयश्च अघोषो विद्यते। अघोषहकार एव संस्कृते विसर्गनाम्ना प्रोच्यते। अघोषहकारस्योदाहरणं यथा—पुनः पुनः, प्रायः—इत्यादिशब्देषु। सघोषस्य यथा—"हस्तः" इत्यादिशब्देषु हकारः। "शषस" इत्येते त्रयो वर्णाः ज़ ख़ फ़ व़ इत्येते च वर्णा येषाममधस्ताद् बिन्दुर्दृश्यते सङ्घर्षिण उच्यन्ते। एते बिन्दुयुताः खकारादिवर्णा विदेशिशब्देषु प्रचुरतया समुपलभ्यन्ते। तद्यथा—ख़राब, बुख़ार, ज़ालिम, नाज़, फ़ारसी, साफ़—इत्यादिशब्देषु क्रमशस्ते सङ्घर्षिणो वर्णा उच्चार्यन्ते "श ष स" इति वर्णत्रयस्य संघर्षिसंज्ञकस्य वर्णस्य संस्कृते प्राचुर्येणोपलब्धिर्दृश्यते। वेदिकौ जिह्वामूलीयोपध्मानीयावपि सङ्घर्षिसंज्ञकौ स्तः[1]।

९.—**अर्धस्वरः**—य, व—नूतना ध्वनिशास्त्रिणो यकारं वकारञ्च अर्धस्वरौ मन्यन्ते। वस्तुतस्तु **प्रातिशाख्ये**ऽपीमौ वर्णौ अर्धस्वरसंज्ञकौ प्रोक्तौ। अर्धस्वरसंज्ञकयकारस्योच्चारणे जिह्वाग्रभागः किञ्चिदेव तालुस्थानं स्पृशति, ए अ सदृशञ्च तस्योच्चारणं क्रियते। यथा यम, नियम, आय—इत्यादिशब्देषु। एवं वकारस्याप्युच्चारणे ओष्ठद्वयं किञ्चिदेव परस्परं स्पृश्यते, जिह्वायाः पश्चाद्भागश्च समुपस्थितो भवति। यथा हि—क्वारा, स्वाद, स्वर—इत्यादिशब्देषु। अत्र वकारस्योच्चारणम् ओ अ सदृशं क्रियते।

आधुनिकध्वनिवैज्ञानिकैः कृतस्य वर्णविभाजनस्य व्याकरणादिदृशा विचारः

एतावता ग्रन्थप्रबन्धेनेदमेव समायातं यत् पाणिनीयादिप्राचीनशिक्षासु यत्र वर्णानाम् आभ्यन्तरप्रयत्नकण्ठादिस्थानानां भेदानुसारेण विशेषतो विभाजनं व्यावृत्तम्, तत्र ध्वनिवैज्ञानिका वर्णोच्चारणोपयोगिजिह्वादेः परिस्पन्दानुसारेण वर्णविभागं परिकल्प्य, स्वराणाम् अर्धसम्वृतादिभागेषु, व्यञ्जनानाञ्च स्पर्शसङ्घर्ष्यादिभागेषु विभाजनं कृतवन्तः। ऐतिहासिकदृष्टया भाषायां अध्येतारश्च वेदेषु ह्रस्वैकारादीनां प्रयोगाभावात् "प्राचीनभारतयोरोपीयकालापेक्षया वैदिकभाषायां बहु परिवर्तनं जातम्" इत्येवं सिद्धान्ततयाऽनुसन्दधति स्म। तथा च ऋगादिवेदेषु समुपलभ्यमानमन्त्राः प्राचीनभारोपीयभाषायाः ह्रासावस्थामापन्नरूपाः सन्तीत्यपि तेषां वाक्यैर्ध्वन्यते[2]।

---

१. यथा धीरेन्द्रवर्म एम० ए० कृतस्य "हिन्दी भाषा का इतिहास" इति ग्रन्थस्याशीतितमे पृष्ठे "वैदिक व्यञ्जनवर्गीकरण" इत्यत्र दृश्यताम्।

२. "ऐतिहासिक तुलना की दृष्टि से देखें तो वैदिक भाषा में कई परिवर्तन देख पड़ते हैं। भारोपीय मूलभाषा की ध्वनियां उसमें नहीं पाई जाती"—श्यामसुन्दरदास बी० ए० कृते भाषारहस्ये "वैदिक ध्वनिसमूह" इति स्थले एतदीयोंऽशो द्रष्टव्यः। अर्थाद् भारोपीयभाषायाः ह्रस्वैकारादीनां वेदेष्वभावो विद्यते इति तात्पर्यमवगन्तव्यम्।

भर्तृहर्यादयः प्राचीनवैयाकरणदार्शनिकास्तु ह्रस्वेकारादीनेव उच्चारणासामर्थ्याद् दीर्घेकारादीनां व्यवकीर्णत्वरूपं मन्यन्ते स्म। तथा चोक्तं **वाक्यपदीये** ब्रह्मकाण्डे—"दैवी वाग्व्यवकीर्णेयमशक्तैरभिधातृभिः" इत्यादि। इयं दैवी वाग् अशक्तैरभिधातृभिः एकारादेः शुद्धोच्चारणं कर्तुमसमर्थैः एकारादेर्ह्रस्वरूपमुच्चारयद्भिश्च व्यवकीर्णा अर्धकादिदोषैरवच्छिन्ना—इति कारिकाया अर्थः।

वस्तुतस्तु ह्रस्वैकारादीनां दोषग्रस्तत्वाद् वेदादिषु तेषां समुपलब्ध्यभावः प्रयोगाभावश्च दृश्येते, न तु वैदिकयुगे ह्रस्वेकारादीनामभावः सञ्जातः—इत्येतावता वेदेषु तेषां समुपलब्धिर्न दृश्यत इति वक्तुं युज्यते। व्याकरणग्रन्थेषु अर्धकादिसंज्ञकह्रस्वरूपदोषानुसारेणापि वर्णा विभाजिता दृश्यन्ते। वर्णदोषाणामैतिहासिकं विवरणमग्रे प्रदर्शयिष्यते। अत्र तावत् प्रथमं नूतनैर्ध्वनिशास्त्रिभिः प्रतिपादिता ओकारादयो ह्रस्वविवृतपश्चाग्रादिस्वराः केन केन दोषेण ग्रस्ताः सन्तीति प्रतिपाद्यते। भगवान् पतञ्जलिर्महाभाष्यस्य पस्पशाह्निके "आकृत्युपदेशात्सिद्धमिति चेत् सम्वृतादीनां प्रतिषेधः" इति वार्त्तिकस्य व्याख्यावसरे स्वरदोषान् व्यावृणोत्। ते च यथा—

सम्वृतः, कलः, ध्मातः, एणीकृतः, अम्बूकृतः, अर्धकः, ग्रस्तः, निरस्तः, प्रगीतः, उपगीतः, क्ष्विण्णः, रोमश इति। अपर आह—

ग्रस्तं निरस्तमवलम्बितं निर्हतमम्बूकृतं ध्मातमथो विकम्पितम्।
सन्दष्टमेणीकृतमर्धकं द्रुतं विकीर्णमेताः स्वरदोषभावनाः॥ इति॥

यद्यपि भाष्यकारः एषां स्वरदोषत्वेन गणनां कृतवान्, परन्तु केचिद् दोषाः स्वरव्यञ्जनयोरुभयोरपि भवितुं शक्यन्ते। तद्यथा—एणीकृतः, अम्बूकृत इत्यादि। **महाभाष्ये** तु वर्णदोषाणां प्रादेशमात्रं निर्देशं कृतवान् पतञ्जलिः, परन्तु शौनकीय**ऋग्वेदप्रातिशाख्यस्य** चतुर्दशपटले भगवान् शौनकः प्राचुर्येण वर्णदोषानुपदिष्टवान्। ते[1] यथा उदाहरणमात्ररूपेणात्र प्रदर्श्यन्ते—निरस्तम्, व्यासः, पीडनम्, अम्बूकृतम्, शूनम्, सन्दष्टम्, प्रकर्षणम्, ग्रस्तम्, अयथामात्रमित्यादि। इतोऽन्येऽपि बहवो दोषास्तत्र संख्याताः। तत्र अधुनातनैर्भाषाविज्ञाननिपुणैर्गवेषिता ये प्राचीनभारोपीयह्रस्वैकारादयः, यद्वा अर्धविवृतह्रस्वाग्रादिस्वराः, यद्वा विभिन्नभाषासूपलभ्यमानास्ते स्वरा येन येन दोषेण ग्रस्तास्तेषामेवात्र व्याख्यानं करिष्यते।

१—"अयथामात्रं वचनं स्वराणाम्" (ऋ० वे० प्रा० १४।१०)=ह्रस्वे—
कारादिस्वराः

ह्रस्वा एकारादयः स्वरा अयथामात्रवचननामकेन दोषेण ग्रस्ता विद्यन्ते।

---

१. शौनकीयर्ग्वेदप्रातिशाख्ये—"निरस्तं स्थानकरणापकर्षे" १४।२, "विहारसंहारयोर्व्यासशीलने" १४।३, "ओष्ठाभ्यामम्बूकृतमाह नद्धंदुष्टम्" १४।४।

मात्रामनतिक्रम्य यथामात्रम्, न यथामात्रमित्ययथामात्रम्, वचनमुच्चारणम्। ह्रस्वस्य दीर्घोच्चारणम्, दीर्घस्य च ह्रस्वोच्चारणम्, प्लुतस्य वा ह्रस्वदीर्घोच्चारणम् अयथामात्रवचननामकः स्वरदोष उच्यते। यथा अस्मिन्नेव सूत्रे समुदाहृतम् ऋग्वेदप्रातिशाख्ये "रक्तं ह्रस्वं द्राघयन्त्युग्रँ ओकः" (ऋ०प्रा० १४।५१) रक्तं सानुनासिकं ह्रस्वमकारं दीर्घं कुर्वन्ति स दोषः। यथा—विश्वेदहानि तविषीव उग्रं ओकः (ऋ० वे० ७।२५।४)। अस्मिन्मन्त्रे "उग्रं" इत्यत्र "उग्रं" शब्दघटकस्य 'अं' इति सानुनासिकस्य ह्रस्वस्याकारस्य "उग्रां" इति दीर्घोच्चारणं दोषः, स च दोषोऽयथामात्रवचननामको व्यवह्रियते।

प्राचीनभारतयोरोपीयभाषान्तर्गताः, यद्वापालि-प्राकृत-अपभ्रंशादिभारतीयभाषासूपलभ्यमानाः "आ ए ओ ए" इति ह्रस्वैकारादयः स्वरा अयथामात्रवचनदोषग्रस्ताः स्फुटरूपेण प्रतीयन्ते। अतस्तेषां देववाण्यां प्रयोगो न दृश्यते। किञ्च, ह्रस्वैकारादिषु **महाभाष्योक्तो** अर्धकनामाऽपि दोषो दृष्टिपथमवतरति। दीर्घस्य ह्रस्वोच्चारणमर्धकदोष उच्यते।

सम्वृतः (पातञ्जलमहाभाष्यस्य पस्पशाह्निके प्रोक्तः)
=ऊकारादिसम्वृतदीर्घपश्चादादिस्वराः

दीर्घाकारादीनां विवृतोच्चारणे कर्तव्ये सम्वृतोच्चारणं तन्नामको दोष (सम्वृतनामकः) उच्यते। एवं विवृततमेष्वौकारादिषूच्चार्येषु सम्वृतो दोषो जायते। ऊकारादिसम्वृतदीर्घपश्चात्स्वराणां सम्वृतदोषयुक्तत्वकथनं सुतरां युक्तमेव प्रतिभाति। यद्यपि व्रज-अवधीत्यादिदेशजभाषासु दीर्घकारादीनां ह्रस्वोच्चारणम्, यद्वा सम्वृतमुच्चारणं दोषो न व्यवह्रियते, तथाऽपि संस्कृते तेषामयथामात्रवचनादिदोषेषु गणना क्रियते।

"जिह्वामूलनिग्रहे ग्रस्तमेतत्" (ऋ० वे० प्रा० १४।८)
"ग्रासः कण्ठचयोः" (ऋ० वे० प्रा० १४।१२)
=अर्धविवृतमध्यस्वरः

जिह्वामूलस्य निग्रहे ग्रस्तं नाम दोषो भवति। अयञ्च दोषः कण्ठचयोर्ह्रस्वदीर्घाकारयोरुत्पद्यते। अयं दोषो ग्रासेत्यपरनाम्नाप्यभिधीयते। अर्धविवृतमध्यस्वरोकारो हिन्दीभाषायाम् "अव, कमल, सरल" इत्यादिशब्देषु बहुशः समुपलभ्यते। हिन्दीभाषायाम् अधुनापदार्थवाचके अवशब्दे, तथा कमलादिशब्देषु च अन्तिमोऽकारः स्पष्टतया नोच्चार्यते। जिह्वामूल एव ग्रस्तो जायते।

"विहारसंहारयोर्व्यासपीलने" (ऋ० वे० प्रा० १४।३)
=जपितस्वरः इ उ ए इति

स्थानकरणयोर्विस्तारे संहारे (सङ्कोचे) च सति व्यासपीडननामकौ दोषो जायेते। विहारे व्यासः, संहारे च पीडनदोषो भवति। व्रजादिभाषासु "जातउ"

"आवतइ" इत्यादिशब्देषु जपितस्वरेकारोकारौ पीडननामकदोषेण ग्रस्तौ विद्येते, यतो हि अनयोरुच्चारणे स्थानं करणञ्च द्वे अपि संकुचिते जायेते। किञ्च, जपितस्वरसंज्ञक उकारोऽम्बूकृतदोषेणापि ग्रस्तः प्रतीयते, यतो हि जपितस्वरस्य उकारस्य उच्चारणे ओष्ठद्वयं परस्परमतीव नद्धं भवति। पुनश्च ते जपितस्वराः "श्वासोऽघोषनिभता हकारे" (ऋ० वे० प्रा० १४।२८) इत्यत्र यो दोषो हकारस्य निर्दिष्टस्तेनापि दोषेण ग्रस्ताः प्रतिभान्ति। श्वासो वाऽधिकोऽघोषसदृशत्वं वा हकारस्य दोषो लक्ष्येत्। जपितस्वराणामप्युच्चारणे श्वासस्याधिक्यम् अघोषता च प्रतीयेते। अतस्ते श्वासघोषनिभताभ्यां दोषाभ्यां ग्रस्यन्ते।

एवमेव नूतनध्वनिविज्ञानसम्प्रदाये घर्षस्पर्शादिसंज्ञका ये वर्णा व्याख्यायन्ते, तेऽपि पीडनादिदोषैः संयुताः सन्तीति लक्षणसमन्वयेन सुतरां वक्तुं युज्यते। तथा च अधस्तात् क्रमशः स्पर्शसंघर्ष्यादिवर्णानां दोषग्रस्तत्वं व्याचक्षे—

"सरेफयोर्मध्यमयोर्निरासः" (ऋ० वे० प्रा० प० १४।२४)
"निरस्तं स्थानकरणापकर्षे" (ऋ० वे० प्रा० प० १४।२)
=स्पर्श संघर्षी चवर्गः

सह रेफेण वर्तते इति सरेफौ। एतेषामेव चतुर्णां वर्गाणां यौ **मध्यमौ** वर्गौ (चवर्गटवर्गौ) तयोश्च रेफस्य च निरासो नाम दोषो भवति। स च दोषः "निरस्तं स्थानकरणापकर्षे" (ऋ० वे० प्रा० १४।२) इत्यत्र व्याख्यातः। स्थानकरणयोरपकर्षेण निरस्तं नाम दोषः समुत्पद्यते। अस्य स्पर्शसंघर्षिसंज्ञकस्य "च्य छ्य ज्य"—इत्येवमुच्चारणं तालुस्थानस्य तत्करणभूतजिह्वामध्यभागस्य च घर्षणाज्जायते। अतोऽयं स्पर्शसंघर्षिचवर्गो निरासदोषेण युक्तः स्पष्टतया प्रतीयते।

पुनश्चायं स्पर्शसंघर्षिवर्णः "लेशेन वचनं पीलनं वा" (ऋ० वे० प्रा० १४।१७) इति सूत्रनिर्दिष्टदोषेणापि युक्तः प्रतीयते। प्रयत्नशैथिल्येन प्रयत्नाधिक्येन जिह्वाघर्षणपूर्वकं व्यञ्जनानामुच्चारणे कृते लेशवचननामकः पीडननामकश्च दोषौ जायेते। प्रयत्नाधिक्येन चवर्गस्योच्चारणे जिह्वायां संघर्षः समुत्पद्यते। अतः स्पर्शसंघर्षिसंज्ञकोऽयं चवर्गः पीडनदोषेणापि ग्रस्तः स्वीकर्तुं शक्यते।

एतेषां स्पर्शसङ्घर्षिवर्णानां जिह्वाप्रथनदोषयुक्तत्वमपि प्रतिपादयितुं शक्यते। तथा चोक्तम्—"वर्गेषु जिह्वाप्रथनं चतुर्षु" (ऋ० वे० प्रा० १४।२१) इति। जिह्वायाः प्रथनम् = विस्तारो जिह्वाप्रथनमुच्यते। अयं जिह्वाप्रथननामको दोषः कादिनान्तेषु (आद्येषु चतुर्षु) वर्गेषूच्चारणे असामर्थ्यादिवशाज्जायते। यथा क ख च छ इत्यादिवर्णानां क्य, ख्य, ग्य, च्य, छ्य ज्येत्याद्युच्चारणे जिह्वा पृथुरूपं दधाति। कादि-नान्तेषु चवर्गस्यापि सन्निवेशादयमपि वर्गोऽनेन दोषेण युज्यते। स च दोषश्चवर्गस्य स्पर्शसंघर्षपूर्वकमुच्चारणे कृते जायते। अयं स्पर्शसंघर्षिसंज्ञकः पीडननामकदोषयुतो वर्णः (चवर्गः) वङ्गदेशे बहुशो व्यवह्रियते। एवञ्चायं स्पर्श-

संघर्षिचवर्गः निरास-पीडन-जिह्वाप्रथनेति दोषैर्युतो विद्यते। आचार्यश्रीसीताराम-चतुर्वेदिमहोदयास्तु स्पर्शसंघर्षि-चवर्गस्य भेदप्रतिपादनं व्यर्थमाहुः। तथा चोक्तं तैः— "अमान्याः[1] स्पर्शसंघर्षिलुण्ठितभेदाः" "इति। यश्चवर्गं च्य छ्य ज्य झ्य ञ्य"— इत्येवं व्यवहरति, तदुच्चारणे एव स्पर्शसंघर्षित्वं प्रतीयते। च छ इत्याद्युच्चारणे स्पर्शसंघर्षित्वं नानुभूयते। युक्तञ्च एतन्मह्यं प्रतिभाति।

"अतिस्पर्शो वर्वरता च रेफे" (ऋ० वे० प्रा० १४।२६)

=लुण्ठितः

मुहुर्मुहुरतिशयेन जिह्वाया दन्तमूले स्पर्शोऽतिस्पर्शः। "अर्ररर्र" इत्येवमुच्चारणं वर्वरता प्रोच्यते। यथा आयरिशभाषाया "वेगोर्रा" शब्दे। केचिदिमं[2] रेफं तालुकम्पितनाम्ना, अधिकतालुकम्पितनाम्ना च व्यपदिशन्ति। अयञ्च वर्वरतानामको दोषः पातञ्जलमहाभाष्यस्य पस्पशाह्निके प्रतिपादितो यो विकीर्णाभिधो दोषस्तेन नाम्नाऽप्यभिधातुं शक्यते। विकीर्णदोषेऽपि एको वर्णः "अर्र्रर्र" इत्यादिवदनेक इव प्रतिभाति। भाषाविज्ञाननिकाये लुण्ठितसंज्ञको रेफः पूर्वाभ्यामतिस्पर्श-वर्वरतानामकदोषाभ्यां युक्तो विद्यते।

"जिह्वान्ताभ्याञ्च वचनं लकारे" (ऋ० वे० प्रा० १४।२७)

=पार्श्विकः (लकारः)

लकारस्य जिह्वाग्रेणोच्चारणं कर्तव्यम्। स एव लकारो यदा जिह्वाया अग्रान्ताभ्यामुच्चार्यते तदा स दोषयुक्तो भवति। पूर्वोक्तौ द्वौ च अतिस्पर्शवर्वरौ दोषौ लकारस्यापि भवतः। पूर्वोक्तौ अतिस्पर्शवर्वरौ, अयञ्च दोषः—सर्वे सम्भूय त्रयो दोषा लकारस्य भवन्ति। ध्वनिविज्ञानसम्प्रदाये पार्श्विकसंज्ञको लकारोऽति-स्पर्शदोषयुतः प्रतीयते; यतो हि जिह्वान्ताभ्यां वर्त्स्वंभागेऽतिस्पर्शे सति वायु-र्जिह्वायाः पार्श्वद्वयेन बहिर्निःसरति। यद्यपि संस्कृतभाषायां समुपलभ्यमानं लकारं पार्श्विकं मन्यन्ते भाषावैज्ञानिकाः। वस्तुतस्तु अयं पार्श्विको लकारो दोषत्रययुक्त-त्वेन देशजभाषास्वेव समुपलभ्यते। यथा 'संल्हा' इत्यादिशब्देषु।

"सरेफयोर्मध्यमयोर्निरासः"=उत्क्षिप्तः ! (ड़कारो ढ़कारश्च)।

अस्य दोषस्य व्याख्यानं स्पर्शसंघर्षिसंज्ञकस्य च वर्गस्य व्याख्यावसरे कृतम्। "निरस्तं स्थानकरणापकर्षे" (ऋ० प्रा० प० १४।२) इति सूत्रोक्तानुसारेण स्थानकरणयोरपकर्षे सति निरस्तनामको दोषः सञ्जायते। चतुर्षु वर्गेषु मध्यम-वर्गद्वयमध्ये टवर्गस्य सत्त्वात् निरासनामको दोषोऽस्मिन् वर्गे जायते, स च दोषो वर्जनीयः।

भाषावैज्ञानिकनिकाये उत्क्षिप्तनाम्ना प्रसिद्धौ यौ टवर्गीय-डकारढकारयोः

१. आचार्यसीतारामचतुर्वेदिकृते भाषालोचनेति ग्रन्थे द्रष्टव्यम्।
२. ,, ,, ,, २४६ पृष्ठे द्रष्टव्यम्।

करणभूतस्य प्रतिवेष्टितजिह्वाग्रभागस्यापकर्षेण जायमानौ ड़कारढ़कारौ स्तः, तौ चानेन दोषेण ग्रस्तौ स्तः। यतो हि—उत्क्षिप्तवर्णोच्चारणे जिह्वाग्रभागो मूर्धानं त्वरापूर्वकमाहत्य प्रत्यावर्तते इति नूतनध्वनिविज्ञा उत्क्षिप्तवर्णोच्चारणस्य विधिं प्राहुः। निरासदोषग्रस्तवर्णस्य उच्चारणे करणमपकृष्टं भवतीत्युभयोः साम्यं समायाति। अनयोर्लक्षणसाम्याच्च "ड़कारढ़कारौ निरस्तदोषान्वितौ स्तः" इति सुतरां विश्वासपथमारोहति। किञ्च, अयमुत्क्षिप्तो वर्णो व्यथन[1] दोषेणापि संश्लिष्टः प्रतिभाति। व्यथनं नाम वर्णानामन्यथाकरणम्। यथा "रथ्या" इत्यत्र थकारस्य सकारवच्छ्रवणम्। रस्या इति। तथा च इमौ ड़कारढ़कारौ व्यथननामक-दोषेण ग्रस्तौ स्तः।

"श्वासोऽघोषनिभता वा हकारे" (ऋ० वे० प्रा० १४।२८)

=संघर्षी

अधिकः श्वासः, अघोषसदृशत्वं वा हकारस्य दोषो भवति। तथा च संघर्षि-संज्ञको हकारोऽधिकश्वासाघोषसदृशत्वदोषाभ्यां युक्तः प्रतीयते। यतो हि संघर्षि-संज्ञकस्य हकारस्योच्चारणे श्वासस्य प्राचुर्यं घोषस्य च अभावः—इत्युभौ अपि जायेते। एवमेव "ख ग ज झ व फ" इत्यादयो वर्णा अधिकश्वासग्रस्ता उच्चार्यन्ते। एते वर्णा **महाभाष्यस्य** पस्पशाह्निकोक्तेन ध्मातसंज्ञकदोषेणापि ग्रस्ताः प्रतीयन्ते। **महाभाष्ये** यद्यपि ध्मातसंज्ञको दोषः स्वराणामुक्तः, तथापि "ख ग" इत्यादिवर्णाना-मुच्चारणे श्वासभूयिष्ठतया एतेऽपि ध्मात-दोषेण ग्रस्यन्ते।

"अदेशे वा वचनं व्यञ्जनस्य" (ऋ० वे० प्रा० १४।१५)

=अर्धस्वरौ यकारवकारौ

अदेशे स्थानेऽसद्व्यञ्जनोच्चारणम् अदेशनामकदोष उच्यते। तथाऽर्धस्वरौ यकारवकारौ एतद्दोषयुक्तौ स्तः। यतोहि यकारवकारयोरुच्चारणे कर्तव्ये इकारो-कारौ समुच्चार्येते। एवं रीत्या उदात्तानुदात्तादिवर्णगुणानां समुद्देशनपूर्वकं[2] ह्रस्वैकारादिवर्णानां ये दोषास्तेषां व्याख्यानं निष्पादितम्।

एवमेव विचार्यमाणे सति इतोऽन्येऽपि बहवो दोषा लब्धुं शक्यन्ते। येषु ह्रस्वै-

१. समुद्दिष्टा वर्णगुणाः पुरस्तात्, निर्दिष्टानां संहितो यश्च धर्मः।
तदापायव्यथनानि दोषास्तान् व्याख्यास्यामोऽत्र निदर्शनाय॥
—ऋ०वे०प्रा०शा०१४।१
अत्र व्यथनदोषस्य ग्रहणं विद्यते। तस्य च व्याख्यानमुव्वटभाष्ये कृतम्। तदनुसृत्य मूलेऽपि स दोषो व्याख्यातः।
२. अकारादिवर्णानां विशेषरूपेण विभाजनावसरे वर्णगुणा व्याख्याता, अतो मूले वर्ण-गुणसमुद्देश्यपूर्वकमित्युक्तम्।

कारादिवर्णानां गणना कर्तुं शक्यते। अत्र तु मया निर्देशमात्रं प्रदर्शितम्। ह्रस्वैकारादीनाम् अर्धकत्वादिदोषग्रस्तत्वादेव वेदेषु तेषां प्रयोगाभावो बोध्यः। न तु प्राचीनभारतयोरोपीयह्रस्वैकारादीनां स्थाने दीर्घकारादयः प्रयुक्ताः—इत्येवं विद्यते। तथा चेदं वचनं कथमपि विश्वासपदवीम् नैव आटीकते। एते उपर्युक्ताः वर्णदोषाः। तथा च नूतनभाषावैज्ञानिकैः स्पर्शसङ्घर्षीत्यादिरीत्या कृतं वर्णविभाजनं न किमपि नवीनं वस्तुतत्त्वं प्रतीयते। ऋगादिवेदेषु वर्णदोषाणां संकेतस्य समुपलब्धेः सत्त्वात् तेषां सत्ता प्राचीनकालत एव स्वीकर्तव्या। अस्मिञ्जगति यथा गुणानां दुर्गुणानां सज्जनानां दुष्टानां वा युगपदेव समुत्पत्तिः, अत एव जगदिदं द्वन्द्वात्मकमुच्यते, तथैव वर्णानामपि ह्रस्वत्वदीर्घत्वादयो गुणाः, अर्धकत्वादयो दोषादुर्गुणाश्च युगपदेव प्रादुर्भूताः। अस्मिन् विषये मनागपि सन्देहो न न्याय्यः, न वा विश्वासार्हः।

अर्धकादिदोषग्रस्तानां ह्रस्वानामेकारादिवर्णानामैतिहासिकं विवरणम्

अर्धकत्वादिदोषग्रस्तानां ह्रस्वैकारादिवर्णानाम् आधुनिकेतिहासकारैर्निर्धारितेषु वैदिकादियुगेष्वपि बाहुल्येन अस्तित्वविषये ऐतिहासकमपि प्रमाणमुपस्थापयितुं शक्यते। यद्यपि "द्रष्टृप्रवक्तृसामान्याच्चानुमानम्—य एव आप्ता वेदार्थानां द्रष्टारः प्रवक्तारश्च ते एवायुर्वेदप्रभृतीनाम्—इति आयुर्वेदप्रमाण्यवद् वेदप्रामाण्यमनुमातव्यम्। इतिहासपुराणयोः धर्मशास्त्रस्य च" (न्यायभाष्यम् २।१।६८) इति वात्स्यायनवाक्येन वेदपुराणादीनां समकालिकत्वस्य सिद्धतया "वैदिकयुग,ः संस्कृतयुगः" इत्यादिरूपेण कालविभागो न संगच्छते, तथाप्यभ्युपेत्यवादेन तं कालविभागं स्वीकृत्य दोषग्रस्तानां ह्रस्वसंज्ञकानामेकारादिवर्णानामस्तित्वं वैदिकयुगेष्वपि प्रमाणपुरःसरमुस्थाप्यते।

आधुनिकैतिहासकाराणां विविधमतानुसारेण भारतदेशे समुपलभ्यमानभाषाः पञ्चभागेषु विभज्यन्ते—(१) वैदिकयुगः, (२) संस्कृतयुगः, (३) जैनयुगः, (४) बौद्धयुगः, (५) आधुनिकयुगश्च। केचिच्च प्राकृतादिभाषाणां संस्कृतयुगे गणनां कृत्वा भारतीयभाषां भागत्रये विभजन्ते—(१) प्राचीनभारतीय-भाषाकालः, (२) मध्यकालीनभारतीयार्यभाषाकालः, (३) आधुनिकभारतीय आर्यभाषाकालश्च। एतेषां मध्ये प्रथमकालस्यावधिः १५००पूर्वं ईस्वीयतः प्रारभ्य ५०० पूर्वं ईस्वीपर्यन्तम्, द्वितीयस्य च ५०० पूर्वं ईस्वीयतः १००० ईस्वीयपर्यन्तम्, तृतीयस्य च १००० ईस्वीयतः प्रारभ्य अद्यावधिः समयो विद्यते। एतेषां मध्ये जैनबौद्धाधुनिकयुगेष्वतिशयेन विकासं लब्धवतीषु पालिप्राकृतापभ्रंशभाषासु द्राविड़पाञ्चालवंगेत्यादिदेशजभाषासु च सम्वृतत्वार्धकत्वादिदोषैर्ग्रस्तानां ह्रस्वैकारादीनां स्पर्शसङ्घर्षिचवर्गादीनाञ्च प्राचुर्येण प्रयोगो दृश्यते। अतः प्रत्यक्षे किं प्रमाणम् इति न्यायेन तासु भाषासु दोषग्रस्तवर्णानां समुपलब्धौ प्रमाणोपस्थापनमनावश्यकं

प्रतिभाति। वैदिकसंस्कृतयुगयोरेव तेषामस्तित्वस्य प्रमाणोपस्थापनं समीचीनं प्रतीयते। संस्कृतयुगः लौकिकवैदिकभाषयोः सन्धियुगः रामायणम्, महाभारतम्, पुराणम् इत्यपरनाम्नाऽपि व्यपदिश्ते।

पूर्ववैदिकयुगे दोषग्रस्तानां ह्रस्वैकारादीनां समुपलब्धिः

वैदिकयुगस्य च विभागद्वयं विद्यते—(१) पूर्ववैदिकयुगः, (२) उत्तरयुगश्च। पूर्ववैदिकयुगे ऋगादयश्चतस्रः संहिताः, उत्तरवैदिकयुगे च आरण्यकोपनिषद्ब्राह्मणषड्वेदाङ्गानि गण्यन्ते। अत्र प्रथमं पूर्ववैदिकयुग एव ह्रस्वानामेकारादीनामस्तित्वं प्रतिपद्यते। एतेषां दोषग्रस्त वर्णानां मध्ये ह्रस्वैकारादीनां यद्यपि वेदे संस्कृते च प्रयोगो न दृश्यते। तथापि केषाञ्चिद् शाखाविशेषाध्यायिनां समवाये गीतिवशाद् एकारस्य, ओकारस्य च—इत्युभयोरपि ह्रस्वोच्चारणं क्रियमाणमासीत्। एतच्च पातञ्जलमहाभाष्यस्य प्रत्यहाराह्निके "एओङ्, ऐऔच्" इति सूत्रयोर्व्याख्यावसरे व्यावृणोत्। तदयथा आक्षेपभाष्यम्—"ननु चैङः स्थानतरा अर्धएकारोऽर्ध ओकारः"। समाधानभाष्यम्—"न तौ स्तः। यदि हि तौ स्याताम्, तावेवायमुपदिशेत्।" आक्षेपभाष्यम्—"ननु च भोश्छन्दोगानां सात्यमुग्रिराणायनीया अर्धमेकारम् अर्धमोकारं चाधीयते—सुजाते[1] एश्वसूनृते, एध्वर्यो ओदिभिः सुतम्, शुक्र ते एन्यत्[2] एजतं ते एन्यत" इति। समाधानभाष्यम्—पार्षदकृतिरेषा तत्रभवताम्। नैव हि लोके, नान्यस्मिन् वेदे अर्ध एकारोऽर्ध ओकारोऽस्ति।" इत्यनेन महाभाष्येण वेदे संस्कृते च ह्रस्वैकारादीनां प्रयोगेऽभावः, उच्चारणे तेषां गीतिवशाद् अस्तित्वञ्च स्पष्टतया प्रमाणीभवतः। सम्प्रदायपरम्परानुसारेण गीतिवशाद् ह्रस्वयोरेकारौकारयोः समुच्चारणे सात्यमुग्रिराणायनीया दोषयुक्तस्वराणां प्रयोगेण जायमानस्य दोषस्य फलभाजो न भवन्ति। यथा "ज्ञ" इति वर्णस्य केचिद् "द्न", केचिच्च "ज्न" इति, केचित्तु "ग्य" इति समुच्चारणं कुर्वन्ति, परन्तु तत्तद्देशेषु प्रचलितप्रथावशाद् दोषो न गण्यते। एवं ह्रस्वैकारादिविषये छन्दोगानां सात्यमुग्रिराणायनीयानामपि निकायेऽवगन्तव्यम्।

किञ्च, वैदिकयुगे न कोऽपि मनुष्यो जातमात्रेण वैदिकभाषायाः शुद्धवर्णान् शुद्धरूपेण व्यवहर्तुं पाटवं लभते स्म। अत एव जन्मना सह वैदिकमन्त्रघटकवर्णानां शुद्धोच्चारणासम्भावाद् वैदिकयुगे गुरुकुलेषु वेदाभ्यासं कर्तुं छात्रत्वेन निवासं विदधुः। अत एव ऋग्वेदकालिकोऽयम् ऋषिर्वसिष्ठो वर्षतौ एकं मण्डूकमनुकृत्य वदतो मण्डूकस्य शुद्धवर्णोच्चारणसामर्थ्यविहीनेन छात्रेण सहोपमां दत्तवान्, तदयथा यदेषामन्योऽन्यस्य वाचं शक्तस्येव वदति शिक्षमाणः। सर्वं तदेषां[3] समृधेव पर्वयत्-

---

१. ऋ० वे० म० ५, सूक्त ७९, १, २, ३, ४, ५ इत्यादयो मन्त्राः।
२. ,, ,, ५, सू० ४८, म० १।
३. ऋ० वेद–मण्ड० ७, सूक्त १०३, म० ५।

सुवासोवदथ नाकमप्सु। सायणाचार्यः"हे मण्डूका यदद्यदेषां युष्माकं मध्येऽन्यो मंडूकोऽन्यस्य मण्डूकस्य वाचं वदति । अनुवदति अनुकरोति तत् शिक्षमाणः = शिक्ष्यमाणः शिष्यः, शक्तस्य शक्तिमतः शिक्षकस्य वाचं यथा वदति, तद्वत्" इत्येवं भाष्यं कृतवान् । अस्मिन्मन्त्रे "शाक्तस्य" इत्युक्त्या वैदिकयुगे गुरोः शुद्धवर्णोच्चारणसामर्थ्यं, "शिक्षमाण" इत्यनेन च शिष्यस्य शुद्धवर्णोच्चारणासामर्थ्यम्, दोषग्रस्तवर्णोच्चारणञ्च इति द्वयमपि सूच्यते । तेन मन्त्रघटकस्य वदतीति-पदस्य अनुकरोति इति सायणभाष्यं संगच्छते । यदि वैदिकयुगे सर्वे जन्मना सहैव वर्णान् निर्दोषानुच्चारयितुं सामर्थ्यवन्तः स्युस्तर्हि वर्णानां शुद्धोच्चारणस्याभ्यासार्थं शिक्षकस्य प्रयोजनाभावाद् इयं ऋग्व्यर्थैव स्यात् । तस्मात् निरासादिदोषग्रस्तानां स्पर्शसङ्घर्षिचवर्गादीनाम् अर्धकत्वादिदोषग्रस्तानां ह्रस्वैकारादीनां वैदिकयुगे अस्तित्वं प्रमाणीभवति ।

एवं रीत्या पूर्ववैदिकयुगे दोषग्रस्तवर्णानां समुपलब्धौ छन्दोगानां सात्यमुग्रिराणायनीयानां गीतिवशाद् एकारस्य ह्रस्वोच्चारणरूपम्, यदेषामन्यो अन्यस्य इतीयञ्च ऋग्—उभयं द्वे प्रमाणे समुपस्थापिते । तृतीयञ्च प्रमाणं विद्यते वृत्रासुरवधरूपम् । एकदा देवासुरसंग्रामे इन्द्रं विजेतुँ वृत्रासुरोऽभिचारयज्ञम् अनुष्ठितवान् । तत्र ऋत्विजा "इन्द्रशत्रुर्वर्धस्व"[1] इति मन्त्रः समूहितः । इन्द्रशत्रुर्द्धस्वैत्येतन्मन्त्रघटके "इन्द्रशत्रु" पदे "इन्द्रस्य शातयिता भव" इत्यर्थेऽन्तोदात्ते कर्तव्ये आद्युदात्तः प्रयुक्तः । तेन "हे अग्ने त्वमेवं वर्धस्व येन इन्द्र एव शातयिता तस्य स्यात्" इति विपरीतार्थनिगमाद् वृत्रासुर एव संग्रामे व्यापादितः । अयञ्च अभिचारो वैदिकयुगे एव सम्पादितः । यतो हि ऋग्वेदे बहुषु[2] मन्त्रेषु वृत्रासुरवधस्योल्लेखो दृष्टिगोचरीभवति । इन्द्रशत्रुपदे आद्युदात्ते कर्तव्येऽन्तोदात्तकरणं स्वरविपर्ययनामको[3] दोष उच्यते ।

चतुर्थञ्च प्रमाणं व्याकरणस्य माहात्म्यरूपं विद्यते । तदयथा—

उतत्व[4] पश्यन्न ददर्श वाचम्, उतत्व शृण्वन्न शृणोत्येनाम् ।
उतो त्वस्मै तन्वं विसस्रे, जायेव पत्य उशती: सुवासाः ॥

---

१. "यथेन्द्रशत्रुः स्वरतोऽपराधात्" ।

२. तद् यथा —"अपादहस्तोऽपृतन्यद् इन्द्रमस्य वज्रमद्रिसानौ जघान" । "अपादवज्रेण छिन्नहस्तत्वात् पादरहितः, अहस्तो हस्तरहितः वृत्रमिन्द्रमुद्दिश्य अपृतन्यत् पृतनां युद्धमैच्छत्"—इति सायणभाष्यम् । (ऋ०वे०मण्ड०१, सू०३२) ।

३. "संयोगानां स्वरभक्त्या व्यवायो विक्रमणं क्रमणं वा यथोक्तम् ।
विपर्ययो वा व्यत तिल्विलेऽज्मन्द्रप्सोऽजुषून् साञ्जयोऽष्ट्रां प्रनेष्ट्रात् ॥"
—ऋ० वे० प्रा० १४।५८ ।

४. ऋ० वे० मण्ड० १०।सू० ।

त्व-शब्दोऽन्यवाची, उतशब्दः अपि-शब्दस्यार्थे, स च भिन्नक्रमः । अपि खल्वेकः प्रत्यक्षेण शब्दस्वरूपमुपलभमानोऽपि अर्थापरिज्ञानान्न पश्यति । एकः शृण्वन्नपि एनां न शृणोति । किन्तु यश्च व्याकरणं जानाति, यथा जाया पत्ये कामयमाना सुवासाः स्वम् आत्मानं विवृणुते, तथैव वाग्विदे वाक् स्वात्मानं विवृणुते । अत्र तावत् विचार्यताम्—यदि वैदिकयुगे सर्वे जना जन्मना सहैव वैदिकभाषाभिज्ञाः शुद्धवर्णोच्चारणशक्ताश्च स्युस्तर्हि "उतत्व शृण्वन्न शृणोत्येनाम्" इति कथं संगच्छेत ! वैदिकयुगे शिक्षितजनानां दोषग्रस्तवर्णानाञ्च इत्युभयोरस्तित्वस्य स्वीकारादेव अस्या ऋचः सत्यत्वं सेत्स्यति । एवमन्या अपि बह्व्य ऋचो वैदिकयुगे दोषग्रस्तानां लुण्ठितादिसंज्ञकवर्णानामस्तित्वस्य प्रमाणार्थमुपस्थापयितुं शक्यन्ते ।

उत्तरवैदिकयुगे अर्धकादिदोषग्रस्तानां ह्रस्वैकारादिवर्णानामस्तित्वम्

एवञ्च पूर्ववैदिकयुगेऽपशब्दानां समुपलब्धेः सिद्धौ सत्याम् उत्तरवैदिकयुगे तेषामस्तित्वमनायासेन सिद्ध्यति, तथापि व्याख्यानार्थं तेषामस्तित्वप्रतिपादनपराणि द्वे त्रीणि प्रमाणान्युपस्थाप्यन्ते । आधुनिकैतिहासिकैः[1] ब्राह्मणारण्यकोपनिषदः षड्वेदाङ्गानि उत्तरवैदिकयुगीयानि मन्यन्ते । **शतपथब्राह्मणे**[2] देवासुरसंग्रामेऽसुरा "हे अरयः" इति प्रोक्तव्ये "हे अलयः" इत्यशुद्धप्रयोगजन्यपापवशात् पराजयन्त इति वर्णितो विद्यते । "हे लयः हे लय" इत्यत्र "हे अरयः" इत्यवस्थायां "है हे प्रयोगे हैहयोः" (पा० सू० ८।२।८५) इति प्लुते प्रकृतिभावे च कर्तव्ये तदकरणं म्लेच्छत्वम् । केचित्तु पदद्विर्वचने कार्ये वाक्यद्विर्वचनं लत्वञ्च म्लेच्छत्वं मन्यन्ते । अत्र असद्वर्णोच्चारणरूपवर्णदोषो[3] विद्यते ।

द्वितीयञ्च प्रमाणमैतरेयारण्यके विद्यते । तत्र "अथातो निर्भुजः—शूरवीरो माण्डूकेयः" (३।१।३) इति श्रुतौ निर्भुजप्रतृण्णयोः स्वरूपं प्रतिपादितम् । निर्भुजप्रतृण्णशब्दयोः लोकप्रसिद्ध्यभावात् "यद्धि सन्धिं विवर्तयति, तन्निर्भुजस्य रूपम्, अथ यच्छुद्धे अक्षरे अभिव्याहरति तत्प्रतृण्णस्य"—इत्युभयोः स्वरूपं श्रुतिरेव प्रतिपादितवती । अत्र शुद्धेत्युक्त्या दोषग्रस्तानामशुद्धाक्षराणां वैदिकयुगे विद्यमानस्य प्रतीतिर्जायते । यतो हि अशुद्धाक्षरेषु विद्यमानेष्वेव तदपेक्षया "शुद्धे अक्षरे" इति

---

१. वाचस्पतिगैरोलाकृते "संस्कृत का संक्षिप्त इतिहास" इत्यभिधेये ग्रन्थे आरण्यकादीनामुत्तरवैदिकयुगे नामाङ्कनं कृतम् ।

२. "तेऽसुरा आत्तवचसो हेलवो हेलव इति वदन्तः परास्ता बभूवुः । तत्रैतामपि वाचमूचुः । उपजिज्ञास्यां स म्लेच्छस्तस्मान्न ब्राह्मणो म्लेच्छेदसूर्या वाक्" ॥ श० प० ब्रा० ३, २।१, २३–२४ । काण्वशाखीयशतपथब्राह्मणे ते हेलव हे लव इत्यस्य स्थाने "हैलो हैल" इति पाठभेदः समुपलभ्यते, महाभाष्ये तु "हेलयो हेलयः" इति पाठः ।

३. "अदेशे वा वचनं व्यञ्जनस्य"—ऋ० वे० प्रा० १४।१५ ।

श्रुतौ "शुद्धे" इति कथनं युज्यते । अनया रीत्या "वैदिकयुगेऽशुद्धाक्षराण्यप्यासन्" इत्यत्र सन्देहलेशोऽपि न युज्यते । अशुद्धाक्षरत्वञ्च दोषग्रस्तत्वमुच्यते ।

तृतीयञ्च प्रमाणं विद्यते षड्वेदाङ्गानां मध्ये शिक्षाव्याकरणनिरुक्तत्रयम् । एतेषां मध्ये यद्यपि उत्तरवैदिककालिकयोः शिक्षा-व्याकरणग्रन्थयोरधुना समुपलब्धिर्न दृश्यते । शौनकीयर्ग्वेदप्रातिशाख्यं यथाकथञ्चिदुत्तरवैदिककालिकं[1] स्वीकर्तुं शक्यते, किन्तु युधिष्ठिरमीमांसकाः[2] शौनकं महाभारतात् पश्चाज्जातं मन्यन्ते । यथा चात्र विषये—

शौनको गृहपतिर्वै नैमिषीयैस्तु दीक्षितैः ।
दीक्षासु चोदितः प्राह सत्रे तु द्वादशाहिके ॥

इति **ऋग्वेदप्रातिशाख्यवर्गद्वयवृत्तिं** कुर्वता विष्णुमित्रेण कृतः शास्त्रावतार एव तैः (युधिष्ठिरमीमांसकैः) प्रमाणमुपन्यस्यते । नैमिषारण्ये द्वादशाहिकं सत्रं तु परीक्षितकालानन्तरं प्रारब्धम् । अनया रीत्या शौनकीय**मृग्वेदप्रातिशाख्य**मुत्तरवैदिकयुगजातं न सिद्धयति, तथापि महर्षियास्ककृतं **निरुक्तं** तु उत्तरवैदिककालिकमेव विद्यते । यतो हि गैरोलामहोदया यास्ककृतस्य निरुक्तस्य उत्तरवैदिकयुगे गणानां कृतवन्तः । तत्र स्पष्टतया वर्णदोषस्य कृतः संकेतो दृश्यते । तद्यथा—

दुष्टः शब्दः स्वरतो वर्णतो वा, मिथ्याप्रयुक्तो न तमर्थमाह ।
स वाग्वज्रो यजमानं हिनस्ति, यथेन्द्रशत्रुः स्वरतोऽपराधात् ॥ इति ॥

दीर्घस्य एकारादेः अर्धकत्वादिदोषग्रस्तं ह्रस्वाद्युच्चारणमेव स्वरतो वर्णतो वा दुष्टत्वमुच्यते । एवं रीत्या ऋग्वेदादीनां विभिन्नमन्त्रेषु वर्णदोषाणामुल्लेखो दृष्टिपथं समायाति । ते एव वर्णदोषाः संस्कृतयुगं स्पृशन्तोऽधुना बह्वीषु क्षेत्रीयभाषासु व्यवह्रियमाणा दृष्टिगोचरीभवन्ति ।

संस्कृतयुगे दोषग्रस्तवर्णानां समुपलब्धयः

संस्कृतयुगे ह्रस्वैकारादीनामस्तित्वस्य संकेतो रामायण-महाभारतयोः क्वचित् क्वचित् समुपलभ्यते । अयं संस्कृतयुगः कालद्वये विभक्तः—(१) रामायण-

---

१. "राढि, शौनक और गौतम का स्थितिकाल ३००० वि० पूर्व था"—वाचस्पति गैरोला "संस्कृत साहित्यका संक्षिप्त इतिहास" (पृ० सं० २५४) । गौतमपुत्रो वामदेवश्च ऋग्वेदस्य चतुर्थमण्डलस्य मन्त्राणां द्रष्टा विद्यते । यदि शौनकसमकालिकस्य गौतमस्य पुत्रो वैदिककालिकस्तर्हि शौनकस्य ऋग्वेदयुगीयत्वस्वीकारे न कोऽपि विरोधः ।

२. संस्कृत व्याकरण शास्त्र का इतिहास ।

कालः, (२) महाभारतकालश्च । रामायणकाले दोषग्रस्तवर्णानां समुपलब्धौ प्रमाणम् अरण्यकाण्डे विद्यते । ऋष्यमूकपर्वते निवसता सुग्रीवेण प्रेषितो हनुमान् बटुरूपं विधाय श्रीराममुपगम्य तत्परिचयं पृष्टवान् । परिचयप्रश्नपूर्वकं श्रीहनुमतो वाक्यं श्रुत्वा श्रीरामस्तस्य भाषणपाटवं प्रशंसन् पार्श्वे स्थितं श्रीलक्ष्मणं प्राह—

"अभिभाषस्व[1] सौमित्रे सुग्रीवसचिवं कपिम् ।
वाक्यज्ञं मधुरैर्वाक्यैः स्नेहयुक्तमरिन्दम् ॥
नानृग्वेदविनीतस्य नायजुर्वेदधारिणः ।
नासामवेदविदुषः शक्यमेवं प्रभाषितुम् ॥
नूनं व्याकरणं कृत्स्नमनेन बहुधा श्रुतम् ।
बहु व्याहरताऽनेन न किञ्चिपदभाषितम् ॥
न मुखे नेत्रयोर्वापि ललाटे च भ्रुवोस्तथा ।
अन्येष्वपि च गात्रेषु दोषः सम्विदितः क्वचित् ॥
अविस्तरमसन्दिग्धम् अविलम्बितमद्रुतम् ।
उरःस्थं कण्ठगं वाक्यं वर्तते मध्यमे स्वरे ॥
संस्कारक्रमसम्पन्नाम् अद्रुतामविलम्बिताम् ।
उच्चारयति कल्याणीं वाचं हृदयहारिणीम् ॥

एषु श्लोकेषु स्पष्टतया रामायणकालिकवर्णदोषाणामुल्लेखो विद्यते । एषु श्लोकेषु निर्दिष्टवर्णदोषाणां मध्ये केचिदेवात्र व्याख्यायन्ते, येन रामायणकालिकवर्णदोषाणामस्तित्वस्य परिचयो लभ्येत । तद्यथा—

१ **अपशब्दितम्**[2]—संस्कृतभाषणेऽपशब्दत्वं तदैव सम्भाव्यते, यदा उच्चार्यमाणवर्णाः सम्वृतत्वार्धकत्वादिदोषग्रस्ता वर्णास्तथा उत्तममध्यमान्यपुरुषाणां मध्ये उत्तमपुरुषस्य स्थानेऽन्यपुरुषस्य प्रयोगाः—इत्यादयः प्रमादाः स्युः । अनेन अपशब्दितपदेन सर्वा अशुद्धयः संकलिता जाताः ।

न मुखे दोषः[3]—अत्र श्लोके भ्रूनेत्रललाटेत्यङ्गत्रयस्य पृथग्ग्रहणान्मुखपदेन "औष्ठात् प्रभृति प्राक् काकलकात्" इति "तुल्यास्य०" इति सूत्रस्थ**महाभाष्यसम्मत**मुखस्यैव ग्रहणं बोध्यम्, न तु नेत्रललाटकर्णाद्यङ्गसमुदितरूपमुखस्य । "अस्य

---

१. वाल्मीकीयरामायणकिष्किन्धाकाण्डे २३ सर्गे २७ श्लोकतः ३२ श्लोकपर्यन्तम् ।

२. अपशब्दितम्—"नूनं व्याकरणं कृत्स्नम्"—इत्येतच्छ्लोकघटकमिदं पदम् ।

३. न मुखे दोषः—न मुखे नेत्रयोर्वापीत्येतच्छ्लोकस्थमिदं पदम् । "मुखे" इति पदेन अस्य श्लोकस्योत्तरार्द्धस्थ दोषपदस्यान्वये सति न मुखे दोष इति ।

कपेर्भाषणे मुखे दोषो न विद्यते" इति "न मुखे दोषः" इत्यस्य तात्पर्यं बोद्धव्यम्। मुखदोषपदेन च ताल्वादीनां मुखान्तर्भवत्वात् तेषाम्, जिह्वादिकरणस्य च दोषा गृह्यन्ते। यद्यपि जिह्वादिकरणदोषा जिह्वादीनामेव व्यपदेष्टुं योग्याः, न तु वर्णानाम्, तथापि वर्णोच्चारणे जिह्वादीनामुपयोगात्तज्जन्यदोषा वर्णानां स्वीक्रियन्ते। स्थानकरणसम्बन्धिदोषा ऋग्वेदप्रातिशाख्ये निर्दिष्टाः। यथा—"निरस्तं स्थानकरणापकर्षे" (ऋ० प्रा० १४।२) "विहारसंहारयोर्व्यासपीलने" (ऋ० वे० प्रा० १४।३) "जिह्वामूलनिग्रहे ग्रस्तम्" (ऋ० वे० प्रा० १४।४) "जिह्वान्ताभ्याश्च वचनं लकारे" (ऋ० प्रा० १४।२७) इत्यादिसूत्रेषु ताल्वादिस्थानानां जिह्वादिकरणस्यच अपकर्षाज्जायमाना दोषाः व्याख्याताः। एतेषाञ्च संकेतो रामायणे "न मुखे दोषः" इत्यत्र समुपलभ्यते।

असन्दिग्धम्—तृतीयश्च व्याख्यायमानम् असन्दिग्धपदं विद्यते। अस्य कपेर्वाणी "किम् अयमकारम् अथवा[1] ओकारमुच्चारयति', इत्येवं सन्देहरहिता विद्यते। सन्दिग्धपदेन च अम्बूकृतैणीकृतदोषयोः संकेतो बोद्धव्यः। यो व्यक्तोऽप्यन्तर्मुखमिव श्रूयते स अम्बूकृतः, "अयमुकारमुच्चारयति, आहोस्विद् ओकारम्?" इत्येवं यत्र सन्देहः स एणीकृतदोष उच्यते। तथा चास्य कपेर्वाणी अम्बूकृतैणीकृतदोषशून्या श्रूयते। एवमेव अन्येषामपि दोषाणां व्याख्यानं कर्तव्यम्। विस्तरभयाद्, वर्णदोषाणां बाहुल्याच्च सर्वेषामूहापोहं कर्तुं न शक्यते।

किं बहुना, रामायणकाले संस्कृतादतिरिक्ता अपि भाषा आसीद्, येन वर्णदोषाणां रामायणकाले अनुमानं कर्तुं शक्यते। तद्यथा—

"आमन्त्रयति[2] विप्रान् स्म श्राद्धमुद्दिश्य निर्घृणः।
धारयन् ब्राह्मणं रूपमिल्वलः संस्कृतं वदन्"॥
"यदि[3] वाचं प्रदास्यामि द्विजातिरिव संस्कृताम्॥"

इत्यादिश्लोकप्रामाण्येन संस्कृतादतिरिक्तभाषाणामपि सत्त्वस्य प्रतीतेर्वर्णदोषाणां रामायणकालेऽस्तित्वं सुतरां सिद्ध्यति। यतः संस्कृतातिरिक्तासु सर्वासु भाषासु प्रायेण निरस्तादिदोषयुक्तस्पर्शसङ्घर्ष्यादिवर्णाः भवन्ति।

---

१. पातञ्जलमहाभाष्यस्य पस्पशाह्निके "ग्रस्तनिरस्तमवलम्बितम्" इत्यत्र संख्याता ये दोषास्तेषां मध्ये इमावपि दोषौ स्तः।

२. वाल्मीकीयरामायणम्, अरण्यकाण्डम्—सर्ग ११, श्लो० ५७।

३. ,, ,, ,, सुन्दरकाण्डम्—अशोकवाटिकायां श्रीहनुमज्जानकीसम्वादप्रसङ्गे दृश्यताम्।

महाभारतकाले वर्णदोषाणां विद्यमानत्वम्

एवं पूर्वोक्तप्रामाण्येन रामायणकाले दोषग्रस्तवर्णानां विद्यमानत्वस्य सिद्धेः "तदुत्तरं महाभारतकाले वर्णदोषा आसन्" इति स्वतो विश्वासः समायाति। किञ्च, महाभारतस्य आदिपर्वणि[1] पर्वसंग्रहपर्वनामके द्वितीयाध्याये म्लेच्छभाषायाः स्पष्टतयोल्लेखाद् दोषग्रस्तवर्णानां समुपलब्धौ सुतरां विश्वासो जायते। "म्लेच्छो ह वा एष यदपशब्दः" इति महाभाष्यप्रामाण्येन यस्यां भाषायाम् अपशब्दबाहुल्यं भवति, सा म्लेच्छभाषा उच्यते। अपशब्दत्वं नाम सम्वृतत्वादिदोषयुक्तवर्णोच्चारणम्, यद्वा व्याकरणलक्षणहीनत्वम्। महाभारतस्यादिपर्वणि "विदुरेण कृतो यत्र हितार्थं म्लेच्छभाषया"—इत्येतच्छ्लोकघटकम्लेच्छपदव्याख्यानेन महाभारतकालिकानां अर्धकादिदोषग्रस्तानां ह्रस्वैकारादीनामस्तित्वस्य परिचयः सञ्जातः।

एवं पूर्वोक्तदिशा ऋगादिवेदानां विभिन्नमन्त्रेषु[1] वर्णदोषाणां संकेतस्योपलब्धेर्दर्शनाद् अर्धकादिदोषग्रस्तानां ह्रस्वैकारादीनां वैदिकयुगे अस्तित्वं सुतरां विश्वासार्हं विद्यते। यद्यपि ऋगादिसंहितासु व्यासपीडनेत्यादिनाम्नां वर्णदोषाणामुल्लेखो न दृश्यते, तथाऽपि "सुजाते एश्वसूनृते" इत्यादिमन्त्रेषु सात्यमुग्रिराणायनीयानाम् एकारस्य ह्रस्वोच्चारणम्, "इन्द्रशत्रुर्वर्धस्व", "तेऽसुरा हेलयो हेलयः" इत्यादिस्थलेऽर्धकादिदोषग्रस्तैकमात्रिकस्य एकारादेः संकेतः समुपलभ्यते। अर्धकग्रासववर्रतादिदोषयुक्ता ह्रस्व एकार ओकारश्च, स्पर्शसंघर्षिवर्गाः, लुण्ठितश्च रेफः—इत्यादयः सर्वे वैदिकयुगे समुपलभ्यमाना आसन्। तथाच वैदिकयुगे ह्रस्वैकारादीनां सत्त्वेऽपि दोषग्रस्तत्वात् तेषां ऋगादिवैदिकमन्त्रेषु प्रयोगो न कृतः, न तु ऋगादिवैदिकयुगे प्राचीनभारतयोरोपीयाणां व्याकरणशास्त्रदृष्ट्या दोषग्रस्तानां ह्रस्वैकारादीनां दीर्घैकारादिरूपेण परिवर्तनं जातम्" इत्येतावता संहितासु तेषां प्रयोगाभाव इति।

किञ्च, गुणदोषमये द्वन्द्वात्मकेऽस्मिन् संसारे यथा प्राणिषु धर्माधर्मौ गुणदोषावनादिकालतो युगपदेव जायन्ते, सज्जनानां सम्पर्काद् दोषान् परिभूय गुणानां प्राचुर्येण समुदये सति स सत्पुरुष उच्यते, दुष्टजनानां सम्पर्काच्च गुणेषु परिभूतेषु दोषाणां प्राचुर्येण समुदये सति स कुत्सितः पुरुष उच्यते। एवं वर्णेष्वपि धर्माधर्मौ गुणदोषौ वा अनादिकालतो युगपत्कालिकौ स्तः। वर्णोच्चारणशक्तिमन्तं प्राप्य अर्धकत्वादिदोषान् परिभूय यथामात्रं ह्रस्वदीर्घादिधर्मे समुदिते सति ते वर्णा

---

१. "हिलोपदेशश्च पथि धर्मराजस्य श्रीमतः।
विदुरेण कृतो यत्र हितार्थं म्लेच्छभाषया"॥
—महाभा० आ० प० २।१०३।

निर्दोषाः कथ्यन्ते । वर्णोच्चारणशक्त्यादिविहीनं प्राप्य यथामात्रादिगुणेषु परिभूतेषु, अयथामात्रवचनादिदोषाणां समुदये सति स एव वर्णो दुष्टः प्रोच्यते । एवं वर्णदोषाणां संक्षेपतः ऐतिहासिकम् इतिवृत्तं समवगन्तव्यम् । यद्यपि वेदेषु तदुत्तरलौकिकसंस्कृते च दोषग्रस्तवर्णानां प्रयोगेण विपरीतार्थबोधो जायते, किन्तु पालिप्राकृतापभ्रंशादिभाषासु तादृशवर्णानां प्रयोगेण विवक्षितार्थबोधः परिस्फुटति । तथा च पालि-प्राकृत-गुर्जर-वङ्गेत्यादिदेशजभाषासु विपक्षितार्थबोधकतया ते निर्दोषा गण्यन्ते । तदयथा "चञ्चल इत्युच्चारणे कर्तव्ये हिन्दीभाषायां 'चन्चल' इत्यसद् व्यञ्जनदोषग्रस्तमुच्चारणं क्रियते, किन्तु हिन्दीत्यादि भाषासु अस्य दोषस्य निर्दोषरूपेण गणना क्रियते, तथा च 'चन्चल' इत्येवोच्चरणं शुद्धं स्वीक्रियते ।

लौकिकवैदिकसंस्कृते कतिपयशुद्धवर्णानां सेतिहासमुच्चारण निरूपणम्

"ऋ ऌ र ल ज य ष"

ऋ ऌ वर्णयोः स्वरूपम्

एवं वर्णदोषाणां गुणानाञ्चैतिहासिकदृष्टचा विवरणं विधाय केषाञ्चिद् ऋकारादिवर्णानाम् ऐतिहासिकमुच्चारणस्वरूपं प्रतिपाद्यते । तत्रोच्चारणस्वरूपज्ञानात् पूर्वम् "ऋ ऌ वर्णौ स्वरौ व्यञ्जने वा" इत्यस्य ऐतिहासिकं ज्ञानं परमावश्यकं विद्यते । तत्र "ऋ ऌ वर्णौ स्वरव्यञ्जनोभयात्मकौ स्तः" इत्यस्य निर्देशो वर्णमालानिरूपणावसरे मया पूर्वमेव कृतः । ऋकारस्य स्वरत्वं व्यञ्जनत्वञ्च वैदिकादिकालत एव प्रसिद्धे स्तः । महाभारतस्य आदिपर्वणि पञ्चमाध्याये—

तमपृच्छत्ततो रक्षः पावकं ज्वलितं तदा ।
शंस मे कस्य भार्येयमग्ने पृच्छे ऋतेन वै ॥ (श्लो० २२)

इत्यस्मिन् श्लोके "पृच्छे ऋतेन" इत्यत्र ऋकारस्य स्वरत्वस्वीकारे तत्परे पृच्छेघटकस्य एकारस्य अयादेशे यकारस्य च "लोपः शाकल्यस्य" इति लोपे कृते "पृच्छ ऋतेन" इत्येवं लिखितव्यम् । यद्वा यकारलोपस्य वैकल्पिकत्वेन "पृच्छयृतेन" इत्येवं पठितव्यम् । लिखितञ्च "पृच्छे ऋतेन" इति । तेन ऋकारस्य व्यञ्जनत्वं स्वीकर्तुमापतति । तेन "पृच्छे ऋतेन" इत्यादयः प्रयोगाः सङ्गच्छन्ते ।

किञ्च, न केवलं महाभारत एव ऋकारस्य व्यञ्जनत्वसाधकाः प्रयोगाः समुपलभ्यन्ते, अपि तु वाल्मीकीयरामायणेऽपि तादृशः प्रयोगो दृष्टिगोचरीभवति । यथा "वसतो[1] ऋष्यमूके मे पर्वते विपुलद्रुमे" इत्यस्मिन् श्लोके "वसतो ऋष्यमूके" इत्यत्र महर्षिर्वाल्मीकिर्ऋकारं व्यञ्जनं मत्वा, तस्य च ह्रस्वं स्वीकृत्य तस्मिन् परे वसतस्शब्दघटकसकारस्य रुत्वे सति तस्य च "हशि च" (पा०सू०६।१।११४) इत्युत्वे गुणे च कृते

1. वाल्मीकीयरामायणस्य सुन्दरकाण्डे सर्गः ५८, श्लो० १३५ ।

"वसतो ऋष्यमूके" इति पाठं कृतवान् । अन्यथा ऋकारस्य अच्त्वे सति वसतस्शब्दघटकसकारस्य रुत्वे, रोर्यत्वे च, "लोपः शाकल्यस्य" इति यकारस्य लोपे "वसत ऋष्यमूके" इति, यलोपस्य च वैकल्पिकत्वात् पक्षे "वसतय् ऋष्यमूके" इति वा पठेत्, किन्तु न पठितम्, पठितञ्च "वसतो ऋष्यमूके" इति । तेन बाल्मीकिर्ऋकारस्य व्यञ्जनत्वं स्वीकरोतीति ज्ञायते । महर्षिर्वाल्मीकिः कमपि व्याकरणग्रन्थमपि निर्मितवान् । यतो हि **तैत्तिरीयप्रातिशाख्ये** "उदात्तो[1] बाल्मीकेः" इति सूत्रे बाल्मीकेर्नाम गृहीतं दृश्यते । एवमेव वेदेष्वपि ऋकारस्य व्यञ्जनत्वसाधका बहवः प्रयोगाः समुपलभ्यन्ते ।

किञ्च, बाल्मीक्यादिभिर्ऋकारस्य केवलं हल्त्वमेव न स्वीकृतम्, अपि तु स्वरत्वमपि स्वीकृतम् । अत्र विषये बहूनि प्रमाणानि समुपस्थापयितुं शक्यन्ते । तद्यथा **महाभारतस्य** आदिपर्वणि तृतीयाध्याये—"यः पुरुषः स पर्जन्यो योऽश्वः सोऽग्निर्य ऋषभस्त्वया ।" (१६७)—इत्यस्मिन् श्लोके ऋषभशब्दघटक ऋकारे परे यस्—शब्दघटकशकारस्य रुत्वे तस्य च "भो भगोः" (पा० सू० ८।३।१७) इति यत्वे, तस्य च "लोपः शाकल्यस्य" इति लोपे कृते "य ऋषभ" इति प्रयोगः सम्पद्यते । तथा च "तमृषय ऊचुः परमं लोमहर्षणे" (महाभा० आ० पर्व ४-३) इत्यत्र ऋकारे परे मकारस्यानुस्वारत्वं न दृश्यते । तदेतच्च सर्वम् ऋकारस्य स्वरत्वस्वीकारादेव सङ्गच्छते । अन्यथा हल्त्वमात्रस्वीकारे तु "मोऽनुस्वारः" (पा० सू० ८।३।२३) इत्यनुस्वारे कृते "तं ऋषयः" इति पठितव्यम् । किन्तु न पठितम्, पठितञ्च "तमृषयः" इति । तेन ऋकारस्य स्वरत्वमपि ऋषिभिः स्वीक्रियते । बाल्मीकीय**रामायणे**ऽपि "**सर्वर्क्षहरिभिस्त्यक्षतः प्राणसंग्रहम्**" इत्यस्मिन् श्लोके सर्वर्क्षेत्यादयः प्रयोगाः । तथा च **शुक्लयजुर्वेदे** रुद्राष्टाध्याय्याः पञ्चमाध्याये "वित्तञ्च मेध्यञ्च मे"—इत्यस्मिन् मन्त्रे ऋद्धञ्च मे ऋद्धिश्च मे इति प्रयोगः ऋकारस्य स्वरत्वस्वीकारादेव सङ्गच्छते । एवम् ऋकारस्य स्वरत्वव्यञ्जनत्वमित्युभयमपि वैदिककालत एव स्वीक्रियमाणं विद्यते । ऌकारस्य तु केवलं क्लृपशब्द एव प्रयोगो दृश्यते । भगवान् शौनकस्तु ऌकारस्य[2] स्वरसंज्ञां विदधाति । ऌकारस्य स्वरसंज्ञाविधानात्तस्य हल्त्वमपि ध्वन्यते । अन्यथा तस्य स्वरत्वे तु स्वरसंज्ञाविधानं व्यर्थमेव स्यात् । भाषावैज्ञानिकास्तु ऋकारं "रि" इत्याक्षरिकं मन्यन्ते । ऋऌवर्णयोः स्वरव्यञ्जनोभयात्मकत्वादेव "ऋऌवर्णयो[3]

1. अध्याय ६।६ तैत्तिरीयप्रातिशाख्ये ।
2. ऋग्वेदप्रातिशाख्ये १३ पटले सूत्रम् ३५, । तच्च सूत्रम् "तस्यैव ल— कल्पयावॢकारः" इति ।
3. कात्यायनीयशुक्लयजुःप्रातिशाख्ये, ३ अध्याये, १४६ सू० ।

रेफलकारौ संश्लिष्टावश्रुतिधरावेकवर्णौ" इति कात्यायनीयशुक्लयजुःप्रातिशाख्ये "रेफलकारौ संश्लिष्टौ" इति, लघुमाध्यन्दिनशिक्षायाञ्च "ऋकारः खलु सर्वत्र ह्येकारसदृशो भवेत्" (२८) इत्यत्र 'एकारसदृशः' इत्युक्तम्। एतत्सर्वम् ऋऌवर्णयोः स्वरत्वस्वीकारादेव सङ्गच्छते, नान्यथा।

परन्तु पाणिनिस्तु ऋकारस्य केवलं स्वरत्वमेव स्वीकरोति। यद्यपि "उरण् रपरः" (१।१।४) इति सूत्रेण ऋकारस्य स्थाने जायमानस्याणो रपरत्वनिर्देशात् पाणिनिरपि ऋकारस्य स्वरव्यञ्जनोभयात्मकत्वं स्वीकरोतीति प्रतीयते। तथाऽपि "कृत्यैर्ऋणे" (पा० सू० २।१।४३) "ऋच्छत्यॄताम्" (पा० सू० ७।४।११) इत्यादिसूत्रेषु न कोऽप्येवं निर्देशः समुपलभ्यते, येन पाणिनिमते ऋऌवर्णयोः स्वरव्यञ्जनोभयात्मकत्वं स्वीक्रियेत। तथा च पाणिनिमते ऋकारस्य केवलमच्त्वादेव कात्यायनः "ऋवर्णान्नस्य णत्वं वाच्यम्" इति वार्तिकं कृतवान्। भगवान् भाष्यकारस्तु "तुल्यास्य" (१।१।९) इति सूत्रे "योऽसौ ऋकारे रेफः" इति ऋकारस्य स्वरव्यञ्जनोभयात्मकत्वं स्वीकृत्य अकारावयवं रेफमाश्रित्य "मातृणाम्" इत्यादौ णत्वं प्रतिपाद्य तद् वार्तिकं प्रत्याख्यातवान्। किञ्च, तुल्यास्येति पाणिनीयसूत्रस्य **महाभाष्ये** "ऋकारऌकारयोः सवर्णविधिः" इति वार्त्तिकव्याख्यानावसरे ऋकारऌकारयोरच्त्वं पूर्वपक्षिणा प्रतिपादितम्। उत्तरपक्षिणा च प्रतिज्ञया तयोरच्त्वं साधितम्। तद्यथा पूर्वपक्षिणा—अवश्यं तद्वक्तव्यम्। ऊकालोज्झ्रस्वदीर्घप्लुतसंज्ञो भवतीत्युच्यते। न च ऋकार ऌकारो वाऽजस्ति इत्युक्तम्, ततश्चोत्तरपक्षिणा—"ऋकारस्य ऌकारस्य चाच्त्वं वक्ष्यामि" इत्युक्तम्।

एतत्सर्वं तथ्यं ऋकारऌकारयोः स्वरत्वं व्यञ्जनत्वञ्च इत्युभयमपि साधयति।

ऋऌवर्णयोरुच्चारणस्वरूपम्

एवं रीत्योपर्युक्तविवरणेन ज्ञायते यद् वैदिकयुगात् प्रारभ्य **महाभारत**कालपर्यन्तम् ऋकारस्य स्वरत्वं व्यञ्जनत्वञ्चेत्युभयमपि प्रसिद्धमासीत्। भगवतः पाणिनेः, वार्त्तिककारकात्यानस्य च समये ऋकारः केवलं स्वरो मन्यमान आसीत्, किन्तु भगवतः पतञ्जलेः समये ऋकारस्य स्वरत्वं व्यञ्जनत्वञ्चेत्युभयमपि प्रसिद्धमभूत्।

ऋऌवर्णयोः स्वरव्यञ्जनोभयात्मकत्वेऽपि तस्योच्चारणमेकारसदृशमेव वेदेषु क्रियते। तथा च **लघुमाध्यन्दिनशिक्षायाम्**—

"ऋकारः खलु सर्वत्र ह्येकारसदृशो भवेत्" ॥२८॥ इति।

तस्योच्चारणविधिं शिक्षितवान् यथा—"कृष्णोसि" इत्यस्य क्रेष्णोसि, "क्लृप्तञ्च मे" इत्यस्य "क्लेप्तञ्च" इत्युच्चारणं क्रियते।

किन्त्वधुना देशजभाषासु ऋकारस्य "रि" इत्युच्चारणं क्रियते, क्वचिच्च

"रु" इति व्यवह्रियते। तत्र अपभ्रंशादिषु "ऋक्ष" इति प्रयोक्तव्ये "रीछ" इति प्रयोगस्य दर्शनेन संस्कृतयुगेऽपि (रामायण-महाभारतकालयोः) ऋकारस्य "रि"[1] इत्युच्चारणमासीदित्यनुमीयते। यतो हि अपभ्रंशादिभाषाणां संस्कृतभाषासदृश एव प्रयोगो दृश्यते[2], किन्त्वेतद्विपरीतमपि विभिन्नदेशजभाषायाः वृक्षादिशब्देषु ऋकारस्य प्रयोगदर्शनात् संस्कृतयुगेऽपि ऋकारस्य वैदिकयुगवदेवोच्चारणमासीदित्यनुमीयते।

यकारवकारयोरुच्चारणम्

वेदेषु अन्यहल्संयुक्तयकारवकारयोरुच्चारणम् "इय्" "उव्" इत्येवं क्रियते। तदयथा "त्र्यम्बकं[3] यजामहे" इति मन्त्रे त्र्यम्बकम् इत्यस्य त्रियम्बकम् इत्युच्चारणं क्रियते। संयुक्तहल्यकारस्य "इय्" इत्युच्चारणं क्रियते। संयुक्तहल्यकारस्य "इय्" इत्युच्चारणस्वीकार एव ब्रह्मगायत्रीमन्त्रघटकस्य "वरेण्यम्" इयि पदस्य "वरेणियम्" इत्युच्चारणे कृते तस्याश्चतुर्विंशत्यक्षरात्मकत्वं निष्पद्यते, नान्यथा। ऋग्वेदे तु "तन्वं पुषेम" (१०। १२८।११) इति मन्त्रे "तन्वम्" इत्यस्य यथोल्लिखितमेवोच्चरणं कियते। असंयुक्तहल्यकारवकारयोस्तु यथोल्लिखितमेवोच्चारणं क्रियते। परन्तु यकारस्य क्वचित् क्वचिद् वेदे जकारस्याप्युच्चारणं क्रियते। तद्यथा शुक्लयजुर्वेदे—"यज्ञेन यज्ञमयजन्त" इति मन्त्रे यकारो जध्वनिरूपेण व्यवह्रियते[4]। अपितु विभिन्नदेशजभाषास्वपि क्वचित् क्वचिद् यकारो जध्वनिरूपेण व्यवह्रियते[5]।

किञ्च, बङ्गभाषायां शब्दादौ अवयवत्वेन स्थितस्य यकारस्य जध्वनिरूपेण, शब्दान्ते च यथोल्लिखितमेवोच्चारणं व्यवह्रियते। यथा "यमुना", "विद्यालय"—शब्दयोः क्रमशस्तस्य जकारयकारोच्चारणं वेदितव्यम्। अपभ्रंशादिभाषासु यवर्णस्य जध्वनिरूपेण व्यवहारस्य दर्शनेन संस्कृतेऽपि क्वचित् यवर्णस्य जध्वनिरूपेणोच्चारणं शुद्धमेव स्वीकर्तव्यम्। नास्त्यत्र काचिद् विप्रतिपत्तिः।

किञ्च, न केवलं यकारस्य जकारोच्चारणम्, अपितु जकारस्यापि यकारो-

---

१. "ध्वनि की दृष्टि से ऋण को रिण ही लिखना चाहिए। इसी से हमने स्वरों में ऋ का विचार नहीं किया है।" —श्यामसुन्दरदासस्य भाषारहस्यम्, पृ० सं० २६४।
२. शब्दानित्यत्वपक्षे भाषाविज्ञानदृष्टचा।
३. "अथान्तःस्थानामाद्यस्यः पादादिस्थस्यान्यहल्संयुक्तस्यासंयुक्तस्य"—शु० यजु० प्राति० प्रतिज्ञापरिशिष्टे द्वितीयकण्डिका।
४. "अथान्तःस्थानामाद्यस्य पादादिस्थस्यान्यहल्संयुक्तस्यासंयुक्तस्य"—शु० युज० प्राति०, प्रतिज्ञापरिशिष्टे द्वितीयकण्डिका।
५. "येहि" अत्र जकार उच्चार्यते।

च्चारणं वेदे दृश्यते । तद्यथा—"अजो ह्यग्ने रजेनिष्ठ" । अस्मिन् मन्त्रे "अजो" इति शब्दे जकारो यध्वनिरूपेण व्यवह्रियते । जकारस्य यकारोच्चारणं[1] चरकाणामेव मते क्रियते । लोके तु यथोल्लिखितमेवोच्चार्यते ।

रलयोरुच्चारणस्वरूपम्

संस्कृतादिभाषासु व्यञ्जनपरे सति रेफस्य लकारस्य च यथोल्लिखितमेवोच्चारणं क्रियते, किन्तु वेदेषु इमौ वर्णौ स्वरेण सह व्यवह्रियेते । तद्यथा "दर्शतम्" इत्यस्य "दरेशतम्" इति "शतवल्शः" इत्यस्य "शतवलेश" इति उच्चारणं क्रियते। वेदेषु व्यञ्जनपरस्य रेफस्य केन स्वरेण सहोच्चारणं कर्तव्यमित्यत्र आचार्याणां मतभेदोऽपि विद्यते ।[2] व्यञ्जनपररेफस्य स्वरेण सहोच्चारणं "स्वरभक्तिः" इत्युच्यते ।

षकारोच्चारणम्

शुक्लयजुर्वेदे असंयुक्तहल्षकारस्य [3]खकारोच्चारणं क्रियते । तद्यथा—"सहस्रशीर्षा" इत्यत्र शीर्षापदस्य 'शीरेषा' इति मूर्धन्यषकारस्य खध्वनिरूपेणोच्चारणं क्रियते । किन्तु टवर्गककाराभ्यां योगे तु यथालिखितमेवायं वर्णो व्यवह्रियते । तद्यथा "अतिष्ठद् दशांगुलम्" इत्यत्र मूर्धन्यषवर्णस्य यथालिखितमेवोच्चारणं वैदिकैः क्रियते । मूर्धन्यषवर्णस्य खध्वनिरूपेणोच्चारणं न केवलं वेदेष्वेव, अपितु हिन्दीत्यादिदेशज । भाषास्वपि खकारोच्चारणं समुपलभ्यते[4] । श्रीमद्गोस्वामितुलसीदासविरचिते श्रीरामचरितमानसे बहूनि उदाहरणानि समुपलभ्यन्ते, यत्र मूर्धन्यषकारस्य खकारोच्चारणं क्रियते। परन्तु हिन्दीत्याद्यपभ्रंशभाषासु षवर्णस्य तथोच्चारणं सर्वत्र न क्रियते, अपितु क्वचिदेव । जनभाषायामस्य वर्णस्य ख-

---

१. "स्वरात्स्वरे परे जो यन्तु ऋकारे"—शु० य० प्रा० ४।१६४ ।

२. "रेफादूष्मणि स्वरे परे स्वरभक्तिरकारस्यार्धं चतुर्थमित्येके, अन्यस्मिन् व्यञ्जने चतुर्थमष्टमं वा" (अ० प्रा० १०१ । १०२), "रेफात् स्वरोपहितात् व्यञ्जनोदयाद् ऋकारवर्णा स्वरभक्तिरुक्तम्"—(ऋ० प्राति० ६।४६) इत्यादि ।

३. षकारस्य खकारः स्याट्टुकयोगे तु नो भवेत्—द्वितीयमाध्यन्दिनशिक्षायाम् (शिक्षासंग्रहे), खकारोच्चारणमसंयुक्तस्य शुक्लयजु० प्राति० ।

४. यथा—जब लगि आवौ सीतहिं देखी, होइ काज मोहि हरष विसेषी ॥
—श्रीरामचरितमानससुन्दरकाण्डे इति चतुष्पद्याम्
विसेषीशब्दघटकषकारस्य यथोल्लिखितमुच्चारणे कृते तु देखी शब्दघटकखकारेण सह तस्याऽनुप्रासो न युज्यते । किन्तु मूर्धन्यषवर्णस्य खकारोच्चारणे कृते एव "देखी" शब्दावयवखकारेण सह तस्यानुप्रासो युज्यते ।)

ध्वनिरूपेण व्यवहारात् संस्कृतभाषायामपि तथोच्चारणमासीदित्यनुमातुं शक्यते। तदनुसारेण च शुक्लयजुर्वेदवदेव लौकिकसंस्कृते टवर्गकवर्णाभ्यामसयुंतस्य मूर्धन्यववर्णस्य खकारोच्चारणे न कश्चिदपराधः समापतति । यथा च वैदिककालादेव मूर्धन्यषकारस्य खकारोच्चारणं क्रियमाणं विद्यते, न तु तदाधुनिकमित्यवगन्तव्यम्।

एवं रीत्या भारतीयशिक्षाव्याकरणाद्यनुसारेण तथा नूतनभाषावैज्ञानिकमतानुसारेण वर्णविभाजनं यथाऽधीतं यथाशक्ति प्रतिपादितम् । सम्वृतत्वादिदोषग्रस्तह्रस्वैकारादिस्वराणाम्, ववंरतेत्यादिदोषग्रस्तलुण्ठितलकारादीनाम् तथा च निर्दोषवर्णानां विषये यद् वक्तव्यं तद् यथामति व्याख्यातम् । वर्णमालाघटकानाम् एतेषामकारादिवर्णानाम् मूलभूतभारोपीयभाषातो विकासं स्वीकुर्वन्ति भाषावैज्ञानिकाः । एतत्सर्वमग्रे प्रतिपादयिष्यते, तदुपरि च कश्चिद् विचारोऽपि समुस्थापयिष्यते ।

द्वितीयपरिच्छेदस्य चतुर्थं प्रकरणम्

४. वर्णानां विकासवादः

आधुनिकशब्दशास्त्रिणः केल्टिक-जर्मनेटली-ग्रीक-हिट्टाइटेत्यादिदेशेषु व्यवह्रियमाणभाषाः सम्मेल्य भारतयोरोपीयनामकमेकं भाषायाः परिवारं (परिजनं) कल्पयाञ्चक्रुः। भारतयोरोपीयपरिवारे "केल्टिक-जर्मनेटली-ग्रीक-हिट्टाइट-तोखारी-अल्बेनियन-लैटोस्लाह्विअकर्मेनियनेरानी-संस्कृतम्" इत्यादयो या याः भाषा गण्यन्ते तासां जनयित्री काचित् प्राचीना भारतयोरोपीयभाषा आसीत्, तदनुसारेण प्राचीनभारतयोरोपीयवर्णमालाया अपि अनुसन्धानं कृतवन्तः । "अ ए आन म इति प्राचीनभारतयोरोपीयवर्णेभ्यः संस्कृतादिभाषासु अकारादीनां विकासः सञ्जातः" इत्येवं ते मन्यन्ते ।

पातञ्जलमहाभाष्ये विकासवादस्य बीजम्, तत्र तथ्यातथ्यविचारः

पातञ्जल**महाभाष्य**स्य प्रत्याहाराह्निकनामके द्वितीयाध्याये "ए ओ ङ् ॥३॥ ऐ औच् ॥ ४ ॥" इत्यनयोः सूत्रयोः पूर्वपक्षीयमहाभाष्यानुसारेण एकारादिस्वराः अकारेकारादीनां विकसितरूपाः सन्तीति प्रतीयते । उक्तञ्च **महाभाष्ये—**

"इदं विचार्यते—इमानि सन्ध्यक्षराणि तपराणि वोपदिश्येरन्—एत् ओत् ङ्, ऐत् औत् च; अतपराणि वा यथान्यासम् ।" इति ।

अत्र भाष्ये सन्ध्यक्षराणीत्युक्तम् । एकारादयश्चत्वारः स्वरा अकारादिस्वरवत् न स्वतन्त्रसत्तात्मकाः, अपि तु अकारेकारोकाराणां सन्ध्यक्षरस्वरूपाः । **महाभाष्ये** च पूर्वपक्षे अवयविन एकारस्य अकारेकारौ अवयवौ प्रोक्तौ । तद्यथा प्रत्याहाराह्निके—

इदं विचार्यते—य एते वर्णेषु वर्णैकदेशा वर्णान्तरसमानाकृतयः, एतेषामवयवग्रहणेन ग्रहणं स्याद्वा न वेति । कुतः पुनरिदं विचारणा ? इह हि समुदाया अप्युपदिश्यन्ते, अवयवा अपि । आभ्यन्तरश्च समुदायेऽवयवः, तद्यथा वृक्षः प्रचलन् सहावयवैः प्रचलति । तत्र समुदायस्थस्यावयवस्यवयवग्रहणेन ग्रहणं स्याद्वा न वेति जायते विचारणा । इति ।

अर्थादाकारादिष्वकारसदृशा अवयवाः ऋकारलृकारयो रेफलकारसदृशाववयवौ सन्ध्यक्षरेष्वकारेकारोकारसदृशाः । एवमेभिर्भाष्यवचनैर्ध्वन्यते यत् सन्ध्यक्षराणि अक्षरद्वयस्य संयोगेन विकसितानि सन्तीति ।

वस्तुतस्तु इदं सर्वं भाष्यं पूर्वपक्षीयम्, न तु सिद्धान्तसिद्धम् । अस्य पूर्वपक्षीयभाष्यस्य कश्चिदन्य एव आशयो विद्यते । तमाशयमविज्ञायैव विकासवादस्य बीजं संस्थाप्यते । केवलवर्णकार्यमवयवेषु भवति न वेति पूर्वपक्षीयस्यास्य भाष्यस्याशयः । एकारादिषु च नावयवप्रतीतिः । यदि स्यात्तर्हि "नौद्व्यचःष्ठन्" (पा० सू०

(४. ४. ७) इत्यस्मिन् सूत्रे नौग्रहणं न कर्तव्यम्, नौघटकौकारस्य द्व्यच्त्वात् । तावन्मात्रेणैव ठन् प्रत्ययेऽनुबन्धलोपेन नाविकशब्दस्य निष्पत्तेः । तदेव नौग्रहणं व्यर्थीभूय ज्ञापयति— एकारादिषु नावयवावयविभावः । एवं बहूनि प्रमाणानि समुपस्थापयितुं शक्यन्ते । तैश्च प्रमाणैर्भगवान् पाणिनिः, पतञ्जलिश्च अकारादीनां वर्णसमाम्नाये स्वतन्त्रसत्तां स्वीकुर्वन्तीति ज्ञायते । एतच्च तथ्यं शब्दविद्याशिरोमणिः श्रीभर्तृहरिप्याह **वाक्यपदीयस्य** ब्रह्मकाण्डे—

पदे न वर्णा विद्यन्ते वर्णेष्ववयवा न च ।
वाक्यात् पदानामत्यन्तं प्रविभागो न कश्चन ॥ इति ॥

स्पष्टा चैषा कारिका । वर्णेष्ववयवा न चेत्युक्त्याऽवयवत्वं नाङ्गीकर्तव्यम् ।

विदुषां पुरः सम्यग्विचारार्थं स्वरव्यञ्जनविकासः भाषाविज्ञानरीत्या समुपस्थाप्यते ।

प्राचीनभारोपीया मूलस्वराः

तथा च ये प्राचीनभारतयोरोपीया वर्णाः प्राच्यैः पाश्चात्यैश्च भाषावैज्ञानिकैः परिकल्प्य स्वीक्रियन्ते, ते देवनागरलिप्यामधोऽङ्किताः[1] सन्ति । ते यथा—आदौ स्वराः ।

प्राचीनभारतयोरोपीयभाषायां सप्त एव शुद्धाः स्वरा आसन् । अ, आ, ऍ ए,[2]ऑ, ओ, अ । अन्तिमः सप्तमश्च अकारो दुर्बलस्वरनाम्नाऽप्युच्यते स्म ।

एतेभ्योऽतिरिक्ताः अन्तःस्थासंज्ञकाः स्वरव्यञ्जनोभयात्मकाः षड् वर्णा आसन् । ते यथा— य्, व् र् ल् न् म् इत्येते वर्णाः । एतेषां स्वरात्मकं स्वरूपं क्रमशः "इ, उ, ऋ, लृ, अन, अम्" इति वेदितव्यम् । एतेषां मध्ये मकारनकारौ स्वनन्तसंज्ञकौ रेफलकारौ च द्रववर्णौ व्यवह्रियेते ।

एतेषामन्तःस्थानां स्वरव्यञ्जनोभययुग्मरूपमप्यासीदिति भाषाविज्ञानज्ञैः स्वीक्रियते । यथा—"इय, उव्, ऋर, लृल (अ) न्न, (अ) मम्" इति । एते च अन्तःस्थाः प्राचीनैः भारतयोरोपीयैः सप्तभिः शुद्धस्वरैरपि सह संयुज्य ध्वनियुग्मरूपेण व्यवह्रियन्ते स्म । यथा—अय, ऍय, ऑय, आय्, एय्, ओय् इति । एवं "व, र, ल, न, म" एतैरपि युक्ता मूलस्वरा आसन् ।

क्वचिद्[3] ग्रन्थेषु च "अइ आइ एइ, इए इत्यादयोऽपि प्राचीना भारतयोरोपीयाः स्वरा गण्यन्ते ।

---

१. डा० श्यामसुन्दरदासकृते भाषारहस्ये, श्रीभोलाशङ्करव्यासकृते च "संस्कृत का भाषाशास्त्रीय अध्ययन" इत्यादिग्रन्थे एतदीयोंऽशो द्रष्टव्यः ।

२. ह्रस्वस्य एकारस्य ह्रस्वस्य ओकारस्य ॅ, √इमौ संकेतौ ग्रन्थेऽत्र प्रयुक्तौ ।

३. श्यामसुन्दरदासकृते भाषारहस्यनामके ग्रन्थे एतदीयोंऽशो द्रष्टव्यः ।

प्राचीनभारोपीया व्यञ्जनवर्णाः

कण्ठ्यः—क, ख, ग, घ ।
तालव्यः—क्य, ख्य, ग्य, घ्य ।
कण्ठ्योष्ठ्यः—क्व, ख्व, ग्व, घ्व ।
दन्त्यः—त थ द ध ।
ओष्ठ्यः—प फ ब भ इति ।
स, अघोष ह सघोष ह ।

एतेभ्यः प्राचीभारुतयोरोपीयध्वनिभ्यो भारतीयसंस्कृतवर्णानां विकासोऽभूदिति क्रमशः प्रदर्श्यते ।

अ-कारादिस्वराणां विकासः

अकारस्य विकासः

प्राचीनभारतयोरोपीयैः अ ऍ ऑ स्वरेभ्यः, स्वरव्यञ्जनोभयात्मकनकारमकाराभ्याञ्च संस्कृते ह्रस्वस्य अकारस्य विकासोऽभूत् । यथा—

संस्कृते—अजति; अवेस्तायां अजइति, ग्रीकभाषायाम् अगइ, प्रा० भा० यो० अगेॅइ ।

,,	अस्ति	,,	अस्तिय्	,,	ऍस्ति	,,	ऍस्ति
,,	पतिः	,,	पाइतिश्	,,	पोॅसिस	,,	पोॅतिस्
,,	दश	,,	दस	,,	दक	,,	दक्म
,,	ततः	....		,,	ततोॅस	,,	त्तूतोॅस् ।

आकारस्य विकासः

प्राचीनभारतयोरोपीयाः "आ ए ओ न् म्" इत्येते स्वरा संस्कृतभाषायाम् आकाररूपेण व्यकासन्त । यथा उदाहरणानि—

संस्कृत	मातृ	अवे०	मातर	ग्रीकभा०	मातेर	प्रा० भा० यो०	मातेर्
,,	मा	,,	मा	,,	मे	,,	मे
,,	ग्राम्	,,	गम्	,,	वोन	,,	ग्वोम्
,,	जातः	,,	जातो	,,	ग्नोतोॅस्	,,	ग्नतोॅस्
,,	क्षा	,,	ज	,,	ख्थोन	,,	घ्स्म्

ह्रस्वदीर्घयोरिकारोकारयोर्विकासः

अनयोर्विकासः प्रा० भा० योरोपीयस्य विविधवर्णेभ्यो जातः । प्राचीन-भा० यो० इकारोकारौ संस्कृतभाषायां मूलरूपेण समुपलभ्येते । यथा—

संस्कृत इह	अवेस्ता—इदी	ग्रीक—इथि०	प्रा० भा० यो०	इधि०
,, उप	,, उप	,, उप	,,	उप
,, जीव	पारसी—जीव	लैतिन—उईउस	,,	ग्वीव्स्
,, भूः	,, अब्रू	ग्रीक—ओॅफ्रूस	,,	ओॅभ्रूस्

अनयोरकाराद् विकासः

संस्कृत—पितृ	अवेस्ता—पितर्	ग्रीक—पतेर्	प्रा० भा० यो०	पुअतेर
,, दुहिता	,, दुदा	,, थुगातेर	,,	दुघ्अतेर

ऋकाराद् विकासः

संस्कृत गुरु	अवेस्ता गोउरु	ग्रीक—वरुस	प्रा० भा० यो०	गृउस
,, गिरि	,, गइरि	,, ...	,,	गृरि, गृर् अ

ह्रस्वदीर्घकारयोः लृकारस्य च विकासः

नूतनभाषाशास्त्रज्ञैः संस्कृते[1] ह्रस्वदीर्घकारौ लृवर्णश्च शुद्धस्वरूपेण न स्वीक्रियन्ते, किन्तु रलवर्णयोः स्वरीभूतं रूपं मन्यते । प्राचीनभारतयोरोपीयः "मृज्द इज्ध" इत्यादिशब्दघटक ऋकारस्तु संस्कृते मृड-दृढेत्यादिशब्देषु ऋकार-रूपेणैव समुपलभ्यते । अवेस्ताभाषायां तु ऋकारस्य "अ र् अ[2]" रूपेण विकासोऽभूत् । यथा प्राचीनभारतयोरोपीयपृथुशब्दघटक ऋकारः अवेस्ताभाषायां 'प् अ र् अ थु=परथु—शब्दे—"अर् अ" रूपेण विकास प्राप्तवान् । वैदिक-ऋकारस्य अवेस्तीयेन अ र् अ (अभितोऽज्भक्तेपरा) वर्णेन सह साम्यञ्च[3] प्रतीयते; यतो हि अवेस्तीय "अर् अ" इति वर्णौ प्रथमान्तिमेतिपादद्वयं स्वरस्य मध्ये च रेफो दृश्यते ।

"हरीन्, हरीणाम्" इत्यादिषु दीर्घ ऋकार एव दीर्घेकारः सञ्जात इत्येवं ब्लाकमहोदयाः स्वीकुर्वन्ति । "वस्तुतस्तु दीर्घ ऋकारः केवलं ऋकारान्तशब्दस्य षष्ठद्वितीयविभक्त्योर्बहुबचनरूपेण समुपलभ्यते"—इत्येवं केचित् स्वीकुर्वन्ति । एवञ्च प्रा० भा० योरोपीय ऋवर्णः क्वचित् परिवर्तितः, क्वचिच्च अपरिवर्तितो दृश्यते । लृकारस्य[4] च प्राचीनभारतयोरोपीयऋकाराद् विकासोऽभूत्—इत्येव-

---

१. डॉ० भोलाशङ्करव्यासः—"संस्कृत का भाषाशास्त्रीय अध्ययन", पृ० सं० ९४ ।
२. ,, ,, — ,, ,, ,, ,, ।
३. "इस प्रकार वैदिक ॠ प्राचीन ईरानी अर्थात् अवेस्ता की (२ र २) ध्वनि की बराबरी पर रखा जा सकता है"—श्यामसुन्दरदासस्य भाषारहस्ये पृ० सं० २८३ ।
४. भोलाशङ्करव्यासः, "संस्कृत का भाषाशास्त्रीय अध्ययन", पृ० सं० ९४ ।

माधुनिकशब्दशास्त्रिणां सम्प्रदाये ह्रस्वदीर्घकारयोः ऌकारस्य च विषये महत्त्व-पूर्णा गवेषणा विद्यते ।

एकारस्य ऐकारस्य च विकासः

अनयोः स्वरयोः प्रा० भा० यो० भाषायाः "अइ ऍइ ओॅइ" स्वरेभ्यो विकासः सञ्जातः, यथा प्राचीनभारतयोरोपीयभाषायाः "ऍक्वाइ' शब्दघटक अइ स्वरः संस्कृते "अश्वे" शब्दे एकारः ग्रीकभाषायां "हृप्पॉइ" शब्दे "आई" सञ्जातः । "एय्" इति ध्वनियुग्मादप्यैकारस्य विकासो वक्तुं शक्यते । तद्यथा प्रा० भा० योरो० भाषायां "लेय्क्व" शब्दघटक "एय" इति ध्वनियुग्मः, संस्कृते "अरैक्षम्" शब्दे ऐ रूपेण, ग्रीकभाषायाञ्च "ऐॅलेॅइप्स" शब्दे "ऍइ" रूपेण विकासोऽभूत् । प्रा० भा० यो० भेॅवोॅइतोॅ शब्दघटक ओॅइ इति ध्वनियुग्मः संस्कृते "भवेत्" शब्दे एकाररूपेण विकसितः । अइ [अय्] इति ध्वनियुग्मादपि एकारो विकसितः । यतोहि "अय्" इत्यत्र यकारस्य स्वरीभूतं स्वरूपमिकारोऽपि वर्तते ।

ओकारस्य औकारस्य च विकासः

अनयोः स्वरयोस्तु प्राचीनभारतयोरोपीयभाषायाः अउ (अव्) एउ (एव्) आउ (आव्) एउ (एव) "अउ, एउ, आउ" इति सन्ध्यक्षरात्मकस्वरेभ्यो जनिरभूत् । तद्यथा—मघवन्शब्दघटक अवकारः "मघोन" शब्दे ओकाररूपेण, प्रा० भा० यो० "द्येवस" शब्दघटक एवकारश्च ग्रीकभाषायां "जेउस" शब्दे "एउ" रूपेण "एउ एव" इति सन्ध्यक्षरात्मकस्वरौ च संस्कृते "द्यौः" शब्दे औरूपेण विकासं प्राप्तवन्तौ । एवं प्राचीन भा० यो० "नावस्' शब्दावयव "आव्" वर्णः ग्रीकभाषायां "नाउस" शब्दे आउरूपेण, तौ एव आववर्णः आउस्वरश्च संस्कृते "नौ" शब्दे औ-स्वररूपेण व्यकासेताम् ।

ककारादिव्यञ्जनध्वनीनां विकासः

कवर्णस्य विकासः—प्रा० भा० यो० ककारक्वकाराभ्यां संस्कृते ककारौ व्यकासेत । यथा प्रा० भा० यो० 'क्रेवस" शब्दघटकककारः संस्कृते "क्रवि" इत्यादिशब्दे मूलरूपेण सुरक्षितो दृश्यते । एवं ग्रीकभाषायामपि "क्रेवस" शब्दे मूलरूपेण ककार एव दृश्यते । परन्तु प्रा० भा० यो० "क्वास्" शब्दघटक क्ववर्णः संस्कृते क्वोस् शब्दे करूपेण विकासं प्राप्तः ।

ख—प्रा० भा० यो० ख ख्व स्ख वर्णाः संस्कृते खकाररूपेण परिवर्तिताः जाताः ।

उदाहरणं यथा—

संस्कृते—खादति			प्रा० भा० यो०	खोॅदोॅति
,,	नख	ग्रीक—आनुख		
,,	मख	,, मखोॅमाइ	प्रा० भा० यो०	मखोस्

ग—प्रा० भा० यो० ग, ग्व-वर्णाभ्यां प्रादुर्भूतः । यथा—

सं०	उग्र		प्रा० भा० यो०	उग्र
,,	गौः	ग्रीक-वोॅउस	प्रा० भा० यो०	ग्वोवस्

घ—प्रा० भा० यो० घ ध्व वर्णौ धरूपेण परिणतौ । यथा—

वैदिक संस्कृत द्रोग्धा			प्रा० भा० यो०	घ्रोॅउघोॅ
,,	धन	रूसी-ग्नत्य	प्रा० भा० यो०	ध्वोॅनोॅ

च—प्रा० भा० यो० "क, क्व" वर्णाभ्यामस्य वर्गस्य विकासः सञ्जातः । यथा—प्रा० भा० यो० "ककोर" शब्दघटकः ककारः संस्कृते चकारशब्दे चकारः, प्रा० भा० यो० "क्वि" शब्दघटकः क्ववर्णः संस्कृते "चित" शब्दे चकारः सञ्जातः ।

छ—प्रा० भा० यो० स्ख्यवर्णः संस्कृतभाषायां छ-रूपेण परिणतिं प्राप्तः । यथा—प्रा० भा० यो० "ग्वमस्ख्यति" शब्दावयव "स्ख्य" वर्णो गीर्वाणवाण्याम् "गच्छति" शब्दे, प्रा० भा० यो० "पृस्ख्यति" शब्दावयवः "स्ख्य" वर्णश्च संस्कृभाषायां "पृच्छति" शब्दे छकाररूपं प्राप्तौ ।

वस्तुतस्तु[1] "इषुगमियमां छः" (पा० सू० ७।३।७७) इत्यादि सूत्रेषु मकारस्य छकारादेशकरणात्प्रा० भा० यो० म-स्ख्य-वर्णाभ्यां छकारस्य विकासोऽभूदित्येवमपि वक्तुं शक्यते । तदयथा प्रा० भा० यो० 'गमवस्ख्यति" शब्दघटक "म स्ख्य" वर्णयोः "गच्छति" शब्दे छकारद्वयरूपेण विकासे सति "गच्छति" इति स्थिते आद्यछकारस्य "खरि च" इति चर्त्वे "गच्छति" इति रूपं निष्पद्यते । केवलं स्ख्यवर्णस्य छरूपेण विकासस्वीकारे तु "गछति" इत्यनिष्टरूपापत्तिरिति मदीयोऽभिप्रायो वेदितव्यः ।

ज—प्रा० भा० यो० ग-ग्व-वर्णाभ्यां संस्कृते जकारस्य प्रादुर्भावोऽभूत् । यथा—प्रा० भा० यो० "अगस्" शब्दावयवो गकारः संस्कृते "ओजस्" शब्दे जकाररूपम्, प्रा० भा० यो० ग्वीवोॅ (ग्वीवोॅस्) ग्ववर्णश्च संस्कृते शब्दे "जकार-रूपं प्राप्तौ ।

झ—"प्रा० भा० यो० वर्णमालायां झवर्णो न विद्यते । परन्तु प्राचीन भा० योरोपीयातिरिक्ता या भाषाः सन्ति, ताभ्योऽयं वर्णः प्रा० भा० यो० भाषायां समागतः । यद्वा अनुकरणात्मकोऽयं शब्दः, यथा—झटिति, झंझा, झंकृतिरित्यादिषु" —इत्येवं विकासवादिनां भाषाविज्ञानविदामनुसन्धानं विद्यते ।

---

१. डॉ० भोलाशङ्करो व्यासः "संस्कृत का भाषाशास्त्रीय अध्ययन" पृ० सं० १०० इति ग्रन्थे "ग्वमस्ख्यति" शब्दे स्ख्यशब्दस्य छरूपेण परिणतिं प्रत्यपादयत्, तदुपरि मूले तर्कसङ्गतो विचारः प्रस्तुतः ।

ट—प्रा० भा० यो० तकार एव संस्कृते टरूपं प्राप्तः। स च तकारः प्रा० भा० यो० भाषायां कस्मिश्चित् शब्दे रेफेण, क्वचित् क्य (सं० श) ग्य घ्य (सं० ज, ह) इत्येतैर्वर्णैर्युक्त आसीत्। उदाहरणार्थं यथा—प्रा० भा० यो० कर्तुस् शब्दे रेफयुक्तस्तकारः संस्कृते कटु-शब्दे टकाररूपेण परिणतः। देववाण्यां वष्टि-वृष्टि-शब्दयोः शकारस्य मूलं जकारयुक्तस्तकारो विद्यते। तथा च लिट्, विराट्-शब्दयोर्हकारजकारौ टकाररूपेण व्यकासेताम्। हकारटकारयोश्च प्रा० भा० यो० भाषायां "ग्य घ्य" इति रूपमासीत्।

ठ—एवमेव रेफयुक्तः प्रा० भा० यो० थकारो गीर्वाणवाण्यां ठकाररूपेण परिणामं प्राप्तः। तद्यथा—प्रा० भा० यो० ग्त्र्थ शब्दघटकरेफयुक्तथकारस्य संस्कृते जठरशब्दे ठकाररूपेण विकासस्य कल्पना कर्तुं शक्यते।

ड—प्रा० भा० यो० दवर्णयुक्तजकारस्य संस्कृते ड-रूपेण विकासोऽभूत्। तद्यथा—प्रा० भा० यो० "दुज्दभ" शब्दस्य संस्कृते "डूडभ" शब्दे डकारः, वेदे च तस्य डकारस्य "ळूळभ" शब्दे ळकारः सञ्जातः।

ढ प्रा० भा० यो० धयुक्तो जकारः संस्कृते ढरूपं प्राप्तवान्। यथा—प्रा० भा० यो० अस्तोज्ध्वम् शब्दावयवो धवर्णयुक्तो जकारः संस्कृते अस्तोढ्वम् शब्दो ढवर्णः सञ्जातः।

त—संस्कृते तकारः स्वमूलभूतेन प्रा० भा० यो० तरूपेणैवावशिष्यते। यथा प्रा० भा० यो० "पतेर्" शब्दस्य तकारः संस्कृते "पितृ" इति समुपलभ्यते।

एवमेव सर्वे तवर्गीयवर्णाः प्रा० भा० यो० तवर्गस्यापरिवर्तितरूप अवशिष्यन्ते, ते च क्रमशः प्रदर्श्यन्ते—

थ—संस्कृते	रथ	ग्रीक-हॉर्थोस्	प्रा० भा० यो०	रॉथोथ्
दवर्णः—				
संस्कृते	ददाति	ग्रीक—दॆदोति	प्रा० भा० यो०	दॆदोति
धः— ,,	दधार	,, तॆथेतइ	,,	घॆघोर

एवमेव पवर्गोऽपि संस्कृतभाषायां स्वमूलरूपेण सुरक्षितो विद्यते। यथा—

संस्कृते पिता	प्रा० भा० यो०	पअतेर
फ— ,, फल ग्रीक पुल्लोंन,	प्रा० भा० यो०	फल्लों
ब—संस्कृते बर्हिः, अवे० वर्ऽजिश्	प्रा० भा० यो०	बरघिस्

भ—संस्कृत भरति अवेस्तां वरइति ग्रीक-भेरॆसि, प्रा० भा० यो० भरति।

अनुनासिकवर्णाः—ङ ञ ण न म

शब्दशास्त्रिण एतेषां मध्ये ङकारञकारणकारान् नकारस्यैव विकसितरूपान् मन्यन्ते। एते स्वतन्त्ररूपेण न स्वीक्रियन्ते। तद्यथा—"युङ्क्ते" इत्यत्र श्नमो नकारस्य ङकारयोगे, युञ्जानशब्दे नकारस्य ञकारः, रुणद्धिशब्दे च नकारस्य णकारादेशः सञ्जातः।

केवलं नकारमकारावेव प्रा० भा० यो० नकारमकाररूपेण संस्कृतेऽवशिष्येते। यथा प्रा० भा० यो० "मॆनोंस्" शब्दघटकनकारमकारौ संस्कृते "मनस्" शब्दे समुपलभ्येते। प्रा० भा० यो० "मातर्" शब्दावयवमकारः संस्कृते मातृशब्दे, ग्रीकलैटिनभाषयोश्च "मातेर" शब्दे श्रूयते। नकारमकारयोः स्वमूलभूत प्रा० भा० यो० नकारमकाररूपेणावशिष्यमाणतया आंग्लभाषायां नकारमकारावेव श्रूयेते। ङ ञ ण इत्येते च न श्रूयन्ते।

"य र ल व"—इत्येते चत्वारो वर्णा अन्तःस्थसंज्ञका उच्यन्ते। प्रा० भा० यो० भाषायां तु अन्तःस्थासंज्ञका वर्णाः षड् आसन्। ते यथा—"य र ल व न म" इति। यद्यपि प्रा० भा० यो० यकारादिवान्तवर्णेभ्यो यकारादिवान्तस्य वर्णचतुष्टयस्य विकासः संस्कृतभाषायां सञ्जातः, तथापि प्रा० भा० यो० रेफलकाराभ्यां क्रमशो रेफलकारयोर्विकासस्वीकरणं भ्रान्तिपूर्णं प्रतीयते, किन्तु रेफस्य लकारेण, लकारस्य च रेफेण—इत्येवं व्यत्ययेन विकासोऽभूत्।

रलयोर्विकासः—लकारेण रेफस्य बिकासो यथा—प्रा० भा० योरो० अलक्स शब्दावयवलकारः संस्कृते रक्षशब्दे रेफः, ग्रीकभाषायाञ्च मूलभूतो लकाररूपेण सुरक्षितो दृश्यते। ग्रीकभाषायां दल्फासशब्दावयवो लकारश्च संस्कृते "गर्भ" शब्दे रेफः सञ्जातः।

लकारस्य च रेफेण विकासो यथा—लिथुआन लैतिनभाषयोः क्रौक्तिरुम्पा शब्दयोरवयवीभूतो रेफः संस्कृतभाषायां क्रोश-लुम्पशब्दयोर्लकारः सञ्जातः।

एवं रेफस्य लकारेण लकारस्य च रेफेण विकासोऽभूत्। अतएव संस्कृते "रलयोरभेदः" इत्येवं प्रसिद्धिर्विद्यते।

लकारस्य च द्वितीयं विकासमूलं डकारो विद्यते। "अग्निमीळे" इत्यादिवैदिकमन्त्रेषु डकार एव लकाररूपेण दृश्यते।

य—यथा प्रदीपाद् दीपान्तरः प्रज्वलितः सन् विकासते, एवं प्रा० भा० यो० यवर्णात् संस्कृते यकारस्य विकासः सञ्जातः। यथा—

संस्कृते—युगम्, ग्रीक—जुगोंन्, लैतिन—जुगुन्, गाथि—जुक्; प्राचीन अंग्रेजी—ज्योक, आधुनिक अंग्रेजी—जोक, जर्मन—त्सोख, रूसी—इगो, प्रा० भा० यो० युगाम्।

व—प्रा० भा० योरो० वकारेण संस्कृतादिभाषास्थवकारस्य विकासः सञ्जातः । यथा—

संस्कृते—अश्वे, ग्री०—हों प्पों स, लिथुयानी—अश्व, प्रा० भा० यो० ऍक्वों स ।

इग्यणोर्वैज्ञानिकता

यणां मध्ये रेफस्य लकाररूपेण, लकारस्य च रेफरूपेण विकासाद् रलयोः परस्परं सम्बन्धः परस्परमभेदश्च दृश्येते । अतएव यमकश्लेषालङ्कारयोस्तयोरभेद-रूपाः प्रयोगा दृष्टिपथं समायान्ति । एवं यकारवकारापेक्षया रलयोर्वैशिष्ट्याति-शयो विद्यते । अस्माद् व्यतिरिक्तं यकारादिचतुर्षु वर्णेषु सामान्यं वैशिष्टयमव-लोक्यते । व्यञ्जनानामुच्चारणं स्वरं विना न सम्भवति, व्यञ्जनानि च कदापि स्वररूपेण न परिवर्तन्ते । किन्तु यकारादिवर्णचतुष्टयमस्यापवादभूतं विद्यते ।

एतेषां वर्णानां स्वरात्मकमपि स्वरूपं दृश्यते । यकारादिवर्णचतुष्टयस्य स्वरात्मकं रूपं क्रमशः "इ ऋ ऌ उ" इति स्वरचतुष्टयं वेदितव्यम् । अत एव पाणिनिः—"इग्यणः सम्प्रसारणम्" इति सूत्रेण यकारादिवान्तस्य वर्णचतुष्टयस्य सम्प्रसारणसंज्ञामादिष्टवान् । किञ्च, न केवलमन्तःस्थवर्णानां स्वरीभूतं स्वरूपं "इ ऋ ऌ उ" इति वर्णचतुष्टयम्, अपि तु इकारादिस्वरचतुष्टयस्यापि व्यञ्जनी-भूतं स्वरूपं यकारादयो विद्यन्ते । तथा च "सुध्युपास्यः, धात्रंशः, लाकृतिः, मध्वरिः" इत्यादिषु इकारादीनामेव यकाराद्यादेशाः, "इयाज" इत्यादिषु च यकारादीनामेव इकाराद्यादेशा दृश्यन्ते । एवम् इग्यणोः परस्परमभेदः प्रतीयते, केवलं ध्वन्यात्मकदृष्टया तयोर्यत्किञ्चिद् भिन्नत्वं श्रोत्रेन्द्रियेण प्रतीयते ।

एवं यकारादिवर्णचतुष्टयस्य वैशिष्ट्यं प्रदर्शयँस्तेषां स्वरात्मकमेकं स्वरूपं प्रतिपादितम् । यकारादिवर्णचतुष्टयस्य द्वितीयं स्वरूपं इकारादिस्वरयुक्तमपि[1] प्रा० भा० योरो० भाषायामासीदित्येवमनुमानं भाषावैज्ञानिकैः क्रियते । ते यथा—"इय्, उव्, ऋर्, ऌल्" इत्यादि । मन्येऽहं भाषाविज्ञानचुञ्चवः "अचिश्नुधातुभ्रुवां य्वोरियङुवङौ" (पा० सू० ६।४।७७) इति सूत्रेण धात्वन्तेवर्णोवर्णयोः इयङुवङौ दृष्ट्वा प्रा० भा० यो० भाषायामन्तःस्थवर्णानां स्वरयुक्तरूपस्यानुमानं कुर्वन्ति ।

---

१. यद्यपि भोलाशङ्करव्यासमहोदयः "संस्कृत का भाषाशास्त्रीय अध्ययन" पृ० सं० ११३ इति ग्रन्थे "इय, उव" इति ध्वनियुग्मस्य प्रा० भा० योरो० भाषायामभावं प्रतिपादितवान् । अस्य ध्वनियुग्मस्याभावप्रतिपादने हेतुश्च प्रा० भा० यो० भाषायाम् ईस्वरस्याभावरूप प्रतीयते । परन्तु त्र्यधिकनवतितमे (९३) पृष्ठे इ-उ-स्वरयो-विकासप्रतिपादनेन प्रा० भा० यो० भाषायामनयोरस्तित्वं तेन स्वीकृतम् । अतो यकारा-दीनां द्वितीयं स्वरूपम् "इय उव" इत्येवं स्वीकर्तुं शक्यते ।

एतेषां यकारादिवर्णानां शुद्धस्वरैः (अ आ ए ए ओ ओ अ) युक्तं तृतीयं रूपमासीत् । तद्यथा—"अय्, एय, एय ओय ओय अय" इत्यादि । एवं लकारा-दीनामपि "अर् एर एर" इत्यादि रूपं बोद्धव्यम् । तथा च प्रा० भा० यो० भाषायामन्तःस्थवर्णानां "अय, एय, अव्, अर्" इत्यादिस्वरूपाणामनुमाने हेतुः "गमयति" इत्यादिशब्दे "अय" इत्यंशः "देयम्" शब्दे च "एय" इत्यंशो विद्यते । तथा च "गमयति" इत्यादिशब्देषु अयाद्यादेशेनानुमीयते यत् प्रा० भा० यो० भाषायां "अय, एय्" एत्यादिध्वनियुग्मा अप्यासन् । किञ्च, "एचोऽयवायावः" (६।१।७८) इति सूत्रेण ज्ञायते यच्चतुर्णामिकारादिसन्ध्यक्षराणां यथार्थस्वरूपम् "अय् अव् आय् आव्" इति विद्यते । अतएव हरे+ए, विष्णो+ए, नै+अकः, इति प्रक्रियादशायां "हरये, विष्णवे" इत्यादिनिष्पन्नशब्देषु एकारादयः स्वकीयं यथार्थस्वरूपं भजन्ते । तच्च स्वरूपं यकाराद्यन्तःस्थावर्णानां स्वरूपतयाऽङ्गीक्रियते । एवं यकारादीनाम् "अय, अव"—इति अकारादिस्वरयुक्तं स्वरूपमासीदिति सुतरां निश्चेतुमपि शक्यते, न केवलमनुमातुम् । भाषाशास्त्रिणस्तु नकारमकारावप्यन्तःस्था-वर्णौ मन्यन्ते । एतयोरपि "अम् अन्" इत्यादिरूपेण विकासो वेदितव्यः ।

ऊष्मवर्णाः

श—देववाण्याम् ऊष्मवर्णानां मध्ये शकारस्य प्रा० भा० यो० क्यवर्णाद् विकासं मन्यन्ते । यथा—प्रा० भा० यो० क्ल्युशब्दघटक क्यवर्णः संस्कृते श्रू-शब्दे शकाररूपेण विकासं प्राप्तः, किन्तु ग्रीकभाषायां "क्लुओ" शब्दे तस्य ककाररूपेण परिवर्तनं दृश्यते ।

ष—प्रा० भा० यो० सकारावस्य वर्णस्य विकासं मन्यन्ते । अकारं विहाय इकारादिस्वरेभ्यः कवर्गाच्च परस्य सकारस्य मूर्धन्यषकारादेशः सञ्जायते । तद्यथा-हरिषु, रामेषु, मातृषु, वाक्षु इत्यादिषु शब्देषु इकारादिभ्यः परस्य सकारस्य मूर्धन्यादेशः षकारो दृश्यते ।

स—अयं वर्णः संस्कृते स्वमूलभूतेन प्रा० भा० योरोपीयसवर्णरूपेणैव अपरिवर्तितः सन् दृश्यते । यथा प्रा० भा० यो० "एस्ति" शब्दावयवसकारः संस्कृते "अस्ति" शब्दे स्वरूपेणैव दृश्यते ।

ह—आधुनिकशब्दशास्त्रिणो हकारस्य भेदद्वयं स्वीकुर्वन्ति—१. घोषात्मकः, २. अघोषात्मकश्चेति । अघोषस्य हकारस्य विकासः प्रा० भा० यो० पदान्तसकाराद् रेफाद्वा सञ्जातः । विसर्गम् एव अघोषहकारस्य स्वरूपं मन्यन्ते नूतनशब्द-शास्त्रिणः । हरिः, रामः—इत्यादिशब्देषु च अस्यैवाघोषत्मकस्य हकारस्य श्रुतिर्जायते ।

सघोषहकारस्य तु प्रा० भा० योरो० घ, घ्य० घ्ववर्णेभ्यो विकासोऽभूत्। यथा—

संस्कृते—दह्यति, प्रा० भा० यो० घ्रव्घ्, घ्रावघ, घ्रव्घ्य्ति।

„ हन्ति „ घ्वन्, घन्न, घ्नान, घ्वनति।

एवं तुलनात्मकाध्ययनेनेयं चरमपरिणतिः समायाता यत् प्रा० भा० यो० भाषायाम् "अ आ ए ऐ ओ औ अ"—इति सप्तैते शुद्धस्वरा आसन्। एतेषां मध्ये 'आ ए अ" इति स्वरत्रयञ्च प्रधानमासीत्। एते स्वरा एव "ऐ औ" इत्यादि स्वररूपेण व्यकासन्त। एवं व्यञ्जनानां मध्ये कवर्गस्य प्रा० भा० योरोपीयवर्णमालाघटकेभ्यः क्वादिघ्वान्तवर्णेभ्यः (कण्ठ्योष्ठ्यवर्णेभ्यः), चवर्गस्य च "क्य ख्य ग्य घ्य" इति प्राचीनभारतयोरोपीयतालव्यध्वनिभ्यः, कादिघान्तकण्ठवर्णेभ्यः, क्वादिघ्वान्तकण्ठोष्ट्यवर्णेभ्यश्च विकासः प्रतिपाद्यते। तवर्गपवर्गौ च स्वमूलरूपेणैव अपरिवर्तितौ विद्येते। एवं शकारस्य क्यन्वर्णात्, मूर्धन्यषकारस्य च दन्त्यसकारात् विकासम्, सकारञ्च अपरिवर्तितं स्वीकुर्वन्ति। हकारस्य च "घ घ्य घ्व" वर्णेभ्यो विकासं परिकल्प्य, तस्य च घोषाघोषात्मकं भेदद्वयं मन्यन्ते। एवं रेफस्य लकारेण लकारस्य च रेफेण य-व-वर्णयोश्च क्रमशः परस्परं विकासं प्रतिपादयन्ति। परन्तु केल्टिक-जर्मनेटली-ग्रीकसंस्कृतादिभाषाणां जननी प्रा० भा० यो० भाषा विद्यते, या च तस्या वर्णमाला परिकल्प्यते, तस्याः किं स्वरूपम्, कथञ्च उच्चारणमासीद्—इत्यस्मिन् विषये मौनमालम्बन्ते। यत्किमपि वदन्ति, तन्निश्चितं[1] न।

अत्र व्याकरणदिदर्शनदृशा विचारविमर्शः

एवं भाषावैज्ञानिका अर्धकादिदोषग्रस्तैर्ह्रस्वैकारादिवर्णेभ्यः संस्कृतेऽकारादिवर्णानां विकासं स्वीकुर्वन्ति। भारतीयदार्शनिकास्तु अकारादिवर्णान् आदिनिधनरहितान् मन्यन्ते। स्वयम्भूश्च तेषाम् आविर्भावकरूपेण स्मर्यते। तथा चोक्तम्—"अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा" (महाभा० शा० प० २३२।२४) इति। तथा च ब्रह्मबृहस्पतिप्रभृतयोऽकाराद्यक्षराणां प्रवक्तारः, न तु स्रष्टारः सन्ति।

"अक्षरसमाम्नायो वर्णमाला वा भूलोके मानवैः कथमुपलब्धा? अक्षरसमाम्नायस्य का परम्परा? कश्च सम्प्रदायः?" इत्येतत् सर्वमस्य ग्रन्थस्य

१. "उस काल के अक्षरों का उच्चारण सर्वथा निश्चित तो नहीं हो सकता, तो भी सामान्य व्यवहार के लिये निम्नलिखित संकेतों से प्रगट कर सकते हैं"—श्यामसुन्दरदासस्य भाषारहस्यम्, पृ० सं० २७२।

प्रथमे परिच्छेदे "लौकिकवैदिकसंस्कृतशब्दानां भूमावतरणम्" इत्यत्र प्रतिपादितम्। तद्यथा ऋक्तन्त्रे व्याकरणे शाकटायनो व्याचष्ट—

"इदमक्षरच्छन्दो वर्णशः समनुक्रान्तम्, यथाऽऽचार्या ऊचुर्ब्रह्मा बृहस्पतये, बृहस्पतिरिन्द्राय, इन्द्रो भरद्वाजाय, भरद्वाज ऋषिभ्यः, ऋषयो ब्राह्मणेभ्यस्तं खल्विममक्षरसमाम्नायमित्याचक्षते, न भुक्त्वा न नक्तं प्रब्रूयाद् ब्रह्मराशिः।" इति। ब्रह्मराशिरित्यस्य ब्रह्मप्रतिपादको वर्णराशिरित्यर्थः।

अक्षरसमाम्नायस्य द्वितीया शिवपरम्परा विद्यते। उक्तञ्च **काशिकायां** नन्दिकेश्वरेण—

नृत्यावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम्।
उद्धर्त्तुकामः सनकादिसिद्धानेतद् विमर्शे शिवसूत्रजालम्॥इति॥

पाणिनिसनकादिसिद्धानां तपसा प्रसन्नः शिवः, तेषां पुरः स्वतः प्रकटीभूय नृत्यं चकार, नृत्यावसाने च सनकादिसिद्धानां मनोरथपूर्त्यर्थं ढक्कां चतुर्दशवारं नादयामास। तेन नादेन सनकादीनां चतुर्णां कुमाराणां मनोरथसिद्धिर्जाता, भगवान् पाणिनिश्च तेनैव नादेन चतुर्दशसूत्रात्मकमक्षरसमाम्नायं लब्धवान्। "अ इ उ ण्" इत्यादिसूत्रेषु णकारादयोऽनुबन्धाः महेश्वरेण कृताः। अकाराद्यक्षराणि तु अनादिकालतः। इमानि सूत्राणि महेश्वरादागतानि, अभिव्यक्तानि वा। अत इमानि माहेश्वराणि सूत्राणीत्युच्यन्ते। एवं वर्णानां न वर्णान्तररूपेण विकृतिर्विकासो वा। अक्षराणां प्रचारप्रसारयोः अध्ययनाध्यापनयोश्च परम्पराऽस्माभिरित्थमेव स्वीक्रियते। आधुनिका नूतना भाषावैज्ञानिका एतत्तथ्यमविज्ञाय अन्यथा प्रतिपादयन्ति। केचित् संस्कृतज्ञा अपि भाषावैज्ञानिकाः जानन्तोऽपि वर्णसमाम्नायं सम्प्रदायसिद्धान्तविरुद्धं प्रतिपादयन्तीति मदीयं चित्तं चेखिद्यते।

यथा वेदान्तिनो ब्रह्मण आद्यन्तं न जग्मुः, तथा शाब्दिका अपि शब्दब्रह्मण आद्यन्तं न लेभिरे। यतो हि नूतनाः शब्दशास्त्रिणो जर्मन-रूस-ग्रीक-संस्कृतेत्यादिभाषास्थवर्णानां जनयित्रीं यां प्रा० भा० यो० वर्णमालामगवेषयन्, तद्घटकवर्णानां स्वरूपविषय एव सन्दिह्यन्ते। भारतीयदार्शनिकास्तु "अकारादिवर्णानामुच्चारणमनादिकालतोऽकाराद्येव क्रियते" इति वर्णानामुच्चारणीयस्वरूपविषये निश्चितचेतसा एकमतयः प्रतीयन्ते, किन्तु "तेषां कदाप्रभृति स्थितिर्जाता"—इत्यस्मिन् विषये सन्दिग्धा विद्यन्ते; यतो हि सर्वेषां वर्णानाम् प्रवक्ता ब्रह्मा विद्यते, किन्तु ब्रह्मणोऽपि पूर्वं सर्वेवर्णा निःश्वासभूता ब्रह्मजनयितृपद्मनाभेऽतिष्ठन्। स एव पद्मनाभो ब्रह्माणं शब्दब्रह्म अध्यापयामास। पद्मनाभस्य च आद्यन्ताभावाद् वर्णानाम् अस्तित्वकालो निश्चेतुं न पार्यते।

द्वितीयं वक्तव्यमत्रेदमवशिष्यते यत् ककारादिवर्णानां चकाराद्यात्मकमुच्चारणं यद्वा चकारादिवर्णरूपेण परिवर्तनं कदापि घटितुं न सम्भवति। अत एव भगवान् भाष्यकारः पतञ्जलिर्महाभाष्ये प्रत्याहाराह्निके "ऋ ऌ क्" इति सूत्रे

लृकारस्य प्रयोजनव्याख्यावसरे "अशक्तया कयाचिद् ब्राह्मण्या ऋतक इति
प्रयोक्तव्ये लृतक इत्याह" इति वाक्ये "ऋतक" इति प्रयोक्तव्ये लृतक इत्याह"
इत्युक्तम्, तथा च "ऋतक इत्युच्चारणे कर्तव्ये लृतक इत्युच्चारणं कृतम्" इति
तदर्थो बोद्धव्यः। यदि च ककारादिवर्णानां ककारादिभिन्नचकाराद्युच्चारणं स्यात्,
तर्हि भाष्यकृता - "ऋतकशब्दस्य लृतकोच्चारणं कृतम्" इत्येवं वक्तव्यम्, किन्तु
नोक्तम्। उक्तञ्च "ऋतक इति प्रयोक्तव्ये लृतक इत्याह" इति। ऋतकलृतकशब्दौ
परस्परं भिन्नौ विद्येते, न तु 'ऋतक' शब्द एव 'लृतक'रूपेण परिवर्तितः। ब्राह्मण्या
यत्र ऋतकशब्द उच्चारयितव्यस्तत्र असामर्थ्यात् 'ऋतक'-शब्दमनुच्चार्य 'लृतक'
शब्द उच्चारितः' इति भाष्याशयः। ककारादिवर्णानां स्वभिन्नतकाराद्युच्चारणा-
सम्भवादेव आचार्यो भर्तृहरिरपि **वाक्यपदीयस्य** ब्रह्मकाण्डे "एवं साधौ प्रयोक्तव्ये
योऽपभ्रंशः प्रयुज्यते" इति कारिकायां "साधौ प्रयोक्तव्ये" इत्युक्तवान्। तथा च
'गौरित्यादिसाधुशब्दे प्रयोक्तव्ये प्रयोक्तुमिष्टे योऽशक्त्या गावीत्यादिवर्णः प्रयुज्यते'
इति कारिकायाः पूर्वार्धस्य तात्पर्यं वेदितव्यम्। अत्र 'प्रयोक्तव्ये' इत्युक्त्या
साधुशब्दघटकगकारादिवर्णानामपरिवर्तनीयत्वम्, असाधुशब्दघटकवर्णानाञ्च तेभ्यो
भिन्नत्वं स्पष्टतया प्रतीयते। एवं भारतीयव्याकरणशास्त्रनिरुक्तकारयोश्च
मते शब्दनित्यत्वपक्षे विकासवादिनामयं विकासवादो न विश्वासपदमारोहति,
वर्णानां नित्यत्वात्। क्षणिकवादिन्यायशास्त्रभाषाविज्ञानयोश्च मते वर्णानामा-
शुविनाशित्वाद् अत्र विषये तयोर्मतैक्यं बोद्धव्यम्। तच्च मतैक्यं वर्णानित्य-
त्वमात्रे ज्ञेयम्। न तु "एकाराद्य एव अकारादिरूपेण परिवर्तिताः" इत्यस्मिन्नंशे।

नैयायिकाः—"सुध्युपास्यः इत्यादिषु सुधीघटक इकारो नष्टः, तत्स्थाने
च यकारः समुत्पन्नः" इत्येवं मन्यन्ते। परन्तु विकासवादिनां मतानुसारेण तु सुधी-
घटक ईकार एव "सुध्युपास्यः" इत्यादिषु यकाररूपेण परिवर्तितः सन् व्यकासत्—
इत्येवं मन्यते। एवं विचार्यमाणे सति न्यायशास्त्र-भाषाविज्ञानयोश्च मतभेदः
प्रतिभाति। वस्तुतस्तु तात्पर्यमुभयोरेकत्र एव अवसीयते। परन्तु प्राचीन-
भारतयोरोपीयवर्णेभ्यो भारतीयवर्णानां विकासः समजनीति तु न कोऽपि
नैयायिकः स्वीकर्तुं कटिबद्धः। अत एव अत्र पूर्वं 'तच्च मतैक्यं वर्णानामनित्यत्व-
मात्रे ज्ञेयम्' इत्युक्तम्।

एवं विकासशब्दस्य विकृत्यर्थमङ्गीकृत्य अकाराद्यक्षराणां यत् प्रतिपादनं
क्रियते, तत्तु शब्दनित्यत्वानित्यत्वयोरुभयोः पक्षयोः सर्वथा असंगतम्; नित्यस्य
शब्दस्याविक्रियमाणत्वात्। अनित्यत्वपक्षे च आशुविनाशित्वात् कादिवर्णानां
वर्णान्तररूपेण परिणामाभावात्।

विकासशब्दस्य स्फुटनार्थे अभिव्यक्त्यर्थे[1] वा शक्तिः स्वीक्रियते चेत्तर्हि

1. "विकासः स्फुटने व्यक्तौ" (इति दन्त्यान्ते धरणिः) इत्येवं विकासशब्दस्य व्याख्यानं

तन्त्रान्तरीयमतानुसारेण कादिवर्णानां विकासः, स्फुटनं वा अभिव्यक्तिर्वा सङ्घटते। तद्यथा—

"अकारः सर्ववर्णाग्र्यः प्रकाशः परमः शिवः।"

ॐकार एव सर्वा वाग्। सैषा स्पर्शोष्मभिर्व्यज्यमाना बह्वी नानारूपा भवति।"

अकाराद् यद्वा प्रणवात् सर्वेषां वर्णानां विकासोऽभिव्यक्तिर्वा जाता। सर्वे स्वरव्यञ्जनात्मका वर्णाः स्वाभिव्यक्तेः पूर्वमेव सूक्ष्मरूपेण अकारे यद्वा प्रणवे विराजन्ते। कण्ठताल्वादिव्यापारेण च स्वरूपात् प्रणवादभिव्यज्यन्ते। अभिव्यक्त्य-नन्तरञ्च पुनस्तत्रैव सूक्ष्मरूपेण लीनाः सन्तो विराजन्ते। उक्तञ्च **वाक्यपदीयस्य** ब्रह्मकाण्डे—

अजस्रवृत्तिर्यः शब्दः सूक्ष्मत्वान्नोपलभ्यते।
व्यजनाद् वायुरिव स स्वनिमित्तात् प्रतीयते॥ ११६॥

अजस्रं त्रिकालं स्वमूलस्वरूपे वृत्तिः उपस्थितिर्यस्य स शब्दः सूक्ष्मत्वाद् श्रोत्रेन्द्रियेण नोपलभ्यते। स एव शब्दः व्यजनाद् वायोरिव स्वनिमित्तात् वक्तुः प्रयत्नवशाद् अभिव्यक्तः सन् प्रतीयते। एवं तन्त्रान्तरीयरीत्या प्रणवाद् अकाराद्वा सर्वेषां वर्णानां विकासोऽभिव्यक्तिर्वा जाता। यथा संग्रामे शुम्भवधावसरे एकस्या एव भगवत्या विन्ध्यवासिन्याः चिन्मयशरीरात् समस्ता देव्यः प्रादुर्बभूवुः। पुनश्च तस्याः शरीरे सूक्ष्मरूपेण लयं जग्मुः, यद्वा लीना बभूवुः। तदा सा अम्बिका एकैवासीत्। उक्तञ्चैतद् दुर्गासप्तशत्या दशमाध्याये—

एकैवाहं जगत्यत्र द्वितीया का ममापरा।
पश्यैता दुष्ट मय्येव विशन्त्यो मद्विभूतयः॥ ५॥
ततः समस्तास्ता देव्यो ब्रह्माणीप्रमुखा लयम्।
तस्या देव्यास्तनौ जग्मुरेकैवासीत्तदाम्बिका॥ ६॥

एवमेव एकस्मादेव प्रणवात् सर्वे वर्णा अभिव्यज्यन्ते, तत्रैव च अभिव्यक्त्य-नन्तरं सूक्ष्मरूपेण तिष्ठन्ति।

एवं तन्त्रान्तरीयरीत्या प्रणवात् (अकारोकारमकारात्) यद्वा अकारात् सर्वे वर्णा व्यक्त सन्, पुनश्च तत्रैव लीना भवन्ति। लीनत्वं नाम सूक्ष्मरूपेणावस्थानम्। किन्त्वियं विकासप्रक्रिया आधुनिकशास्त्रप्रक्रियातो विलक्षणा भिन्ना च वर्तते।

कृतम्। अत्र विषये "निराकरिष्णुः—ज्ञाता (तु) विन्दुरो विन्दुर्विकासी (तु) विकस्वरः॥ ३०॥" इत्यस्मिञ्श्लोके विशेष्यनिघ्नवर्गे **अमरकोषस्य रामाश्रमी**-टीकायां द्रष्टव्यम्।

स्वरव्यजनात्मकानां वर्णानामन्या अपि काचिदभिव्यक्तिप्रक्रिया वर्तते, सा चास्माभिः वाचस्पति(डी० लिट०)इत्युपाधिप्राप्त्यर्थं प्रस्तुते ध्वनितत्त्वाख्ये शोधनिवन्धे प्रथमपरिच्छेदस्य तृतीयप्रकरणे निरूपयिष्यते ।

एवमयं 'वर्णविज्ञान'–नामा परिच्छेदो समाप्ति गतः । अग्रे वाक्य- पदयोस्तुलनात्मकं समीक्षणं प्रस्तोष्यते ।

वाक्यपदविज्ञानम्

१. वाक्यव्याख्याभिधं प्रथमं प्रकरणम्
२. पदव्याख्याभिधं द्वितीयं प्रकरणम्

३

वाक्यपदविज्ञानपरिच्छेदे

वाक्यव्याख्याभिधं प्रथमं प्रकरणम्

भारतीयाः विद्वांसः कौण्डभट्टप्रभृतयो वैयाकरणा अखण्डवाक्यस्फोटमेव शब्दतत्त्वस्य निष्कृष्टतमं स्वरूपं मन्यन्ते। उक्तमपि कौण्डभट्टविरचितवैयाकरणभूषणसारे—

> वाक्यस्फोटोऽतिनिष्कर्षे तिष्ठतीति मतस्थितिः।
> साधुशब्देऽन्तर्गता हि बोधका न तु तत्स्मृताः॥ ६१॥

यद्यपि स्फोटविषये वर्ण-पद-वाक्यभेदेन त्रयो व्यक्तिस्फोटाः, त्रयश्च जातिस्फोटाः, अखण्डपदवाक्यस्फोटौ च—इत्यष्टौ पक्षाः सिद्धान्तसिद्धाः। वाक्यग्रहणमनर्थकम्, दुरर्थकञ्च प्रतिभाति। तथापि वाक्यस्फोटातिरिक्तानामन्येषामप्यवास्तवत्वबोधनाय तदुपादानम्। एतदेव ध्वनयन्नाह—अतिनिष्कर्ष इति मतिस्थितिर्वैयाकरणानां महाभाष्यकारादीनाम्।

वर्णस्फोटादीनामाकांक्षानिवर्तकत्वाभावाद् अवास्तवत्वम्, शास्त्रीयप्रक्रियायानिर्वाहाय परं सिद्धान्ते तत्स्वीकारः। पारमार्थिकत्वं तु वाक्यस्फोटस्यैवेति तत्तात्पर्यमवसीयते। अयं विषयः शब्दस्वरूपमुपसंहरन् "वर्णशब्दयोः सम्बन्धः" इत्यत्र पूर्वमेव समासतो व्याख्यातः। आधुनिका अपि भाषाविज्ञानविद्याचणाः अखण्डवाक्यस्फोटादेव भाषायाः प्रारम्भं स्वीकुर्वाणाः कौण्डभट्टप्रभृतिभिर्व्यावृत्तं तत्सिद्धान्तमुररीकुर्वाणाः प्रतीयन्ते[1]। एवं वाक्यस्य सत्यत्वात् पदव्याख्यानमसङ्गतम्। तथापि प्रक्रियावादं समाश्रित्य वर्णव्याख्यानवत् पदवाक्यव्याख्यानं प्रारब्धुमिष्टम्। प्राचीना भाषाशास्त्रज्ञानचुञ्चवो ह्विटप्रभृतयस्तु "भाषणं वर्णात्, पदाद्वा प्रारब्धम्, वर्णपदाभ्यां वाक्यं प्रारब्धम्" इत्येवं मीमांसकादिवन्मन्यन्ते[2]। एतेषां मतमनुरुध्य दैव्या गिरः पूर्ववर्ती परवर्ती च विकासौ

---

१. शब्दस्वरूपमित्यस्मिन् परिच्छेदे "वर्णशब्दयोः" सम्बन्धः इत्यत्रत्यं "संहित से व्यवहित" इत्युद्धरणं द्रष्टव्यम्।

२. कुछ दिन पहले जो कल्पना असङ्गत प्रतीत होती थी वही आज सर्वथा सत्य और सङ्गत मानी जाती है। ह्विट ने एक दिन कहा था कि (C. F. American Journal of philology P. 338) "वाक्य से भाषा का प्रारम्भ मानना अनर्गल और निराधार है। शब्दों के बिना वाक्य की स्थिति ही कैसी"—श्यामसुन्दरदासएय: "भाषा रहस्य", पृ० सं० ७८।

अनेन ज्ञायते यदेते ह्विटप्रभृतयो विद्वांसो वाक्यस्फोटस्यैव वर्णपदस्फोटयोः सत्यत्वं विश्वसन्ति स्म।

व्याख्यातौ। स्वरव्यञ्जनयोः पूर्ववर्तिनं विकासम् "अकारादिवर्णानां विषये विकासवादः" इत्यत्र व्यासतो व्यावृत्तवान्। वर्णमालानिरूपणावसरे या प्राकृतादिभाषाणां वर्णमाला प्रदर्शिता, तत्र प्राकृतादिवर्णमालासु संस्कृतलोकप्रसिद्धवर्णमालाया अपेक्षया वर्णानां न्यूनत्वञ्च प्रदर्शितम्, तत्सर्वं दैव्या गिरो वर्णानां परिवर्तिविकासं विकासवादिमतानुसारेण जानीयात्। यतो हि कस्याश्चिद् भाषायाः वर्णमालायां वर्णानां ह्रासो वृद्धिर्वा तन्मूलभूतभाषाया विकासे (विकृतरूपेण विस्तरतां याते सति) सत्येव सम्भवति।

इत्थमेते प्राचीना भाषाशास्त्रिणो भाषाया विकासमङ्गीकृत्य अस्माकं वाक्यस्फोटवद् वर्णपदयोरपि सत्यत्वं विश्वसन्ति। अकारादिवर्णेभ्यः पदानाम्, पदेभ्यश्च वाक्यानां विकासः, सम्भवतीति तेषां राद्धान्तः।

भाषाशास्त्रिणां मतानुसारेण दैवी वागेव पालि-प्राकृतेत्यादिवाग्रूपेण व्यावृत्ता[1]। केषाञ्चिच्च मतानुसारेण प्राकृतभाषामेव व्याकरणनियमबद्धां विधाय दैव्या गिरः सृष्टिर्बभूवेति श्रुतिर्जायते[2]। अत्र विषये यन्मया वक्तव्यम्, तत् "शब्दस्वरूपम्" इति प्रथमे परिच्छेदे भाषाया दिव्योत्पत्तिवादनिरूपणावसरे, न काऽपि भाषा कस्या अपि भाषाया जनयित्रीत्याशयं प्रकटीकुर्वता विशदरूपेण चर्चा कृता। तत्र दैव्या गिरः कथं भूमावतरणमिति निरूपणेनेदं सुस्पष्टं जातम्, यन्मानवी-देवगिरोर्न जन्यजनकरूपसम्बन्धः। उभे पृथक्तया प्रादुर्बभूवतुरिति। केचिद् भाषाशास्त्रिणस्तु अनुकरणेऽशक्तिदोषवशात् पदवाक्ययोर्विकासं मन्यन्ते। तद् यथा वृद्धजनोच्चरितं गौरिति शब्दं श्रुत्वा तदुच्चारयितुं चेष्टां कृतवान् कश्चित्। किन्त्वनुकरणासामर्थ्यात् तेन "गावी यद्वा गऊ" इत्युच्चरितम्। एवं गोशब्दाद् "गावी" यद्वा "गऊ" शब्दस्य विकासः समजनि।

वस्तुतस्तु वर्णमालानिरूपणावसरे "अर्धकादिदोषग्रस्तानां ह्रस्वानामेकारादिवर्णानामैतिहासिकं विवरणम्" इत्यत्र यदुक्तम्, तेन ज्ञायते यद् एतेषां

१. भोलाशङ्करव्यासकृते "संस्कृत का भाषाशास्त्रीय अध्ययन" इत्याख्ये गन्थे "संस्कृत का परवर्ती विकास" इति स्थलं द्रष्टव्यम्। तत्र प्रकृतिः संस्कृतम् तत्र भवम्, तत आगतं वा प्राकृतम् (है० व्या० १।१) इत्यादिकं २८२तमे पृष्ठे समुद्धृतम्।

२. "वैदेशिक विद्वानों ने प्राकृत भाषाओं के कुछ थोड़े से शब्दों की केवल बाह्य बनावट को देखकर यह सिद्ध करने की चेष्टा की है कि प्राकृत का विशिष्ट सम्बन्ध वैदिक भाषा से है, न कि संस्कृत भाषा से। और इस प्रकार उन्होंने संस्कृत का या वैदिक भाषा का उद्गम जनसाधारण में प्रचलित प्राकृत भाषाओं से ही सिद्ध करने का प्रयास किया है"—आचार्य नरेन्द्रनाथ एम० ए० कृतम् "प्राकृत भाषाओं का रूप दर्शन" पृ० १९४।

"गावी" इत्यादिशब्दानामस्तित्वं पुराकालत एव आसीत्। किञ्च, वैयाकरणानां शब्दनित्यत्ववादः स्पष्टतया सर्वभाषीयपदवाक्ययोः पृथक् सत्तामुद्घोषयति। एवं भाषाया भाषान्तरेण विकासोऽसम्भवः। वर्णपदवाक्यानि सर्वाणि नित्यानि।

किन्तु वर्णपदवाक्यानां नित्यत्वेऽपि अर्थविबोधः आकांक्षाशान्तिश्च वाक्यादेव जायते। अखण्डवाक्यस्फोटादेव च भाषणस्य प्रारम्भोऽभूद् इति प्राचीनभाषाशास्त्रविरुद्धं मतं स्वीकर्तव्यम्। यतो हि शिशुः प्रथमं वाक्यमेव वक्तुमभ्यस्यति। वाक्येष्वेव कमप्यर्थं चिन्तयति। किञ्च, यदा शिशुः "जलम् दुग्धम्" इत्येवं शब्दमात्रं प्रयुंक्ते, न तु वाक्यम्, तदा तस्यापि तात्पर्यं वाक्येष्वेव अवसीयते। बालेन "जलम्" इत्युच्चारिते सति प्रकरणवशात्तस्य "पिपासुरस्मि, जलमानय", दुग्धमित्युक्ते च "बुभुक्षुरस्मि, दुग्धं पास्यामि" इत्येवं जलमित्यादि पदानां "पास्यामि" इत्यादिवाक्येषु तात्पर्यमवसीयते। इदमेव तथ्यं नागेशकृतायां **वैयाकरणलघुसिद्धान्तमञ्जूषायां** स्फुटरूपेण प्रकाशितम्, "पिण्डीम्" इत्युक्ते पिण्डीं भुङ्क्ष्व, "प्रविश" इत्युक्ते च "गृहं प्रविश" इत्येवं तात्पर्यमवगम्यते। केचित्तु "प्रविश, पिण्डीम् इत्यादौ कारकक्रियाशब्दमनुमाय ततो बोधः" इति मन्यन्ते, तत्तु न समीचीनम्; उच्चरितेनैव शब्देन अर्थस्य प्रत्यायनात्। पिण्डीमित्यादिपदवाच्यार्थेन भुंक्ष्वेत्याद्यर्थान्तरस्यानुमानम् उचितम्। एवं वाक्यादेव भाषारम्भणमिति तथ्यं दृढीभवति। निरुक्तकारेण यास्केन "सर्वं वै धातुजं नाम" इति यदुक्तम्, तत्तु प्रक्रियापक्षमादाय तन्निर्वाहाय, न तु यथार्थरूपेण प्रोक्तम्। एतेन ये भाषाशास्त्रिणः "भाषाया विकासं यास्कोऽपि स्वीकृतवान्" इति मत्वा "सर्वं वै धातुजं नाम" इति वाक्यं प्रमाणतया समुद्धरन्ति, तत्सर्वमपास्तम्।

एवं वर्णपदस्फोटौ निरर्थकतां गतौ। वाक्यस्फोटस्यैव सत्यत्वम्। तथापि प्रक्रियावादं समाश्रित्य यथा वर्णशब्दस्यावयवमङ्गीकृत्य स व्याख्यातः, एवमत्रापि प्रक्रियापक्षमाश्रित्य वाक्यं व्यावृण्वन्, तदङ्गीभूतपदस्यापि व्याख्यानं प्रारब्धुमिष्टम्।

प्रत्येकं वाक्यस्य कोटिद्वयम्—१. उद्देश्यम्, २. विधेयञ्च। रामो गृहं गच्छति; स हरिं भजति, हरिर्भक्तान् पालयतीत्यादिवाक्येषु रामादिशब्दा उद्देश्यभूताः, गृहं गच्छतीत्यादयस्तु विधेयभूताः।

वाक्यभेदाः

पाणिनिमतानुसारेण लकाराणामर्थानुसारेण वाक्यभेदा निश्चेतुं शक्यन्ते। तद्यथा—"विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ्"(३।३।१६१)"आशिषि लिङ्लोटौ" (३.३.१७३)। विधिः=प्रेरणं भृत्यादेर्निकृष्टस्य प्रवर्तनम्। निमन्त्रणम् =नियोगकरणम्, आवश्यके श्राद्धभोजनादौ दौहित्रादेः प्रवर्तनम्। आमन्त्रणम् = कामचारानुज्ञा। अधीष्टम् = सत्कारपूर्वको व्यापारः। एवम् अस्मिन् सूत्रे षड्विधवाक्यानां निर्देशः समुपलभ्यते। **वैयाकरणसिद्धान्तकौमुद्यां** या लकारार्थ-

प्रक्रिया व्याख्याता तयाऽपि वाक्यभेदः प्रमातुं शक्यते । तदयथा "अभिज्ञावचने लृट्" (३।२।११२) "स्मृतिबोधिन्युपपदे भूतानद्यतने धातोर्लृट् स्यात्" इति लङोऽपवादः, "स्मरसि कृष्ण गोकुले वत्स्यामः" इति तद्व्याख्यानम् । इदं वाक्यम् अभिज्ञावचनात्मकनाम्ना व्यपदेष्टुं शक्यते । किञ्च "तत्प्रयोजको हेतुश्च" (१।४।५५), "हेतुमति च" (३।१।२६) इति पाणिनीयसूत्राभ्यां प्रयोजकात्मकमपि वाक्यं भवतीति ज्ञायते । तदयथा—देवदत्तो यज्ञदत्तं ग्रामं गमयति । देवदत्तो यज्ञदत्तं ग्रामं गन्तुं प्रेरयतीत्यर्थः ।

क्वचित् प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद् विभाषा क्वचिदन्यदेव ।
विधेर्विधानं बहुधा समीक्ष्य चतुर्विधं बाहुलकं वदन्ति ॥

अत्र चतुर्विधवाक्यानां प्रतीतिर्जायते । तदयथा—

१—प्रवृत्त्यात्मकं यथा—इकः स्थाने यण् भवति, रामो गृहं गच्छति ।
२—अप्रवृत्त्यात्मकम्—देवदत्तो न भुंक्ते ।
३—विभाषात्मकम्—पठितव्यम्, अथवा किञ्चित् कार्यं कर्तव्यम् ।
४—अन्यदात्मकम्—गणेशं कुर्वाणोऽपि रचयामास वानरम् ।

एवं पाणिनीयव्याकरणशास्त्रतो वाक्यस्य बहवो भेदा दृष्टिपथं समवतरन्ति । आंग्लभाषावैयाकरणास्तु चतुर्विधमेव[1] वाक्यं प्रवदन्ति । तदयथा—

(१) विधिसूचकं वाक्यम्[2]—अनेन वाक्येन वक्तुः सामान्यम् तात्पर्यं प्रकटीक्रियते । अस्य भेदद्वयम्— १ निषेधात्मकम्, २. स्वीकारात्मकञ्च ।

(२) प्रश्नवाचकं वाक्यम्[3]—अनेन वाक्येन वक्तुर्जिज्ञासा प्रकटीक्रियते । यथा—"त्वया किं क्रियते ?" इत्यादि ।

(३) आदेशात्मकं वाक्यम्[4]—येन वाक्येन भृत्यादय आज्ञाप्यन्ते तद् आदेशात्मकं वाक्यमुच्यते । तदयथा—"कार्यं कुरु" ।

(४) विस्मयादिबोधकं वाक्यम्[5]—येन वाक्येन हृद्गता विस्मयादिभावाः प्रकटीक्रियन्ते, तद् विस्मयादिबोधकं वाक्यं व्यवह्रियते । तदयथा—"आश्चर्यं गवां दोहोऽगोपेन" ।

१. वाक्यानामिदं विभाजनम् "न्यू लाइट इन जनरल इंगलिश फार हाईस्कूल" इत्यादि ग्रन्थं समाश्रित्य कृतम् ।
2. Assertive Sentenses.
3. Interrogative Sentenses.
4. Imperative Sentenses.
5. Exlamatory Sentence.

व्याकरणदृष्ट्या वाक्यानामिदं चतुर्षु भागेषु विभाजनं भारतयोरोपीयपरिजनकोटौ भाषा समागतासु समासु भाषासु कर्तुं शक्यते । यतो हि कामपि भाषां कस्मिंश्चित् भाषापरिजने परिगणयितुं ये नियमाः[1] समपेक्ष्यन्ते तेषां मध्ये व्याकरणसाम्यरूपोऽपि नियमः परिगण्यते ।

वाक्यपदीयकारेण श्रीभर्तृहरिणा तु वाक्यमष्टविधं यद्वा वाक्यस्य अष्टौ लक्षणानि समुपदिष्टानि । उक्तञ्च वाक्यपदीयस्य द्वितीयकाण्डे—

आख्यातशब्दः सङ्घातो जातिः सङ्घातवर्तिनी ।
एकोऽनवयवः शब्दः क्रमो बुद्ध्यनुसंहृतिः ॥ १ ॥
पदमाद्यं पृथक् सर्वं पदं साकांक्षमित्यपि ।
वाक्यं प्रति मतिर्भिन्ना बहुधा न्यायवादिनाम् ॥ २ ॥

आचार्याणां मतभेदसमाश्रयेण तावद् अष्टधा वाक्यस्वरूपमुद्दिशति । न्यायदर्शिनां विदुषां वाक्यं प्रति=वाक्यविषये बहुधा अष्टधा मतिर्भिन्ना । अत्र न्यायो वाक्यविषयकस्तर्कः । ते चाष्टौ पक्षभेदा निम्नाङ्किताः ।

१—आख्यातशब्दो वाक्यम्, २—संघातः, पदसङ्घातः । ३—सङ्घातवर्तिनी जातिः । ४—एकोऽनवयवः शब्दः । ५—क्रमः । ६—बुद्ध्यनुसंहृतिः । ७—आद्यं पदम् । ८—पृथक् सर्वपदं साकांक्षम् ।

१—तत्र "आख्यातशब्दो वाक्यम्" इति पक्षाश्रयिणाम् आख्यातशब्द एव वाक्यमिति न तात्पर्यम्, "देवदत्त गामभ्याज दण्डेन" इत्यादौ सुप्तिङन्तचये वाक्यव्यवहारानापत्तेः । किन्तु क्वचिद् केवलमाख्यातशब्दोऽपि वाक्यम् । आख्यातशब्दात्मके वाक्ये कर्तृकर्मादिवाचकशब्दप्रयोगं विनाऽपि केवलमाख्यातशब्देनैव (क्रिययैव) वाक्यार्थावगतिः । यथा–पिधेहि इत्यादि । पिधेहीति क्रियया द्वारं पिधेहीत्यर्थस्यावगतिः द्वारमिति कारकशब्दप्रयोगं विनैव जायते ।

२—"संघातो वाक्यम्" इति वादिनस्तु 'पिधेहि' इत्यादौ न केवलमाख्यातस्य वाक्यत्वम्, किन्तु द्वारमिति कर्माध्याहृत्य तत्संघातस्यैवेति ।

३—संघातवर्तिनी जातिः—"सुप्तिङन्तपदसंघातवर्तिनी जातिर्वाक्यम्" इति वादिनां मते तु "देवदत्त गामभ्याज दण्डेन" इत्यादिसमूहात्मकेषु वाक्येषु

१. "वंशानुक्रमिक (पारिवारिक वर्गीकरण) भाषाओं के वंशानुक्रमिक या ऐतिहासिक वर्गीकरण के लिये चार बातों की समता आवश्यक है, १—स्थानीय समीपता, २—व्याकरण की समता, ३—शब्दसाम्य, ४—ध्वनिसाम्य । इन चारों बातों की समता होने पर ही कहा जा सकता है कि अमुक भाषा अमुक परिवार की है । इन चारों बातों में से केवल एक बात के आधार पर निर्णय नहीं हो सकता ।"
—प्रभुनारायणशर्मा, "भाषाविज्ञानतत्त्व", पृ०सं०४६ ।

अस्ति कश्चन प्रतिवाक्यं भेदं प्राप्तो जातिविशेषः । अत एव प्रतिपुरुषं प्रत्युच्चारणं प्रतिक्षणञ्च "देवदत्त गामभ्याज दण्डेन" इत्यादिवाक्ये एकत्वप्रत्यभिज्ञा जायते । एकत्वप्रत्यभिज्ञाया अभावे प्रतिपुरुषं प्रत्युच्चारणं प्रतिक्षणञ्च भिद्यमाने पदसमूहात्मके वाक्ये वाचकत्वं न सम्भवति, शक्तेरानन्त्यव्यभिचारप्रसङ्गात् । अतः पदसङ्घातगताया जातेरेकस्या एव वाचकत्वमिति तस्या एव वाक्यत्वमिति ।

४—एकोऽनवयवः शब्दो वाक्यम्—एतन्मते वाक्यस्फोटोऽखण्डः, तत्र वर्णपदापोद्धारकल्पनायामपि वस्तुतो वर्णाः पदानि वा तत्र न सन्ति ।

५—क्रमः—पदानां क्रमः, पौर्वापर्यम्, पूर्वापरीभूतानि पदान्येव वाक्यम् । एतन्मते वाक्यस्फोटस्य सखण्डत्वं पदसमुदायारब्धत्वञ्च ।

६—बुद्ध्यनुसंहृतिवाक्यम्—एतस्मिन् कल्पे वाक्यमखण्डम्, तत्र पदानि न सन्ति, किन्तु पदानि पदबुद्धयश्च कल्पितानि । तत्र पदबुद्धीनां कल्पितानामनुक्रमेण संहार-उपसंहार इति पदसमुदायरूपत्वं बुद्ध्या प्रकल्प्य वाक्यत्वव्यवहारः ।

७—आद्यं पदम्—अस्मिन् पक्षेऽनेकपदारब्धं सखण्डं वाक्यम् । अस्मिन् मते आद्यं पदमेव वाक्यम् । इतरपदानि तु तत्सहकारीणि तच्छक्तिद्योतकानि । यथा "साक्षात् क्रियते" इत्यत्र साक्षात्-पदमेव साक्षात्कारवाचकम्, क्रियते-इति तु पूर्वपदस्य तदर्थे शक्तिद्योतकमित्याद्यपदस्यैव वाक्यत्वमिति ।

८—पृथक् सर्वं पदं साकांक्षम्—पृथग् = वाक्यात् पृथक्कारे, साकांक्षं पदान्तरसाकांक्षम्, सर्वम् आद्यं मध्यमन्त्यञ्च पदं समुदितं वाक्यमिति ।

अत्रेदं बोद्धव्यम्—वाक्यविषये आचार्याणामष्टौ विकल्पाः सन्ति । ते च अष्टौ विकल्पाः अखण्ड-सखण्डवाक्यस्फोटभेदेन द्विधा विभक्तुं शक्यन्ते । तत्र वाक्यस्फोटोऽखण्ड इति पक्षे-जातिः संघातवर्तिनी, एकोऽनवयवः शब्दः, बुद्ध्यनुसंहृतिरिति त्रीणि वाक्यलक्षणानि । वाक्यस्फोटः सखण्डः—इति पक्षे तु आख्यातः, क्रमः, सङ्घातः, पदमाद्यम्, पृथक् सर्वं पदं साकांक्षम् इति पञ्च लक्षणानि सन्निविष्टानि भवन्ति ।

वस्तुतस्तु यथालक्षणम् अखण्डवाक्यस्फोटं कौण्डभट्टप्रभृतयः स्वीकुर्वन्ति, तस्योदाहरणं नूतनभाषाशास्त्रिभिर्व्याख्यायमानं चतुर्विधेषु समासादिप्रधानवाक्येषु यत् समासप्रधानं वाक्यम्, तदेव भवितुमर्हति ।

यथा अमेरिकादेशे 'मह्यं नावमानय' इत्यर्थे 'नाघोलिनिन' इति वाक्यं प्रयुज्यते । 'नाघोलिनिन' इति समासप्रधाने वाक्ये पदविभागकल्पना दुष्करा । मह्यं नावमानयेत्यादिसंस्कृतभाषीयवाक्येषु बुद्ध्या पदविभागकल्पना सुकरा । आख्यातशब्दो वाक्यमिति वादिनां मते 'पिधेहि, गच्छामि' इत्यादिकं यदुदाहरणं प्रदीयते, तदपि समासप्रधानं वाक्यं मन्यन्ते भाषावैज्ञानिकाः । एतत्सर्वमग्रेऽत्रैव प्रतिपादयिष्यते ।

भाषाविज्ञानदृष्ट्या[1] तु वाक्यं निम्नोक्तेषु चतुर्षु भागेषु विभक्तुं शक्यते—

(१) समासप्रधानम्[2], (२) व्यासप्रधानम्[3], (३) प्रत्ययप्रधानम्[4], (४) विभक्तिप्रधानं[5] च ।

समासप्रधानं वाक्यम्—अस्य वाक्यस्य भेदद्वयं विद्यते—(क) पूर्णरूपेण समासप्रधानम् । (ख) आंशिकरूपेण च समासप्रधानम् ।

१. (क) पूर्णरूपेण समासप्रधानं वाक्यम्—यस्मिन् वाक्ये उद्देश्यविधेयादिकं सर्वं समस्यते, तत्समासप्रधानं वाक्यमुच्यते । अस्मिन् वाक्ये प्रत्येकं शब्दा अतिशयेन संश्लिष्टा भवन्ति । अतस्तेषां विश्लेषणमतिदुष्करम् । व्यासप्रधानेषु वाक्येषु योऽर्थोऽनेकपदवाच्यः, सोऽर्थः समासप्रधानवाक्येषु एकेनैव शब्देन व्यवह्रियते । कर्तृकर्मक्रियाविशेषणानि सर्वाणि एकस्मिन्नेव शब्दे समाह्रियन्ते । भाषाविज्ञानमतानुसारेण एतादृशवाक्यानां संस्कृतभाषायां नितरामभावो दृश्यते । मैक्सिकोभाषायाम् यद्वा उत्तरदक्षिणभेदेन अमेरिकाद्वयदेशस्य भाषायामेतादृशवाक्यानि व्यवह्रियन्ते । तद् यथा—मैक्सिकोभाषायां "नेवल, नकल, क" इति शब्दत्रयं क्रियते । एतेषां शब्दानां क्रमशः 'अहं मांसं भक्षयामि" इत्यर्थः । अस्य शब्दत्रयस्य समासे कृते सति "नीनकक" इत्येवं वाक्यं निष्पद्यते । तस्य च "अहं मांसं भक्षयामि" इति पूर्वोक्त एवार्थः, न तु तद्विपरीतः । अत्र एकस्मिन्नेव शब्दे सर्वं कर्त्रादिकं समाविष्टम् । एवं "नातन, अमोखल, निन" एषां त्रयाणां क्रमशः "आनय नावं मह्यम्" इत्यर्थः सञ्जायते । समासे कृते सति "नाधोलिनिन" इत्येकं शब्दात्मकं वाक्यं निष्पद्यते । अनेन वाक्येन च पूर्वोक्त एवार्थोऽवगम्यते । अस्मिन्नेवार्थे "मघोलिनिन" इत्यप्येकशब्दात्मकं वाक्यं समुपलभ्यते । उभयोरमेरिकादेशयोर्भाषासु इत्थं वाक्यानि प्रयुज्यन्ते ।

(ख) अंशतः समासप्रधानं वाक्यम्—अस्मिन् वाक्ये बहवः शब्दाः प्रयुज्यन्ते । किन्तु कर्तृकर्मादिवाचकपदानां क्रियायामेव समाहारो दृश्यते । अत इमानि वाक्यानि समासप्रधानानि विद्वद्भिः स्वीक्रियन्ते । यूरोपीयवाष्कभाषायामेवमेव वाक्यं समुपलभ्यते । अस्योदाहरणं यथा—दर्कि आत्=अहं तं तस्य पार्श्वे नयामि । "दर्कि आत्" इति शब्दद्वयात्मिका क्रिया । अस्यां क्रियायां कर्तृकर्मादीनि सर्वाणि समासतः समाहृतानि ।

---

१. श्यामसुन्दरदासस्य "भाषारहस्य' ग्रन्थस्य ८० पृष्ठं द्रष्टव्यम् ।
2. Incorporating.
3. Isolating.
4. Aglutinating.
5. Infecting.

संस्कृतभाषायामेतादृग्वाक्यानामभावप्रायो विद्यते। अतएव इयं भाषा (संस्कृतभाषा) अमेरिकाभूखण्डपरिजने न गण्यते। यद्यपि कानिचित् समास-प्रधानानि वाक्यानि अस्यां भाषायां दृष्टिपथं समायान्ति। तद्यथा—अस्मि, गच्छामि, अनुव्यचलत्, पर्यभूषयत्। अस्मि, गच्छामीति क्रियाश्याम् अहमिति कर्ता समाह्रियते, ततोऽर्थः क्रियते—अहमस्मि, अहं गच्छामि। 'अनुव्यचलत् पर्यभूषयत्" इत्यत्र "सह सुपा" (२।१।४) इति सूत्रे सहेति[1] योगं विभज्य समासः क्रियते। "पर्यभूषयद् इत्येकस्मिन् शब्दे "स परितः शोभामकरोत्" इत्येवम्, "अनुव्यचलत्" इत्यत्र च "स पश्चाद् विशेषेण अचलत्" इत्येवं कर्तृकर्माद्यर्था एकस्मादेव शब्दान्निःसरन्ति। पूर्वं यत् "प्रविश, पिण्डीम्" इत्येवं प्रयोगद्वयमुदाहृतम्, तत्रापि "त्वं गृहं प्रविश, त्वं पिण्डीं भुंक्ष्व" इत्येवं कर्तृकर्मादीनि समाह्रियन्ते। तदित्थं समीक्षयाऽस्यामपि भाषायामंशतः समासप्रधानं वाक्यं समुपलभ्यते। तथाऽपि नास्यां भाषायां समासप्रधानवाक्यानां बाहुल्यम्।

यद्यप्यस्यां भाषायां षड्विधः समासः परिलक्ष्यते। **वैयाकरणभूषणसारे** (कौण्डभट्टनिर्मिते) समासशक्तिनिर्णये ते समासा इत्थं प्रोक्ताः—

सुपां सुपा तिङा नाम्ना धातुनाऽथ तिङां तिङा।
सुबन्तेनेति विज्ञेयः समासः षड्विधो बुधैः॥ २८॥

सुपां सुपा—पदद्वयमपि सुबन्तम्। राजपुरुष इत्यादिः।

सुपां तिङा—पूर्वपदं सुबन्तम्, उत्तरपदं तिङन्तम् = पर्यभूषयत्। अनुव्यचलत्। अत्र "गतिमतोदात्तवता तिङापि समासः" इति वार्त्तिकेन समासः।'

सुपां नाम्ना—"कुम्भकार" इत्यादि। अत्र "उपपदमतिङ्" (पा॰ सू॰ २।२।१०) इति समासः। स च समासः "गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः" इति परिभाषया सुबुत्पत्तेः प्राङ् निष्पद्यते। अत्रोत्तरपदे सुबुत्पत्तेः प्राग् इत्यर्थः। अन्यथा चर्मक्रीतीत्यादौ नलोपानापत्तेः।

सुपां धातुना—उत्तरपदं धातुमात्रम्, नतु सुप्तिङन्तम्, यथा कटप्रूरिति। अत्र "क्विब्वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घश्च" इति वार्त्तिकात् समासः।

तिङां तिङा यथा—पिबतखादता, पचतभृज्जता इत्यादिः। अत्र "आख्यातमाख्यातेन क्रियासातत्ये" इति मयूरव्यंसकाद्यन्तर्गणसूत्रात् समासः।

तिङां सुबन्तेन—पूर्वपदं तिङन्तम्, उत्तरपदं सुबन्तम्। यथा—जहिस्तम्बः।

१. "सह सुपा" (२।१।४) पाणिनीयं सूत्रम्—सहेति योगो विभज्यते। सुबन्तं समर्थेन सह समस्यते। योगविभागस्येष्टसिद्धयर्थत्वात् कतिपयतिङन्तोत्तरपदोऽयं समासः। स च छन्दस्येव—भट्टोजिदीक्षितकृतवैयाकरणसिद्धान्तकौमुदीस्थं समासप्रकरणम्।

अत्र "जहिकर्मणा बहुलमाभीक्ष्ण्ये कर्तारञ्चाभिदधाति" इति मयूरव्यंसकाद्यन्तर्गणसूत्रात् समासः।

एवमस्यां भाषायां समासबाहुल्यं दृश्यते। तथापि कटप्रूरित्यादिसमस्तशब्देन आकांक्षानिवृत्तिर्न जायते। आकांक्षानिवृत्तये क्रियान्तरस्याकांक्षा जागर्ति। अहं मासं भक्षयामीत्यर्थके "निनकक" इत्यादि समस्तशब्दे समुच्चरिते सति तु क्रियान्तराऽकांक्षा नोदेति। एकशब्दवद् वाक्याभावादियं दैवीवाग् समासप्रधानपरिजने न गण्यते।

वस्तुतस्तु भाषावैज्ञानिकैर्यादृशः समासः स्वीक्रियते, स पाणिनीयव्याकरणपठितैरणादिप्रत्याहारैः सह तुलनार्हः। यथा अण्प्रत्याहारेऽकारादिवर्णत्रयं समाह्रियते, एवं "नाघोलिनिन" इत्येकशब्दात्मके वाक्ये "नातन[1], अमोखल, निन इति सम्प्रदानादयः समाह्रियन्ते।

२—व्यासप्रधानं वाक्यम्—एतादृशानि वाक्यानि चीनी-तिब्वती-वर्मी-स्यामीत्यादि भाषासु समुपलभ्यन्ते। अस्मिन् वाक्ये सर्वे शब्दाः प्रायेण एकाक्षरात्मकाः, उद्देश्यविधेययोः परस्परं सम्बन्धश्च शब्दप्रयोगानुसारेण (स्थानपरिवर्तनेन), उदात्तादिस्वरेण, निपातैश्च प्रकटीक्रियते। यथा चीनीभाषायाम्—"ङो ता नी" इति वाक्यस्य "अहं त्वां हन्मि" इति वाच्यार्थः। किन्तु "ङो नी" शब्दयोः, स्थानपरिवर्तने सति "नी तान ङो" इत्येवं वाक्यं निष्पद्यते। "त्वं मां हन्सि" इति पूर्वापेक्षया भिन्नार्थः सञ्जायते। पूर्ववाक्ये "ङो" शब्दस्य "अहम्" "ता" शब्दस्य च त्वम् इत्यर्थः। किन्तु द्वितीयवाक्येऽनयोः शब्दयोर्व्यत्यासरूपेण (स्थानपरिवर्तनेन) प्रयोगे सति अर्थेऽपि व्यत्यासः (परिवर्तनं) सञ्जातः। एवं "कु ओक् ता" इति वाक्यस्य "राज्यं विशालं विद्यते" इति वाच्यार्थः। 'ता' शब्दस्य पूर्वप्रयोगे सति "ताकुं ओक" इति वाक्यस्य "विशालराज्यम्" इति पूर्वापेक्षयाऽर्थो भिद्यते। एवं व्यासप्रधानवाक्येषु शब्दानां सन्निवेशक्रमे व्यत्ययाव्यत्यययोः सतोरर्थो भिद्यते।

निपातानां प्रयोगानुसारेणाऽपि वाक्यम् अन्यद्वाच्यार्थं भजते। तद्यथा चीनीभाषायाम् "वंग पाओ मिन" इति वाक्यस्य "राजा जनान् रक्षति" इति वाच्यार्थः। अस्मिन् वाक्ये "चि" इति सम्बन्धवाचकस्य निपातस्य मिन्-शब्दात् पूर्वं प्रयोगे सति "राज्ञा परिरक्षिता जनाः" इत्येवमर्थभेदो दृष्टिपथं समायाति। व्यासप्रधानवाक्येषु सर्वे शब्दा निर्विभक्तिकाः। अतस्तेषां प्रयोगः स्वतन्त्ररूपेण क्रियते। शब्दानां परस्परमन्वयश्च प्रसंगाद् अवगम्यते। इमानि वाक्यानि एकाक्षरपदनाम्नाऽपि व्यवह्रियन्ते।

१. "मह्यं नावमानय" इति तस्यार्थः।

प्रत्ययप्रधानं वाक्यम्

प्रत्ययप्रधान-समासप्रधानवाक्ययोर्भेदः—प्रत्ययप्रधानवाक्येषु बहवः शब्दाः प्रयुज्यन्ते। प्रत्येकं शब्देषु प्रकृतिप्रत्ययौ स्पष्टतया प्रतीयेते, प्रत्ययाश्च प्रायेण स्वतन्त्ररूपेण प्रयुज्यन्ते। यद्यपि "प्रकृतिप्रत्ययौ सहार्थं ब्रूतः" इति नियमानुसारेण प्रकृतिविहीनः केवलं प्रत्ययः कमप्यर्थं बोधयितुमसमर्थः, तथापि प्रकृत्या सह प्रयोगे कृतेऽपि प्रत्ययस्य स्वतन्त्ररूपेणास्तित्वं स्पष्टतया दृष्टिपथं समवतरति। प्रत्ययाः प्रकृत्या सह सायुज्यमापद्य न विलीयन्ते। कर्तृकर्मादिवाचकशब्दैः क्रियायाः, क्रियावाचकशब्दैश्च कर्तृकर्मादीनामवबोधाभावात्तदर्थं बहवः शब्दाः प्रयुज्यन्ते। क्रियावाचकपदप्रयोगं विना सर्वे प्रकृतिप्रत्ययाः सम्भूय वाक्यं निर्मातुमसमर्थाः।

किन्तु, समासप्रधानवाक्येषु तु एतद्विपरीतमेव दृश्यते। एतादृशेषु वाक्येषु प्रत्येकमर्थमवबोधयितुं तदर्थवाचकशब्दानां प्रयोगाभावः, केवलमेकेनैव शब्देन सर्वोऽपि वाक्यार्थो बुद्धयते। प्रकृतिप्रत्यययोः पार्थक्यस्यावगमनं दुष्करम्। उदाहरणं "निक्क" इत्येकं वाक्यम्। "अहं तं भक्षयामि" इति तद्वाच्यार्थः। अत्र स्पष्टतया प्रकृतिप्रत्यययोः पार्थक्यं दुष्करम्। अहमित्यादिकर्तृकर्माद्यर्थमवबोधयितुं तत्तदर्थवाचकशब्दानां प्रयोगाभावः प्रकृतिप्रत्ययविभागरहितेन एकेनैव "निक्क" इति वाक्यात्मकशब्देन—अभीप्सितोऽर्थोऽवगम्यते।

प्रत्ययप्रधानवाक्यस्योदाहरणं यथा—एस्पेरन्तो-भाषायां "विडालः, स्त्री, शिशुः, लघुः" इत्येतेषु पदवाच्यार्थेषु "काट, इन, इड, एट" इत्येते शब्दाः प्रयुज्यन्ते। ओवर्णश्च सत्त्वार्थे (विभक्त्यर्थे) व्यवह्रियते। एतैः शब्दैर्बहूनाम् अर्थावबोधकवाक्यानां ग्रहणं कर्तुं शक्यते। तद्यथा—काट + इनो = काटिनो = विडालः। काट + इडो = काटिडो = विडालस्य शावकः। काट + इड + इडो = काटिडेडो = विडालस्य लघुशावकः। "विडालस्य शावकः" इति वाच्यार्थे "काटिडो" शब्दे विडालवाचकस्य काटशब्दस्य, शिशुवाचकस्य "इड" शब्दस्य, सत्त्वार्थकस्य (= षष्ठ्यर्थकस्य) ओवर्णस्य च प्रतीतिः स्पष्टतया परिलक्ष्यते।

एवं तुर्कीभाषायां प्रेमार्थकसेवधातोः मेक्-प्रत्यये कृते सति "सेवमेक" शब्दो निष्पद्यते। स्नेहं कर्तुम्, यद्वा आनन्दनिष्पादनायेति तद्वाच्यार्थः। सेवमेकशब्दयोर्मध्ये इन-शब्दस्य "सेव इन मेक" इत्येवं प्रयोगे कृते "स्वात्मप्रेमनिष्पादनाय" यद्वा "आनन्दं ग्रहीतुम्" इत्यर्थोऽवगम्यते। तयोर्मध्ये इश-शब्दे प्रयुक्ते "सेव इश मेक" इत्येवं शब्दरूपं निष्पद्यते। "परस्परं स्नेहं कर्तुम्" इति तद्वाच्यार्थः।

प्रत्ययप्रधानवाक्यस्य च चत्वारो भागाः। ते यथा—(क) पुरःप्रत्ययप्रधानम् (ख) परप्रत्ययप्रधानम्, (ग) सर्वप्रत्ययप्रधानम्, (घ) ईषत्प्रत्ययप्रधानम्।

(क) पुरःप्रत्ययप्रधानं वाक्यम्—अफ्रीकादेशे वातूपरिजनस्य काफिर भाषायां प्रकृतेः पूर्वं प्रत्ययो युज्यते। तद्यथा "भृत्यो मम शिष्टः प्रतीयते" इत्येतेष्वर्थेषु क्रमशः "न्तु तुचिल, य वोनकल" इत्येते शब्दाः व्यवह्रियन्ते। अत्र प्रत्येकं शब्दात् पूर्वं प्रत्यये कृते "उमुन्तु वेतु ओमुचिल उयवोनकल" इत्येकं वाक्यं निष्पद्यते। अस्य वाक्यस्य च "भृत्यो मे शिष्टः प्रतीयते" इति पूर्वोऽर्थोऽवगम्यते। पुरःप्रत्ययस्य परिवर्तने कृते सति "अवन्तु वेतु अवचिल वयवोनकल" इति बहुवचनात्मकं वाक्यं निष्पद्यते।

(ख) परप्रत्ययप्रधानं वाक्यम्—यूरालवाल्टिक—द्राविडपरिजनयोः कुक्षौ सन्निविष्टासु भाषासु वाक्यघटकशब्देभ्यः परः (अग्रे) प्रत्ययाः प्रयुज्यन्ते। तदुदाहरणं यथा—यूराल-वाल्टिकपरिजनाङ्गभूतायां तुर्कीभाषायाम्—

एकवचनम्	बहुवचनम्
कर्ता—एव	एव लेर
कर्म—एव ई	एव लेर ई
सम्प्रदानम्—एव ए	एव लेर ए
अपादानम्—एव देन	एव लेर देन
सम्बन्धः—एव इन	एव लेर इन
अधिकरणम्—एवदे	एव लेर दे।

इमे शब्दास्तुर्कीभाषायाः (टर्की (तुर्की) भाषायाम्) "एव" शब्दो गृहार्थे प्रयुज्यते। बहुवचनार्थकानां लेरादिप्रत्ययानां योगे सति "एवलेर" इत्यादयः स्पष्टतया गृहार्थवाचकशब्दाः निष्पद्यन्ते। कर्तृकारकाद् बहुवचनान्ताद् "एवलेर" शब्दाद् इम प्रत्यये कृते सति "एवलेरिम" इति वाक्यं निष्पद्यते। तस्य च "मम गृहाणि" इति वाच्यार्थः।

एवं द्राविड-परिजनाङ्गभूतायां कनाडीभाषायां शब्दात् परं प्रत्ययः प्रयुज्यते। तद्यथा कर्तरि—सेवकारु, कर्मणि—सेवकरन्तु, करणे—सेवकरिद, सम्प्रदाने—सेवकरिगे, सम्बन्धे—सेवकर, अधिकरणे सेवकरल्ली इति।

(ग) सर्वप्रत्ययप्रधानं वाक्यम्—मलयन-मलेशियापरिजनयोः सन्निविष्टासु भाषासु वाक्यं सर्वप्रत्ययप्रधानं प्रयुज्यते। अस्यां भाषायां शब्दात्परं पूर्वम् मध्ये च प्रत्ययाः क्रियन्ते।

(घ) ईषत्प्रत्ययप्रधानं वाक्यम्—यस्यां भाषायां प्रत्येकं समासादिप्रधानवाक्यानाम् ईषत्प्रयोगः क्रियते। सा भाषा ईषत्प्रत्ययप्रधानवाक्यवती व्यवह्रियते। जापानी-कांकेशीभाषयोर्विभक्तिप्रधानम्, हाउसभाषायाञ्च व्यासात्मकम्, वास्कपरिजनान्तर्गतासु भाषासु तु समासात्मकं वाक्यं विशेषरूपेण, अन्यच्च वाक्यं सामान्येन व्यवह्रियन्ते। प्रत्ययप्रधानवाक्यस्याङ्गभूतेषु पुरःप्रत्ययादिप्रधानेषु वाक्येषु प्रत्ययाः प्रकृतिं स्वात्मानञ्च अविकुर्वाणाः स्वस्वरूपेण अस्तित्वं भजमानाः कर्त्राद्यभीप्सितमर्थं प्रकटीकुर्वन्ति। तदुदाहरणम्—एवलेर, सेवकारु,

सेवकरन्तु इत्यादयः शब्दाः पूर्वं प्रोक्ताः। प्रत्ययप्रधानवाक्येषु सर्वे कर्तृकर्मादयो व्याकरणसम्बन्धिनियमाः प्रत्ययैरभिधीयन्ते। दैव्यां गिरि तु प्रत्ययाः प्रकृतिं स्वात्मानञ्च विकुर्वाणाः प्रकृतिषु विलीयन्ते। तेषां प्रकृतेः पृथक् सत्ता स्पष्टतया न दृश्यते। तदयथा रामशब्दः। रामशब्दस्य क्रीडार्थकरमुधातुः प्रकृतिः, घञ् इति प्रत्ययः। स च "हलश्च" (३।३।१२१) इति पाणिनिसूत्राद् विधीयते। प्रत्ययघटकघकारञकारयोर्लोपे सति रकारोत्तरस्य ह्रस्वाकारस्य "अचो ञ्णिति" (७।२।११५) इति सूत्रेण वृद्धेः सत्त्वाच्च प्रकृतिभूते रमधातौ स्पष्टतया विकारत्वं दृष्टिपथं समायाति। प्रकृतिप्रत्यययोः स्पष्टरूपेण पृथक्तया प्रतीतेरभावादेव दैवी वाग् भाषावैज्ञानिकैः प्रत्ययप्रधानभाषासु न परिगण्यते। किन्तु विभक्तिप्रधानवाक्यात्मकभाषास्वेव अस्या अस्तित्वं स्वीक्रियते। विभक्तिप्रधानवाक्यस्य लक्षणमग्रे विशदरूपेण प्रतिपादयिष्यते। अत्र प्रत्ययविभक्तिप्रधानयोर्वाक्ययोः केचिच्छब्दाः समुद्ध्रियन्ते, येन तयोः परस्परं भेदः स्फुटतयाऽभिव्यक्तीभविष्यति।

संस्कृते बहुवचनम्	**कनाडीभाषायां** बहुवचनम्
कर्ता—सेवकाः	सेवकारु
कर्म—सेवकान्	सेवकरन्तु
करणम्—सेवकैः	सेवकरिंद
सम्प्रदानम्—सेवकेभ्यः	सेवकरिगे
सम्बन्धः—सेवकानाम्	सेवकर
अधिकरणम्—सेवकेषु	सेवकरल्ली

अत्रोदाहृतेषु संस्कृतशब्देषु विभक्तिप्रत्यययोरपार्थक्यम् प्रकृतिप्रत्यययोर्दीर्घाद्यादेशेन विक्रियमाणत्वम्, कनाडीभाषायाः "सेवकारु सेवकरन्तु" इत्यादिशब्देषु "सेवक" इति प्रकृतेः "रन्तु" इत्यादिप्रत्ययानाञ्च परस्परं पार्थक्यम् अविक्रियमाणत्वञ्च परिदृश्येते।

संस्कृतं प्रत्ययप्रधानं यद्वा विभक्तिप्रधानम्? वस्तुतस्तु विचार्यमाणे सति संस्कृतमुभयप्रधानभूतं सिद्धान्तसिद्धं निश्चीयते। प्रत्ययप्रधानवाक्यस्याङ्गभूतो य ईषत्प्रत्ययप्रधानभागस्तत्र दैव्या गिरो गणना कर्तुं शक्यते। दैव्यां गिरि कानिचित् समासप्रधानानि वाक्यानि समुपलभ्यन्ते। अयं विषयः पूर्वं समासप्रधानवाक्यस्य व्याख्यावसरे "गच्छामि, अस्मि, प्रविश, पिण्डीम्, जलम्", इत्याद्युदाहरणमुखेन व्याख्यातः। किञ्च, "आं ह्लीं क्रौं यं रं लं वं शं षं सं हं सं हंसः" इति प्राणप्रतिष्ठादिमन्त्रेषु आमित्यादयः प्रत्येकं शब्दाः (मन्त्राः) समासप्रधानवाक्यात्मकाश्च प्रतीयन्ते। यथा अस्मीति वाक्यात्मकशब्देन "अहमस्मि" इति वाक्यार्थबोधो जायते, तथैव यमिति शब्दस्य "यम्" इति मन्त्रेण वायोः समुत्पत्तिर्जाता, अतोऽयं मन्त्रो वायोर्बीजम्—इत्याद्यर्था एकेनैव वर्णेन निःसरन्ति। किञ्च, अमेरिकादेशस्य भाषायां "मधो लिनिन" इत्यादिसमासात्मकवाक्येषु "नातन, अमोखल, निन" इति शब्दत्रयं समस्य एकमर्थमवबोधयन्ति। "आं ह्लीं क्रीम्" इत्यादिषु

तु केवलमेक एव वर्णात्मको मन्त्रो बह्वमर्थमवगमयति। एवमेकेनैव वर्णेन बहूनां वाक्यानां तद्वाच्यार्थानाञ्च अवबोधाद् इयं संस्कृतवाक् समासप्रधानवाक्यात्मिका प्रतीयते।

किञ्च, व्यासप्रधानमपि वाक्यमांशिकरूपेण ऋगादिवेदेषु समुपलभ्यते। तद्यथा ऋग्वेदस्य दशममण्डले नवमसूक्ते—

"आपो हि ष्ठा मयोभुवः" (मन्त्रः १) अत्र मन्त्रे "ष्ठा" इत्येकाक्षरात्मिका क्रिया। लोट्लकारस्य मध्यमपुरुषस्य बहुवचने "भवत" इत्यर्थे विद्यते। "एवमस्मिन्नेव सूक्ते द्वितीयमन्त्रे "यो वः शिवतमो रसस्तस्य भाजयतेह नः"। इत्यत्र "यः, वः, नः" इत्येकाक्षरात्मकानि पदानि। "वः" इत्यस्य युष्माकम्, "नः" इत्यस्य च अस्माकमपीत्यर्थः। एवम् ऋगादिवेदेषु बहवो मन्त्राः समुपलभ्यन्ते, यत्र "ष्ठा", "नः" इत्यादिवद् बहून्येकाक्षराणि पदानि समुपलभ्यन्ते। यद्यपि "आं ह्रीं क्रौं यं रं लं वं शं षम्" इति पूर्वोक्ते मन्त्रे यमित्यादय एकवर्णात्मका मन्त्रा व्यासात्मकवाक्यवत् प्रतीयन्ते, तथापि व्यासप्रधानवाक्येषु शब्दाः परस्परमन्वीयन्ते। किन्त्वत्र तु यमित्यादीनां परस्परं न कोऽप्यन्वयः। अतो व्यासप्रधानवाक्येष्वस्य गणनाऽसम्भवा।

प्रत्ययप्रधानवाक्यं तु ऋगादिवैदिकमन्त्राणामवग्रहपाठे समुपलभ्यते। यथा यजुर्वेदे—"अद्भिः"। अत्र प्रकृतिप्रत्यययोर्निर्विभागत्वं दृश्यते। किन्त्ववग्रहपाठे "अप् भिः" इत्यत्र प्रकृतिप्रत्ययौ स्फुटरूपेण पृथक्तया परिलक्ष्येते। यद्यपि "भिस्" प्रत्ययघटकसकारस्य रुत्वविसर्गयोः सतोः प्रत्ययो विकारवान् दृश्यते, तथापि "अप् भिः" इत्यत्र प्रत्ययः स्फुटरूपेण प्रतीयते। अतः प्रत्ययप्रधानवाक्यस्य यः परप्रत्ययप्रधाननामको द्वितीयो भेदः, तस्मिन्नस्य गणना सम्भवा।

विभक्तिप्रधानवाक्यस्य तु अस्यां दैव्यां गिरि प्रचुररूपेण समुपलब्धिदृष्टिपथं समायाति। एवं समेषां समासादिप्रधानवाक्यानामांशिकरूपेण (अल्परूपेण) विभक्तिप्रधानस्य वाक्यस्य च विशेषरूपेण समुपलब्धेः सत्त्वाद् इयं दैवी गीर्न केवलं विभक्तिप्रधानभाषायाम्, अपि तु प्रत्ययादिप्रधानभाषास्वपि गणनार्हा। किन्तु भाषाविज्ञानपटीयांसो विद्वांसो विभक्तिप्रधानातिरिक्तान्यवाक्यानामीषत्प्रयोगाद् इमां गिरं विभक्तिप्रधानभूताम्, न तु प्रत्ययादिप्रधानभूतां मन्यन्ते।

अग्रे विभक्तिप्रधानवाक्यस्य लक्षणं यथाऽधीतं व्याख्यास्यते—

विभक्तिप्रधानं वाक्यम्—प्रत्ययप्रधानवाक्यस्य लक्षणनिरूपणावसरे विभक्तिप्रधानवाक्यस्यापि लक्षणं किञ्चित् स्पष्टतामभजत्। तदेव स्पष्टीकर्तुं पुनर्व्याख्यायते। यत्र प्रकृतिप्रत्यययोः पार्थक्यं स्फुटतया नावभासते, प्रत्ययाः प्रकृतिषु विलीयन्ते, तद्वाक्यं विभक्तिप्रधानमुच्यते। भाषाविज्ञानमतानुसारेण सविभक्तिकेषु शब्देषु "रामः" इत्यादयः शब्दाः प्रत्ययविहीनाः। "रामः, रामौ, रामाः" इत्येकस्यैव शब्दस्य एकवचनादिषु विविधं रूपं दृष्ट्वा "सु औ जस्" इत्येवं

प्रत्ययानां काल्पनिको विभागः कृतः। अत एव एते प्रत्यया विभक्तिनाम्नाऽभिधीयन्ते। वस्तुतस्तु "रामः, रामौ, रामाः" इत्यादयः शब्दाः प्रकृतिप्रत्ययविहीनाः। भाषावैज्ञानिकानामेतन्मतं नागेशादिवैयाकरणसम्मतम्। अत एते वर्णस्फोटस्य प्रक्रियानिर्वाहाय सार्थक्यं मन्यन्ते। प्रत्ययप्रधानवाक्ये तु प्रकृतिप्रत्यययौः पृथग्भूतावविकृतौ च भवतः—इति पूर्वं बहुश उदाहरणानि समुपस्थापयता मया व्याख्यातम्।

अस्मिन् वाक्ये शब्दानां (पदानाम्) परस्परमन्वयः कल्पितविभक्त्यनुसारेण क्रियते। "नीलो घटः" इत्यादौ पदानां परस्परमभेदान्वये "राज्ञः पुरुषः" इत्यादौ च भेदान्वये सरूपविरूपविभक्त्योः समुपस्थितिरेव कारणम्।

भाषाविज्ञानमतानुसारेण विभक्तिर्द्विविधा—१—अन्तर्मुखी, २—बहिर्मुखी च। सेमेटिक-हेमेटिकपरिजनयोः कुक्षौ सन्निविष्टासु भाषासु अन्तर्मुखविभक्तेर्भारोपीय (भारत—योरोपीय) भाषासु च बहिर्मुखविभक्तेः प्राचुर्येण समुपलब्धिः। अन्तर्मुखविभक्तिप्रधानवाक्येषु शब्दात् पूर्वम्, परम्, शब्दस्य चान्तभागे प्रत्ययाः क्रियन्ते। अकारादिस्वरभेदानुसारेण एकस्यैव शब्दस्य अर्थाः परिवर्तन्ते, तद्यथा—अरबीभाषायां कत्लधातोस्तकारोत्तरम् अस्वरस्य योगे सति "कतल" इत्यस्य "स जघान" इत्यर्थः। अस्यैव धातोः ककारोत्तरमुस्वरस्य, तकारोत्तरम् इस्वरस्य च योगे सति "कुतिल" इत्यस्य "स हतः" इत्यर्थः। ककारतकाराभ्यां लकाराच्च परम् उस्वरे ककारात् पूर्वं यप्रत्ययस्य योगे "यक्तुलु" इत्यस्य "स हन्ति" इत्यर्थः सञ्जायते। एवमेकस्यैव शब्दस्य स्वरभेदेन अर्था भिद्यन्तें। अन्यच्च उदाहरणम् "कातिल = हन्ता, कित्ल = शत्रु; कितल = प्रहार" इति। एवम् एकस्यैव शब्दस्य स्वरभेदेन विविधरूपाणि तदनुसारञ्च अर्था अपि भिद्यन्ते।

बहिरङ्गविभक्तयस्तु भारोपीयभाषासु शब्देभ्यः परा युज्यन्ते। बहिरङ्गविभक्तिप्रधानवाक्यमयीषु भाषासु सर्वे धातवो द्वैवर्णिका (केवलं नामादिधातुं विहाय) दृष्टिपथं समायान्ति। भाषाविज्ञानमतानुसारेण एतादृशवाक्यमयी भाषा संहितरूपं विहाय व्यवहितरूपं परिदधती बहुरूपतां प्राप्ता।

२. पदव्याख्याभिधं द्वितीयं प्रकरणम्

यथा दैवी वाक् प्राकृतादिरूपं दधाना हिन्दी-पञ्जाबीत्यादिरूपेण परितो विकसितरूपा दृश्यते। एवम् आंग्ल-लैटिन-ग्रीकेत्यादयो भाषा बहिरङ्गविभक्तिप्रधानाः व्यवहितरूपं दधति स्म। वस्तुतस्तु दैव्यां गिरि समासादिप्रधानानि सर्वाणि वाक्यान्यल्परूपेण, विभक्तिप्रधानानि वाक्यानि च प्रचुररूपेण दृष्टिपथं समवतरन्ति। भाषाविज्ञानदृष्ट्या जगति समुपलभ्यमानासु भाषासु वाक्यानां चतुर्विधरूपेण विभाजनम्, तानि च चतुर्विधवाक्यानि संस्कृतभाषायां समुपलभ्यन्ते, न केवलं विभक्तिप्रधानं वाक्यमेवेति दिशा वाक्यस्फोटो व्याख्यातः।

वस्तुतस्तु पदव्याख्यानं विना वाक्यव्याख्यानं पूर्णतां न भजति। यद्यपि पूर्वं वाक्यस्फोटस्य व्याख्यावसरे "सेवकाः, सेवकारु:" इत्येवं संस्कृत-कनाडीभाषयोः शब्दानां व्याख्यानेन पदस्फोटोऽपि व्याख्यातः। पुनर्व्याख्यातुं नावशिष्यते। तथाप्यग्रे पदानां नामनिर्देशपुरःसरं विशेषतो व्याख्यानं करिष्यते।

पदविभाजनम्

पदानि च चत्वारि। तदुक्तं यास्काचार्येण—"चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्च"। महर्षिभाष्यकारः पतञ्जलिरपि महाभाष्यस्य पस्पशाह्निके व्याकरणाध्ययनस्य गौणं प्रयोजनं प्रतिपादयन् "चत्वारि शृङ्गास्त्रयोऽस्य पादाः" इति ऋग्वेदीयं मन्त्रं समुद्धृत्य "चत्वारि शृङ्गाः" इत्यस्य "चत्वारि शृङ्गाणि पदजातानि नामाख्यातोपसर्गनिपाताश्च" इत्येवं विवेचनं कुर्वन् यास्कोक्तं पदविभाजनं स्वीकुर्वन् प्रतीयते। पदानाम् (= शब्दानाम्) अयं विभागः आंग्लभाषायां भाषणविभागनाम्ना[1] व्यवह्रियते।

एवम्[2] अन्यास्वपि भाषासु पदानां (शब्दानाम्) विभाजनं विविधप्रकारेण

---

1. Parts of Speech.

२. "भिन्न-भिन्न भाषाओं के वैयाकरणों ने शब्दों का वर्गीकरण भिन्न-भिन्न प्रकार से किया है। यही कारण है कि भेदों की संख्या दश तक पहुँच गयी है। भारत ने प्राचीन काल में इसके तीन भेद किये थे। पर आज कल इन्हीं को संज्ञा क्रिया और अव्यय नाम से प्रकट किया जाता है। संज्ञा में विशेषण का अन्तर्भाव हो जाता है। अंग्रेजी आदि पाश्चात्त्य भाषाओं में शब्द के आठ भेद किये जाते हैं। संज्ञा, सर्वनाम, क्रियाविशेषण तो ये पहले से ही हैं। अव्ययों के भी अब चार विभाग कर लिए गए हैं—क्रियाविशेषण, समुच्चयबोधक, सम्बन्धबोधक, और विस्मयादिबोधक"।

—प्रभुनारायणशर्मकृतं भाषाविज्ञानतत्त्वम्, पृ० ३६।

क्रियते । तद्यथा आंग्लभाषायां शब्दानामष्टौ भागाः क्रियन्ते । ते च निम्नोक्ताः—
१—संज्ञा, २—सर्वनाम, ३—क्रिया, ४—विशेषणम् । एते चत्वारो भागाः प्राक्तनाः।
१—क्रियाविशेषणम्, २—समुच्चयबोधकः, ३—सम्बन्धबोधकः, ४—विस्मयबोधकश्च—इत्येते च चत्वारो भागाः कालान्तरकृताः ।

भारोपीयपरिजनस्य सर्वासु भाषासु इत्थमेव शब्दानां विभाजनप्रक्रिया दृश्यते[1] । अत्र यास्कोक्तपदविभाजनविधिमाश्रित्य संज्ञाशब्दानां कौण्डभट्टादिमतेन सम्मतं व्याख्यानं कुर्वता, तस्य च प्राकृतादिभाषया सह निष्पत्तिप्रक्रियायास्तुलनात्मकं विवरणं प्रस्तूयते ।

नाम - पदानामयं विभागः संज्ञासर्वनामशब्दाभ्यामपि व्यपदिश्यते, क्रियान्तराकांक्षोत्थापकतावच्छेदकवत्वं सत्वम् । "रामः" इत्युक्ते सति "किं करोति" इत्येवं कस्याश्चित् क्रियाया आकांक्षा समुदेति, "रामो गच्छति"—इत्युक्ते सति सा आकांक्षा समाप्यते ।

नामपदेनाऽत्र "कृतद्धितसमासाश्च" (१।२।४६) इति पाणिनीयसूत्रगृहीतानां कृत्तद्धितप्रत्ययान्तानाम्, समासस्य, अथ च अव्युत्पन्नसर्वादिशब्दानां ग्रहणं बोद्धव्यम् । कैयटकृते **महाभाष्यप्रदीपोद्**द्योते "नामशब्देन सुबन्तं नमत्याख्यातार्थं प्रति विशेषणीयं भवतीति व्युत्पत्तेः" इत्येवं नामपदं व्याख्यातम् । सर्वादीनि सर्वनामान्यपि आख्यातार्थं प्रति विशेषणीभूतत्वान्नामव्यपदेशार्हाणि । आंग्ल-ग्रीकादिभाषासु तु सर्वनाम संज्ञाशब्दात् पृथग्गण्यते ।

(क) **नामिकपदानां भेदाः**—नैयायिकानां मतानुसारेण तु "जात्याकृतिव्यक्तयः पदार्थाः" इत्युक्त्या जात्याकृतिव्यक्तीनां पदवाच्यत्वात् तदनुसारेण नामिकशब्दानां (संज्ञाशब्दानाम्) भागत्रयं प्रतीयते—१—जातिवाचकाः, २—आकृतिवाचकाः, ३—व्यक्तिवाचकाश्च । अत्र आकृतिपदेनावयवसंस्थानविशेषस्य ग्रहणं क्रियते । यथा—"हस्तः, अंगुलिः" इत्यादि ।

कासुचिद् भाषासु तु संज्ञाशब्दाः पञ्चधा विभज्यन्ते । ते च यथालक्षणमधस्तात् प्रस्तुताः ।

---

1. "The description of English and other Languages of the Indo-European family interm of Greek and Latin parts of Speech is not too bad, though since that parts of speech system of common to the Indo-European family of languages. But when we try to force languages which are not Indo European which have to tally different structures from Indo European languages, into the mold of Latin, we often get sad result."
—Robert A Hall J.R. Linguistic and Your Language. P. 101.

(१) व्यक्तिवाचकसंज्ञा—व्यक्तिस्थानवस्तूनां विशेषेण व्यपदेशनं व्यक्तिवाचकसंज्ञात्वम् । यथा—रामः, कृष्णः, कालिकाता, रामायणमित्यादि ।

(२) जातिवाचकसंज्ञा—भिन्नेष्वभिन्नं छिन्नेष्वच्छिन्नं सामान्यभूतं यत् सा जातिस्तद्वाचकश्च शब्दो जातिवाचक उच्यते । "एतच्च जातिलक्षणं यत्तर्हि तद्भिन्नेष्वभिन्नं छिन्नेष्वच्छिन्नं सामान्यभूतं स शब्दः ? नेत्याह, आकृतिर्नाम सा" इति पातञ्जल**महाभाष्य**प्रामाण्यात् प्रोक्तम् । भिन्नेष्वभिन्नमित्यनेन सामान्यस्य एकत्वम्, छिन्नेष्वच्छिन्नमित्यनेन नित्यत्वञ्च प्रोक्ते । अस्योदाहरणं यथा—गोत्वादि-जात्यवच्छिन्ना गौरित्यादयः ।

(३) भाववाचकसंज्ञा—कस्यचिद् गुणम्, क्रियाम्, अवस्थां वा सूचयति यः स शब्द इमां संज्ञा लभते । एतदेव स्पष्टयाञ्चकार भट्टोजीदीक्षितः "तस्य भावस्तत्वलौ" (५।१ ११९) इति पाणिनीयसूत्रे—"प्रकृतिजन्यबोधे प्रकारो भावः" । इति । गुणो यथा—कठोरता, वीरता, बुद्धिमत्ता । क्रिया—चञ्चलता, तीव्रता, तस्करता । परिस्थितिः—ज्वरता, उदारता, शैशवम् ।

(४) समूहवाचकसंज्ञा—समूहवाचकसंज्ञाशब्देन कस्यचित्समूहस्य बोधः सञ्जायते । तद्यथा—सेना । बहूनां सशस्त्राणां योद्धृणां समूहस्य व्यपदेशनं सेनापदेन क्रियते । अतः सेनाशब्दः समूहवाचकसंज्ञाभाक् ।

(५) पदार्थवाचकसंज्ञा—सुवर्णादिधातवो बहूनां कटककुण्डलादीनामुपादानभूताः, यद्वा ये पृथिव्यां पिहितास्ते धातवोऽनया संज्ञया व्यपदिश्यन्ते । यथा—अस्य सुवर्णस्य कटकम्, अंगुलीयकमित्यादि ।

एवमेव नामिकशब्दानां वैज्ञानिकं विभाजनमेतद्देशप्रसूता महर्षयोऽपि चक्रुः । पातञ्जल**महाभाष्यस्य** प्रत्याहाराह्निके " ऋ ऌ क्" इति प्रत्याहारसूत्रस्य व्याख्यावसरे शब्दानां चतुष्टयी प्रवृत्तिरुक्ता । तद्यथा—"चतुष्टयी शब्दानां प्रवृत्तिः—जातिशब्दाः, गुणशब्दाः, क्रियाशब्दाः, यदृच्छाशब्दाश्च । जातिगतप्रवृत्तिनिमित्तमपेक्ष्य यः शब्दः प्रवर्तते स जातिशब्दः । जातेश्च आश्रया व्यक्तिः । अतो जातिपदेन व्यक्तेरप्याक्षेपः कर्तव्यः । तद्यथा—ब्राह्मणशब्दो ब्राह्मणत्वजातिगतम्, रामादिशब्दः दशरथापत्यादिरूपव्यक्तिगतं प्रवृत्तिनिमित्तमादाय प्रवर्तते । एवं गुणगतं प्रवृत्तिनिमित्तमादाय प्रवृत्ते सति शब्दो गुणवाचकसंज्ञया व्यपदिश्यते । यथा—शुक्लः, नीलः, कपिलः, कपोत इति । उदारता, शीतलतेत्यादयोऽपि शब्दा गुणगतं प्रवृत्तिमादाय प्रवर्तन्ते । अतस्तेऽपि गुणवाचकशब्दाः । विश्वनाथप्रणीत**कारिकावल्यां** ये चतुर्विंशतिगुणाः प्रोक्तास्तेषामप्यत्र गुणवाचकपदेन ग्रहणम् । ते च गुणा निम्नोक्ताः—

……अथ गुणा रूपं रसो गन्धस्ततः परम् ॥ ३ ॥
स्पर्शः संख्या परिमितिः पृथक्त्वञ्च ततः परम् ।
बुद्धिः सुखं दुःखमिच्छा, द्वेषो यत्नो गुरुत्वकम् ॥ ४ ॥
द्रवत्वं स्नेहसंस्कारावदृष्टं शब्द एव च ॥ ५ ॥

अनयोः कारिकयोः रूपरसगन्धादीनां समेषां समावेशो विद्यते । क्रियाशब्दाः—क्रियागतप्रवृत्तिनिमित्तेन यः शब्दः प्रयुज्यते स क्रियापदेन व्यपदिश्यते । क्रियाशब्देन च अत्र कृत्प्रत्ययनिष्पन्नस्य क्रियार्थकशब्दस्य ग्रहणम् । तद्यथा—हन्तुम्, कृत्वा, भुक्त्वा । भोक्तव्यम्, पक्तव्यम्, गच्छन्, पचमानः इत्यादयः ग्रीक-भाषायाम् तुमुन्नन्ताः क्रियार्थकाः शब्दाः असमापिकक्रियानाम्ना[1] व्यपदिश्यन्ते ।

यद्वा क्रियाशब्देनात्र कर्मणो ग्रहणम् । कर्मशब्देन "कर्तुरीप्सिततमं कर्म" (पा० सू० १।४।७९) इति शास्त्रीयं कर्म न गृह्यते, किन्तूत्क्षेपणादीनि पञ्च कर्माणि । तानि च पञ्च कर्माणि यथा—

> उत्क्षेपणं ततोऽपक्षेपणमाकुञ्चनं तथा ।
> प्रसारणञ्च गमनं कर्माण्येतानि पञ्च च ॥ ६ ॥
>
> भ्रमणं रेचनं स्पन्दनोर्ध्वज्वलनमेव च ।
> तिर्यग्गमनमप्यत्र गमनादेव लभ्यते ॥ ७ ॥

इति विश्वनाथप्रणीत**कारिकावल्यां** प्रोक्तानि । कन्दुकस्योत्क्षेपणक्रियां दृष्ट्वा कश्चित् "कन्दुकस्योत्क्षेपणम्"—इत्येवं प्रयुक्तवान् । अत्रोत्क्षेपणशब्दं प्रयोक्तुं निमित्तं कन्दुकस्योत्क्षेपणरूपक्रिया ।

यदृच्छाशब्दः—अर्थगतप्रवृत्तिनिमित्तमनपेक्ष्य यः शब्दः प्रयुज्यते स यदृच्छाशब्दः, यथा—डित्थः । "अचोऽन्त्यादि टि" (१।१।६४),"दाधा घ्वदाप्" (१।१।२०), "शेषो घ्यसखि" (१।४।७) इति पाणिनीयसूत्रेषु "टि, घु" इत्यादयः संज्ञाशब्दाः । अत्र यः शब्दानां विभागः पतञ्जलिना प्रोक्तः, तत्र गुणवाचकशब्देषु भाववाचकशब्दानामन्तर्भावः कर्तुं शक्यते ।

अत्रेदमवधेयम्—"चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्च" इति पदविभाजनं समेषां सुप्-तिङ्शब्दानां, भेदमधिकृत्य प्रोक्तम् । चतुष्टयी शब्दानां प्रवृत्तिरित्यत्र जात्यादिगतप्रवृत्तिनिमित्तमादाय केवलं नामिकशब्दानां सुबन्तानां विभाजनम्, अतस्तयोर्न विरोधः ।

(ख) विभक्तिप्रयोगः

विभक्तिप्रधानवाक्यस्य व्याख्यावसरे विभक्तीनां तुलनात्मकं किञ्चिद् व्याख्यानं प्रस्तावितम् । एतदुद्देशप्रसूतैः व्यवहृतया प्राकृतादिभाषया, ग्रीकाख्यया वैदेशिकभाषया सह, सामान्येन आंग्लभाषया च सह विभक्त्यन्तशब्दानां प्रयोगदृष्ट्या संस्कृतवाक् साम्यं भजमाना प्रतिभाति । अत एव इमा भाषाः विभक्तिप्रधाना भाषाविद्भिर्व्यवह्रियन्ते । भाषाविषयकं शोधं कुर्वद्भिः प्रायेण सर्वैरयं विषयो विदितचरः—"दैव्यां गिरि सप्त विभक्तयो विद्यन्ते" इति ।

---

1. Infinitive Verb.

महाभाष्यकारः पतञ्जलिर्**महाभाष्यस्य** पस्पशाह्निके व्याकरणाध्ययनस्य गौणं प्रयोजनं व्यावृण्वन् "चत्वारि शृङ्गा त्रयो अस्य पादाः द्वे शीर्षे सप्त हस्तासो अस्य" इत्येतन्मन्त्रघटकं "सप्त हस्तासो" इत्येतत्पदं "सप्त विभक्तयः" इत्येवं व्याचष्ट । ताश्च सप्त विभक्तयः पाणिनीयव्याकरणानुसारेण निम्नाङ्किताः—

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा विभक्तिः	सु	औ	जस्
द्वितीया ,,	अम्	औट्	शस्
तृतीया ,,	टा	भ्याम्	भिस्
चतुर्थी ,,	ङे	भ्याम्	भ्यस्
पञ्चमी ,,	ङसि	भ्याम्	भ्यस्
षष्ठी ,,	ङस्	ओस्	आम्
सप्तमी ,,	ङि	ओस्	सुप्

एवं पालिप्राकृतापभ्रंशादिषु भारतीयभाषास्वपि शब्दानां परस्परमन्वयः सरूपविरूपविभक्त्यनुसारेणैव क्रियते । विभक्त्यन्तशब्दानाञ्च प्राचुर्येण प्रयोगः समुपलभ्यते । पालिभाषायां **कच्चायनव्याकरणे** सियो, अयो, ना हि, स नं, स्मा हि, स नं स्मि सु" (२।१।४) इति सूत्रे सप्त विभक्तयो निर्दिष्टाः । ताश्च स्फुटरूपेण निम्नाङ्किताः—सि, यो-प्रथमा; अं, यो-द्वितीया; ना, हि-तृतीया; स, नं-चतुर्थी; स्मा, हि-पञ्चमी; स, नं-षष्ठी; स्मि, सं, सु-सप्तमी ।

अस्यां भाषायामेकवचन-बहुवचनयोरेव रूपाणि लभ्यन्ते । "सि" इत्येकवचने, "यो" इति बहुवचने च प्रयुज्येते । एवं द्वितीयादिविभक्तिष्वपि "अं" इत्येकवचनं, "यो" इति बहुवचनं क्रमशोऽवगन्तव्यम् ।

एवं प्राकृतभाषायामपि एकत्व-बहुत्वबोधिकयोरेव विभक्त्योः समुपलब्धिः, चतुर्थ्याश्च विभक्तेर्नितरामभावो दृश्यते । एकत्वबहुत्वबोधिकास्तु सु जस्, अम, शस्-इत्यादयः पाणिनिशास्त्रनिर्दिष्टा एव विभक्तयः प्रातिपदिकशब्देभ्यः परं प्रयुज्यन्ते ।

"न काऽपि भाषा कस्याश्चिद् भाषाया जनयित्री, मूलत एव सर्वा भाषाः पृथक्-पृथक् अभिव्यक्ताः" इति पक्षे तुलनात्मकभाषाविज्ञानदृष्ट्या व्याकरण-सम्बन्धिनियमेषु तुलनया तोलितेषु दैव्या गिरा सह प्राकृतादिजनभाषाणां साम्यं प्रतिभाति । भाषाविज्ञानविदाम् "भाषा सर्वदा एकरूपेण न तिष्ठति, किन्तु परिवर्तनमपेक्षते" इति पक्षमनुसृत्य; ऐतिहासिक्या भाषाविज्ञानदृष्ट्या तु पालीत्यादिभाषीया विभक्तयस्तदन्ताश्च शब्दा देवभाषायां प्रयुक्तानां विभक्तीनां तदन्तशब्दानाञ्च परवर्तिविकासरूपाः; ग्रीकादिभाषीयाः विभक्तयस्तदन्ताश्च शब्दाः पूर्ववर्तिविकासरूपाः—इत्येवं स्वीकर्तुं समापतति । दैव्या वाचो ग्रीकभाषया सह

विशेषरूपेण साम्यस्य सत्त्वाद् अस्यां भाषायां शब्देभ्यः प्रयुक्तानां विभक्तीनामपि विवरणं परमावश्यकं प्रतीयते ।

यथाऽस्माकं दैव्यां गिरि पुंल्लिङ्गादिशब्देभ्यः परं प्रथमादिविभक्तीनां विविधं रूपं दृश्यते । तद्यथा—अकारान्तपुंल्लिङ्गरामशब्दात् परायाः सुविभक्तिर्विसर्गरूपेण, नपुंसकलिंगकज्ञानशब्दाच्च परम् अम्-रूपेण समुपलभ्यते । आकाराद्यन्तस्त्रीलिङ्ग-शब्देभ्यश्च परं लुप्यते । यथा—रमा, गौरी इत्यादौ । क्वचित् विसर्गरूपेण समुपलभ्यते । यथा—श्रीरित्यादौ । एवं ग्रीकभाषायामपि पुंल्लिङ्गादिशब्देभ्यः परं प्रथमादिविभक्तीनां प्रयोगो दृश्यते । भेदश्च एतावान् विद्यते यद् देवभाषाया-मेकस्या एव प्रथमादिविभक्तेर्यथाप्रयोजनं विविधा आदेशाः क्रियन्ते । ग्रीकभाषायां तु लिङ्गानुसारेण तत्तच्छब्देभ्यो विविधा विभक्तयः प्रयुज्यन्ते । क्वचितु विभक्तीनां वर्णसाम्यमपि दृश्यते ।

ग्रीकभाषायां प्रयुज्यमानानि सर्वाणि शब्दरूपाणि प्रथम[1]-द्वितीय-तृतीयेति भागत्रये विभक्तानि । प्रथमभागे निम्नाङ्किता विभक्तयः स्त्रीपुंल्लिङ्गशब्देभ्यः प्रयुज्यन्ते ।

	एकवचनम्		द्विवचनम्	बहुवचनम्
	स्त्रीलिङ्गम्	पुंल्लिङ्गम्,	स्त्री० पु०	स्त्री० पु०
कर्ता[2]	आ, ए	आस्, एस्	आ	आई
सम्बोधनम्[3]	,,	आ, अ, ए	,,	,,
कर्म[4]	आन्, एन्	आन्, एन्	,,	आस्
सम्बन्धः[5]	आस्, एस्,	ऊ	आइन्	ओन्
सम्प्रदानम्[6]	आ, ए	आ, ए	,,	आइस्

प्रथमभागे इमा विभक्तयः सन्निविष्टाः । एतद्विभक्त्यन्ताः कतिपये शब्दा उदाहरणार्थमधस्तात् प्रदर्शिताः—

1. There ar three declensions of nouns, in which also all adjective and participles are included "A School Greek Grammar" written by William W. Good Wine., LLD. D. C. E, P. NO. 19.
2. Nominative,
3. Vocative.
4. Accusative.
5. Genitive.
6. Dative.

तिमे (प्रतिष्ठा) स्त्रीलिङ्गकोऽयं शब्दः

	एकवचनम्	द्विवचनम्
कर्ता	तिमा, तिमे	तिमा
सम्बोधन	तिमा, तिमे	तिमा
कर्म	तिमान्, तिमेन्	तिमान्
सम्बन्ध	तिमास्, तिमेस्	तिमाइन्
सम्प्रदान	तिमा, तिमे	तिमाइन्

	बहुवचनम्
कर्ता	तिमाई
सम्बोधन	तिमाई
कर्म	तिमास्
सम्बन्ध	तिमोन्
सम्प्रदान	तिमाइस्

ओइकिआ (गृहम्) स्त्रीलिङ्गकोऽयं शब्दः

	एकवचनम्	द्विवचनम्	बहुवचनम्
कर्ता	ओ॑इकिआ	ओ॑इकिआ	ओ॑इकिआई
सम्बोधन	ओ॑इकिआ	ओ॑इकिआ	ओ॑इकिआई
कर्म	ओ॑इकिआन्	ओ॑इकिआन्	ओ॑इकिआस्
सम्बन्ध	ओ॑इकिआस	ओ॑इकिआइन्	ओ॑एकिओन्
सम्प्रदान	ओ॑इकिआ	ओ॑इकिआइन्	ओ॑इकिआइस्

होरा (भूमिः) स्त्रीलिङ्गः

कर्ता	होरा, होरे	होरा	होराई
सम्बोधन	होरा, होरे	होरा	होराई
कर्म	होरान्, होरेन्	होरा	होरास
सम्बन्ध	होरास्, होरेस्	होराइन्	होरोन्
सम्प्रदान	होरा, होरे	होराइस्	होराइस्

एवं विद्याधिदेवतावाचकमूसादिशब्देम्य आकारादयो विभक्तयः प्रयुज्यन्ते । द्वितीयभागे[2] तु निम्नाङ्किता विभक्तयो गण्यन्ते ।

१. अत्र ˘ इत्थं संकेतेन चिह्नितं स्वरं ह्रस्वं जानीयात् ।
2. In to the Second declension.

	पुंल्लिङ्गम्	स्त्रीलिङ्गम्	नपुंसकलिङ्गम्
		एकवचनम्	
कर्ता	ओ˝स्	ओ˝स्	ओ˝न्
सम्बोधन	ऍ	ऍ	ओ˝न्
कर्म	ओ˝न	ओ˝न	,,
सम्बन्ध	ऊ	ऊ	ऊ
सम्प्रदान	ओ	ओ	ओ
		द्विवचनम्	
कर्ता	ओ˝	ओ˝	ओ
सम्बोधन	ओ˝	ओ˝	आ
कर्म	,,	,,	,,
सम्बन्ध	ओ˝इन	ओ˝इन्	ओइन
सम्प्रदान	,,	ओ˝इन्	,,
		बहुवचनम्	
कर्ता	ओ˝ई	ओ˝ई	आ
सम्बोधन	,,	,,	,,
कर्म	ऊस्	ऊस	आ
सम्बन्ध	ओन्	ओन् (औन्)	ओन
सम्प्रदान	ओ˝इस्	ओ˝इस्	ओ˝इस

प्रातिपदिक लाग शब्दः (पुंल्लिङ्गः)

	एकवचनम्	द्विवचनम्	बहुवचनम्
कर्ता	लो˝गो˝स्	लोगो	लो˝गो˝ई
सम्बोधन	लो˝गे	लोगो	,,
कर्म	लो˝गो˝न्	लोगो	लो˝गूस्
सम्बन्ध	लो˝गू	लो˝गो˝इन	लो˝गोइन्
सम्प्रदान	लो˝गो	लो˝गो˝इन्	लो˝गो˝इस्

आन्थ्रोपा

	एकवचनम्	द्विवचनम्	बहुवचनम्
कर्ता	आन्थ्रोपो˝स्	आन्थ्रोपो	आन्थ्रोपो˝ई
सम्बोधन	आन्थ्रोपे˝	,,	,,
कर्म	आन्थ्रोपो˝न्	,,	आन्थ्रोपूस्
सम्बन्ध	आन्थ्रोपू	आन्थ्रोपो˝इन्	आन्थ्रोपोन्
सम्प्रदान	आन्थ्रोपो	,,	आन्थ्रोपो˝इस्

शब्दरूपाणां तृतीयो भागः (Third declensions)

	पु०	स्त्री०	नपुँ०
		एकवचनम्	
कर्ता	स —	,, —	—
सम्बोधन	— न	— न	—
कर्म	आ ,, न	— न	—
सम्बन्ध	आस, ओस	आस, ओस	आस ओस
सम्प्रदान	ई	ई	ई
		द्विवचनम्	
कर्ता	ऍ	ऍ	ऍ
सम्बोधन	ऍ	ऍ	ऍ
कर्म	ऍ,	ए	ऍ
सम्बन्ध	ओ˝इन्	ओ˝इन	ओ˝इन्
सम्प्रदान	,,	,,	,,
		बहुवचनम्	
	पु०	स्त्री०	नपुँ०
कर्ता	ऍस	ऍस	आ
सम्बोधन	,,	,,	,,
कर्म	आस	आस	,,
सम्बन्ध	ओन	ओन्	—
सम्प्रदान	सी	सि	

पुलिङ्गः गिगान्त (दीर्घकायो मनुष्यः, यद्वा राक्षसः)

	एकवचनम्	द्विवचनम्	बहुवचनम्
कर्ता	गिगास	गिगान्ते˝	गिगान्ते˝स्
सम्बोधन	गिगान्	गिगान्ते˝	,,
कर्म	गिगान्ता	,,	गिगान्तास
सम्बन्ध	गिगन्तो˝स्	गिगान्तो˝इन्	गिगान्तोन्
सम्प्रदान	गिगान्ती	गिगान्तो˝इन्	गिगासी

---

१. अत्र ˝ इति संकेतेन ह्रस्वं जानीयात् । २. विभक्तेरभावस्यायं—संकेतः ।

सोमा (शरीरम्) नपुंसकलिङ्गः

कर्ता	सोमा	सोमाते	सोमाता
सम्बोधन	सोमा	सोमाते	सोमाता
कर्म	सोमा	सोमाते	सोमाता
सम्बन्ध	सोमातोॅस्	सोमातोॅइन्	सोमातोन्
सम्प्रदान	सोमाती	,,	सोमातोॅइन्

एवं ग्रीकभाषायां दैव्यां गिरीव शब्दान् परस्परमन्वेतुं विभक्तयः प्रयुज्यन्ते। उभयोर्भाषयोः विभक्तिविषयो यो भेदो विद्यते, स पूर्वमेव निर्दिष्टः। अपरश्च महान् भेदोऽत्र उपर्युक्तप्रयोगाणां समीक्षया प्रतिभाति। ग्रीकभाषायां सम्बोधनसहितानि पञ्च कारकाणि, दैव्यां वाचि तु ससम्बोधनम् सप्त[1] कारकाणि, परन्तु वाक्यघटकसब्दानां परस्परमन्वयो विभक्त्यनुसारेण, शब्देभ्यश्च परं विभक्तिप्रयोग इत्येतद्दृष्ट्या तयोः[2] साम्यम्। किञ्च "विभक्त्यादिप्रत्ययानां क्व प्रयोगः कर्तव्यः" इति सन्देहम् अपनेतुं "परश्च" (पा० सू० ३।१।२) इति सूत्रितं भगवता पाणिनिना।

कारकाणां तुलनात्मिका समीक्षा

भाषावैज्ञानिका वैदेशिकभाषाणां मध्ये ग्रीकभाषया सह संस्कृतस्यातिशयं साम्यं स्वीकुर्वन्ति। अतः कारकविषयं[3] समवलम्ब्य अनया भाषया सह साम्यपर्यालोचनमस्य ग्रन्थस्य परमावश्यकमङ्गं प्रतिभाति।

ग्रीकभाषायां कर्तरि कर्मणि च प्रथमाद्वितीयपविभक्ती दैव्या गिरीव प्रयुज्येते। तद्यथा—

हॉ अन्थ्रोॅपोॅस तोॅन् कुन ऍपताजेॅन् = स पुरुषस्तं श्वानमताडयत्। अत्र "हा अन्थ्रोपास" कुन कर्ता, "तान्कुन्" इति द्वितीया।

यथा संस्कृते कर्मण्यर्थे क्वचित् षष्ठी प्रयुज्यते, एवम् अस्यामपि भाषायाम्[3]। ग्रीकभाषायां यासां क्रियाणां कर्मणि षष्ठी प्रयुज्यते, ताश्च सर्वाः क्रिया भक्षस्पर्शेच्छाशासनानुभवार्थिकादयः। कर्मण्यर्थे षष्ठ्या विभक्तेरुदाहरणं यथा भट्टोजीदीक्षितकृत-**वैयाकरणसिद्धान्तकौमुद्याम्**—"अधीगर्थदयेषां कर्मणि"

---

१. एवं लैतिनावेस्ताभाषयोरपि शब्दात्परं विभक्तयो युज्यन्ते। अत्र विस्तरभयात् केवलं ग्रीकभाषाया एव चर्चा कृता। अग्रे सामान्यरूपेण आंग्लभाषाया विभक्तीनामुल्लेखः करिष्यते।

२. अतः पूर्वं तु विभक्तीनां विचारः कृतः।

३. "किन्तु कुछ क्रियायें ऐसी होती है, जिनमें कर्म षष्ठ्यन्त पाया जाता है"।
—श्री भोलाशङ्करव्यासः—"संस्कृत का भाषाशास्त्रीयअध्ययन", पृ० २५३

(२।३।५२) इति पाणिनीयसूत्रे मातुः स्मरणम्, सर्पिषो दयनम्, ईशनं वा इति। "षष्ठी शेषे" (२।३।५०) इति सूत्रे "कर्मादीनामपि सम्बन्धमात्रविवक्षायां षष्ठ्येव"—इत्येवं स्वीकृत्य "सतां गतम्, सर्पिषो जानीते, मातुः स्मरति" इत्युदाहरणानि प्रदत्तानि। एवमेव ग्रीकभाषायामपि।

ग्रीकभाषायां यथा—

(१) पिनेॅइ[1] तू ऑएन् = स मद्यं (मद्यस्य) पिवति।

पिनेॅइ = पिवति। तू ऑएनू = समद्यस्य (मद्यम्)।

(२) एलावेॅतोॅ तेस हेरॉस आउनू (उनू) = स स्वहस्तं (स्वहस्तस्य वा) गृहीतवान्। एलावेॅतो = (स) गृहीतवान्। तेस = तस्य (स्वस्य)। हेरॉस = हस्तस्य (हस्तम्)।

(३) तेस क्सुनेॅसेॅओस मेॅतोॅ पॉइऊन्ताए = ते चातुर्यं (चातुर्यस्य शासति) तेस = स्वस्य। क्सुनेॅसेॅ ओस = चातुर्यस्य (ज्ञानस्य) मेॅता = मदीयं पूॅऊन्ताए = शासति।

"मयि चातुर्यमस्तीति भाषन्ते" इति तत्तात्पर्यमवगन्तव्यम्। "ते स्वकीयं चातुर्यं शासति" इति संस्कृतभाषानुसार्यनुवादः। अत्रोपर्युक्तवाक्येषु पिवत्याद्यर्थक- "पिनेॅई" इत्यादिक्रियाणां "तू ऑ एनू" इत्यादि षष्ठविभक्त्यन्ताः शब्दाः प्रयुक्ताः। ग्रीकव्याकरणानुसारेण अयमनुवादः। संस्कृतव्याकरणानुसारेण तु अत्र द्वितीया विभक्तिः प्रयोक्तव्या।

करणापादनाधिकरणानि—ग्रीकभाषायां तृतीयपञ्चमसप्तमविभक्तीनां प्रायो नितरामभावः परिलक्ष्यते। अतः तृतीयार्थे सप्तम्यर्थे च चतुर्थी विभक्तिः प्रयुज्यते। तृतीयार्थे चतुर्थविभक्तेः प्रयोगो यथा—

(१) हॉरोमेॅन तॉइस ऑफ्थाल्म्बॉएस = वयम् अक्ष्णा पश्यामः।
हॉरोमेॅन् = पश्यामः। तॉइस् = तेभ्यः (तैः = स्वकीयैरित्यर्थः)।
तॉइस – अयं चतुर्थविभक्त्यन्तः। संस्कृतव्याकरणानुसारेण तु तैः (स्वकीयैः) इति प्रयुज्यते। यथा आंग्लभाषायां "तस्य" इति षष्ठ्यन्ततच्छब्दार्थकस्य "हिज" शब्दस्य क्वचित् "तस्य" इत्यर्थः। यथा – हिज बुक – तस्य पुस्तकम्। क्वचित्तु "स्व" अर्थे प्रयुज्यते। यथा—"ही सीज वाइ हिज आइज" इत्यत्र। एवं ग्रीकभाषायामपि "तस्मै" इत्यर्थे प्रयुज्यमानः "तॉइस" शब्दोऽपि "स्वेभ्यः" अर्थे प्रयुज्यते।

आफ्थालू माएस = अयं चतुर्थविभक्त्यन्तः। "अक्षिभ्यः" इति तदर्थः।

---

१. "ए स्कूल ग्रीक ग्रामर" ग्रन्थस्य १६७तमपृष्ठाद् इमानि वाक्यानि समुद्धृतानि।

अस्य चतुर्थ्यन्तशब्दस्य संस्कृते "अक्षिभिः" इति तृतीयविभक्त्याऽनुवादः । अत्र तृतीयार्थे चतुर्थी विभक्तिः प्रयुक्ता ।

(२) काकोॅएस्, इआस्थाई काका = दुष्कर्मभिदुष्कर्मणां जयः । काकाएस = पापैः । (ग्रीकभाषानुसारेण पापेभ्यः इति) । इ आस्थाइ = जयः । काका = पापानि (पापानाम्) । अधिकरणार्थे यथा—

(१) मेॅतेॅस्ति मोॅइ तूतू = अस्मिन्मे भागो विद्यते । मेतैस्ति = एकोभागः । मोइ = मह्यम् (मम) । तूतू = अस्मिन् । पञ्चम्यर्थे तु षष्ठी[२] प्रयुज्यते । यथा—

होरिस[२] तू सोमातस = शरीरादेको भागः ।

होरिस = एको भागः । तू = तस्य । संस्कृतभाषानुसारेण तु तस्माद् । सोमातस = शरीरस्य (संस्कृतभाषानुसारेण शरीराद्) । पतित इति क्रिया च अत्र अध्याहर्तव्या ।

यद्यप्यत्र करणाधिकरणार्थे चतुर्थ्याः, अपादानार्थे च षष्ठ्या विभक्तेर्विधानाद् ग्रीकसंस्कृतयोर्वैयाकरणनियमेषु भेदः परिलक्ष्यते, दैव्यां गिरि यत्करणम् यच्च अधिकरणम् अपादानञ्च तदेवं ग्रीकभाषायां सम्प्रदान-सम्बन्धसंज्ञाभ्यां व्यवह्रियते । तथापि यस्मिन्नर्थे प्रथमादिविभक्तयः संस्कृते विधीयन्ते, तस्मिन्नेवार्थे प्रायेण अस्यामपि भाषायाम् । तद् यथा—"हाॅ अन्थ्रोॅपाॅस ताॅन् कुन । ऍपताजेॅन" इति पूर्वोक्तवाक्ये "हाॅ अन्थ्रोपाॅस" इत्यत्र कर्त्रर्थे प्रथमा । "ताॅन् कुन" इत्यत्र कर्मण्यर्थे द्वितीया विभक्तिर्दृश्यते ।

क्रुधार्थद्यकक्रियाणां प्रयोगे यं प्रति कोपः स सम्प्रदानसंज्ञया व्यवह्रियते । उक्तश्च भगवता पाणिनिना "क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः" (१।४।३७) इति । सम्प्रदानसंज्ञकाच्च चतुर्थी विभक्तिः प्रयुज्यते । यथा—हरये क्रुध्यति । एवं ग्रीकभाषायामपि कोपविषयीभूत उक्तसंज्ञो भवति । यथा—

ग्रीकभाषा	संस्कृतम्
(१)—आर्गीज्देॅस्थें[१] ताॅएस अदीकूसिन्	त्वम् अपराद्धेभ्यः क्रुध्यसि ।

आर्गीज्देॅस्थेॅ = त्वं क्रुध्यसि । ताॅइस = तेभ्यः । अदीकूसिन = अपराद्धेभ्यः

(२)—ताॅइस थेवाए[२] ओॅएस अनिेदि जूसिन्	ते तेभ्यः नगरवासिभ्यः असूयन्ति ।

१ "A school Greek Grammr" Written by willim Goobwin LL.D.D. C.L. Secction 184 P . 173

२. उपर्युक्तग्रन्थे १७१ तमे पृष्ठे एतदीयोंऽशो द्रष्टव्यः ।

२,२ श्री भोलाशंकरव्यासकृतस्य "संस्कृत का भाषाशास्त्रीय अध्ययन" इत्याख्यग्रन्थस्य १६३, २५६ पृष्ठयोरपि द्रष्टव्यम् ।

1,2 A School Greek Grammar written by william Sec. 184 P. 193

ताॅइस = तेभ्यः । थेवाएआॅएस = थेवे = नगरवासिभ्यः । आॅनेदिजूसिन = असूयन्ति (निर्भर्त्सयन्ति) ।

सम्बन्धार्थे च षष्ठ्या विभक्तेः प्रयोगो यथा—

हेमोन ए पाॅतृस[१] अस्माकं देशः ।

हेमोन = अस्माकम्, ए = सा । पात्रिस = पितृभूमिः ।

किञ्च दैव्यां गिरीव उपर्यर्थक "हुपर" शब्दयोगे षष्ठी प्रयुज्यते, यथा—घोटकानाम् उपरि = खौरान् हुपर ।

सम्बोधनम्—यथा गीर्वाणवाण्यां सम्बुद्धौ प्रथमा विभक्तिः, पदेभ्यश्च पूर्वं "हे हा" इत्याद्यव्यायानां प्रयोगश्च क्रियेते । यथा हे राम, हा जनन्यः—इत्यादौ । एवमस्यामपि भाषायां दृश्यते, यथा—ओ लओस् (हे सिंह), ओ क्रीत = हे न्यायाधीश ।

एवं कारकदृष्ट्या ग्रीकसंस्कृतयोः परस्परं साम्य-वैषम्ये तुल्यरूपेण दृश्येते । परन्तु यथा पदानां (शब्दानाम्) परस्परमन्वयः कर्तृकर्मादिकञ्च विभक्त्याऽवगम्यते, एवं ग्रीकभाषायामपीति दृष्ट्या उभयोः सम्यक् साम्यं परिलक्ष्यते । उभयोर्भाषयोः शब्देभ्यः (प्रातिपदिकेभ्यः) परं विभक्तयः प्रयुज्यन्ते ।

परन्तु सम्प्रति आंग्लभाषाया यत्स्वरूपमुपलभ्यते, तत्र शब्देभ्यः पूर्वं कर्मादिकारकार्थे विभक्तीनां प्रयोगो दृश्यते । शब्देभ्यः (प्रातिपदिकेभ्यः) पूर्वं प्रयोगादेव विभक्तयः पूर्वसर्गनाम्ना[१] व्यपदिश्यन्ते । यथा "गच्छति" इति क्रियया "स" इति कर्तृकारकोऽपकृष्यते, तथैवास्यां भाषायामपि । अतस्तदवगन्तुं न कोऽपि पूर्वसर्गः प्रयुज्यते, क्रिययैव तदवगमात् । कर्मादिकारकार्थे तु निम्नाङ्किताः पूर्वसर्गाः प्रयुज्यन्ते । ते यथा—

	संस्कृतविभक्तयः	आंग्ल विभक्तयः
कर्मणि द्वितीया	अम् औट् शस्	= टू ।
करणे तृतीया—	टा भ्याम् भिस्	= वाई ।
सम्प्रदाने चतुर्थी	ङे० ,, भ्यस्	= फार ।
अपादाने पंचमी	ङसि ,, भ्याम् ,,	= फ्राम ।
सम्बन्धे षष्ठी	ङस् ओस् आम्	= आफ् ।
अधिकरणे सप्तमी	ङि ,, सुप्	= इन ।

पाणिनीयशास्त्रनिर्दिष्टाभिर्विभक्तिभिः सह साम्यं भजमाना इमा आंग्लभाषीयाः पूर्वसर्गाः कर्तृकर्मादिबोधकाः । परन्तु कर्माद्यर्थेषु विधीयमानविभक्तीनां "रामान्" इत्यादिष्विव वैकृत्यं न दृश्यते । यथा प्रभवतीत्यादिषु शब्देषु प्रादयो

१ उपर्युक्त ग्रन्थे १६५पृष्ठे सम्बन्धकारकनिरूपणे द्रष्टव्यम् ।

२. Preposition.

भ्वादिधातुभ्यः पूर्वमुपसर्गरूपेण प्रयुज्यन्ते। तथैव अस्यां भाषायां विभक्तयः पूर्वसर्गरूपेण शब्देभ्यः प्राक् प्रयुज्यन्ते। क्वचितु सम्प्रदानकारकार्थे विभक्तेरप्रयोगः[1], क्वचिच्च द्वितीयविभक्तेः प्रयोगो[2] दृष्टिपथं समायाति।

अस्मिन्नेवार्थे क्वचिच्चतुर्थ्या विभक्तेः प्रयोगो दृश्यते।

वस्तुतस्तु आंग्लभाषायां कर्तृकर्मसम्बन्धेति कारकत्रयमेव विद्यते। यद्यपि दैव्यां गिरि सम्बन्धार्थकषष्ठविभक्त्यन्तस्य कारकेषु गणना न क्रियते; तस्य क्रियया सह अन्वयाभावात्। परन्त्वांग्ल-ग्रीक-जापानी इत्यादिभाषासु एतद् विपरीतं दृश्यते। आंग्लभाषायां करणसम्प्रदानापादानाधिकरणमिति कारकचतुष्टयं क्रियापूरकसंज्ञकशब्देष्वन्तर्भूतम्[4]। पूर्वसर्गसहकारेण च करणादयो विवक्षितार्थमवगमयन्ति[5]।

वस्तुतस्तु विभक्तिदृष्टया दैव्या वाचो जापानीभाषया सह शतप्रतिशतं साम्यं दृष्टिगोचरीभवति। अधस्तात् केचित् प्रयोगाः प्रस्तूयन्ते, येन मदुक्तिः सर्वथा पुष्टिं भजते।

विभक्तिः

कर्ता[6] =	गा =	हारुगा काएरीमाशिता	= वसन्तर्तुर्गता।
कर्म =	नी =	बनारसनी माइरीमाशो	= अहं वाराणसीं गमिष्यामि।
करणाम् =	दे =	होचोदे किस	= लवित्रा छिनत्ति।
सम्प्रदानम् =	ये =	दोको ये इराश्शरु	= कुत्र प्रतिष्ठन्नसि।
अपादानम् =	योरी =	बनारसकारा सारनाथ मादे माचीगा देश	= वाराणसीतः प्रारभ्य सारनाथपर्यन्तं राजमार्गो गच्छति।
साकजित्सुकारा आमेगाफुरु	=	गत दिवसात् प्रारभ्य वर्षन्नास्ति।	
सम्बन्ध =		नो = मे नो माये दे कारता	अ = क्ष्णः पुरतोऽ गच्छत्।

अस्यां भाषायामधिकरणकारकार्थे कर्मण्यर्थे च नी[7] इत्येकविभक्तिः प्रयुज्यते। यथा व्रजमवरुणद्धि गाम्, कुरून स्वपिति, अधिशेते, अधितिष्ठति,

१. यथा—मह्यं पुस्तकं देहि = गिव मे ए बुक।
२. स रामाय पुस्तकं ददाति—ही गिव्स द बुक टू राम।
३. मह्यं पुस्तकमानय = ब्रिंग द बुक फार मी।
४. इम्पलीमेन्ट आफ दी वर्ब।
५. अहं वायुयानेन आगच्छामि = आइ कम बाई द एयरोप्लेन।
६. गौरीशङ्करद्विवेदिकृते जापानी स्वयं शिक्षक ग्रन्थे, १४ पृ० द्रष्टव्यम्।
७. „ „ „ पृ० सं० १५ द्रष्टकम्।

अध्यास्ते वा वैकुण्ठं हरिः—इत्यादिवाक्येष्वधिकरणार्थे द्वितीया विभक्तिर्दृश्यते, एवमस्यामपि भाषायां तदर्थे सा विभक्तिः[1] प्रयुज्यते। यद्यपि दैव्यां गिरि सर्वत्र आधारार्थे द्वितीया विभक्तिर्न दृश्यते, यथा—कटे तिष्ठति; तथापि क्वाचित्कम् अधिकरणार्थे द्वितीयाविभक्तिविधानं जापानभाषया सह साम्यमवरोहति। अस्यां भाषायाम् अधिकरणकारकस्य कर्मकारकेऽन्तर्भावः सञ्जातः।

एवं वैदेशिकाभिर्विभक्तिप्रधानभाषाभिः सह दैव्या वाचो विभक्तिदृष्टया विशेषरूपेण साम्यं सामान्यरूपेण च वैषम्यं प्रतिभाति। न केवलं ग्रीकादिभाषया सह, अपितु एतद्देशप्रसूताभिः पालि-प्राकृतादिभाषाभिरपि व्याकरणदृष्टया साम्यम् इयं गीर्वाणवाग्भजते। पाणिनिना यदर्थे प्रथमादिविभक्तयो विहितास्तदर्थे पालिभाषायामपि ता विभक्तयो व्यवहृता दृश्यन्ते। अत्र कानिचित् सूत्राण्यवतार्यन्ते, येन मदुक्तं दृढ़तां गतं प्रतिभाति।

कच्चायनव्याकरणम् (पालिभाषायाम्)	**संस्कृते पाणिनीयव्याकरणम्**
१—यो करोति स कत्ता (२।६।११)	स्वतन्त्रः कर्ता (१।४।५४)
कत्तरि च (२।६।१८)	कर्तृकरणयोस्तृतीया (२।३।१९)
२—यं करोति तं कम्मं (२।६।१०)	कर्तुरीप्सिततमं कर्म (१।४।४९)
कम्मत्थे दुतिया (२।६।२७)	कर्मणि द्वितीया (२।३।२)
३—येन वा कयिरते तं करणं (२।६।९)	साधकतमं करणम् (१।४।४२)
करणे ततिया (२।६।१६)	कर्तृकरणयोस्तृतीया (२।३।१८)
४—यस्स दातुकामो रोचते धारयते वा तं सम्प्रदानं (२।६।६)	कर्मणा यमभिप्रैति सम्प्रदानम् (१।४।३२)
सम्पदाने चतुत्थी (२।६।२३)	सम्प्रदाने चतुर्थी।
५—यस्मादपेति भयमादत्ते वा तदपादानं (२।६।१)	ध्रुवमपायेऽपादानम् (१।४।२४) भीत्रार्थानां भयहेतुः (१।४।२५)
अपादाने पञ्चमी (२।६।२५)	अपादाने पञ्चमी (२।३।२८)
६—अनादरे च (२।६।३५)	षष्ठी चानादरे (२।३।३८)
७—यो धारो तमोकासं (२।६।८)	आधारोऽधिकरणम् (१।४।४५)
ओकासे सप्तमी (२।६।३२)	सप्तम्यधिकरणे च (२।३।३६)

एषाञ्च क्रमश उदाहरणानि यथा—

पालिः	**संस्कृतम्**
१—बुद्धेन जितो मारो।	बुद्धेन जितो मारः।
२—रथं करोति, धम्मं सुणाति।	रथं करोति, धर्मं शृणोति।
बुद्धं पूजयति।	बुद्धं पूजयति।

१. यथा—पाबोयानी हाइत्ता = भोजनालयं प्राविशत।

३—फरसुना रुक्खं छिनत्ति ।	परशुना वृक्षं छिनति ।
कुद्दालेन आवाटं खणति ।	कुद्दालेन आवाटं खनति ।
हत्थेन कम्मं करोति ।	हस्तेन कर्म करोति ।
४ समणस्स चीवरं ददाति ।	श्रमणाय वस्त्रं ददाति ।
समणस्स रोचते सच्चम् ।	श्रमणाय रोचते सत्यम् ।
देवदत्तस्स सुवण्णच्छत्तं धारयते ।	देवदत्ताय सुवर्णच्छत्रं धारयते ।
५—गामा अपेन्ति मुनयो ।	ग्रामाद् अपयन्ति मुनयः ।
पापा चित्तं निवारये ।	पापाच्चित्तं निवारयेत् ।
चौरा भयं जायते ।	चोराद् भयं जायते ।
६—रुदतो दारकस्स पब्बजि ।	रुदतो दारकस्य परिव्रजति ।
रुदन्तस्मि दारके पब्बजि ।	रुदति दारके ,, ।
७—जलेसु खीरं, तिलेसु तेलं,	जलेषु क्षीरम्, तिलेषु तैलम्,
उच्छुसु रसो,	इक्षुषु रसः । भूमिषु मनुष्याश्चरन्ति,
भूमीसु मनुस्सा चरन्ति ।	वने हस्ति-नश्चरन्ति ।
वने हत्थिनो चरन्ति ।	

एवं प्राकृतभाषायामपि कारकसम्बन्धिनियमाः संस्कृतेन सह प्रायेण साम्यं भजन्ति । अस्यां भाषायां चतुर्थविभक्तेरभावात् सम्प्रदानार्थे षष्ठी विभक्तिः प्रयुज्यते । दैव्यां गिरि यदर्थे द्वितीयतृतीयपञ्चमविभक्तयः प्रयुज्यन्ते तदर्थे कुत्रचित् षष्ठी विभक्तिः प्रयुज्यते । तद्यथा—

संस्कृतम्	प्राकृतम्
सीमागृहं वन्दे	सीमाघरस्स वन्दे
धनेन लब्धो	धनस्स लद्धो ।
चोराद् बिभेति ।	चोरस्स वीहई ।
पृष्ठे केशभारः ।	पिट्ठियं केसभारो ।

द्वितीय[3]तृतीयविभक्तिद्वयस्थले क्वचित् सप्तमी दृश्यते । यथा—

ग्रामं वसामि ।	गामे वसामि ।
तैरलंकृता पृथ्वी ।	तेसु अलंकिया पुह्वी ।

१. प्राकृत में आकर विभक्तियों की भी सरलता पायी जाती है। किन्तु यहाँ चतुर्थी का लोप हो गया है। वह षष्ठी में सम्मिलित हो गयी है।
श्री भोलाशङ्कर व्यास—[2]संस्कृत का भाषाशास्त्रीय अध्ययन" (पृ० सं० ३०१) उक्तञ्च वररुचिकृते प्राकृतप्रकाशे "चतुर्थ्या षष्ठी" (६।६४) इत्यस्मिन्सूत्रे ब्राम्हणस्य देहि । इति ।

२. "क्वचिद् द्वितीयादेः" हे० (८।३।१३४) ।

३. "क्वचिद्द्वितीयादेः"—हे० व्या० (८/३/१३४)

पञ्चमविभक्त्यर्थे तृतीयसप्तम[1]विभक्ती प्रयुज्येते, यथा—

चोराद् बिभेति	चोरेण विहई ।
अन्तःपुराद् रन्त्वा आगतो राजा	अन्तेउरे रमिउ मागओ राया ।

सप्तमविभक्त्यर्थे क्वचिद् द्वितीया, क्वचिच्च तृतीया प्रयुज्येते[2] । यथा—

विद्युद्द्योते स्मरति रात्रिम् ।	विज्जुज्जोये मरइ रत्तिं ।
तस्मिन् काले, तस्मिन् समये ।	तेसं कालेणं । तेणं समयेणं ।

सर्वनाम्नस्तुलनात्मिका समीक्षा

"सर्वादीनि सर्वनामानि" (१।१।२७) । यद्यपि सर्वनामसंज्ञकाः शब्दा नामिकशब्देष्वेवान्तर्भूताः, एतेषां पृथक्तया गणना न युज्यते; तथाप्येते सर्वादिशब्दाः सर्वस्य नाम निर्दिशन्ति । जातिगुणक्रियाशब्दास्तु केवलं जातिगुणक्रिया एव बोधयन्ति । सर्वादिशब्दैस्तु सर्वस्य निर्देशः क्रियते । अतः संस्कृतादन्यासु भाषासु सर्वादिशब्दानां जात्यादिशब्देभ्यः पृथग्गणना क्रियते ।

सर्वादिशब्दाः वक्तुर्विवक्षया क्वचित् कर्त्रादिकारकरूपेण, क्वचिच्च विशेष्यविशेषणरूपेण प्रयुज्यन्ते । किमित्यादिकं तु प्रश्नवाचकं सर्वनाम ।

कर्त्रादिकारकरूपेण सर्वनामप्रयोगो यथा— .

स तं तेन हन्ति । त्वं तस्मादागत्य तस्य पुस्तकं तस्मै तत्र ददासि । प्रथमवाक्ये "सं तं तेन" इति त्रयं क्रमशः कर्तृ-कर्म-करणानि । द्वितीयवाक्ये तस्मै, तस्मात्, तत्र (तस्मिन्निति सप्तम्यर्थे त्रल्) इति क्रमशः सम्प्रदानापादानाधिकरणकारकाणि । तस्येत्यत्र तु सम्बन्धार्थे षष्ठी ।

विशेष्यविशेषणरूपेण यथा—सर्वाणि पुस्तकानि, सुन्दरोऽहम् । अत्र सर्वाणि इति पुस्तकस्य विशेषणम् । सुन्दरोऽहम्—इत्यत्र अहमिति विशेष्यम् ।

प्रश्नरूपेण प्रयोगो यथा—कस्त्वम् ? त्वया किं कृतम् ? अत्र किंशब्दः प्रश्नार्थकः ।

किञ्च, आंग्लभाषीया वैयाकरणाः सर्वनाम्नो यावतः प्रकारान् व्याचक्षते, ते सर्वेऽस्माकं गीर्वाणवाण्यां समुपलभ्यन्ते । आंग्लवैयाकरणैः सर्वनाम्नो दश भेदाः प्रतिपाद्यन्ते । ते च भेदा निम्नाङ्किताः—

इमानि सूत्राणि हेमचन्द्रव्याकरणात्, कौमलचन्द्रजैनप्रणीतप्राकृतप्रकाशिकातः समुद्धृतानि ।

१. "द्वितीयातृतीययोः सप्तमी"—है० व्या० ८।३।१३५ ।

२. "पञ्चम्यास्तृतीया च"—है० व्या० ८/३/१३६)

प्रश्ननिजपुरुषसंकेत-सम्बन्धविभागनिश्चयदृढ़ता-परस्पर-विस्मयवाचका-नीति ।

१. पुरुषवाचकं यथा[1] अहं गच्छामि, त्वं गच्छसि ।
२. संकेतार्थकं यथा[2] इदं मे पुस्तकम् ।
३. प्रश्नबोधकम्[3]- केनेदं लिखितं पुस्तकम् ?
४. सम्बन्धवाचकम्[4] यत् पुस्तकं त्वया पठितम्, तन्मम ।
५. विभागबोधकम्[5] नृणां मध्ये न कश्चित्समागतः ।

अत्र आंग्लभाषाव्याकरणानुसारेण कश्चिदिति विभागसूचकं सर्वनाम । कश्चिच्छब्देन नृ-समुदायाद् एकदेशस्य पृथक्करणं सूच्यते । नृणामित्यत्र "यतश्च निर्धारणम्" (२।३।१४१") इति पाणिनीयसूत्रेण षष्ठी । पक्षे च सप्तमी ।

६. अनिश्चयवाचकं[6] सर्वनाम यथा– केचिज्जनाः समागता । अत्र कः कः समागत इति निश्चयरूपेण न ज्ञायते ।

७. निजवाचकं[7] सर्वनाम यथा—यज्ञदत्तः स्वं ताडयामास ।

८. दृढ़ताबोधकं[8] यथा—अहं स्वयमेव तत्र गमिष्यामि ।

९. परस्परबोधकं[9] यथा—ते परस्परं भुञ्जते ।

१०. विस्मयबोधकं[10] यथा—किम् स चौरः ? इत्यादि ।

यद्यपि गीर्वाणवाण्याव्याकरणग्रन्थेषु सर्वनाम्नामेते भेदाः कण्ठतो न प्रोक्ताः, तथापि तेष्वर्थेषु तेषां प्रयोगाः समुपलभ्यन्ते । सर्वनाम्नामुपर्युक्ता भेदा आंग्लादिभाषीयव्याकरणग्रन्थाननुसृत्य प्रोक्ताः । एवं पालिप्राकृतेति जनभाषयोः ग्रीकभाषायाश्च सर्वनाम्नां पुरुषादिवाचकरूपेण, क्वचिद् विशेष्यविशेषणरूपेण प्रयोगाः समुपलभ्यन्ते । यथा—

1. Personal Pronoun.
2. Demonstrative Pronoun.
3. Intrrogative Pronoun.
4. Relative Pronoun.
5. Distributive Pronoun.
6. Indefinite Pronoun.
7. Reflexive Pronoun.
8. Emphatic Pronoun.
9. Reciprocal Pronoun.
10. Exlamatory Pronoun.

प्राकृते—सो तइ तं करोति=स त्वया तं करोति ।

अहअं तुमो पुप्फं तहिं ते दाहम् = अहं तव पुष्पं तत्र तुभ्यं दास्यामि ।
सुत्तो सो=सुप्तः सः ।

पालिभाषायाम्—

सो पुरिसो = स पुरुषः ।

ग्रीकभाषायाम्—

पासस = कियद् अधिकम् ।
पेलिकस = कियद् आयुः ।
एमस लूसिस = मम[1] श्लथयन् ।

अत्र प्रश्नादिवाचकसर्वनामानि विशेषणरूपेण प्रयुक्तानि । प्राकृतादिभाषासु गीर्वाणवाण्यामिव तत्तदर्थेषु सर्वनाम्नां प्रयोगाः स्वीक्रियन्ते । अतः सर्वनामदृष्टया ग्रीकादिवैदेशिकभाषया, अथ च प्राकृतादिभारतीयभाषया सह च गीर्वाणवाण्या साम्यं प्रतिभाति । आसु भाषासु सर्वनाम्नां प्रयोगाः समानरूपेण समुपलभ्यन्ते ।

इत्थं विविधवाक्यानां समीक्षया ग्रीकादिवैदेशिकभाषाभिः, अथ च प्राकृतादिभारतीयभाषाभिश्च गीर्वाणवाण्याः साम्यवैषम्येतुल्यरूपे दृश्येते । आभिर्भाषाभिः सह अस्या देवभाषायाः विशेषरूपेण साम्यम्, सामान्येन च वैषम्यं दृष्टिपथं समायातम् ।

लिङ्गम्, वचनञ्च

लिङ्गवचनयोर्व्याख्याने सर्वप्रथमं "लिङ्गवचने शब्दनिष्ठे यद्वा अर्थनिष्ठे" इति प्रस्तूयते । इमानि स्त्र्यादिलिङ्गानि शब्दनिष्ठानि, न तु अर्थनिष्ठानि; एकस्यैवार्थस्य बोधनाय व्यवह्रियमाणशब्दानां विविधलिङ्गदर्शनात् । किञ्जल्कार्थवाचकः सरशब्दः स्त्रियां पुंनपुंसकयोर्व्यवह्रियते । एवं "राक्षसः, रक्षः" दैत्यार्थवाचकयोरनयोर्मध्ये प्रथमः पुंल्लिङ्गः, अपरश्च नपुंसकलिङ्गः । संस्कृते चन्द्रार्थवाचको विधुशब्दः पुंल्लिङ्गः, आंग्लभाषायां तदर्थवाचको मूनशब्दस्तु स्त्रीलिङ्गकः । एवं तत्तद्भाषीयवैयाकरणैरेकस्यैवार्थस्य वाचके शब्दे विविधलिङ्गानि व्यवह्रियन्ते । अतो लिङ्गं शब्दनिष्ठम् । शब्दस्यैव स्त्रीलिङ्गादिसंज्ञा क्रियते ।

एवमेव विविधभाषासु वचनसंख्याभेदस्य दर्शनात् तस्यापि शब्दनिष्ठता । वचनसंख्याभेदोऽग्रे प्रदर्शयिष्यते । एवं पूर्वोक्तयुक्त्या कर्मादिकारकसंज्ञानामपि शब्दनिष्ठता बोद्धव्या । व्रजमवरुणद्धि गामित्यत्र आधारभूतस्य व्रजस्य कर्मत्वं शब्द-

१. अत्र शेषषष्ठी, न तु कारकषष्ठी ।

निष्ठम् । अर्थाद् व्रजार्थवाचकव्रजशब्दस्य कर्मसंज्ञा क्रियते, न तु तद् वाच्यार्थस्य । किञ्च एकस्मिन्नेवार्थे विकल्पेन कर्मादिकारकवाचिकाः बह्व्यो विभक्तयः प्रयुज्यन्ते । तद्यथा—वनाद् ग्रामो योजनं[1] योजने वा । अक्षैरक्षान् वा दीव्यति । अत्र अक्षशब्दस्य कर्मसंज्ञा करणसंज्ञा च तदर्थवाचिकयोर्द्वितीयतृतीयविभक्त्योश्च प्रयोगो विकल्पेन क्रियते । एवमत्र प्रसङ्गवशात् कारकसंज्ञानामपि शब्दनिष्ठता वेदितव्या ।

अत्र **संस्कृतवैयाकरणानामपि मतं** विदुषां पुरः समुपस्थाप्यते ।

"सरूपाणा मेकशेषः" अथ वा "स्त्रियाम्" इत्यत्र भाष्यम्—

"एकार्थे शब्दान्यत्वाद् दृष्टं लिङ्गान्यत्वम्"–शेखरकारः । अर्थः लिङ्गभेदवान् शब्दभेदात्, हेतुत्वावच्छेदकः सम्बन्धो वृत्तिविशेष्यः, साध्यतावच्छेदकश्च स्वरूप-सम्बन्धः । अथवा लिङ्गमर्थनिष्ठं विभिन्नशब्दवाच्यत्वात् । अस्मिन् पक्षे हेतुत्वा-वच्छेदकः सम्बन्धः स्वरूपसम्बन्धविशेषः । उभौ पक्षौ नवीनमतेन ।

प्राचीनानां मते लिङ्गं शब्दनिष्ठम्, एकत्रार्थे शब्दभेदात् । शब्दभेदप्रयुक्त-लिङ्गभेदात् । यन्नैवम्, तन्नैवम् । पुष्यः, तारकः, नक्षत्रम्—इत्येकस्मिन्नेवार्थे त्रयः शब्दाः प्रयुज्यन्ते । नवीनानां मते लिङ्गं केवलान्वयि, केवलमन्वेत्येव, न तु क्वचिद् व्यभिचरति । सत्त्वरजस्तमसामपचयापचयौ सततं सर्वत्र भवत एव । अस्थां स्थितौ कदा कस्मिन्नर्थे किं लिङ्गं प्रयोक्तव्यम्, सत्त्वरजस्तमसामुपचयापचयोः सर्वदा सत्त्वात् ? इति चेदत्र "शब्दतत्त्वविदः शिष्टाः शब्दार्थेषु व्यवस्थिताः" इत्युक्त्या शिष्टव्यवहार एवात्र शरणम् इति **मञ्जूषायां** द्रष्टव्यम् । उक्तञ्च—लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्य ।

शेखरमते शब्दोऽपि पदार्थः, लिङ्गमपि पदार्थः । अतः शब्दरूपे पदार्थेऽपि लिङ्गरूपस्य पदार्थस्य सत्ता तिष्ठत्येव । केवलं सम्बन्धभेदः । स च शब्दः गुणो भवतु, द्रव्यं वेत्यत्र नास्ति विवादः । द्रव्यपक्षे लिङ्गं तस्मिन् शब्दरूपे द्रव्ये स्वरूप-सम्बन्धेन, अथवा स्वाश्रयार्थवाचकतासम्बन्धेन तिष्ठति । अर्थनिष्ठत्वपक्षे तु स्वाश्रयपदवाच्यत्वसम्बन्धेन लिङ्गमर्थे तिष्ठति । इत्येवं सर्वोऽपि विशेषोऽ-वगन्तव्यः । एवं शेखरपक्ष एव ज्यायान् ।

लिङ्गवचनदृष्ट्या संस्कृतप्राकृतादिव्याकरणानां परस्परं तुलनायां साम्य-वैषम्ये उभे अपि दृष्टिपथं समायातः । प्राकृतपालिभाषयोः पुंस्त्रीनपुंसकेति लिङ्गत्रयस्य दर्शनात् अपभ्रंश-हिन्दीभाषयोश्च नपुंसकशब्दानामभावाल्लिङ्ग-दृष्ट्या पालिप्राकृतभाषाभ्यां संस्कृतस्य साम्यम्, अपभ्रंशादिभिश्च वैषम्यं प्रतिभाति । वचनदृष्ट्या विविच्यमाने तु प्राकृतादिजनभाषासु द्विवचनस्याभावान्न तैः सह अस्याः किमपि साम्यम् । किन्तु ग्रीकभाषायां पुंस्त्रीनपुंसकेति लिङ्ग-त्रयस्य एकादिवचनत्रयस्य च सत्त्वात् तया सह अस्याः सम्यक्साम्यं प्रतिभाति ।

---

१. "तदस्य क्तादध्वनः प्रथमासप्तम्यौ" (वार्तिकम्)

आंग्लभाषायां तु द्विवचनस्याभावात् लिङ्गचतुष्टयस्य च सत्त्वात् तद्दृष्ट्याऽनयोर्भाषयोर्न किमपि साम्यम् । आंग्लभाषायां स्त्रीपुमित्युभयात्मकस्य लिङ्गस्य[1] संस्कृतापेक्षया आधिक्यं विद्यते । अस्योदाहरणं यथा—परिचारक-वाचकः सर्वेण्टशब्दः । वस्तुतस्तु संस्कृतेऽपि उभयलिङ्गात्मकः, यद्वा लिङ्गत्रयात्मकः शब्दो दृश्यते । स च शब्दोऽस्माकं व्याकरणशास्त्रेऽनियतलिङ्गपदेन व्यवह्रियते । यथा – तटः[2], तटी, तटम् । अतो लिङ्गदृष्ट्या संस्कृतम् आंग्लभाषया सह किञ्चित्[3] साम्यं भजते ।

नामिकशब्दानां निष्पत्तिप्रक्रिया (तुलनात्मिका)

अत्र नामिकशब्दानां व्याख्याने कारकलिङ्गवचनानां नामिकशब्दनिष्ठत्वात् प्रतिपाद्यविषयाऽऽबहिर्भूतत्वाच्च तेषां सामान्यं विवेचनं प्रदर्शितम् । रामेत्यादि-नामिकशब्दानां का निष्पत्तिप्रक्रिया—इति जिज्ञासाशान्त्यै केषाञ्चिन्नामिकशब्दानां तुलनात्मको निष्पत्तिप्रकारः प्रस्तूयते । दैव्यां गिरि नामिकशब्दाः प्रातिपदिक-शब्देनापि व्यवह्रियन्ते । प्रातिपदिकशब्दानां मध्ये केचिच्छब्दा अव्युत्पन्नाः (प्रकृतिप्रत्ययविहीनाः), केचिच्च व्युत्पन्नाः (प्रकृतिप्रत्ययवन्तः) । अव्युत्पन्नाश्च शब्दा यथा —सर्व, विश्व, उभ, अन्य, इदमित्यादयः । व्युत्पन्नाश्च शब्दा यथा–रामः, गृहम्, पाचकः" इत्यादयः ।

धातुभ्यः कर्त्राद्यर्थे प्रत्यये कृते सति शब्दानां निष्पत्तिरस्माभिः साध्यते । धातवो यथा—"रमु क्रीडायाम्", "गम्लृ गतौ", "डुपचष् पाके" इत्यादयः । एभ्यो भ्वादिधातुभ्यो द्विधा प्रत्ययाः क्रियन्ते—कृतः, तिङश्च । कृत्प्रत्यया यथा—तव्यत्, तव्य, अनीयर्, ण्वुल्, घञ्—इत्यादयः ।

तिङ्प्रत्ययाश्च अष्टादश संख्याकाः । ते यथा—(१) तिप्, (२) तस्, (३) झि । (४) सिप्, (५) थस्, (६) थ । (७) मिप्, (८) वस्, (९) मस्—एते परस्मैपदिनः ।

१०–त, ११–आताम्, १२–झ । १३–थास्, १४–आथाम्, १५–ध्वम्, १६–इड्, १७–वहि, १८–महिङ्—एते आत्मनेपदिनः ।

(क) कृत्प्रत्ययेन नामिकशब्दानां निष्पत्तिप्रक्रिया

धातुभ्यो विहिता ण्वुलादिकृत्प्रत्यया नामिकशब्दान् निष्पादयन्ति । अत्र केचिच्छब्दा उदाहरणमुखेनाधस्तात् प्रस्तूयन्ते—

---

१. कामन जेण्डर ।

२. भट्टोजीदीक्षितकृतवैयाकरणसिद्धान्तकौमुद्यां कारकप्रकरणे प्रातिपदिकार्थेति सूत्रे समुदाहृतोऽयं शब्दः ।

तटशब्दस्य लिंगत्रये प्रयोगो दृश्यते, तथापि तटीशब्दः स्त्रीलिङ्गको न तु तटशब्दः, एवं तटं शब्दो नपुंसकः, न तु तटः—इति दृष्ट्या किञ्चिदिति प्रोक्तम् ।

शब्दः	सानुबन्धो धातुः	निरनुबन्धो धातुः	प्रत्ययः	आदेशः	प्रथमा विभक्तिः
पचतीति पाचकः	डुपचष्पाके	पच्	ण्वुल्	पाच् + अक	पाचकः
लूयतेऽनेनेति लवित्रम्	लूञ्छेदने	लू	इत्र	लव् + इत्र	लवित्रम्
दीयतेऽस्मै दानीयः	डूदाञ् दाने	दा	अनीयर्	दा + अनीय	दानीयः
रमन्ते योगिनो स्मिन्निति रामः	रमुक्रीडायाम्	रम्	घञ्[1]	राम् + अ	रामः
किरतीति किरः	—	कॄ	क[2]	किर + अ	किरः
—	गम्लृ	गम्	शतृ	गच्छ + अन्	गच्छन्
	,,	,,	क्त्वा	गत्वा	गत्वा

इयमेव प्रक्रिया संस्कृतशब्देन सह सादृश्यं भजमानानां पाल्यादिनामिक-शब्दानां निष्पादने तद्व्याकरणग्रन्थेषु दृश्यते ।

प्राकृतशब्दानां निष्पत्तिस्तु परिनिष्ठितसंस्कृतशब्देभ्यः क्रियते । तद्यथा—

संस्कृतम्	प्राकृतम्	संस्कृतम्	प्राकृतम्
ईश्वरः	इस्सरो, ईसरो	कृतम्	कअम्[3]
आकृतिः	आइदी[4]	उत्सवः	उस्सवो[5]

ईश्वरशब्दघटकस्य वकारस्य लोपे सति[6] शकारस्य सकारादेशे तस्य च द्वित्वे[7] सुविभोक्तेश्च ओकारादेशे "इस्सर" शब्दो निष्पद्यते । द्वित्वाभावे च ह्रस्वा-भावः "ईसरो" इति रूपम् । एवं "कअं" इत्यादिशब्दाः "कृतम्"—इत्यादि-शब्देभ्यो वररुचिकृते **प्राकृतप्रकाशा**भिधे ग्रन्थे निष्पादिताः । क्वचिच्चोक्तलक्षणमपि बाधित्वा एकदेशसंस्कृतमुपपाद्य व्याक्रियते । यथा—वच्चन्ते पि अम्मि भणिअं = व्रजति प्रिये भणितम् । गत्यर्थक व्रजधातोः शतृप्रत्यये "च्चो व्रजिनृत्योः" (८।४७) इति जकारस्य "च्च" इत्यादेशः । "न्तमाणे शतृशानचौ" (७।१०) इति शतृ-प्रत्ययस्य "न्त" इत्यादेशः । क्वचिच्च "न्त" वर्णस्थस्याकारस्य लोपः । एवं "वच्चन्ते" शब्दो व्रजति-शब्दान्निष्पद्यते । "सर्वत्र लवंराम्" (३।३) इति रेफस्य "क ग य जं" इति यकारस्य च लोपे "ङे म्मी" इति ङेविभक्ते रम्म्यादेशे

१. हलश्च (३।३।१२१) इति पाणिनीयसूत्रण ।
२. इगुपधज्ञाप्रीकिरः कः (३।१।१३५ पा० सू०)
३. ऋतोऽत् (१।२७) वररुचिकृते प्राकृतप्रकाशे ।
४. ऋत्वादिषु तो दः (२७ प्राकृतप्रकाश) ।
५. नोत्सुकोत्सवयोः (३।४२ ,, ,,) ।
६. सर्वत्र लवराम् (३।३ ,, ,,) ।
७. सेवादिषु च (३।५८, ,, ,,) ।

"पिअम्मि" शब्दो निष्पन्नः । शतृप्रत्ययविधानात् संस्कृतस्यैकदेशमुपपाद्य व्याख्या-तम् । क्वचिच्च संस्कृतोपपाद्यमाश्रित्य एकदेशेन व्याख्यायते । यथा शिरस्-शब्दस्य तृतीयैकवचने टाविभक्तौ "अन्त्यस्य हलः" इति स-लोपे "टामोर्णः" इति टाप्रत्ययस्य णः । "एचः सुप्यङिङसो" इत्येत्वम्, "शषोः सः" इति सः, एवं सिरेण इति प्राप्नोति । संस्कृते "शिरसा" इति तृतीयासिद्धिमङ्गीकृत्य "शषोः सः" इति शकारस्य सकारादेशे "सिरसा" इत्यपि भवति । एवं प्राकृतशब्दान् संस्कृतं समीक्ष्यावगच्छेत् ।

ऐतिहासिकदृष्टया भाषाया अध्येतार आधुनिकाः प्राकृतभाषीयेषु सिरसा-दिशब्देषु दन्त्यसकारादिवर्णान् समीक्ष्य –"यदा संस्कृतं प्राकृतादिरूपेण विकासं प्राप्तम्, तदा शकारादिवर्णानामभावः, तत्स्थाने च दन्त्यसकारादयो वर्णाः प्रायु-ज्यन्त" इत्येवं मन्यन्ते । परन्तु शब्दनित्यत्वपक्षे भाषाविज्ञानविदुषाम् एतत्सर्वं विपरीतमेव प्रतिभाति । संस्कृतशब्देभ्यः प्राकृतशब्दानां निष्पादनं प्रक्रियामात्रम् । एतत्सर्वं पूर्वमेव प्रतिपादितम् ।

पालिभाषायां तु प्राकृतविपरीता शब्दनिष्पत्तिप्रक्रिया दृश्यते । अत्र नामिकशब्दाः संस्कृतभाषायामिव धातुजा दृश्यन्ते । यथा—

धातुः	प्रत्ययः	आदेशः	शब्दः
कर	तव्व	क + तव्व	कत्तव्वं
चि	तव्व	चे + तव्व	चेतव्वं
चि	ण्य	चे + य	चेयं

इत्यादयः ।

अनेन प्रतीयते यत् पालिशब्दानां संस्कृतशब्दा न प्रकृतयः । अत एव **कच्चायनव्याकरणे** कृद्-उणादिप्रकरणानि, **धातुमञ्जूसा**ख्ये च धातूनां निर्देशा दृष्टिगोचरीभवन्ति । अस्यां भाषायां पाणिनिपठितेभ्यो धातुभ्यः प्रातिपदिकेभ्यश्च भिन्ना एव धातवः, भिन्नानि प्रातिपदिकानि च दृष्टिगोचरीभवन्ति । यथा—

पालिभाषीयो धातुः	संस्कृते च धातुः
गम	गम्लृ

प्रातिपदिकशब्दा यथा—

मघव	मघवन्
युव	युवन्
पुम्	पुंस्
कम्म	कर्मन्

एवं नामिकशब्दानां निष्पत्तिप्रक्रिया दृष्टयापालि-प्राकृतयोर्भेदः पालि-संस्कृतयोः साम्यञ्च परिलक्ष्येते । दैव्यां गिरि शब्दनिष्पत्तिप्रक्रियामवगन्तुं समुदा-हृतानां शब्दानां मध्ये केचिज्जातेर्व्यक्तेर्वा, केचिच्च क्रियाया वाचका व्यवह्रियन्ते ।

व्यक्तिवाचको यथा—रामः, जातेश्च बोधको यथा—किरः(=शूकरः), क्रियाशब्दो यथा—पक्तव्यम्, गत्वा, गच्छन् इत्यादयः। गुणवाचकशब्दाः प्रायेण षष्ठ्यादिविभक्त्यन्तशब्देभ्यस्त्वतलादितद्धितप्रत्ययेषु कृतेषु निष्पद्यन्ते। यथा—ब्राह्मण्यम्, औदार्यम्, शुक्लता, ज्येष्ठः, श्रेष्ठ इत्यादयः।

जात्यादिसंज्ञकशब्दानामियमेव निष्पत्तिप्रक्रिया ग्रीकभाषायामपि दृश्यते। अत एव भाषावैज्ञानिकास्तया सह दैव्या गिरस्तुलनात्मकं समीक्षणं सम्पादयन्ति। न केवलं ग्रीकभाषायाम्, अपितु आंग्लभाषायामपि जात्यादिवाचका धातुजाः शब्दा दृष्टिसरणिमवतरन्ति। यथा—

जातिवाचकः शब्द आंग्लग्रीकभाषयोः—

	धातुः	प्रत्ययः	शब्दः
ग्रीकभाषायाम्	लाग	आस	लोँगोँस्

येन शब्देनान्तःस्था विचाराः प्रकटीक्रियन्ते स शब्दो ग्रीकभाषायां लॉगॉस्-नाम्ना[1] व्यवह्रियते।

	ग्राफ	एउस	ग्राफेउस = राइटर

आंग्लभाषायां यथा—

राइट	अर	राइटर
माउण्ट	एन	माउण्टेन[2]
मोल्ड	इंग	मोल्डिंग

व्यक्तिवाचकाः शब्दाः—ग्रीकभाषायाम् व्यक्तिवाचका शब्दा अव्युत्पन्नप्रातिपदिकेभ्यो निष्पन्नाः। प्रथमादिविभक्तिं विहाय न कोऽपि प्रत्ययो दृश्यते। यथा हिप्प आहोँस, अपोँ—लुकोँस इत्यादि[3]। एवं लैटिनभाषायामपि व्यक्तिवाचकशब्दा निष्पद्यन्ते।

गुणशब्दाः—ग्रीकभाषायाम् गुणवाचकशब्दानां[3] प्रकृतिः प्रायेण प्रातिपदिकम्। प्रातिपदिकशब्देभ्यो गुणार्थवाचके प्रत्यये कृते सति गुणवाचकशब्दा निष्पद्यन्ते। यथा—

सोँफ + इआ =	बुद्धिमत्ता = विजडम
ताह + ओँस् =	कोमलः = सोफ्ट

1. The word by which the inward thought is expressed.
2. Writer.
3. Carldarling Buck–Comparative Grammar of the Greek and Latin. P. 361.

नेँआ + तेस = यौवनम् = यूथ
दिकाएओँ + सुने = न्यायता = जस्टिस इत्यादि[1]।

अत्र गुणवाचकशब्देषु क्रमशः सोँफ, ताह, नेँआ, दिकाइओँ इत्येते शब्दाः प्रकृतिभूताः, तेभ्यः परं प्रयुज्यमानाः क्रमशः इआ, ओँस, तेँस, सुने इत्येते प्रत्ययाः। प्रातिपदिकेभ्यो गुणवाचकशब्दानामियं निष्पत्तिप्रक्रिया आंग्लभाषायामपि दृश्यते। आंग्लभाषीया गुणवाचकशब्दा अत्र उदाहृताः, ये ग्रीकभाषीयगुणवाचकशब्दान् अनुवदन्ति।

	प्रातिपदिकम्	प्रत्ययः	शब्दः
लेतिन	फार	मस	फारमस = धर्म
	फर	मस	फर्मस- दृढः
क्रियाशब्दा यथा	धातुः	प्रत्ययः	निष्पन्नः शब्दः
ग्रीकभाषायाम्	लु	सिस	लुसिस
	ग्राफ	इकास	ग्राफिकास = लेखितव्यम्
लैतिनभाषायाम्	कैन	टुस	कैण्टुस
	एड्वेन	टुस	एडवाण्टुस
आंग्लभाषायाम्	लूज	इंग्	लूजिंग् = श्लथयन्

क्रियाविशेषणम्—कानिचित्[2] क्रियाविशेषणानि विशेषणेभ्यः (गुणवाचकशब्देभ्यः) प्रत्यये कृते सति निष्पद्यन्ते। यथा—

विशेषणम्	प्रत्ययः	क्रियाविशेषणम्
फिलास	ओ	फिलोँस = डीयरली = प्रेमता
साफास	ओ	सोँफोस = बुद्धिमत्ता

कानिचित् क्रियाविशेषणानि तु संज्ञाशब्देभ्यो निष्पत्तिं समायान्ति। यथा—

प्रातिपदिकम्	प्रत्ययः	क्रियाविशेषणम्
आनाफान	दोँन्	आनाफानदोँन् = निरवच्छिन्नता = ओपेनली

क्रियाभ्योऽपि निष्पद्यन्ते, यथा—

धातुः	प्रत्ययः	क्रियाविशेषणम्
कुव	देन	कुवदेन = गोपनीयता

अपराणि च क्रियाविशेषणानि निपातनिरूपणावसरे प्रदर्शयिष्यन्ते।

१. "ए स्कूल ग्रीक ग्रामर" इति पूर्वोक्तग्रन्थात् शब्दनिष्पत्तिप्रक्रियातः (फारमेशन आफ द सिम्पुल वर्डस्) एते गुणवाचकशब्दा समुद्धृताः।
२. "ए स्कूल ग्रीक ग्रामर" इति पूर्वोक्तग्रन्थे १४४–१४६ पृष्ठे द्रष्टव्यम्।

एवमुपरि प्रदर्शितैरुदाहरणैरिदं स्फुटतरं जातं यत् संस्कृतेन सह साम्यं भजमानयोः पालि-प्राकृतयोः आंग्ल-ग्रीकभाषयोश्च व्युत्पन्नप्रातिपदिकशब्दानां निष्पत्तिः, प्रकृतिप्रत्ययाभ्यां क्रियते। "य एव लौकिकास्त एव वैदिकाः" इति पातञ्जल-महाभाष्योक्तरीत्या वैदिकशब्दानामपि निष्पत्तिप्रक्रिया लौकिकसंस्कृतवदेव वेदितव्या। क्वचितु प्रकृतिप्रत्यययोरादेशे भेदो दृश्यते। यथा—

अग्निमीले पुरोहितम् = अत्र ईडघटकडकारो लकारः सञ्जातः।

वेदे—कर्णेभिः, लोके—कर्णैः।

क्वचितु तुमर्थे तुम्प्रत्ययभिन्नाः सेनादयः[1] प्रत्यया दृश्यन्ते। यथा वेदे—जीव + असे = जीवसे। म्लेच्छ + इतवै = म्लेच्छितवै[2]।

लोके तु तुम्-तव्यप्रत्यययोः कृतोः जीवितुम्, म्लेच्छितव्यम् इत्यादयः शब्दा निष्पद्यन्ते। (एवं लोके वेदे क्वाचित्कौ प्रत्ययादेशौ विहाय) तयोः सर्वत्र ऐक्यमेव विद्यते। लोके (लौकिकसंस्कृते) वेदे च क्वचिद् एकस्मादेव धातोरेकस्मिन्नर्थे भिन्नाः प्रत्ययाः क्रियन्ते। यथा वेदे जीवधातोः तुमुन्नर्थे असे-प्रत्यये कृते सति "जीवसे" इति शब्दो जीवितुमित्यर्थे निष्पद्यते। लोके (लौकिकसंस्कृते) तु तस्मिन्नेवार्थे तुमुन्प्रत्ययो विधीयते। वेदे (वैदिकसंस्कृते) यस्मिन्नर्थे "जीवसे" शब्दः प्रयुज्यते, तस्मिन्नेवार्थे लोके "जीवितुं" शब्दो व्यवह्रियते। एवं "जीवसे" "जीवितुम्" इत्यादिलौकिकवैदिकशब्दयोर्भेदो दृश्यते। तथापि प्रकृतेरैक्यात् अर्थैक्याच्च तयोर्न कोऽपि विशेषो भेदः। अत एव "य एव लौकिकास्त एव वैदिकाः" इति पातञ्जलं महाभाष्यवचनं यथार्थं भजति।

(ख) तद्धित-समासक्रियाभ्यां प्रातिपदिकशब्दानां निष्पत्तिप्रकारः

अतः पूर्वं कृत्प्रत्यान्तशब्दान् उदाहृत्य केषाञ्चिन्नामिकशब्दानां निष्पत्ति-प्रक्रिया व्यावृत्ता। तद्धितप्रत्येनापि नामिकशब्दाः सिद्धिं समायान्ति। परन्तु तद्धितप्रत्येन नामिकशब्दानां (प्रातिपदिकानाम्) व्युत्पत्तिप्रक्रिया कृत्प्रत्ययप्रक्रियातो विलक्षणा। कृत्प्रत्यया धातुभ्यो विधीयन्ते, तद्धितास्तु कृत्प्रत्ययान्तशब्देभ्यो यद्वा अव्युत्पन्नप्रातिपदिकेभ्यः, समासनिष्पन्नप्रातिपदिकेभ्यश्च परं प्रयुज्यन्ते।

कृत्प्रत्ययान्ताद् यथा—दिव्यतीति देवाः, पचादित्वादच् प्रत्ययः। देवामिदमित्यर्थेन् यअञ् प्रत्यययोः[3] सतोः—दैव्यम्, दैवम् इति शब्दौ निष्पद्येते।

अव्युत्पन्नप्रातिपदिकाद् यथा—अग्नेरपत्यम् आग्नेयम्[4]।

---

१. "तुमर्थे से सेन से से०" (३।४।९) पाणिनीयसूत्रम्।

२. "कृत्यार्थे तवै केन के०" (पा० सू० ३/४/१४)।

३. देवाद्यञञौ (वार्तिकम्) "दित्यदित्यादित्य०" इति पाणिनीयसूत्रे। वै० सिद्धान्त-कौमुद्यां व्याख्यातम्।

४. "अग्निकलिभ्यां ढग्वक्तव्यः" (वार्तिकम्), "उत्सादिभ्योऽञ्" (४।१।८६) इति सूत्रे सिद्धान्तकौमुद्यां व्याख्यातम्।

समासनिष्पन्नप्रातिपदिकाद्यथा- अश्वपतेः, गणपतेर्वा अपत्यम् आश्वपतम्[1], गाणपतम्[2]। इत्थम् काषायम्[3], माञ्जिष्ठम्[4], लाक्षिकम्[5], पीतकम्[6] इत्यादीनां तद्धितप्रत्यनिष्पन्नशब्दानां देवभाषायां प्राचुर्यं विद्यते। प्राकृते संस्कृतशब्देभ्य एव प्राकृतशब्दानां व्युत्पादनात् पालिभाषायाः कच्चायनव्याकरणे तद्धितप्रकरणस्य प्रारम्भाच्च तद्धितप्रत्ययनिष्पन्नशब्दाः संस्कृतादिभाषात्रये तुल्यरूपेण समुपलभ्यन्ते। ऐरावतादिसंस्कृतशब्देभ्य एरावणादिप्राकृतशब्दानां व्युत्पत्तिप्रक्रिया "ऐस एत्" (१।३५) "दैव्यादिष्व इ" (१।६६) इत्यादिसूत्रेषु वररुचिप्रणीतप्राकृतप्रकाशाख्ये ग्रन्थे व्याख्याता। वासिट्ठादीनां तद्धितप्रत्ययान्तपालिशब्दानां निष्पत्तिर्वसिष्ठस्य अपत्यमिति विग्रहे षष्ठ्यन्तवसिट्ठादिशब्दात् णण् आदिप्रत्ययैः क्रियते। भाषात्रये तद्धितप्रत्ययान्तशब्दानां समानरूपेण समुपलब्धेः सत्त्वात् तासु परस्परं साम्यं प्रतिभाति।

ग्रीकभाषायां तु तद्धितप्रत्ययनिष्पन्नशब्दानां संस्कृतापेक्षयाऽतीव न्यूनता विद्यते। यद्यपि शब्दानां व्युत्पत्तिप्रक्रियादृष्टया भाषाद्वयं संहितप्रधानम्[7]। वैयाकरणनियमानां पर्यालोचनेन ग्रीकभाषायाः संस्कृतेन साम्यं दृष्टिपथं समायाति। तथाप्यस्यां भाषायां तद्धितप्रत्ययान्ताः शब्दाः नाममात्रमुपलभ्यन्ते। अत्र केचित् तद्धितप्रत्यान्ताः शब्दा अधस्तात् प्रस्तूयन्ते—

शब्दः	प्रकृतिः	प्रत्ययः	अर्थः
इरेत्रिएन्स	इरें त्रिया	ऍनस	इरें त्रिया = देशोत्पन्नः
वासिलें आ	वासिलें	आ	राज्ञो भावः कर्म वा राज्यम्
नें ओं तेस	नेओं	तेस	यूनो भावः कर्म वा यौवनम्
सों फिआ	सों फ	इआ	बुद्धिमत्ता
ओं नूरानिओं स	ओं नूरान्	इओं स	विशालता
वों रें ओं देस	बों रेआ	देस्	बारिआख्यस्यापत्यम्
बों रें ओं दों स	बों रेआ	दों स	वारेआख्यस्य पुत्री
प्रिआमिदेस	प्रिआम	इदेस	प्रिआमाख्यस्यापत्यम्
प्रिआमिदों स	प्रिआम	इदों स	प्रिआमाख्यस्य पुत्री

इत्यादि[8]।

---

१. २. "अश्वपत्यादिभ्यश्च" (४।१।८४ पाणिनीयसूत्रम्)।
३. ४. 'तेन रक्तं रागात्" (४।२।१ , ,,)
५. लाक्षारोचनाट्ठक्" (,,)
६. "पीतात् कन्" (वार्तिकम्)
७. प्रकृतिप्रत्ययनिष्पन्नशब्दप्रधानम्।
८. "ए स्कूल ग्रीक ग्रामर" ग्रन्थस्य १४५तमपृष्ठात् समुद्धृता इमे शब्दाः।

यथा दैव्या गिरि राष्ट्रे भवो राष्ट्रियः, राज्ञो भावः कर्म वा राज्यम्, गणपतेरपत्यं गाणपतमित्यादिराष्ट्रादिशब्देभ्यो भवाद्यर्थे घादिप्रत्यया विधीयन्ते। तथैव ग्रीकभाषायामपि "बोरे ओं" इत्यादिशब्देभ्योऽपत्यार्थे देसादि-प्रत्ययाः प्रयुज्यन्ते। एवमाधुनिक्यामांग्लभाषायामपि देशवाचकादिशब्देभ्यो भवाद्यर्थे[1] प्रत्यया विधीयन्ते; किन्तु अपत्यार्थे न कोऽपि प्रत्ययो दृश्यते। रामस्य पुत्रः (अपत्यम्) इत्यादौ रामशब्दात् परं षष्ठ्यर्थबोधकं 'स' वर्णं प्रयुज्य पुत्रार्थवाचकः सन शब्दो व्यवह्रियते। यथा "राम'स सन" इत्यादि।

समासनिष्पन्नाः शब्दाः—

समासविषये समासप्रधानवाक्यस्य व्याख्यावसरे पूर्वं किञ्चित् प्रतिपादितम्। तत्र 'सुपां सुपा' इति कारिकामुद्धृत्य उदाहरणमुखेन समासः षड्विधः प्रतिपादितः। बालानां सुखबोधाय समासश्चतुर्धा[2] केनचिद् विभज्यते। ते यथाक्रममधस्ताद् अङ्किताः—

१—अव्ययीभावः,	२—तत्पुरुषः,	३—द्वन्द्वः,	४—बहुव्रीहिः।
अपदिशम्,	राजपुरुषः,	रामकृष्णौ,	पीताम्बरः

इतीमानि तेषां क्रमश उदाहरणानि।

परन्त्वव्ययीभावादेर्यल्लक्षणं क्रियते, तद् अव्याप्त्यतिव्याप्तिदोषग्रस्तत्वात् प्रायोवादम्। उन्मत्तगङ्गमित्यव्ययीभावे पूर्वपदार्थप्राधान्याभावाद् अव्याप्तिः। अन्यपदार्थप्राधान्याद् बहुव्रीहिलक्षणातिव्याप्तिश्च। अत्र "अन्यपदार्थे च संज्ञायाम्" (पा० सू० २।१।२१) इति समासः। "अर्धं पिप्पली" इति तत्पुरुषसमासे पूर्वपदार्थप्राधान्यसत्त्वाद् अव्ययीभावातिव्याप्तिः। तत्पुरुषाव्याप्तिश्च, "अर्धं नपुंसकम्' (पा० सू० २।२।२) इति समासात्। एवं पूर्वकायमित्यादौ द्रष्टव्यम्। "द्वित्रा" इति बहुव्रीहावुभयपदार्थप्राधान्याद् द्वन्द्वबहुव्रीह्योरति-व्याप्तिश्च। "शशकुशपलाशम्" इत्यादौ द्वन्द्वे समाहारे अन्यपदार्थप्राधान्याद् बहुव्रीह्यतिव्याप्तिः, द्वन्द्वाव्याप्तिश्च। अतः "समासश्चतुर्धा" इति वचनं प्रायोवाद बालानाञ्च कृते। यथा कृत्तद्धितप्रत्ययनिष्पन्नशब्दानां व्यक्तिजात्यादिभेदेन

१. यथा "इण्डिया" "अमेरिका" आदिशब्देभ्यो भवार्थे नप्रत्यये इण्डियन, अमेरिकन इत्यादयः शब्दा निष्पद्यन्ते।

२. समासस्तु चतुर्द्धेति प्रायोवादस्तथापरे।
योऽयं पूर्वपदार्थादिप्राधान्यविषयः स च ॥ २७ ॥
भौतपूर्व्यात् सोऽपि रेखागवयादिवदास्थितः ॥

"चतुर्था अव्ययीभाव-तत्पुरुष-द्वन्द्व-बहुव्रीहिभेदात्। अयं प्रायोवादः। भूतपूर्वः। दन्भूः। काराभूः। आयतस्तूः। व गर्थाविव, इत्याद्यसंग्रहात्"।

—कौण्डभट्टकृते भूषणसारे समासशक्तिनिर्णयः।

त्रयो भेदास्तथैव समासनिष्पन्ना अपि शब्दा जात्यादिभेदेन त्रिविधाः। राम-कृष्णौ, कुम्भकारः, नीलपीतौ, पिबतखादता – इत्यादीनि समासनिष्पन्नानां व्यक्तिजात्यादिवाचकशब्दानां क्रमशः उदाहरणानि वेदितव्यानि।

एवं पालि-प्राकृतभाषयोरपि समासनिष्पन्नाः शब्दाः प्राचुर्येण समुपलभ्यते। उदाहरणार्थं केचिच्छब्दा अधस्तात् प्रस्तूयन्ते—

पालिभाषायाम्[1]—

अव्ययीभावः[2] उपनगरम्।

तत्पुरुषः—खत्तियकञ्ञा = क्षत्रियकन्या। महापदुमवनं[3] = महापद्मवनम्।

द्वन्द्वः —चन्दिमसुरिया = चन्द्रसूर्यौ।

बहुव्रीहिः[4]—दीघजङ्घो = दीर्घजङ्घः।

प्राकृते तु अव्ययीभावादिसमासाः संस्कृतवदेव निष्पाद्यन्ते। उक्तञ्च वररुचिना प्राकृतप्रकाशाख्ये ग्रन्थे "शेषः संस्कृतात्" (१८) इति नवमपरिच्छेदे। उक्तेभ्योऽन्यः शेषः। सुप्तिङ्तद्धितसमासप्रत्याहारकारकलिङ्गसंख्यादयोऽत्र नोक्ताः। ते संस्कृतात् समीक्ष्याऽवगन्तव्याः।

एवं संस्कृतेन सह साम्यं भजमानयोर्भाषयोः समस्तशब्दानां व्यवहारो दृष्टिगोचरीभवति। अयं व्यवहारो न केवलं भारतीयभाषासु, अपि तु ग्रीकेति भाषायामपि समासप्रक्रियया नामिकशब्दा निष्पाद्यन्ते। परन्तूभयत्र किमप्यन्तरं दृष्टिपथं समायाति। दैव्यां गिरि समासबोधनाय न किमपि चिह्नं प्रयुज्यते। परन्तु ग्रीकभाषायां द्वयोः शब्दयोः समासे सति तद्बोधनाय च "—" इत्येवं लम्बायमाना रेखा प्रयुज्यते। अत्रोदाहरणार्थं केचित् समासनिष्पन्नाः शब्दा अध-स्तात् प्रस्तूयन्ते—

ग्रीकभाषा	**आंग्लभाषा**	**संस्कृतेऽनुवादः**
पेथ—आहों'स	ओबेडियण्ट + आथारिटी	कर्तव्यशीलोऽधिकारी
प्लेक्स-हिप्पों'स	हार्स + लाशिंग	घोटकं कसया ताडयन्
में'न—ए—एपों'	स्टेडफास्ट इन वैटिल	संग्रामे दृढः
लेमों'स		

इत्यादयः[5] शब्दाः।

१—कच्चायनव्याकरणे "उपसर्गनिपातपुब्बको अव्ययीभावो" (२।७।४)।

२—"महतं महा तुल्याधिकरणे पदे" (२।७।१५)।

३—"समुच्चयो द्वन्द्वो" (२।७।१४)।

४—"इत्थियं भासितपुमित्थी पुमा व च" (२।७।१६)–एषु सूत्रेषु इमान्युदाहरणानि प्रदत्तानि।

५ "ए स्कूल ग्रीक ग्रामर" इति पूर्वोक्तग्रन्थस्य १४७ तमे पृष्ठे इमे शब्दाः प्रदर्शिताः।

ग्रीकभाषायामिमानि[१] समस्तपदानि काव्यसम्बन्धियौगिकशब्दनाम्ना व्यपदिश्यन्ते। एतादृक्षु समस्तशब्देषु पूर्वपदं क्रिया, उत्तरश्च संज्ञाशब्दः। क्रियायाश्च सुबन्तेन सह समासः, यथा दैव्यां गिरि "जहिस्तम्बः" इत्यादौ क्रियाणां (तिङन्तानाम्) सुबन्तेन सह समासः क्रियते, तथैव ग्रीकभाषायामपि—इत्येभिरुदाहरणैः सुस्पष्टं जातम्।

केचित् समासनिष्पन्नशब्दा विशेषणसमासनाम्नाऽभिधीयन्ते। अयं समासः संज्ञाक्रियाविशेषणवाचकशब्दानां परस्परं समासे कृते सति यः शब्दो निष्पद्यते स विशेषणनाम्नाऽभिधीयते। यथा—

ग्रीकभाषा	आंग्लभाषा	संस्कृतेऽनुवादः
लोॅगोॅ—ग्रोॅफोॅस	स्पीचराइटर	भाषणस्य लेखकः
मिस—आन्थ्रोॅपोॅस	मैनहेटिङ्ग	मानवं घृणयन्[२]

इत्यादयः[३]।

एषु समासनिष्पन्नशब्देषु कश्चिच्छब्दो द्वयोः शब्दयोः समासे कृते सति निष्पद्यते, यथा—लोॅगा—ग्रोॅफोॅस इति, भाषणस्य लेखक इति तदर्थः। अयं समासः संस्कृतव्याकरणदृष्टया "सुपां सुपा" इति नाम्ना व्यपदेष्टुमर्हः। यथा "राज्ञः पुरुषः राजपुरुषः" इत्ययं शब्दः तत्पुरुषसमासेन निष्पद्यते, तथैव लोॅगोॅ-ग्रोॅफोॅस शब्दोऽपि तेनैव प्रक्रियया निष्पादयितुमर्हः।

कश्चिच्छब्दः "कुम्भकारः" इत्यादिवद् उपपदसमासेन निष्पद्यते, तद्यथा—मिस-आन्थ्रोपोॅस = मानवं घृणयन् इति। यद्यपि कर्मोपपदे सति "कर्मण्यण्" (३।२।१) इत्यण्प्रत्यय एव विधीयते, न तु शतृप्रत्ययः। तथापि ग्रीकभाषायां कर्मोपपदे सति धातोः शत्रर्थकः प्रत्ययः प्रयुज्यते। यद्वा, शेषषष्ठ्या सह अत्र समासो बोद्धव्यः। एवं समासप्रक्रियया नामिकशब्दानां व्युत्पत्तिरस्यामपि भाषायां क्रियते। ग्रीकभाषायामेते समासनिष्पन्नशब्दा यौगिकनाम्ना यद्वा मिश्रितनाम्ना (कम्पाउण्ड बर्ड) व्यपदिश्यन्ते। कृत्तद्धितसमासप्रक्रियाभिः नामिकशब्दानां निष्पादनं ग्रीकभाषायामपि दर्शनात्तया सह दैव्या वाचः प्रायेण साम्यमेव दृष्टिपथं समायाति।

---

१. Poetic Compound Words.
उपर्युक्ते ग्रन्थे १४७ तमे एतदीयोंऽशो द्रष्टव्यः।

२. घृणयन् = नामधातुनिष्पन्नोऽयं शब्दः। द्वितीयविभक्त्यन्तघृणाशब्दात् "तत्करोति तदाचष्टे" इति णिचि प्रत्ययेऽनुबन्धादिलोपे सति घृणिधातोः शतृप्रत्यये सत्ययं शब्दो निष्पद्यते।

३. "ए स्कूल ग्रीक ग्रामर" इति ग्रन्थे १४८तमे पृष्ठे एतदीयोंऽशो द्रष्टव्यः।

(२) आख्यातः

पदविभाजनस्य द्वितीयो भागो विद्यते—आख्यात इति। आख्यातः क्रियातिङन्तपदाभ्यामपि व्यपदिश्यते। कर्तृकर्मभाव-(भावः स्ववाच्यः) वाच्यभेदेन आख्यातस्त्रिविधः। अत्र प्रमाणम्—"लः कर्मणि च भावे चाकर्मकेभ्यः" (३।४। ६९) इति पाणिनीयसूत्रमेव। यद्यपि कर्तृकर्मसंख्याकालाः ककारस्य, यद्वा तिङो वाच्याः। उत्तरदेशसंयोगादिरूपं फलम्, तदनुकूलव्यापारश्च तिङ्प्रत्ययप्रकृतिभूतस्य धातोर्वाच्यौ। फलाश्रयं कर्म व्यापाराश्रयश्च कर्ता। तदुक्तं कौण्डभट्टेन **वैयाकरणभूषणसारे** धात्वर्थनिर्णये—

फलव्यापारयोर्धातुराश्रये तु तिङः स्मृताः।
फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणम्॥

एवं कर्त्रादीनां तिङ्वाच्यत्वात् तद्भेदेन पचतीत्यादिक्रियाया विभाजनमसङ्गतं प्रतिभाति। तथाऽपि प्रक्रिया-दृष्टया तिङो भवतीत्यादिक्रियाया अवयवभूतत्वात् तद्वाच्यस्य कर्त्रादेरपि तिङर्थत्वात्। आधुनिकभाषाशास्त्रस्य ग्रीकादिव्याकरणस्य च सरणिमाश्रित्य कर्त्रादिवाच्यभेदेन आख्यातं व्यभजनम्। एवं कालभेदेनापि आख्यातः (क्रिया) अग्रे विचारयिस्यते। अतीतकाले प्रजावर्गेषु व्यवहृतयोः पालिप्राकृतयोरपि कर्त्रादिवाच्यभेदेन क्रियाविभाजनं दैवीं गिरमेवानुसरति। अत एव कच्चायनो व्याकरणशास्त्रे कर्तरि परस्मैपदम्[१], कर्मणि भावे च आत्मनेपदं[२] विदधाति। प्राकृतभाषाचणो वररुचिस्तु आख्यातविषये प्रायेण पाणिनीयां पद्धतिमेवासरति।

क्रियायाः कर्त्रादिवाच्यविषये दैव्या गिरो ग्रीकभाषया सह साम्यम्[३], आंग्लभाषया च सह वैषम्यं दृष्टिपथं समायातः। आंग्लभाषायां वाच्यभेदेन क्रियायाः कर्तृकर्मेति प्रकारद्वयम्, ग्रीकभाषायाञ्च कर्तृभाव (स्ववाच्य) भेदेन प्रकारत्रयं स्वीक्रियते।

विध्यादिभेदेन क्रियाया विवेचनम्

आशीर्वादादिभेदेन क्रियाया बहवो भेदा अस्माकं दैव्यां गिरि दृष्टिगोचरौ भवन्ति। तेषां मध्ये कांश्चित् क्रियाः पाणिनीयसूत्रनिर्देशपुरःसरमधस्तात् प्रस्तूयन्ते। ता यथा—

---

१. "कर्तरि परस्मैपदम्" (३/२/५)।

२. "अत्तनोपदानि भावे च कम्मनि" (३/२/२२)।

3. The Greek Vreb has three voices, the active middle and Passive.
—"A School Greek Grammar"—p. 59.

आशीर्वादात्मिका—

यया क्रियया आशीर्वादः समवगम्यते, सा एतन्नामिका क्रिया व्यपदिश्यते। उक्तञ्च पाणिनिनाऽष्टाध्याय्यां "आशिषि लिङ्लोटौ" (३।३।१७३)। मङ्गलं ते भवतु, भवतात् इति उदाहरणम्।

विध्याद्यर्थविबोधिका—

आसां क्रियाणां निर्देशः "विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ्" (३।३।१६) इति सूत्रे।

यद्यप्यनेन सूत्रेण एष्वर्थेषु द्योतेषु लिङ्लकारो विधीयते, तथाप्यनेन सूत्रेण विध्याद्यर्थविबोधिकाः क्रिया अपि सन्तीत्यवगम्यते। एतत्सूत्रघटकविधिशब्दस्य प्रेरणार्थो वाच्यः। प्रेरणं भृत्यादेर्निकृष्टस्य प्रवर्तनम्। तदयथा—भृत्या इदं कुर्युः। इदं कार्यं कुरुतेत्याज्ञापयामीत्यर्थः। यजेत। निमन्त्रणम् = नियोगकरणम्, आवश्यके श्राद्धभोजनादौ दौहित्रादेः प्रवर्तनम्। यथा—इह भुञ्जीत भवान्। आमन्त्रणम् = कामचाराऽनुज्ञा। परेच्छां ज्ञात्वा अनु पश्चाद् यदाज्ञा क्रियते सा कामचारानुज्ञा। यथा—इहासीत। अधीष्टञ्च सत्कारपूर्वको व्यापार उच्यते—पुत्रमध्यापयेद् भवान्। सम्प्रश्ने—किं वेदमधीयीय उत तर्कम् ? प्रार्थने—भो भोजनं लभेय।

आशंसात्मिका[1] (आशंसा = सम्भावना) क्रिया - यया कस्यचित् सम्भावना प्रतीयते, सा क्रिया एतन्नाम्ना व्यपदिश्यते। आशंसार्थे द्योत्ये सति यथा—देवश्चेदवर्षीत्, वर्षति वर्षिष्यति वा धान्यमवाप्स्म, वपामो वप्स्यामो वा। गुरुश्चेदुपेयाद् आशंसेऽधीयीय। आशंसे क्षिप्रमधीयीय[2]।

एवं भट्टोजीदीक्षितप्रणीतायाः **सिद्धान्तकौमुद्याः** लकारार्थप्रक्रियायां पाणिनीयसूत्रनिर्देशपुरःसरं यदर्थेषु लकारा विहितास्तदनुसारेण क्रियाया बहवो भेदाः समायान्ति। अत्र सर्वेषामुल्लेखो विस्तरभयाद् दुष्करः। यया क्रियया या परिस्थितिः संसूच्यते, सा क्रिया तन्नामिका बोद्धव्येति संक्षेपतोऽत्र समवगच्छेत्।

ग्रीकभाषायां तु परिस्थित्यनुसारेण[3] सर्वाः क्रियाः पञ्चसु भागेषु विभक्ताः। ता यथा—

---

१. आशंसनम् = आशंसा, अप्राप्तस्य प्राप्तुमिच्छा। भट्टोजीदीक्षितकृतवैयाकरणसिद्धान्तकौमुद्यां 'आशंसायां भूतवच्च" (३।३।१३२) इति पाणिनीयसूत्रस्य तत्त्वबोधिनीव्याख्यायामाशंसाशब्दो व्याख्यातः।

२. "आशंसावचने लिङ् (३।३।१३४) इति पाणिनीयसूत्रेणात्र लिङ्लकारः।

३. ग्रीकभाषायास्तत्तद्व्याकरणग्रन्थेषु क्रियाणां पञ्च विभागाः परिस्थित्यनुसारेण प्रोक्ताः। तदनुसृत्य मूले सर्वं प्रोक्तम्।

(१) सामान्यावस्था,[1] (२) सम्भावनावस्था,[2] (३) विध्याद्यवस्था,[3] (४) आज्ञार्थिका,[4] (५) असमापिका[5] क्रिया।

आंग्लभाषायां तु विध्याद्यवस्थाऽसमापिकेत्यवस्थेति द्वयं विहाय अवस्थात्रयमेव क्रियायाः स्वीक्रियते। परिस्थित्यनुसारेण क्रियायां योऽयं विभागो ग्रीकादिव्याकरणग्रन्थेषु समुपलभ्यते, तल्लक्षणानुसारेण सामान्याद्यवस्थां भजमानाः क्रिया दैव्यां गिर्यपि समुपलभ्यन्ते। तद्यथा सामान्याद्यवस्था, यत्र सामान्यमितिवृतम्, प्रश्नः, सत्या कल्पना च प्रतीयेरन्, सा क्रिया सामान्या वस्थाऽऽपन्ना व्यवह्रियते।

ग्रीकभाषा	संस्कृतम्
ग्राफे[6]	स लिखति
ऍग्राफॅन[7]	स अलेखीत्
ग्राप्से[8]	स लेखिष्यति
गॅग्राफॅन[9]	स लिखितवानस्ति।

(२) सम्भावनावस्था = लेट् लकारः (लिङर्थे लेट्) इच्छासन्देहोद्देश्यानि—यथार्थविहीनाश्च कल्पना यत्र प्रकटीक्रियन्ते, ताः क्रिया इमामवस्थामापन्ना व्यवह्रियन्ते। यथा—

(१) एअन ऍल्थे तूता पाइएसो—यदि स आगच्छेत्, तदाहं इदं कुर्यासम्। एअन = यदि। ऍल्थे = आगच्छेत्। तूता = तर्हि इदम्। पाइएसो = करिष्यामि।

(२) एहॅताइ हिना तूतो इदॅ = अहिमदं द्रष्टुं शक्नुयामिति स आगच्छति। इदे = (अहमिति कर्ता अध्याहार्यः) द्रष्टुं शक्नुयाम्। तूतॉ = इदम्, इति। एहॅताइ = स आगच्छति।

क्रियाया इयमवस्था "आशंसायां भूतवच्च"[10] (३।३।१३२), आशंसावचने लिङ्"[11] (३।३।१३२), सम्भावनेऽलमिति[12] चेत्सिद्धाप्रयोगे"

There are five moods.
1. Indicative Mood.
2. Subjunctive mood.
3. Optative mood.
4. Impertive Mood.
5. Infinitive mood.

६. ७,८, "ए स्कूल ग्रीक ग्रामर", सेक्सन २।३ १९० इति पृष्ठे द्रष्टव्यम्।

९. अस्य सूत्रस्य "देवश्चेदवर्षीत्, वर्षति, वर्षिष्यति वा धान्यमवाप्स्म, वपामः, वप्स्यामो वा इत्युदाहरणम्। क्रमशोऽन्येषामपि उदाहरणानि निम्नाङ्कितानि।

१०. गुरुचेदुपेयाद् आशंसे क्षिप्रमधीयीय।

११. अपि गिरिं शिरसा भिन्द्यात्। सिद्धाप्रयोगे किम् ? अलं कृष्णो हस्तिनं हनिष्यति।

१२. सम्भावयामि भुञ्जीत भोक्ष्यते वा भवान्। अयदि किम् ? सम्भावयामि यद् भुञ्जीथास्त्वम्।

(३।३।१५४), "विभाषा[1] धातौ सम्भावनावचनेऽयदि" (३।३।१५५), "हेतु-हेतुमतोर्लिङ्"[2] (३।३।१५६) "इच्छार्थेषु[3] लिङ्लोटौ" (३।३।१५७) इत्यादि-सूत्रैः सह तोलयितुं शक्यते ।

(३) विध्यवस्था—लिङ् लकारः (आप्टेटिव)

आंग्लभाषायामियमवस्था सम्भावनावस्थायामन्तर्भूता । ग्रीकभाषायामिमामवस्थामापन्नाः क्रियाः प्रायेण भूतकालिकक्रियया सह प्रयुज्यन्ते । क्वचित्तु वर्तमानकालिकक्रिययाऽपि सह प्रयुज्यते । संस्कृते सम्भावनायामथ च विध्यर्थे उभयत्र लिङ् लकारः प्रयुज्यते, परन्तु ग्रीकभाषायां वर्तमानादिक्रियया[4] सह सम्भावनाद्यर्थे प्रायेण द्वितीयामवस्थामापन्ना, भूतकालिकक्रियया[5] च सह तृतीयामवस्थामापन्नाः[6] क्रियाः प्रयुज्यन्ते । यथा—

(१) एजन एँल्थे तूतोँ पाएँएसो = स आगच्छेच्चेदिदं कुर्याम् ।

इदं वाक्यं पूर्वमेव लकारप्रतिपादनावसरे समुदाहृतम् ।

(२) एँफावेँतोँ मे तूतोँ गेँनाइतोँ = इदं घटितुं न सम्भवेदिति स अबिभेत् । तूतोँ = इदम् । मे = नहि । गेनाइतोँ = घटितुं सम्भवेद् इति । एंफावेता = अबिभेत् ।

(३ एल्थेँन इना तूतोँ इदोँए = अहं द्रष्टुं शक्नुयामिति स आगच्छत् । अत्र "शकि लिङ् च" (३।३।१७२) इति लिङ्लकारः ।

तूतोँ = इदम्, तत् । इदोँए = द्रष्टुं शक्नुयामिति । इना = इति । एल्थेन = (स) आगच्छत् ।

(४) आज्ञार्थिका क्रिया—(इम्परेटिव मूड) अनया क्रियया आज्ञा प्रकटीक्रियते । यथा—तूतोँ पाए एइ = इदं करोतु । तूतोँ = इदम्, पाए एइ—करोतु ।

क्वचित्तु भविष्यत्कालिकीमिच्छामवबोधयितुं तृतीयाऽवस्थावती क्रिया (आप्टेटिव) प्रयुज्यते । यथा—

१. कृष्णं नमेच्चेत् सुखं यायात् । कृष्णं नंस्यति चेत्सुखं यास्यति ।

२. इच्छामि भुञ्जीत, भुंक्तां वा भवान् । अत्र विषये श्रीभट्टोजीदीक्षितकृतायां वैयाकरणसिद्धान्तकौमुद्यां लकारार्थप्रक्रिया द्रष्टव्या ।

3-4 Final Classes take the subjunctive after primary Sentences, and the aptative after secondary tenses.

5. A School Greek Grammar 3. Sec. p.191.–192.

6. A School Greek Grammar ,p.19.

एँथेँ फिलाँस हेमिन गेँनोँइओँ । = साधु भवेत् यदि त्वं नो मित्रं भवेः ।
एथेँ – साधु भवेद् (यदि भवान्)
हेमिन = अस्माकम् (अस्मभ्यम्)
फिलास[2] = मित्रं गेँनोँइओँ = भवेत् ।

(५) असमापिकावस्था—असमापिकावस्थायां क्रियावाचकसंज्ञाशब्दः प्रयुज्यते । ग्रीकभाषायामस्यामवस्थायां प्रयुज्यमानेन क्रियाशब्देन संस्कृतभाषीयैस्तुमुन्-ण्वुलन्तशब्दैः सह साम्यं कर्तुं शक्यते । क्रियार्थायां क्रियायामुपपदे सति भविष्यत्यर्थे धातोरेतौ प्रत्ययौ विधीयेते । तुमुन्नन्तशब्दोऽस्माकं संस्कृते नपुंसकलिङ्गः ग्रीकभाषायामप्येवमेव समायाति । अस्योदाहरणं यथा—

एक्सेन मेनेँइन = स्थातुमासीद् दुष्करम् ।
एक्सेन = असम्भवम् (आसीत्) । मेनेँइन = स्थातुम् ।

यथा ग्रीकभाषायां सम्भावनाद्यवस्थाबोधिकाः क्रिया वर्तमानातिरिक्तयाऽप्यनद्यतनभूतादिकालिकक्रियया सह समुपलभ्यन्ते, तथैव गीर्वाणवाण्यामपि । पाणिनिना "विधिनिमन्त्रणामन्त्रण०" इत्यादिसूत्रेण विध्याद्यर्थेषु लिङ्लोट्लकारौ विहितौ । किन्त्वनयोर्भूतकाले वर्तमानकाले वा विध्याद्यर्थेषु प्रयोगः कर्तव्यः–इत्येवमपि निर्देशः समुपलभ्यते । यथा "आशंसावचने लिङ्" (३।६।१३४) इति पाणिनीयसूत्रेण भविष्यत्यर्थे गुरुश्चेदुपेयाद् आशंसेऽधीयीय–इत्यत्र "विभाषा कथमि लिङ् च" (३।३।१४३) इति सूत्रेण "कथं धर्मं त्यजेस्त्यजसि वा" इत्यत्र कालत्रये लिङ्लकारो विहितः । तेन ज्ञायते--लिङादिलकारस्य कालत्रये प्रयोगः क्रियते । ग्रीकभाषायामिव अस्यामपि भाषायां भूतादिकालिकक्रियया सह लिङ्लकारस्य (आप्टेटिव) समुपलब्धिर्यथा—वाल्मीकीयरामायणे सुन्दरकाण्डस्य प्रथमसर्गे—

कायवृद्धिं प्रवेगञ्च मम दृष्ट्वैव राक्षसाः ।
मयि कौतूहलं कुर्युरिति मेने महामतिः ।। २०८ ।।

अत्र "मेने" इति परोक्षभूतकालिकक्रियया "कुर्युः" इति भूतकालिको लिङ्लकारः ।

ततः[3] सा ह्रीमती बाला भर्तुर्विजयहर्षिता ।
अवोचद् यदि तत्तथ्यं भवेयं शरणं हि वः ।।

1. A School Greek Grammar, P. 211.
2. The Infinitive is a verbal noun which expresses the simple idea of a verb without restriction of person or number--A School Greek Grammar P. 191.
३. श्रीमद्वाल्मीकीयरामायणस्य सुन्दरकाण्डम्, सर्गः ५८, श्लो० ९० ।

ततो भर्तुर्विजयहर्षिता सा ह्रीमती वाला "यदि तत्तथ्यम् (तर्हि) वः शरणं भवेयम्" इत्यवोचद् । अत्रापि श्लोके भूतकालिकक्रियावद्धवाक्येन सह "भवेयम्" इत्यत्र लिङ् लकारो विहितः ।

लोट्लकारस्यापि भूतादिकालिकक्रियावद्धाक्यैः सह प्रयोगो दृष्टिपथं समवतरति, यथा श्रीमद्भागवतस्य दशमस्कन्धे प्रथमाध्याये—

गिरं समाधौ गगने समीरितां, निशम्य वेधास्त्रिदशानुवाच ह ।
गां पौरुषीं मे श्रृणुतामराः पुनर्विधीयतामाशु तथैव मा चिरम् ॥ २१ ॥

अत्र "उवाच" इति भूतकालिकक्रियया सह "श्रृणुत" "विधीयताम्" इति भूतकालिके आज्ञार्थिके क्रिये । भविष्यत्कालस्योदाहरणं यथा—

कृष्णश्चेद् भोक्ष्यते त्वं गाश्चारय । अत्र "भोक्ष्यते" इति क्रियासाहचर्याच्चारयेति भविष्यत्कालिको लोट्लकारः । एवम् असमापिकायाः क्रियाया अप्युदाहरणानि समुपलभ्यन्ते, यैः कालत्रये तस्याः प्रयोगस्य साधुत्वं प्रमाणीकर्तुं शक्यते । तदुदाहरणं यथा—ग्रामं गन्तुं तृणं पस्पर्श, स्पृशति, स्प्रक्ष्यति । अत्र भूतादिकालिकपस्पर्शादिक्रियाभिः सह "गन्तुम्" इत्यसमापिकायाः क्रियाया प्रयोगः कृतः ।

कालः

कर्तृकर्मसंख्याकालाश्चत्वारस्तिङर्थाः । एतेषां मध्ये कालो धात्वर्थव्यापारे विशेषणम् । कश्चिद्व्यापारः कस्मिंश्चित् काले एव क्रियते । अत एव लोके पृच्छ्यते —"इदं कार्यं कदा कृतम्" ? "कदा वा करिष्यसि ?" इत्यादि । अतः क्रियान्वयीभूतधात्वर्थव्यापारस्य कालविशेषणतया कालस्यापि विचारः परमावश्यकः ।

दैव्या गिरो व्याकरणशास्त्रानुसारेण कालो भागत्रये विभक्तः—

(१) वर्तमानः[1], (२) भूतः, (३) भविष्यच्च ।

वर्तमानकालः—भूतभविष्यद्भिन्नः कालः । [2]यावच्चाभिमतफलप्रयोज्यक्रियायाः समाप्तिर्न भवति, तावद् वर्तमानत्वम् । अधिश्रयणाद्यधःश्रयणान्तव्यापारसमूहस्य पचधात्वर्थत्वेन अधःश्रयणादिक्रियायाः समाप्तिपर्यन्तं "पचति" इत्येव प्रयोगः । वर्तमानाख्यकालस्य कोऽपि विभागो न दृश्यते ।

---

१. यद्यपि भूतवर्तमानभविष्यद् इत्यपि क्रमशः समीचीनस्तथाऽपि भट्टोजीदीक्षितकृतवैयाकरणसिद्धान्तकौमुद्यादिग्रन्थेषु "वर्तमाने लट्" (३।२।१२३) इत्यादिसूत्रे वर्तमानकालेऽस्यैव सर्वप्रथमं व्याख्यानात् स प्रथमं व्याख्यातः ।

२. भट्टोजीदीक्षितकृत वै० सि० कौमुद्यां "वर्तमाने लट्" (३।२।२३) इति सूत्रस्य दाधिमथटिप्पणीतः समुद्धृतम् ।

भूतकालः—वर्तमानभविष्यद्भिन्नः कालः । "परोक्षे लिट्" (३।२।११) "अनद्यतने लङ्" (३।२।१११) इति पाणिनीयसूत्रप्रामाण्येनायं कालः "अनद्यतनः", "परोक्षश्च" इति द्विधा प्रतिभाति । किञ्च "अनद्यतने लङ्" (३।२।१११) इति पाणिनीयसूत्रेऽनद्यतने इत्युक्त्याऽद्यतनभूतकालोऽपि भवतीति ध्वन्यते । एवं भूतकालः (क) अद्यतनः, (ख) अनद्यतनः (ग) परोक्षः—इति त्रिधा विभक्तः ।

यो व्यापारोऽद्यैव परिसमाप्तिं गतस्तत्र अद्यतनभूतकालिकी क्रिया प्रयुज्यते । यथा—अद्य भाषणमभूत् । यश्च व्यापारोऽद्यतनदिवसात् पूर्वेद्युः कृतः, स्वचक्षुर्भ्यां दृष्टश्च, तद्व्यापारमवबोधयितुम् अनद्यतनभूतकालिकी क्रिया प्रयुज्यते । यथा—वर्षद्वयात् पूर्वमहं ग्राममगच्छम्, स ग्राममगच्छत् ।

चक्षुर्भ्यामदृष्टम् अतीतकाले निष्पन्नञ्च व्यापारमभिव्यक्तुं परोक्षभूतकालिकी क्रिया प्रयुज्यते । यथा रामो रावणं जघान इत्यादि । चित्तविक्षेपाद्यवस्थायामुत्तमपुरुषेण यो व्यापारः क्रियते, तत्रापि परोक्षकालिकी क्रिया प्रयुज्यते, चित्तविक्षेपादिना पारोक्षस्य सत्त्वात् । अस्योदाहरणं यथा—

सुप्तोऽहं किल विललाप, बहु जगद पुरस्तात्तस्य मत्ता किलाहम् ।

भविष्यत्कालः—वर्तमानभूतभिन्नः कालः । "अनद्यतने लुट् (३।३।१५) इति सूत्रेऽनद्यतनेत्युक्त्या अद्यतनानद्यतनभेदेनाऽयं कालो द्विधा विभज्यते । अनद्यतनेऽनागते च काले करिष्यमाणं व्यापारञ्च व्यपदेष्टुमनद्यतनभविष्यत्कालिकी क्रिया प्रयुज्यते । यथा—श्वः सभा भविता । अद्यतनेऽनागते काले लृट्लकारः प्रयुज्यते । यथा—अद्य सभा भविष्यति ।

एवं सामान्यरूपेण भूतस्य त्रीन् भेदान्, भविष्यतश्च भेदद्वयं वर्तमानञ्च सङ्कलय्य कालः षड्धा प्रतिभाति । पालिभाषायां तु प्रायेण संस्कृतवदेव क्रियायाः काला भवन्ति । अतः कालदृष्ट्या तया सह अस्याः साम्यं प्रतीयते । परन्तु कच्चायनव्याकरणेऽद्यतनानद्यतनभेदेन भविष्यतो भेदो दृष्टिपथं न समायाति । तथापि यावद् अनागतः कालो भविष्यन्नाम्ना व्यवह्रियते । शेषञ्च सर्वं पाणिनीयवदेव । यथा—

पालिभाषायां कच्चायनव्याकरणे	**संस्कृते पाणिनीयव्याकरणे**
वत्तमाना पच्चुप्पन्ने (३।१।९)	वर्तमाने लट् (३।२।१२३)
पाटलिपुत्तं गच्छति ।	पाटलिपुत्रं गच्छति ।
अपच्चक्खे परोक्खातीते (३।१।१२)	परोक्षे लिट् (३।२।११५)
एवं किल पोराणा आहुः ।	एवं किल पौराणिका आहुः ।
हीयोप्पभुति पच्चक्खे हीयत्तनी (३।१।१३)	अनद्यतने लङ् (३।२।१११)
सो मग्गं अगमा ।	स मार्गम् अगच्छत् ।
समीपेज्जतनी (३।१।१४)	लुङ् (३।२।११०)
सो मग्गं अगमि ।	स मार्गमगमत् ।

अनागते भविस्सन्ती (३।१।१६) लृट् शेषे च (३।३।१३)
सो गच्छिस्सति । स गमिष्यति ।

एवमुपर्युद्धृतवाक्यानां सूत्राणाञ्च समीक्षया पालिसंस्कृतयोः प्रायेण साम्यमेव प्रतिभाति । वर्तमानादिकालविभाजनदृष्टया संस्कृतप्राकृतयोस्तु भेदो दृष्टिपथं समायाति । भूतभविष्यतोऽनद्यतनादिभेदेन संस्कृतवदत्र भेदो न भवति । वर्तमानभूतभविष्यद्भेदेन मुख्यतमास्त्रय एव काला वररुचिना स्वीक्रियमाणाः दृश्यन्ते । प्राकृतप्रकाशस्य कानिचित् सूत्राणि समुद्ध्रियन्ते, येनोपर्युक्तं वचनं दृढ़तरं सेत्स्यति ।

(१) इडमिपोर्मिः[1] (७।३)
पठामि, हसामि ।

(२) धातोर्भविष्यति हिः (७।१२)
हो हि इ[2] ।

श्री मथुराप्रसादकृत चन्द्रिकाख्यव्याख्यायां "भविष्यत्काले विहितेषु लकारेषु धातोर्हिर्विकरणः स्यात् ।" काहिइ=लृट् लुट् लिङो भविष्यति, करिष्यति, कर्ता क्रियात्, करिष्यते, कर्ता, कृषीष्ट" इत्येवमिदं सूत्रं व्याख्यातम् ।

भूतकालः— एकाचो ही अ (७।२४)

एकाचो धातोः परेषां भूतकालप्रत्ययानां "ही अ" इत्यादेशः स्यात् । होहीअ = अभूत्, अभवत्, बभूव ।

काहीअ = अकार्षीत्, अकृत, अकरोत्, अकुरुत । चकार, चक्रे इत्यर्थः ।

अनेन सूत्रेण अनद्यतनादिभेदरहितस्य भूतकालमात्रस्यास्तित्वं प्रतीयते । एवं प्राकृतेऽनद्यतनादिभूतभविष्यत्कालयोर्विभागस्य, तदर्थे विधीयमानलिडादिलकाराणाञ्च अभावो विद्यते । क्वचित्तु वर्तमानभूतकालिकक्रिययो रूपेषु भेदो न दृश्यते ।

यथा—होहीअ[3] = शृणोति, अशृणोत्, शुश्राव, अश्रौषीत् । इत्यर्थाः ।

इत्थं प्राकृतभाषायां सामान्यरूपेण वर्तमानादिकालत्रयक्रियारूपाणां समुपलाभात् त्रयः कालाः प्रतीयन्ते । कालदृष्टया पालि-प्राकृत-संस्कृतभाषासु साम्यवैषम्ययोस्तुल्यता (यावत् साम्यं तावद्वैषम्यम्) विद्यते । ऐतिहासिकभाषाविज्ञानदृष्टया च

---

१. इट् मिप् इत्यनयोः स्थाने मिर्भवति ।

२. प्राकृतप्रकाशे (२।८।१) सूत्रेण भूशब्दस्य हो आदेशः, (७।१) इति सूत्रेण ति-प्रत्ययस्य इ आदेशः ।

३. वररुचिकृतप्राकृतप्रकाशे "स्यात्तिङा हीअ एकाचो वर्तमानेऽपि भूतवत्" इति तत्सूत्रार्थः ।

"लुट् लृट् लङादि लकारेषु निष्पन्नानि क्रियारूपाणि प्राकृते एकरूपेण परिणतिं गतानि, लुट्लङादिभेदाश्च विलुप्ताः ।" इत्येवं वक्तुं शक्यते ।

कालदृष्टया ग्रीकभाषया तु संस्कृतस्य प्रायेण साम्यं विद्यते । अस्यां भाषायां कालः सप्तधा[1] विभज्यन्ते— वर्तमानः[2] (प्रेजेण्ट), वर्तमानपूर्णकालः[3] (परफेक्ट), सातत्य[4]भूतकालः (इम्परफेक्ट), परोक्षपूर्ण[5]भूतकालः (प्लूपर्फेक्ट), सामान्यभूतकालः[6] (अर्वास्ट), सामान्यभविष्यत्कालः[7] (फ्यूचर), अनद्यतनभविष्यत्कालः[8] (फ्यूचर परफेक्ट) ।

अत्र कालस्य यो वर्तमानपूर्णनामको विभागस्तं विहाय भूतादिकालदृष्टया दैववाग्ग्रीकभाषयोश्च साम्यं प्रतिभाति । वस्तुतस्तु वर्तमानपूर्णकालिकक्रियाया अपि समुपलब्धिः संस्कृते दृश्यते । अयं विषयोऽग्रे प्रतिपादयिष्यते । सातत्यभूतकालिकक्रियाया उल्लेखस्तदर्थे लकारविविधानञ्च अस्माकं दैव्यां गिर्यपि समुपलभ्यते । तद्यथा—

"नानद्यतनवत् क्रियाप्रबन्धसामीप्ययोः" (३।३।१३५) इति पाणिनीयसूत्रेण क्रियायाः सातत्ये सामीप्ये च गम्येऽतीतेऽनागते च काले लङ्लुटोर्निषेधः, लुङ्लृटोश्च विधानं क्रियते । यथा—यावज्जीवनमन्नमदाद्, दास्यति वा ।

अत्र जीवनपर्यन्तम् अन्नदानक्रियाया अतीतेऽनागते च काले सातत्यं विरामाभावश्च सूच्यते । एवमनेन सूत्रेण अनागतेऽतीते च काले क्रियायाः सातत्ये गम्ये लङ्लुटोर्निषेधात् तदर्थे लुङ्लृट्लकारयोर्विधानाच्च सातत्यभूतभविष्यत्कालिकक्रिययोरप्यस्तित्वं निश्चीयते । एवं ग्रीकभाषायामपि अतीतानागत-

---

1, "There are seven tenses—The present imperfect, perfect, pluperfect Aourist, Future, and Future perfect."
—A School Greek Grammar, Written by Willian W Goodwin, LL DD. C. P. 60.

२. वर्तमाने लट् । पा० सू०
३. अनद्यतने लङ् । ,, ,,
४. अनद्यतने लङ् । ,, ,, ,, ,,
५. परोक्षे लिट् । ,, ,, ,, ,,
६. लुङ् च । ,, ,, ,, ,,
७. लृट् शेषे च । ,, ,, ,, ,,
८. अनद्यतने लुट् । ,, ,, ,, ,,

पाणिनीयव्याकरणानुसारेण मूलोक्ता ग्रीकभाषायाः काला लडादिलकारेषु विभक्तुं शक्यन्ते ।

कालयोस्तादृशं व्यापारमवबोधयितुं सामान्यभूतभविष्यत्काला एव प्रयुज्येते । यथा—

लुसो = शैथिल्यं करिष्यामि ।

अहं सततं शिथिलं करिष्यामीत्यर्थेऽपि क्रियायाः सातत्ये गम्ये लुसो इत्येव सामान्यभविष्यत्कालिकी क्रिया (यदर्थं लट् लकारोऽस्माभिः) प्रयुज्यते । अतीतकाले क्रियायाः सातत्ये गम्ये सामान्यभूतकालस्य प्रयोगो यथा—

ऍपोँइ तूतोँ = इदमभ्यासेन अकार्षीत् ।

अत्र क्रियायाः सातत्ये गम्ये सामान्यभूतकालिकी क्रिया प्रायुज्यत । इदमभ्यासपूर्वकं कुर्वन्नासीदिति तदर्थः । किञ्च पाणिनिना सम्भावनायां "आशंसायां भूतवच्च" (३।३।१३२) इति सूत्रस्य पक्षान्तरे "देवश्चेद् वर्षिष्यति, धान्यमवाप्स्याम" इत्यत्र सामान्यभविष्यत्कालिकी क्रिया लृट्लकारः । "लोडर्थलक्षणे च" (३।३।८) इति सूत्रस्य वैकल्पिकतया पक्षान्तरे 'कृष्णश्चेद् भोक्ष्यते, त्वं गाश्चारय"—इत्यत्र लोडर्थलक्षणे वर्तमानाद्धातोः सामान्यभविष्यत्कालिकी क्रिया (लृट्लकारः) च प्रयुक्ता । ग्रीकभाषायामपि सम्भावनावस्थायाम्, अथ च आज्ञादिविध्यवस्थायां सामान्यभविष्यत्कालिकी क्रिया दृश्यते । यथा—

एआन तिनेँस ओँए आनू दुनोन्थाए तूतोँ पाइ ओसी कालोस हेवसाइ = यदि केचिद् योग्या इदं करिष्यन्ति तर्हि शोभनं भविष्यति ।

एआन[1] = यदि । तिनेँस = केचिद् । दुनोन्थाए = (ये) शक्नुयुः ।
(ये योग्या सन्ति) ।

अँए आन् = कदाचित् । तूतोँ = इदम् । पाइओसी = करिष्यन्ति ।

कालोस = (तर्हि) साधु । हेवसाइ = भविष्यति ।

दैव्यां गिरि सम्भावनायां वर्तमानकालार्थकलट्लकारोऽपि प्रयुज्यते । यथा—देवश्चेद्वर्षति, धान्यं वपामः । अस्यामपि भाषायां सम्भावनार्थे वर्तमानकालिकी क्रिया प्रयुज्यते । यथा—

हेन ऍङ्गुस ऍल्थेँ थोँनोँतेँस ऊदेश वुलेताइ थ्नेस्केन = यदि मृत्युः समीपमागच्छति (आगच्छेत्) कश्चिन्मर्तुं न इच्छति ।

हेन[2] = यदि । थानातस = मृत्युः । एङ्गुस = समीपम् । एल्थे = आगच्छेत् । उदेस = कोऽपि न । थ्नस्केन = मर्तुम्, वूलेतोँइ = इच्छति ।

अत्र इच्छत्यर्थक वुलेतोँई क्रियायाः सम्भावनार्थे प्रयोगः कृतः ।

---

१. "ए स्कूल ग्रीक ग्रामर" इति पूर्वोक्तग्रन्थस्य २०३तमात् पृष्ठात् समुद्धृतमिदं वाक्यम् ।

२. "ए स्कूल ग्रीक ग्रामर", पृ० १६८ ।

लोडर्थलक्षणे—"कृष्णश्चेद् भोक्ष्यते त्वं गाश्चारय" इत्यादाविव भविष्यत्कालिकक्रियाऽपि प्रयुज्यते । यथा—

ए आन पोँइए तूतोँ पोँइ एइ तूतोँ = यदीदं कार्यं करिष्यति, तर्हि करोतु ।

ए आन = यदि । तूतोँ = इदम् । पोँइए = करिष्यति (करोति) (तर्हि)

तूतोँ = इदं । पोँइ एइ = करोतु ।

महर्षिणा वाल्मीकिना—

अथ[1] मामब्रवीत् सीता गृह्यतामयमुत्तमः ।
मणिर्येन महाबाहू रामस्त्वां बहु मन्यते ॥

अत्र श्लोके "मन्यते" इति वर्तमानकालिकी क्रिया "मन्स्यते" इति भविष्यति क्रियार्थे प्रायुज्यत । ग्रीकभाषायामपि वर्तमानकालिकक्रियाया भविष्यदर्थे प्रयोगो दृष्टिपथं समायाति । यथा—

बूलेँताइ एल्थेँइन ऍआन तूता गेँनेताई = यदीदं करिष्यते तर्हि स गन्तुमिच्छति । ए आन = यदि । तूता = इदम् । गेँ नेताई = क्रियेत (करिष्यते) (तर्हि स) एल्थेइन = गन्तुम्, वूलेँताइ = इच्छति ।

यदर्थे वर्तमानादिक्रिया दैव्यां गिरि प्रयुज्यमाना दृश्यते, तदर्थे प्रायशो ग्रीकभाषायामपि । उभयोः सामान्यरूपेण सन्तुलनमेव दृष्टिपथं समायाति । इमं विषयमतिशयेन स्पष्टीकर्तुमपराणि वर्तमानादिकालसूचकवाक्यानि उद्ध्रियन्ते, ग्रीकभाषीयवर्तमानादिकालानां लडादिभिर्निर्देशोऽपि च कृतः ।

वर्तमानकालः (लट्लकारः = प्रेजेन्ट टेन्स)—वर्तमानसातत्यभूतां क्रियां प्रकटीकरोति । यथा—ग्राफो = अहं लिखामि, यद्वा, अहं लिखन्नस्मि ।

अनद्यतनभूतकालः (लङ्लकारः = इम्परफेक्ट)—भूतकालिकीं सातत्यरूपां क्रियां निष्पादयति । यथा—

एग्राफोँन = अहमलिखम्, यद्वा, अहं लिखन्नासम् ।

वर्तमानपूर्णकालः (परफेक्ट)—वर्तमानां समाप्तिं गताञ्च क्रियामभिव्यनक्ति । यथा—गैग्राफा = अहं लिखितवानस्मि । संस्कृते अस्मिन्नर्थे निष्ठान्तेन सह यथापुरुषम् अस् धातोर्लट्लकारस्य रूपाणि प्रयुज्यन्ते ।

पूर्णभूतकालः, यद्वा परोक्षभूतकालः—(प्लूपरफेक्ट) अतीतां समाप्तिं गताञ्च क्रियामभिव्यनक्ति, यथा—एँ गेँ ग्राफेँन = मया लिखितम् । (ग्रीकभाषाऽनुसारेण "अहं लिलेख" इत्यनुवादः) ।

---

१. श्रीमद्वाल्मीकीयरामायणस्य सुन्दरकाण्डे सर्गः ५२, श्लोकः १०२ ।

सामान्यभूतकालः (लुङ्लकारः) = अवरिष्ट— सामान्यभूतकालिकीं क्रियां सूचयति । यथा— ऍग्राप्सा = अहम् अलेखिषम् ।

सामान्यभविष्यत्कालः (लृट्लकारः = फ्यूचर)— सामान्यभविष्यद्भूता क्रिया अभिव्यज्यते, यथा—ग्राप्सो = अहं लेखिष्यामि ।

अनद्यतनभविष्यत्कालः (लुट्लकारः = फ्यूचर पर्फेक्ट)—अनद्यतन-भूताम् अनतीतां क्रियां सूचयति, यथा— गेॅग्राप्सेॅते = अहं लेखिता इत्यादि[1] ।

एवमुपर्युद्धृतवाक्यानां समीक्षया कालदृष्टचा ग्रीकसंस्कृतयोः प्रचुररूपेण साम्यं प्रतिभाति । न केवलं कालदृष्टचा, अपि तु क्वचित् क्रियारूपेषु आंशिक-रूपेण वर्णसाम्यम्, प्रक्रियासाम्यञ्च दृश्येते । यथा संस्कृते—पठिष्यामि, सेत्स्यति—इत्यादिषु भविष्यत्कालिकक्रियासु ष (स) ध्वनिः श्रूयते । तथैव ग्रीकभाषायां "ग्राप्सो" इत्यादिषु भविष्यत्कालिकक्रियास्वपि । यथा लुङ्लकारे "असेत्सीत्" इत्यत्र सिचः सकारः श्रूयते, अडागमश्च क्रियते; तथैव ग्रीकभाषायाम् "ऍग्राप्सा" इत्यादिषु सकारः श्रूयते, ग्रापधातोश्च पूर्वम् ऍकारः प्रयुज्यते ।

यद्यप्यनयोर्भाषयोः कालदृष्टचा किञ्चिद्वैषम्यं प्रतिभाति । यथा संस्कृते वर्तमानपूर्णाख्यः (परफेक्ट) कालो न दृश्यते । परन्तु "अहं लिखितवानस्मि" इति वाक्ये समाप्तिं गतायाः वर्तमानकालिकक्रियायाः समुपलाभात् न किमपि वैषम्यम् ।

परोक्षभूतकालिकक्रियायाः प्रयोगविषये त्वनयोः किञ्चिद् वैषम्यं प्रति-भाति । अमरगिरि परोक्षभूतकालस्योत्तमपुरुषस्य प्रयोगश्चित्तविक्षेपेऽत्यन्ता-पह्नवे च दृश्यते । उक्तञ्च भट्टोजीदीक्षितेन **वैयाकरणसिद्धान्तकौमुद्याः** लकारार्थ-प्रक्रियायां "परोक्षे लिट्" (३।२।११५) इति सूत्रे "उत्तमपुरुषे चित्तविक्षे-पादिना पारोक्ष्यम्" इति । सुप्तोऽहं किल विललाप, बहु जगद पुरस्तात्तस्य मत्ता किलाऽहम् ।

"अत्यन्तापह्नवे लिड् वक्तव्यः" (वार्तिकम्) । कलिङ्गेष्ववात्सीः ? नाहं कलिङ्गान् जगाम । इति । परन्तु ग्रीकभाषायां निरस्तचित्तविक्षेपाद्यवस्थायामपि लिट्लकारस्य (परोक्षभूतकालस्य) प्रयोगः समुपलभ्यते । तदुदाहरणम्—ऍगेॅग्राफेॅन = अहं लिलेख इति ।

देवभाषायां क्वचित् क्रियायाः सातत्यं कारकेणाभिव्यज्यते । यथा—"यावज्जीवमन्नमदात्" इति प्रयोगः पूर्वमुद्धृतः । अत्र यावज्जीवमिति कारकेणैव दानक्रियायाः सातत्यं सूच्यते । यद्यप्यत्र क्रियायाः सातत्ये गम्ये लुङ् लकारो-

१. इमानि वाक्यानि "ए स्कूल ग्रीक ग्रामर" इति पूर्वोक्तग्रन्थात् १८४ तमापृष्ठादुद्धृतानि ।

विहितस्तेनैव क्रियायाः सातत्यं सूच्यते, तथापि तत्सातत्यं यावज्जीवमिति कारके-णैव सम्यग्ज्ञायते । एवम् "मासमधीते" इत्यत्रापि मासमिति कर्मकारकेण क्रियायाः सातत्यमवगम्यते । अत्र "कालाध्वनोरत्यन्तसंयोगे" (२।३।५) इति द्वितीया । "अन्तम् = विरामम् अतिक्रान्तः अत्यन्तः, स चासौ संयोगश्चात्यन्त-संयोगः, निरन्तरसन्निकर्षः" इति पूर्वोक्तसूत्रघटकस्यात्यन्तसंयोगपदस्य व्याख्या बोद्धचा । परन्तु ग्रीकादिभाषायां[1] क्रियायाः सातत्यबोधनं तथैव जायते ।

इत्थं कालदृष्टचाऽपि ग्रीकभाषया सह संस्कृतस्य प्रायेण साम्यं दृश्यते ।

वचनम्

गीर्वाणवाण्यां संज्ञाया इव क्रियाया अपि वचनत्रयं[2] समुपलभ्यते, किन्तु पालि-प्राकृतयोस्तु क्रियाया वचनद्वयम्[3] । ग्रीकभाषा संस्कृतवदेव वचनत्रयवतीम्[4] उत्तमादिभेदेन पुरुषत्रयवतीञ्च क्रियां[5] भजते । परन्तु सम्भावनेच्छासूचनावस्थासु क्रिया उत्तमादिपुरुषत्रयं आज्ञार्थकलोट्लकारे च (Intotheimparative mood) विध्यवस्थायां मध्यमान्यपुरुषद्वयमेव भजन्ति । एवं सामान्यावस्थाकालवचनपुरुष-भेदेन आख्यातस्य सामान्यं तुलनात्मकं स्वरूपं समुपस्थापितम् । प्रक्रियादृष्टचा (रूपरचनादृष्टचा) आख्यातं व्याख्यातुकामोऽहं कासाञ्चित् क्रियाणां प्रकृति-प्रत्ययनिर्देशपुरःसरं निष्पत्तिप्रकारं प्रस्तौमि ।

क्रियाणां (आख्यातान्तानां) निष्पत्तिप्रक्रिया

धातुभ्यः कृत्प्रत्यये कृते सति यथा संज्ञाशब्दाः सिद्धिं समायान्ति, एवम् आख्यातशब्दा अपि धातुभ्यस्तिङ्प्रत्यये कृते सति निष्पद्यन्ते । धातुश्च द्विविधः— (१) सकर्मकः, (२) अकर्मकश्च ।

१. आदिना आंग्लभाषाया ग्रहणम् । वर्तमानादिकालेषु क्रियायाः सातत्यं तथैव सूच्यते । यथा—आई एम राइटिंग ।

२. "तान्येकवचनद्विवचनबहुवचनान्येकशः" (१ ४।१०२ पाणिनीयसूत्रम्) ।
"तिङस्त्रीणित्रीणि प्रथममध्यमोत्तमाः" (१।४।१०१ „) ।

३. "द्वे द्वे पठममज्झिमुत्तमा पुरिसा" (३।१।३ कच्चायनव्याकरणम्) ।

4. There are three numbers as in nouns, the singular, the dual, and the plural.

5. In each tenses of the indicative, subjunctive and optative, There are three persons in each number, The first, the second and the third, In each tense of the imperative–there are two—the second and the third.
—A School Greek Grammar, written by William.
P. 60.

फलव्यापरयोर्व्यधिकरणत्वं सकर्मकत्वम् । फलं कर्मणि, व्यापारश्च कर्तरि स्याताम्, तर्हि स सकर्मकः "देवदत्तो ग्रामं गच्छति" । अत्र फलम् उत्तरदेशसंयोगः, तस्याश्रयो ग्रामः, उत्तरदेशसंयोगरूपफलजनकश्च पादन्यासादिव्यापारः, स च कर्तरि । अतो गत्यर्थको गम्लृधातुः सकर्मकः । किन्तु "हरिः शेते" इत्यत्र शयनरूपं फलं तदनुकूलव्यापारश्चेत्युभावपि एकस्मिन्नेवाधिकरणे - हरौ । अतः शेते-क्रियायाः प्रकृतिभूतः शीङ्धातुः अकर्मकः । पुनश्च अनिट्सेड्भेदेन धातवो द्विविधाः । तदुदाहरणं यथा भू + इता = भविता । दा + ता = दाता । अत्र प्रथमो धातुः सेट्, द्वितीयश्च अनिट् । एवं पालिभाषायामपि "भविस्सन्ति, सोतुमिच्छति सोस्सूसति" इत्यादिषु इडागमानागमयोदर्शनात् केचिद्धातवः सेट्काः, केचिच्च अनिट्का ज्ञायन्ते ।

भ्वादिधातुभ्यो वर्तमानाद्यर्थका दश लकारा विधीयन्ते । ते यथा— वर्तमाने लट् । परोक्षभूते लिट् । अनद्यतनभविष्यति लुट् । सामान्यभविष्यति लृट् । लेट् - अयं लकारो वेदेष्वेव लिङर्थे प्रयुज्यते । आज्ञाद्यर्थे लोट् । अनद्यतनभूते लङ् । विध्याद्यर्थेषु लिङ् । सामान्यभूते (अद्यतने) लुङ् । क्रियाया अतिष्पत्तौ लृङ् ।

पाणिनिव्याकरणे क्रियान्तप्रत्ययाः

धातुभ्यः परं विहितानां लकाराणां स्थानेष्वष्टादश तिबादिप्रत्ययाः प्रयुज्यन्ते । ते निम्नाङ्किताः—

एकवचनम्	द्विवचनम्	बहुवचनम्
(१) तिप्	(२) तस्	(३) झि
(४) सिप्	(५) थस्	(६) थ
(७) मिप्	(८) वस्	(९) मस्

एते परस्मैपदिनः ।

(१) त	(२) आताम्	(३) झ
(४) थास्	(५) आथाम्	(६) ध्वम्
(७) इड्	(८) वहि	(९) महिङ्

एते आत्मनेपदिनः ।

उभयोर्योगे समेषामष्टादशसंख्या जायते । अनुदात्तङित्[1] धातुभ्यः, कर्तृगामिनि क्रियाफले स्वरितेत्-ञित्-धातुभ्यश्च[2] आत्मनेपदिनः प्रत्ययाः प्रयुज्यन्ते । अत्र केचिदनुदात्तादिधातव उदाहरणार्थमधस्तान्निर्दिश्यन्ते—

१. "अनुदात्तङित आत्मनेपदम्" (१।३।१२) पाणिनीयसूत्रम् ।

२. "स्वरितञितः कर्त्रभिप्राये क्रियाफले" (१।३।७२),, ।

अनुदात्तादिधातूनां गणना

ऊदृदन्तैर्यौति रु-क्ष्णु-शीङ्-स्नु-नु-क्षु-श्वि-डीङ्-श्रिभिः ।
वृङ्-वृञ्भ्याञ्च विनैकाचोऽजन्तेषु निहताः स्मृताः ॥१॥

उपर्युक्तोदन्तादीन् धातून् विहाय अन्ये ऐकाचो धातवोऽनुदात्तसंज्ञया व्यवह्रियन्ते ।

ऊदन्ता भूप्रभृतयः । ऋदन्ताः कृ तृ प्रभृतयः । यु मिश्रणामिश्रणयोः, "रु शब्दे, रुङ् गतिरेषणयोः" इत्युभयोरत्र कारिकायां ग्रहणम्, निरनुबन्धकपरिभाषया, "लुगविकरणालुगविकरणयोः" इति परिभाषया च । न च साहचर्याल्लुग्विकरणस्यैव ग्रहणमिति शङ्क्यम्, तस्यानित्यत्वात् । क्ष्णु तेजने, शीङ् स्वप्ने, क्ष्णु प्रस्रवणे, णु स्तुतौ, टुक्षु शब्दे, टुओश्वि गतिवृद्ध्योः, डीङ् विहायसा गतौ, श्रिञ् सेवायाम्, वृङ् संभक्तौ, वृञ् वरणे—इमान् धातून् विहाय अन्ये एकाचौ धातवोऽनुदात्ताः ।

हलन्तेष्वनुदात्तधातवस्तु द्व्यधिकशतसंख्याकाः सिद्धान्तकौमुद्यां परिगणिताः । ते यथा –

शक्लृ-पच्-मुच्-रिच्-वच्-विच्-सिच्-प्रच्छि-त्यज्-निजिर्-भजः ।
भञ्ज्-भुज्-भ्रस्ज्-मस्जि-यज्-युज्-रुज्-रञ्ज्-विजिर्-स्वञ्जि-सञ्ज-सृजः ॥ २ ॥

अद्-क्षुद्-खिद्-छिद्-तुदि-नुदः पद्य-भिद-विद्यतिर्विनद् ।
शद्-सदी स्विद्यतिः स्कन्दि-हदी क्रुध-क्षुधि-बुध्यतिः ॥ ३ ॥

बन्धिर्युधि-रुधी राधि-व्यध-शुधः साधि-सिध्यती ।
मन्य-हन्नाप्-क्षिप्-कुपि-तप्-तिपस्तृप्यति-दृप्यती ॥ ४ ॥

लिप्-लुप्-वप्-शप्-स्वप्-सृपि-यभ-रभ-लभ्-गम्-नम्-यमो रमिः ॥
कुशिर्दशि-दिशी, दृश्-मृश्-रिश्-रुश्-लिश्-विश्-स्पृशः कृषिः ॥ ५ ॥

त्विष्-तुष्-द्विष्-दुष्-पुष्य-पिष्-विष्-शिष्-शुष्-श्लिष्यतयो घसिः ॥
वसतिर्दह-दिहि-दुहो नह-मिह-रुह-लिह-वहिस्तथा ।

अनुदात्ता हलन्तेषु धातवो द्व्यधिकं शतम् ॥ ६ ॥
तुदादौ मतभेदेन स्थितौ यौ च चुरादिषु ॥ ७ ॥

तृप-दृपी तौ वारयितुं श्यना निर्देश आदृतः ।
किञ्च-स्विद्यपद्यौ सिध्यबुद्धयौ मन्य-पुष्य-श्लिषः श्यना ॥ ८ ॥

वसिः शपा लुका यौतिर्निर्दिष्टोऽन्यनिवृत्तये ।
णिजिर्-विजिर्-शक्लृ इति सानुबन्धा अमी तथा ॥ ९ ॥

विन्दतिश्चान्द्रदौर्गदिरिष्टौ भाष्येऽपि दृश्यते ।
व्याघ्रभूत्यादयस्त्वेनं नेह पेठुरिति स्थितम् ॥ १० ॥

रञ्जि-मस्जी अदि-पदी, तुद्-क्षुध्-शुषि-पुषी शिषिः ।
भाष्यानुक्ता नवेहोक्ता व्याघ्रभूत्यादिसम्मताः ॥ ११ ॥

एतेषां धातूनामनुदात्तत्वफलं तेभ्यः परस्य वलादेरार्धधातुकस्येण्निषेधः । उक्तञ्च पाणिनिना—"एकाच उपदेशेऽनुदात्तात्" (७।२।१०) अनुदात्तेत्वलक्षणस्यात्मनेपदस्यानित्यत्वात् तेभ्यः परस्मैपदसंज्ञका तिबादिप्रत्ययाः प्रयुज्यन्ते, न तु आत्मनेपदिनः । ङितश्च धातवः शीङ्-डीङ्-इत्यादयः । ङित्त्वफलञ्च आत्मनेपदप्रत्ययोत्पत्तिः । स्वरित ञितश्च धातवो यथा—

डुकृञ् करणे । डुदाञ्-दाने । डुधाञ् धारणपोषणयोःरित्यादि ।

भाषाशास्त्रीयदृष्टया[1] धातूनां विभाजनम्

अनुदात्तादिभेदेन ये धातवो विभक्तास्ते भाषाशास्त्रदृष्टया निम्नप्रकारेण विभज्यन्ते ।

१ – अर्=ऋकारान्ता धातवः – धृ (धर्), स्वर् ।

२—अन्नन्ता धातवः – क्षन्, स्वन्, खन् ।

३—असन्ताः सान्ताश्च –'त्रस । ग्रस । ध्वस । श्रुष (श्रु इति वैकल्पिकं रूपम्) अक्ष । नक्ष । उक्ष । निक्ष । वक्ष । ह्रास ।

४—अमन्ता धातवः— दम । गम । क्षम । श्रम ।

५—इकारान्ताः—क्षि । श्रि । स्त्रि (सी इत्येवमप्युपलभ्यते) ।

६—उकारान्ताः—श्रु सु (वहत्यर्थे प्रयुज्यते) द्रु (पलायने) ।

७—आकारान्ताः —गा । या । प्सा । द्रा । ज्या । त्रा (रक्षार्थे)। सा (निगरणार्थे) । द्रा (पलायने) । ज्या (जि=जयार्थे) । त्रा (रक्षार्थे) ।

८—तान्ताः—कृत (छेदने) । चित (संज्ञाने) । मित (द्वैधीकरणे) । श्वित= (दीप्तौ) । (द्युत दीप्तौ) ।

९—थान्ताः—प्रथ = (वृद्धयर्थे) व्यथ (कम्पनार्थे) । स्नथ = (प्रवेशे) । श्रथ (शैथिल्यकरणे) । ग्रथ (ग्रथने) ।

१० – दान्ताः—क्षद (विभाजने) छिद (द्वैधीकरणे) । रुद (विलापे) । मृद (मर्दने) । पीड (स्तब्धीकरणे) । स्यन्द (प्रवाहे) । क्रन्द (विलापे, शब्दकरणे च) ।

११—धान्ताः – मृध (असावधानार्थे) एध (वृद्धौ) । स्पृध (स्पर्धायाम्) क्षुध (बुभुक्षार्थे) ।

१. भोलाशङ्करव्यासकृते "संस्कृत का भाषाशास्त्रीय अध्ययन" इति ग्रन्थे १९३ पृष्ठे एतदीयोंऽशो द्रष्टव्यः ।

१२—पान्ताः—दीप (दीप्तौ), म्लुप (अस्तंगतार्थे), रिप लिप=(लेपने) रुप, लुप (त्रोटनार्थे, अदृश्यार्थे च), विप (कम्पने), स्वप (शयने) ।

१३—भान्ताः—शुभ (दीप्तौ), स्तुभ (स्तुतौ) ।

१४—चान्ताः—म्लुच (अस्तंगतार्थे), याचृ (याञ्चायाम्), सिच (सेचने) ।

१५—जान्ताः – तर्ज (तर्जनार्थे), युज (योगे), रुज (त्रोटनार्थे), विज (कम्पनार्थे) ।

१६—हान्ताः—स्पृह (इच्छायाम्), द्रुह (द्रोहकरणे) ।

एवं भाषाशास्त्रदृष्टया धातवः षोडशभागेषु विभक्ताः । अग्रे विकरणव्याख्यावसरे प्रसङ्गवशाद् विकरणभेदानुसारेण धातुविभागः प्रदर्शयिष्यते ।

अनुदात्तादिधातुभ्यो विहितास्तिङ्शित्प्रत्ययाः सार्वधातुकसंज्ञया, अथ च तिङ्शिद्भ्योऽन्ये प्रत्यया आर्धधातुकसंज्ञया व्यपदिश्यन्ते । सार्वधातुकार्धधातुकसंज्ञाफलं "सार्वधातुकार्धधातुकयोः", (७।३।८४) "पुगन्तलघुपधस्य च" इति धातुनिष्ठस्वरस्य[1] गुणः, यथा—भू+अ+ति=भो+अ+ति=भवति । "आर्धधातुकस्येड्वलादेः" (७।२।३५) इतीडागमः । भू+इ+ता=भो+इ+ता=भविता ।

प्राकृतभाषायां तु **प्राकृतप्रकाशाख्ये** ग्रन्थे "शेषः संस्कृतात्" (९।१८) इत्युक्त्या—धातुभ्यो विहितानां लडादिदशलकाराणां स्थानेषु प्रयुक्तानां तिबादिप्रत्ययानामेव इकाराद्यादेशं विधाय, संस्कृतभाषीयपठ-प्रभृतिधातूनाञ्च पढाद्यादेशं "पढइ" इत्यादिवर्तमानादिकालिक्यः क्रिया निष्पाद्यन्ते । परन्तु संस्कृतवदत्र लकारस्थाने प्रयुक्तानां तिबादीनां णलादिरूपेण आदेशाभावः, तेषु समरूपता च दृश्येते । यथा दैव्यां गिरि लकारस्थाने प्रयुज्यमानस्तिप्प्रत्ययो लुट्लिट्लकारयोः क्रमशः "भविता, बभूव" इत्यादौ आ (डा), अ (णल्) इत्यादेशरूपेण समुपलभ्यते । परन्तु प्राकृतभाषायामुपर्युक्तलकारद्वये "इ" इत्येकं रूपमेव दृष्टिगोचरीभवति । यथा "होहिइ" इत्यादिषु । स एव तिप् प्रत्ययः लिट् लङ् लुङ् लकाराणां स्थानेषु प्रयुक्तः "हुवीअ" इत्यादिषु "ई अ" इत्येकरूपेण दृश्यते । संस्कृते तु क्रमशः बभूव, अभवत्, अभूत्—इत्यादिषु "अ, त्" इति विरूपात्मना दृश्यते । एवं प्राकृते लडादिलकारेष्वेकरूपतामानेतुं महान् आयासोऽवलोक्यते । "लिट् लङ्, लुङ्" इति लकारत्रयं "लुट् लट्" इति लकारद्वयञ्च समूहच एकमेव भूतं भविष्यच्च कालमवबोधयन्ति । ऐतिहासिकदृष्टया भाषाया अध्येतारोऽनद्यतनपरोक्षापरोक्षभूतयोः, अद्यतनादिर्भविष्यति काले च व्यवहृतमेकं क्रियारूपं दृष्ट्वा "प्राकृतकालेऽनद्यतनादीनां भूतादिकालिकक्रियाणां ह्रासः सम्बभूव ।

१. इ उ ऋ ऌ इति स्वरचतुष्टयस्य ।

भूताद्यर्थे केवलमेका एव क्रिया प्रायुज्यत" इत्येवं मन्यन्ते । यद्यपि "होइ, होहिइ" इत्यादौ वर्तमानादिकालिकक्रियाणामन्ते समानरूपतया दर्शनाद् वर्तमानभविष्यदादि ज्ञानं दुर्लभम्, तथापि धातुप्रत्यययोर्मध्ये प्रयुज्यमानेन "हि" इत्यादिविकरणेन तज्ज्ञानं सुलभम् । संस्कृतवदेव अस्यामपि भाषायां धातुभ्यः परस्मैपदात्मनेपदसंज्ञकौ प्रत्ययौ प्रयुज्येते । परन्तु "अनुदात्तादिधातुभ्य एव आत्मनेपदम्, न तु तद्भिन्नेभ्यः" - इत्येवं नियमो न दृश्यते । यथा वररुचिकृते प्राकृतप्रकाशे "ततिपोरिदेतौ" (७।१) इति सूत्रस्योदाहरणम् - "पढइ, पढए; सहइ, सहए" इति । किञ्च, शौरसेन्यां भावकर्तृकर्मसु परस्मैपदान्येव प्रयुज्यन्ते । यथा भावे — सासा[1] असि, कर्तरि — अज्ज वन्दामि । कर्मणि — कामी आदि काम्यते = अतएव काम्यते । इत्थं प्राकृते आत्मनेपदानां प्रायेण अभावः, अल्पीयानेव च यत्र कुत्रचित् प्रयोगः समुपलभ्यते ।

पालिभाषीयक्रियान्तप्रत्ययाः

पालिभाषायां तु प्रायेण सर्वकालिकक्रियाणां रूपाणि समुपलभ्यन्ते । "वर्तमाने लट्" (३।२।१२३), "परोक्षे लिट्" (३।२।११५) इत्येवं वर्तमानाद्यर्थेषु लडादिलकारः, तेषाञ्च स्थाने तिबादिप्रत्यया न विधीयन्ते, धातुभ्यः परं वर्तमानाद्यर्थेषु साक्षात् "ति, ते" इत्यादयः प्रत्यया विधीयन्ते । पालिसंस्कृतयोश्च आख्यातस्य निष्पत्तिप्रक्रियायामयमेवोपर्युक्तो भेदो विद्यते । वर्तमानादिकालेषु विधीयमानाः वर्तमानादिसंज्ञकाः प्रत्यया निम्नोक्ताः—

"वर्तमाने लट्" = वत्तमाना[2] — ति, अन्ति । सि, थ । मि, म । ते, अन्ते । से, व्हे । ए, म्हे । ए, म्हे । ३।१।१८ ।

"परोक्षे लिट् = परोक्खा — अ, उ । ए, त्थ । अ, म्ह । त्थ, रे । त्थो, व्हो । इ, म्हे (६।१।२१) ।

अनद्यतने लुट्
लृट् शेषे च } = भविस्सन्ती — स्सति, सन्ति ।
स्ससि, स्सथ । स्सामि, स्साम, स्सते, स्सन्ते ।
स्ससे, स्स स्वहे । स्सं स्साम्हे (३।१।२४) ।

"अनद्यतने लङ्" = आ, ऊ । ओ थ । अ, म्हा, त्थ, त्थु । से, व्हं । (२।१।१२) ।
"लुङ् च" — ई, उं । ओ, त्थ । इं, म्हा । आ, ऊ । से, व्हं । अ, म्हे । (३।१।२३) ।

"विधिनिमन्त्रणामन्त्रणा०" = सत्तमी — एय्य, एय्युं । एय्यासि, एय्याथ । एय्यामि, एय्याम । एथ, एरं । एयो, एय्यव्हे । एय्यं, एय्याम्हे ॥ (६।१।२०) ।

---

१. प्राकृतप्रकाशे (१।२३) इति सूत्रस्थः प्रयोगः ।
२. इमानि सूत्राणि कच्चायनव्याकरणतः समुद्धृतानि ।

"लिङ्निमित्ते लृङ् क्रियातिपत्तौ" = कालातिपत्ति-स्सा, स्संसु । स्से, स्सथ । स्सं, स्सम्हा । स्सथ, स्सं । स्सम्हा, स्सथ । स्सिंसु स्ससे, स्सव्हे । स्सं, स्साम्हसे । (३।१२५) ।

एषु प्रत्येकं सूत्रेषूक्तानां प्रत्यानां मध्ये आदितः षट्प्रत्ययाः परस्मैपदिनः, ततश्च परं षड् आत्मनेपदिनः । एवमुपर्युद्धृतसूत्राणां समीक्षया स्फुटतया परिभासते यद् वर्तमानादिकं प्रत्येकं कालमवबोधयितुं पालिभाषायां धातुभ्यः प्रत्यया विधीयन्ते । अद्यतनानद्यतनभूतादिषु एक एव प्रत्ययो न दृश्यते ।

लकारदृष्टचा पालिभाषया सह संस्कृतस्य विशेषरूपेण, प्राकृतेन सह च आभासमात्रं साम्यं दृष्टिगोचरीभवति । पालिभाषा च प्राकृतभिन्ना काचिद् भाषेत्यपि च अनेन प्रतिभाति । परन्तु संस्कृतेऽनुदात्तङित्, स्वरितञिद्भेदेन धातूनां यो विभागः कृतस्तद्दृष्टचा पालिसंस्कृतयोर्वैयाकरणव्यवस्थायां भेदोऽपि प्रतिभाति । अस्यां भाषायां सर्वे धातवो हलन्तरहिताः "इण् गतौ" इत्यादिवद् एकस्वरात्मकधातूनाञ्च नितरामभावः । सर्वेभ्यश्च धातुभ्यः कर्तरि प्रायेण परस्मैपदिनः प्रत्ययाः परिलक्ष्यन्ते । आत्मनेपदसंज्ञकाः प्रत्ययास्तु केवलं भावे कर्मणि च विधीयन्ते । उक्तञ्च कच्चायनेन "अत्तनोपदानि भावे कम्मनि च" (३।२।२२) इति । तदुदाहरणं यथा—

उच्चते, उच्चन्ते । लब्भते, लब्भन्ते इत्यादि । क्वचित्तु कर्तर्यपि आत्मनेपदानि । तदुक्तम्—"कत्तरि च" (३।२।२३), इति कच्चायनसूत्रे मञ्ञते (मन + य + ते) ।

एवं प्राकृतवद् अस्यामपि भाषायाम् आत्मनेपदरूपाणामल्पीयानेव प्रयोगः, अनुदात्तादिभेदेन च धातूनां भेदाभावो दृश्यते ।

आख्यातनिष्पत्तिप्रक्रियाया ग्रीकभाषाप्रक्रियया सह तुलना

ग्रीकभाषायां तु संस्कृतवदेव समासां वर्तमानाद्यर्थावबोधिकानां क्रियाणां रूपाणि समुपलभ्यन्ते । अयं विषयः कालस्य व्याख्यावसरे पूर्वमेव व्याख्यातः ।

केचिदाधुनिका विध्याशिषूभयविधलकारस्य "आप्टेटिव" नाम्ना, लोट्लकारस्य च "इम्परेटिव" नाम्नाऽनुवादं कृतवन्तः । अयमपि विषयः पूर्वं व्याख्यातः, पुनः स्मृत्यर्थमत्र तस्य संकेतः कृतः ।

परन्तु आख्यातनिष्पत्तिप्रक्रियादृष्टयोभयोर्मध्ये भेदः प्रतीयते । दैव्यां गिरि धातुभ्यो वर्तमानाद्यर्थे लडादयो लकाराः, तत्स्थाने च तिबादिप्रत्ययाः, तिबादिप्रत्ययस्य च भविष्यदाद्यर्थे स्याद्यागमा विधीयन्ते । ग्रीकभाषायां तु पालिवद् भविष्यदाद्यर्थावबोधकाः "स" इत्यादिप्रत्यया धातुभ्यः प्रत्यक्षत एव विधीयन्ते, न तु परम्परया । अनुदात्तादिभेदेन धातूनां विभागाभावः, तथापि कर्मवाच्यक्रियाया योऽन्तिमो वर्णः (प्रत्ययः), तेन आत्मनेपदस्यानुमानं कर्तुं शक्यते । दैव्यां गिरि शैथिल्यार्थकश्लथधातोः कर्मणि प्रत्यये सति भविष्यत्काले उत्तमा-

दिपुरुषस्यैकवचने क्रमशः—"श्लथिष्ये, श्लथिष्यसे, श्लथिष्यते" इति रूपाणि निष्पद्यन्ते। ग्रीकभाषायां तु शैथिल्यार्थक 'लु' धातोरस्तस्मिन्नेवार्थे 'लेॅलुसोॅमे, लेलुसे लेॅलुसेतेॅ" इति रूपाणि दृश्यन्ते।

लेॅलुसोॅमे = श्लथिष्ये, लेलुसे = श्लथिष्यसे।

लेलुसेते = श्लथिष्यते इत्यादि[1]।

यथा संस्कृतभाषायाम् आत्मनेपदेऽन्यपुरुषैकवचने "ते" इति, मध्यमस्य च "से" इति, उत्तमस्य "ए" इत्यन्तिमो वर्णः समुपलभ्यते, तथैवास्यामपि भाषायां कर्मवाच्याख्यातस्यान्ते दृश्यन्ते। तेन संस्कृतवद् अत्रापि धातुभ्य आत्मनेपदसंज्ञकाः प्रत्यया भवन्तीति वचनं विश्वासार्हम्। परन्तु ते प्रत्ययाः कर्मवाच्ये, न तु कर्तृवाच्ये।

परस्मैपद-आत्मनेपदसंज्ञकाश्च प्रत्ययास्तिबादिप्रत्ययेनाधस्तात् प्रदर्श्यन्ते। एते प्रत्यया आख्यातान्त(वर्बल इन्डिग)नाम्ना व्यवह्रियन्ते।

ग्रीकभाषायाम् आख्यातान्तप्रत्ययाः

कर्तृवाच्यम्

वर्तमानभविष्यत्कालिकक्रियान्तप्रत्ययः।

प्रधानकालः (प्राइमरी टेन्सेज)

	ग्रीकभाषा	=	संस्कृतभाषा
एकवचनम्			एकवचनम्
उत्तमपुरुषः	मि	=	मिप् = (मि)
मध्यमपुरुषः	सि	=	सिप् = (सि)
अन्यपुरुषः	सि (ति)	=	तिप् = (ति)
द्विवचनम्	ग्रीकभाषा		संस्कृतभाषा
उत्तमपु० } मध्यमपु० }	तोॅन		वस् थस्
अन्यपु०	तोॅन		तस्
बहुवचनम्			
उत्तमपु०	मेॅन (मेॅस)		मस्
मध्यमपु०	तेॅ		थ
अन्यपु०	(न्ति) असी		झि = अन्ति

१. "ए स्कूल ग्रीक ग्रामर" पृ० ७६।

कर्तृवाच्यम्

भूतकालिक-क्रियान्तप्रत्ययाः (हिस्टोरिकल वरबल इन्डिंग)

एकवचनम्	ग्रीकभाषा	संस्कृतम्
उत्तमपु०	न	म (अम्)
मध्यमपु०	स	स
अन्यपु०	—	त्
द्विवचनम्		
उत्तमपु०	—	अम्
मध्यमपु०	तोॅन	तम्
अन्यपु०	तेन	ताम्
बहुवचनम्		
उत्तमपु०	मेॅन (मेस)	मस् (म)
मध्यमपु०	तेॅ	त
अन्यपु०	न, सान्	अन्

स्ववाच्यम् (मीडिल) **कर्मवाच्यम्** (पैसिव)

वर्तमान-भविष्यत्कालिक-क्रियान्त-प्रत्ययाः

(प्राईमरली वरबल इन्डिग आफ मीडिल एण्ड पैसिव)

	ग्रीकभाषा	संस्कृतभाषा
एकवचनम्		
उत्तम पु०	माई (मे)	ए
मध्यम पु०	साई (से)	से
अन्य पु०	ताई (ते)	ते
द्विवचनम्		
उत्तमपु०	—	ए
मध्यमपु०	स्थोॅन (थोॅन)	एथे
अन्यपु०	स्थोॅन (थोॅन)	एते
बहुवचनम्		
उत्तमपु०	मेॅथा	महे (महिङ्)
मध्यमपु०	स्थेॅ (थेॅ)	ध्वे (ध्वम्)
अन्यपु०	न्ताई	न्ते (झ)

स्ववाच्यम् (मीडिल) **कर्मवाच्यम्** (पेकेसिव)

भूतकालिक-क्रियान्तप्रत्ययाः (हिस्टोरिकल वरबल एन्डिग)

	ग्रीकभाषा	संस्कृतभाषा
एकवचनम्		
उत्तमपु०	मेन	ए (यथा एधे इत्यत्र)
मध्यमपु०	सा	थाः (थास्)
अन्यपु०	तोँ	त
द्विवचनम्		
उत्तमपु०	—	वहि
मध्यमपु०	स्थोँन् (थाँन)	एथाम्
अन्यपु०	स्थेन (थेन)	एताम्
बहुवचनम्		
उत्तमपु०	मेँथा	महि
मध्यमपु०	स्थेँ (थे)	ध्वम्
अन्यपु०	न्तोँ (न्त)	न्त

यः प्रत्ययः कर्मवाच्यक्रियाया अन्ते प्रयुज्यते स एव स्ववाच्यक्रियाया अप्यन्ते प्रयुज्यते[1] ।

लोट्लकारनिष्पन्नक्रियान्तप्रत्ययाः

(इण्डिंग आफ दी इम्परेटिव)

कर्तृवाच्यम् (एक्टिव)

	ग्रीकभाषा	संस्कृतभाषा
एकवचनम्		
उत्तमपु०	—	ऐ
मध्यमपु०	थि	स्व
अन्यपु०	तो	ताम् (एधताम्)
द्विवचनम्		
उत्तमपु०	—	वहै
मध्यमपु०	तोँन	थाम् (एधेथाम्)
अन्यपु०	तोन	ताम् (एधेताम्)

	ग्रीकभाषा	**संस्कृतभाषा**
बहुवचनम्		
उत्तमपु०	—	महै
मध्यमपु०	तेँ	ध्वम् (एधध्वम्)
अन्यपु०	न्तोन् तोसन्	न्ताम्

१. एते प्रत्यया विलियमप्रणीते "स्कूल ग्रीक ग्रामर" ग्रन्थे क्रियान्तप्रत्ययनिरूपणचक्रात् (फ्राम द टेबुल आफ द वर्बल इण्डिंग) ९७तमपृष्ठतो गृहीताः ।

स्ववाच्ये (इन टू दी मिडिल) **कर्मवाच्ये** (इन टू दी पैसैसिव)

आज्ञार्थकक्रियान्तप्रत्ययाः

एकवचनम्	ग्रीके	संस्कृते
उत्तमपु०		
मध्यमपु०	सोँ	उपर्युक्ता एव प्रत्ययाः
अन्यपु०	स्थो (थो)	अत्र स्ववाच्ये (भाववाच्ये)
द्विवचनम्		एकवचनम् । कर्मवाच्ये तु
उत्तमपु०		सर्ववचनेषु रूपाणि समुपलभ्यन्ते ।
मध्यमपु०	स्थोँन (थोँन)	
अन्यपु०	स्थोन (थो)	एवं लडादिलकारेष्वपि बोध्यम् ।
बहुवचनम्		
उत्तमपु०		
मध्यमपु०	स्थेँ (थेँ)	
अन्यपु०	स्थोन (थोन) या स्थोसान् (थोसान्)	

असमापिकायाः क्रियाया अन्ते प्रयुज्यमानस्य "अस्प्" प्रत्ययस्य संस्कृत-भाषीय तुमुन्प्रत्ययेन सह तुलना सम्भवति । "अस्प" प्रत्ययाऽतिरिक्ता अन्येऽपि प्रत्यया असमापिकक्रियार्थे (तुमुन्प्रत्यार्थे) ग्रीकभाषायां प्रयुज्यन्ते । यथा—

कर्तृवाच्ये—एँन, नाइ । क्वचित्तु एँनाई स्ववाच्ये कर्मवाच्ये च स्थाइ प्राचीनश्च प्रत्ययः—थाइ ।

एतेभ्योऽतिरक्ताः ओ, एँस, एँई—इत्यादयोऽपि प्रत्ययाः क्रियान्ते प्रयुज्यन्ते ।

विकरणानां तुलनात्मकं व्याख्यानम्

धातुप्रत्यययोर्मध्ये यः प्रत्ययो विधीयते स विकरणनाम्ना[1] व्यवह्रियते । "भू + शप् + ति" अत्र शबिति विकरणः । न चैवं "भविता" इत्यादौ इडादीनामपि विकरणत्वापत्तिरिति वाच्यम्, तस्य विधानाभावात् । अयं भावः—इडादयः आर्धधातुकस्यागमभूतास्तदवयवभूताश्च शबादिप्रत्ययानां सार्वधातुके प्रत्यये परेधातुभ्यः परं विधीयन्ते, न तु आगमभूताः । संस्कृतेविकरणाः सप्तसंख्याका आचार्यैः प्रोक्ताः । ते च निम्नोक्ताः—

१. Thematic.

शप्[1] = अ। श्यन्[2] = य। श्नु[3] = नु। श[4] = अ। श्नम्[5] = न। उ[6]। श्ना[7] = ना।

विकरणानुसारेण सर्वे धातवो द्विधा विभक्तुं शक्यन्ते—१. सविकरणः, २. लुग्विकरणश्च।

सविकरणधातूनां भ्वादिभेदेन अष्टौ भेदाः स्वीक्रियन्ते। लुग्विकरणधातूनाञ्च लुक्-श्लुभेदेन भेदद्वयम्। लयोर्मध्ये एक अदादिगणः। अपरश्च जुहोत्यादिगणः।

विकरणदृष्टया पालिसंस्कृतयोः साम्यं प्रतीयते। अस्यामपि भाषायां विकरणभेदेन धातु-गणपाठः समुपलभ्यते।

ग्रीकभाषा तु विकरणदृष्टया धातुविभाजनविषये संस्कृतेन सह साम्यं भजति। अस्यामपि भाषायां लुगलुग्विकरणभेदेन धातवो द्विधा प्रतिभान्ति। लुग्विकरणश्च धातुः मिप्रत्ययान्तनाम्नाऽपि व्यपदिश्यतेऽस्यां भाषायाम्। पाणिनीयशास्त्रदृष्टया ग्रीकभाषायामपि लुग्विकरणधातूनाम् अदादिजुहोत्यादिभेदेन भागद्वयं कर्तुं शक्यते। लुग्विकरणो (= अदादिगणो) यथा—

"अस् धातुः"

	संस्कृतम्	ग्रीकभाषा	प्राचीन ग्रीकभाषा
एकवचनम्			
उत्तमपु०	अस्मि	एँस्मि	एँमि
मध्यमपु०	असि	एँसि	
अन्यपु०	अस्ति	एँस्ति	

यथा संस्कृते विकरणस्य लुक्, तथाऽत्र ग्रीकभाषायामपि।

जुहोत्यादिगणे यथा—दानार्थको दा धातुः (जुहोत्यादिगणे पठितः)

एकवचनम्		
उत्तमपु०	ददामि	दिदोमि
मध्यमपु०	ददासि	दिदोसि
अन्यपु०	ददाति	दिदोति

१. "कर्तरि शप्" (पा० सू० ३।१।६८)।
२. "दिवादिभ्यः श्यन्" (पा० सू० ३।१।६९)।
३. "स्वादिभ्यः श्नुः" (पा० सू० ३।१।७३)।
४. "तुदादिभ्यः शः" (पा० सू० ३।१।७७)।
५. "रुधादिभ्यः श्नम्" (पा० सू० ३।१।७८)।
६. "तनादिकृञ्भ्य उः" (पा० सू० ३।१।७९)।
७. "क्रादिभ्यः श्ना" (पा० सू० ३।१।८१)।

अत्रोभयोरपि भाषयोर्धातोर्द्वित्वं विकरणाभावश्च[1] दृश्यते। अलुग्विकरणाश्च धातवो यथा—शैथिल्याद्यर्थको लुलेँग इत्यादयः। विकरणसहितं क्रियारूपं यथा—

लुमेँन = शैथिल्यं कुर्मः।

अत्र ओँ (अ) इति विकरणः, मेँन इति उत्तमपुरुषस्य वहुबचने मस्[2] तुल्यः प्रत्ययः, लु इति प्रकृतिः।

वस्तुतस्तु ग्रीकभाषायां केवलम् "ओँ" (अ) एव विकरणनाम्ना (थेमेटिक) व्यवह्रियते। अयं विकरणो धातोः परं, मेँनादिव्यञ्जनपूर्वञ्च प्रयुज्यते। दैव्यां गिरि विकरणानां प्रयोगः प्रकृतिप्रत्यययोर्मध्ये सार्वधातुकप्रत्यये परे वर्तमानाद्यर्थबोधकेषु लडादिलकारेषु विधीयते। परन्तु ग्रीकभाषायां भविष्यत्कालेऽपि विधीयते। आकारभिन्ना ये प्रत्यया धातुभ्यो विधीयन्ते, ते सर्वे विकरणनाम्ना न व्यपदिश्यन्ते, क्रियान्तवर्णनाम्ना (वरबल इन्डिग यद्वा टरमिनेशन) व्यपदिश्यन्ते। संस्कृतभाषायां सार्वधातुके धातुभ्यः परे विधीयमानेषु येषु विकरणेषु (अँ) अकारः श्रूयते, ग्रीकभाषाया[3] दृष्टया स एव विकरणनाम्ना व्यपदेष्टुं शक्यते। यथा 'दिवादिभ्यः श्यन्", "तुदादिभ्यः शः", "रुधादिभ्यः श्नम्", "क्रादिभ्यः श्ना" इति। अत्र श्यनादिषु अकारः श्रूयते।

१. लुग्विकरणस्य विकरणहीनस्य वा निर्देशो यथा—

"VII Seventh Class (Present in with simple Stem).—Here the verb stem some time reduplicated (III, 7C) without the thematic vowel, appeare as the present stem, as oane (oa) say".—A School Greek Grammar, P. 104.

अस्मिन्नेव ग्रन्थे सविकरणस्यापि निर्देशः ९९ पृष्ठे द्रष्टव्यः।

२. संस्कृतभाषायामयं प्रत्ययो धातुभ्यो विहितानां लडादिलकाराणां स्थानेषु प्रयुज्यते।

3. "Tense suffixes–In the present, imperfect and second aorist active and middle of the congugation ln all futures, and the future perfect, the tense steme ends in a variable vowel, called the thematic vowel, which is used before and v and in the aptative, and is elsewhere This is written as present steme of second aorist steme of In the futures and the future perfect the thematic vowel is preceded by O these prolonged tense estems the ending are added."—B. G. A School Greek Grammar, written by William P. 99.

अतो ग्रीकभाषादृष्टया एत एव विकरणाख्याः। किन्तु अन्ये "तनादिकृञ्भ्य उः" "स्वादिभ्यः श्नुः" इत्यादिसूत्रैः विधीयमाना उकारादयो विकरणरूपेण न स्वीक्रियन्ते, तेष्वकारस्य श्रवणाभावात्। अतस्तनादि-स्वादि-अदादि-जुहोत्यादिधातवोऽविकरणाः, तदतिरिक्ताश्च सविकरणाः। संस्कृतव्याकरणानुसारेण तु अदादिजुहोत्यादिगणान् यङ्लुगन्तञ्च विहाय सर्वे धातवः सविकरणाः। ग्रीकभाषीयव्याकरणानुसारेण सविकरणाविकरणभेदेन संस्कृतभाषीयधातूनां यो विभागः प्रदर्शितः, स एव भाषाशास्त्रविद्वत्सम्मतः[1]।

केचिद् भाषाशास्त्रज्ञानचुञ्चवो[2] भ्वादिगणानुसारेण दशभागेषु विभक्तान् धातून् चतुर्दश भागेषु व्यभजन्। ते च लक्षणसहिताः अधस्तात् क्रमशः प्रदर्श्यन्ते। अनेन विकरणानामपि सम्यङ्ज्ञानं भविष्यति।

भ्वादिगणानुसारेण धातुभेदाः

प्रथमो वर्गः—येभ्यो धातुभ्यस्तिङ्प्रत्यये परे न कोऽपि विकरणो विधीयते, ते धातवः प्रथमे वर्गे गण्यन्ते। यथा अदादिगणः—अस्ति, स्मः। ग्रीक भाषायाम्—ऐस्ति। लैतिने–एस्त।

प्राचीनभारतयोरोपीयभाषायाम् "एस्ति" इति रूपम्।

द्वितीयो वर्गः—अस्मिन् वर्गे प्रकृतिप्रत्यययोर्मध्ये अविकरणस्य (शप्प्रत्ययस्य) विधानं क्रियते। ग्रीकभाषायामयं विकरणः क्वचिद् ओँकाररूपेणापि श्रूयते। उदाहरणं यथा—

संस्कृते—भरामि, भरति, भरन्ति। ग्रीकभाषायां तु फोँरो, फेँरो उसि। इत्यादि।

तृतीयो वर्गः—अस्मिन् वर्गे जुहोत्यादिगणः समाविश्यते। उदाहरणं यथा—

संस्कृते	ग्रीके	प्रा० भा० यो०
पिपर्मि, पिपृमः	पिप्लमन्	पिपेँल्मि, पिप्लमास

चतुर्थो वर्गः—येषां धातूनां द्वित्वम्, अविकरणश्च विधीयते, ते सर्वेऽस्मिन् वर्गे गण्यन्ते। यथा—

संस्कृते	अवेस्ताभाषायाम्	लैतिने	प्रा० भा० यो०
तिष्ठामि	हिस्तइति	सिस्तित्	सस्क्वति

१. अस्मिन् प्रसंगे भोलाशङ्करव्यासेन कृतस्य "संस्कृत का भाषाशास्त्रीय अध्ययन" इत्याख्यस्य ग्रन्थस्य २११ तमे पृष्ठे द्रष्टव्यम्।

२. धातूनां चतुर्दशवर्गेषु विभाजनं "संस्कृत का भाषाशास्त्रीय अध्ययन" इति पूर्वोक्ते ग्रन्थे १९७ पृष्ठे व्याख्यातम्। तदनुसृत्यैतत्सर्वं प्रोच्यते।

पञ्चमो वर्गः—अस्मिन् वर्गे भागद्वयं विद्यते। प्रथमभागे धातुभ्यो ना-न्, अन्, विकरणाः, द्वितीये च "ना न" प्रयुज्यन्ते। प्रथमस्योदाहरणम्-अश्नामि, अश्नीमः, क्रीणामि। द्वितीयस्य च—मेनाति, घूर्णते, कृपणते।

षष्ठो वर्गः—अयमपि वर्गो द्विधा विभक्तः। प्रथमभागे न्व (नु) विकरणो धातुभ्यो विधीयते। उवङादेशे च अयं विकरणो नुवरूपेणापि श्रूयते। उदाहरणं यथा—स्तृणोमि, स्तृणुमः। ग्रीकभाषायां—स्तार्नुमन्। प्राचीनभारतयोरोपीयभाषायाम्—स्तृन्वमि। स्तृनुमास।

द्वितीये भागे तु यणि कृते सति वकाररूपेण (अकारेण सह) नुविकरणः श्रूयते। यथा चिनु+अति=चिन्वति। होमरिकग्रीकभाषायां तीनो (तिन्वो) प्रा०भा०यो०—क्विन्वति।

सप्तमो वर्गः—अयमपि वर्गो द्विधा विभज्यते। येभ्यो धातुभ्यो न, न् (सं० न) विकरणो विधीयते, ते प्रथमभागे गण्यन्ते। यथा—छिनद्मि, छिन्द्मः। भुनज्मि, भुञ्ज्मः। द्वितीयभागे धातोर्मध्ये नकारः, धातुभ्यश्च परम् अकारः श्रूयते। यथा—विन्दामि, लुम्पति इत्यादि।

अष्टमो वर्गः—धातुभ्यः स, यद्वा अस, यद्वा इस विकरणस्य प्रयोगोऽकारेण सह क्रियते। अयं वर्गः सनाद्यन्तनाम्नाऽपि व्यपदिश्यते। उदाहरणं यथा—पिपासति, जिजीविषामि।

नवमो वर्गः—अस्मिन् वर्गे प्राचीनभारतयोरोपीयधातुभ्यः स्का-विकरणः प्रयुज्यते। अयं स्काविकरणः संस्कृते च्छ, ग्रीकभाषायां स्का, तथा लैतिने स्वरूपेण व्यकासत। उदाहरणं यथा—गच्छामि, ग्रीकभाषायां वास्को इत्यादि।

दशमो वर्गः—"ता" विकरणवन्तो धातवोऽस्मिन् वर्गे गण्यन्ते। तदुदाहरणं यथा लैतिनभाषायाम्—"प्लक्ता"। अयं विकरणो ग्रीकभाषायां को रूपेण समुपलभ्यते। यथा "प्लक्तो" इत्यादिषु। प्राचीनभारतयोरोपीयभाषायां तु स्वस्वरूपेण (तारूपेण) "स्फृल्ताति" इत्यादिशब्देषु समुपलभ्यते, स्फृल्तादिपदं स्फुटत्यर्थे प्रयुज्यते।

एकादशो वर्गः—धा[1] दा विकरणवन्तो धातवोऽस्मिन् वर्गे गण्यन्ते। धा-दा विकरणौ संस्कृते ध द रूपेण दृश्येते। यथा कूर्दति, क्रीडति। प्रा० भा० यो० भाषायाम् क्रिज-द-ति। योधति।

द्वादशो वर्गः—येभ्यो धातुभ्यो य-विकरणः प्रयुज्यते, ते धातवोऽत्र गण्यन्ते। यविकरणधातूनां वर्तमानकालिकं रूपं यथा संस्कृते—पश्यति, अवेस्तायां—स्पस्प

१. यद्यपि संस्कृते ध-द नामको विकरणो न क्वचिल्लभ्यते। तथाप्याधुनिका भाषाशास्त्रिणो मन्यन्ते। एवमन्यत्रापि समाधेयम्।

इति। अयं विकरणः क्वचिद् "इआ" रूपेणापि समुपलभ्यते। यथा—लैतिन-भाषायां "स्पकिआ" इत्यादिषु। ग्रीकभाषायां तु—पस्सो।

त्रयोदशो वर्गः—यासां धातूनां द्वित्वम्, येभ्यश्च यविकरणः प्रयुज्यते, ते सर्वेऽस्मिन् वर्गे गण्यन्ते। प्राचीनभारतयोरोपीयभाषायाञ्च अयं विकरणो "या" रूपेण प्रयुज्यमाना आसीत्। संस्कृतेऽस्य वर्गस्य कस्या अपि क्रियाया रूपं न समुपलभ्यते। किन्तु प्राकृतग्रीकभाषायां (वल्गरग्रीकभाषायाम्) दृश्यते। यथा—तितायनो, प्रा० भा० यो० भाषायां तु "ति-त्न-यो" इति रूपम्।

चतुर्दशो वर्गः—अस्मिन् वर्गे सन्निविष्टेभ्यो धातुभ्यः एया, एय (संस्कृते अय) विकरणः समुपलभ्यते। अस्मिन् वर्गे णिच्प्रत्ययान्ताः सर्वे धातवः सन्निविष्टाः। तदुदाहरणं यथा—संस्कृते तर्षयामि, लैतिने—तारया, प्राचीनभारतयोरोपीयभाषायां लावक्वयो, संस्कृते-स्पृहयामि। वल्गरग्रीकभाषायां-स्परवामइ। भाषाशास्त्रदृष्ट्या, कारयकारयोर्भेदो न स्वीकियते। अतः स्परवा मइ इत्यत्र "अइ = अय" इति बोद्धव्यम्।

एते सर्वे वर्गाः संस्कृतवैयाकरणैः स्वीकृतेषु भ्वादिदशगणेष्वन्तर्भवन्ति, यथा प्रथमो वर्गोऽदादिगणे, द्वितीयश्चतुर्थोऽष्टमो नवमश्च भ्वादौ, तृतीयो जुहोत्यादौ, पञ्चमश्च क्र्यादौ, षष्ठः स्वादौ, सप्तमो रुधादौ, दशमस्तुदादौ, द्वादशो दिवादौ, चतुर्दशश्चुरादौ। त्रयोदशो वर्गस्तु न केष्वपि वर्गेष्वन्तर्भवितुमर्हति। यद्वा अस्मिन् वर्गे सन्निविष्टेभ्यो धातुभ्यो यविकरणस्य विधानात् कथञ्चिद् दिवादावयं वर्गोऽन्तर्भवितुमर्हति। दिवादौ धातोर्द्वित्वाभावाच्च नार्हति। अर्थादियं वर्गो दिवादिभिन्नो दिवादिसदृशश्च विद्यते। "श्नु, श्नम्, उ, श्ना" इति चतुर्षु विकरणेषु परस्परं यद्यपि भेदो दृष्टिपथं समायाति, परन्तु भाषाशास्त्रीयदृष्ट्या "श्नु, श्नम्, श्ना"—इत्यनुबन्धत्रये नध्वनेः श्रवणात्, "उ, श्नु" इत्यनयोश्च उकारस्य सत्त्वाच्च तेषु परस्परं साम्यं परिलक्ष्यते। श्नु (नु), श्नम् (न), श्ना = (ना) इति चतुर्षु विकरणेषु नध्वनेः श्रवणादत्यन्तं साम्यं दृष्टौ समायाति।

एवमत्र पर्यन्तं धातुप्रत्ययविकरणानां तुलनात्मकं समीक्षणं कृतम्। अथ धातुभ्यः परं ये तिङादिप्रत्ययास्तेभ्य आगमाः क्रियन्ते, अग्रे तेषां विचारः प्रस्तूयते।

आगमाः

धातुभ्यो ये तिबादिप्रत्ययाः, लिङादिलकारेषु तेषां णलाद्यादेशाः क्रियन्ते। णलादीनां मध्ये ये आर्धधातुकसंज्ञका वलादयश्च[1], तेभ्यः पूर्वमिडाद्यागमाः क्रियन्ते।

१. वलपदेनात्र पाणिनीयव्याकरणशास्त्रपठिताक्षरसमाम्नाये वकाराद् प्रारभ्य लकारपर्यन्तं (इत्संज्ञकान् वर्णान् विहाय) सर्वे वर्णा ग्राह्याः।

"तदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते" इति परिभाषया ते आगमास्तिबाद्यवयवीभूताश्च वैयाकरणैः स्वीक्रियन्ते। तद्यथा—

बभूव + इथ = बभूविथ इत्यत्र मध्यमपुरुषैकवचनीभूतसिप्स्थानिकस्य थकारस्येडागमः। इड्-घटकस्य डकारस्य लोपे कृते च इकारोऽवशिष्यते। स च थकारस्यावयवः। अतो लिट्लकारे मध्यमपुरुषस्यैकवचने सेड्धातुभ्यः परस्य सिप्प्रत्ययस्य स्वरूपम् "इथ" इति। अनिड्धातुभ्यः परस्य च "थ" इति रूपम्। अनया दिशा विचार्यमाणे सति भविष्यदर्थके लृट् लकारे सेड्धातुभ्यः परस्य तिबादिप्रत्ययस्य स्वरूपम्—"इष्यति, इष्यतः, इष्यन्ति इत्यादि। अनिड्भ्यः परस्य च—स्यति, स्यतः, स्यन्ति इत्यादि। यथा "भवति" इत्यादौ तिबादिप्रत्ययाः धात्ववयवाः, तथैव लृट्लकारे "भविष्यति" इत्यादौ "इष्य" इत्यस्य तिप्-प्रत्ययावयवभूतत्वाद् "इष्यति" इति भूधात्वन्तप्रत्ययनाम्ना व्यपदेष्टुं शक्यते। आधुनिकाश्च एवमेव व्यपदिशन्ति। भविष्यतीत्यादिघटकं "इष्यति" इत्यादिकं "टर्मिनेशन" नाम्ना व्यवहरन्ति। वर्तमानादिकालाद्यर्थकलडादिलकारस्य स्थानेषु प्रयुक्तास्तिबादयो निम्नाङ्कितं स्वरूपं भजन्ति।

तिबादिप्रत्ययानामादेशरूपाणि

परस्मैपदिनः

वर्तमानकालः (लट्लकारः = प्रेजण्ट टैन्स)

	एकवचनम्	द्विवचनम्	बहुवचनम्
अन्यपु०	ति	तः	अन्ति
मध्यमपु०	सि	थः	थ
उत्तमपु०	मि	वः	मः

परोक्षभूतकालः (लिट्लकारः)
(= प्लूपरफेक्ट)

अन्यपु०	अ	अतुः	उः
मध्यमपु०	इथ, थ	अथुः	अ
उत्तमपु०	अ	इव, व	इम, म

अनद्यतनभविष्यत्कालः (लुट्लकारः)
(= परफेक्ट फ्यूचर)

अन्यपु०	इता, ता	इतारौ	इतारः, तारः
मध्यमपु०	इतासि, तासि	इतास्थः, तास्थः	इतास्थ, तास्थ
उत्तमपु०	इतास्मि, तास्मि	इतास्वः, तास्वः	इतास्मः, तास्मः

अद्यतनभविष्यत्कालः (लृट्लकारः)

(= फ्यूचर)

अन्यपु०	इष्यति, स्यति, ष्यति	इष्यतः, स्यतः, ष्यतः	इष्यन्ति, स्यन्ति, ष्यन्ति
मध्यमपु०	इष्यसि, स्यसि, ष्यसि	इष्यथः स्यथः, ष्यथ	इष्यथ, स्यथ, ष्यथ
उत्तमपु०	इष्यामि, स्यामि ष्यामि	इष्यावः, स्यावः, ष्यावः	इष्यामः, स्मामः, ष्मामः

लोट्लकारः (आशीर्वादाद्यर्थकः)

(= इम्परेटिव मूड)

	एकवचनम्	द्विवचनम्	बहुवचनम्
अन्यपु०	तु, तात्	ताम्	न्तु
मध्यमपु०	हि, धि, तात्	तम्	त
उत्तमपु०	आनि	आव	आम

लिङ्लकारः (विध्याद्यर्थकः)

(= आप्टेटिव)

अन्यपु०	इत्	इताम्,	इयुः
मध्यमपु०	इः	इतम्	इत
उत्तमपु०	इयम्	इव	इम

आशीर्वादार्थको लिङ्लकारः

अन्यपु०	यात्	यास्ताम्	यासुः
मध्यमपु०	याः	यास्तम्	यास्त
उत्तमषु०	यासम्	यास्व	यास्म

अद्यतनभूतकालः (लुङ्लकारः)

(= एओरिस्ट)

अन्यपु०	इत, त्, षीत्, सीत्	इष्टाम्, स्ताम्, ष्टाम्	इषुः, सुः, षुः
मध्यमपु०	ईः, षीः, सीः	इष्टम्, स्तम्, ष्टम्	इष्ट, स्त, ष्ट
उत्तमपु०	इषम, सम्, षम्	इष्व, स्व, ष्व	इष्म, स्म, ष्म

क्वचित्तु सिचो लुकि सति लङ्वद्रूपाणि तिबादयो भजन्ति । यथा—

	एकवचनम्	द्विवचनम्	बहुवचनम्
अन्यपु०	अभू-त्	अभू-ताम्	अभूव्-अन्
मध्यमपु०	अभूः	अभू-तम्	अभू-त
उत्तमपु०	अभूव्-अम्	अभू-व	अभू-म

एवं च्लेरङाद्यादेशेषु रूपाणि बोध्यानि । अत्र तु निर्देशमात्रं प्रदर्शितम् ।

लिङ्निमित्ते लृङ् क्रियातिपत्तौ

अन्यपु०	इष्यत्, ष्यत्, स्यत्	इष्यताम्, स्यताम्, ष्यताम्	इष्यन्, ष्यन्, स्यन्
मध्यमपु०	इष्यः, ष्यः, स्यः	ईष्यतम् ष्यतम् स्यतम्	इष्यत, ष्यत स्यत
उत्तमपु०	इष्यम्, ष्यम्, स्यम्	इष्याव स्याव, ष्याव	इष्याम, ष्याम स्याम,

—

आत्मनेपदिनः

(वर्तमानकालः = लट्लकारः)

अन्यपु०	ते	एते	अन्ते
मध्यमपु०	से	एथे	ध्वे
उत्तमपु०	ए	वहे	महे

परोक्षभूतकाल : (लिट्लकारः)

(= प्लूपरफेक्ट)

अन्यपु०	ए	आते	इरे,
मध्यमपु०	इषे, षे, से	आथे	इध्वे, ढ्वे
उत्तमपु०	ए	इवहे, वहे	इमहे, महे

अनद्यतनभविष्यत्कालः (लुट्लकारः)

परफेक्टफ्यूचर

	एकवचनम्	द्विवचनम्	बहुवचनम्
अन्यपु०	इता, ता	इतारौ, तारौ	इतारः, तारः
मध्यम पु०	इतासे, तासे	इतासाथे, तासाथे	इताध्वे, ताध्वे
उत्तमपु०	इताहे, ताहे	इतास्वहे, तास्वहे	इतास्महे, तास्महे

अद्यतनभविष्यत्कालः (लृट्लकारः)

अन्यपु०	इष्यते, स्यते, ष्यते	इष्येते, स्येते, ष्येते	इष्यन्ते, स्यन्ते, ष्यन्ते
मध्यमपु०	इष्यसे, स्यसे, ष्यसे	इष्येथे, स्येथे, ष्येथे	इष्यध्वे, स्यध्वे, ष्यध्वे
उत्तमपु०	इष्ये, स्ये, ष्ये	इष्यावहे स्यावहे, ष्यावहे	इष्यामहे, स्यामहे, ष्यामहे

लोट्लकारः (आशीर्वादाद्यर्थकः)
(=इम्परेटिव मूड)

अन्यपु०	ताम्	एताम्	न्ताम्
मध्यमपु०	स्व, ष्व	एथाः	ध्वम्
उत्तमपु०	ऐ	वहै	महे

लिङ्लकारः (विध्याद्यर्थकः =आप्टेटिव)

अन्यपु०	एत	एयाताम्,	एरन्
मध्यमपु०	एथाः	एयाथाम्	एध्वम्
उत्तमपु०	एय,	एवहि	एमहि

आशीर्वादार्थको लिङ्लकारः

	एकवचनम्	द्विवचनम्	बहुवचनम्
अन्यपु०	इषीष्ट, षीष्ट, सीस्त	इषीयास्ताम् षीयास्ताम् सीयास्ताम्	इषीरन्, षीरन् सीरन्
मध्यमपु०	इषीयास्थाः षीयास्थाः सीयास्थाः	इषीयास्थाम् षीयास्थाम् सीयास्थाम्	इषीध्वम् षीध्वम् सीध्वम्
उत्तमपु०	इषीय, षीय, सीय,	इषीवहि, षीवहि सीवहि	इषीमहि, षीमहि सीमहि

अद्यतनभूतकालः (लुङ्लकारः =ओरिष्ट)

अन्यपु०	इष्ट, स्त ष्ट	इषाताम्, षाताम्, साताम्	इषत, षत, सत्
मध्यमपु०	इष्ठाः, स्थाः ष्ठाः	इषाथाम्, साथाम्, षाथाम्	ईढ्वम्, ध्वम् ढ्वम्
उत्तमपु०	इषि, सि, षि	इष्वहि, स्वहि, ष्वहि	इष्महि, स्महि ष्महि।

लिङ्निमित्ते लृङ् क्रियातिपत्तौ

अन्यपु०	इष्यत, ष्यत स्यत	इष्येताम् ष्येताम्, स्येताम्	इष्यन्त, इष्यन्त, स्यन्त

मध्यमपु०	इष्यथाः, ष्यथाः स्यथाः	इष्येथाम्, ष्येथाम् स्येथाम्	इष्यध्वम् ष्यध्वम् स्यध्वम्
उत्तमपु०	इष्ये, इष्ये, स्ये	इष्यावहि, ष्यावहि, स्यावहि	इष्यामहि, ष्यामहि, स्यामहि

ये धातवोऽजुपधाः, अलन्ताः यद्वा हलन्ताः, सेट्काः अनिट्काश्च, तेभ्यः परं तिबादीनां यत्स्वरूपं वर्तमानादिकालेषु निष्पद्यते, तत्सर्वमत्र प्रतिपादितम्। ऌकारान्तस्तु केवलमाप्लृधातुः[1] समुपलभ्यते। ऌकारोपधस्य धातोस्तु नितरामभावः।

भूतादिकालार्थकलङादिलकारेषु धातूनामडाद्यागमाः क्रियन्ते। यथा भविष्यत्कालिकाः स्याद्यागमास्तिबादि-प्रत्ययावयवीभूताः, एवं लङादिलकारेषु भ्वादिधातुभ्योऽडाद्यागमास्तदवयवीभूताः। पूर्वपरभेदेन धातुभ्यश्च द्विधा प्रत्यया विधीयन्ते। पूर्वागमो यथा—अडाटौ। लङ्-लुङ्-लृङ् लकारेषु हलादिधातुभ्योऽटः अजादिधातुभ्यश्च आट आगमः। यथा—अभवत्, आ+अत+ईत् =आतीत्। इत्यादिषु। धातुभ्यः परश्च वुग्-युगाद्यागमाः। यथा—अभूवन्, व्यधायि।

ग्रीकभाषायामपि अनद्यतनादिभूतकालेषु धातुभ्यः पूर्वम् अडागम इव एकारस्यागमो दृश्यते। यथा - एलुसा =शैथिल्यमकार्षम्। अत्र शैथिल्यार्थक-"लु" धातोः पूर्वमेकारस्यागमः। एवं धातवः, धातुभ्यो विधीयमानास्तिबादि-प्रत्ययाः, तिबादिभ्यश्च भविष्यदाद्यर्थविबोधकाः स्याद्यागमाश्च पूर्वगमा, विकरणञ्च इतीमानि पञ्च तत्त्वानि। यथा पृथ्व्यादिपञ्चभूतानि परस्परं मिलित्वा मानवादिशरीरं निर्मापयन्ति, तथैव भवति, बभूव, अभवत् इत्यादिक्रियारूपं निष्पादयन्ति।

धातूनामादेशरूपाणि

किद्ङिद्भिन्नयोः सार्वधातुकार्धधातुकयोः केचिद् धातवो गुणरूपाणि[2] वृद्धिरूपाणि[3] च भजन्ति। यथा—

भू+अ+ति =भो+अ+ति, अवादेशे भवति इति। छिद्+ता =छेत्ता। अच्छिद्+स+ईत् =अच्छैत्सीत् इत्यादौ उकारेकारयोरोकारैकारादिरूपेण गुण-वृद्धी दृश्येते। एवं यत्र धातुघटकेकारादिस्वराणां एकारादिरूपेण समुपलब्धिस्तत्र तेषां गुणीभूतं रूपं जानीयात्।

---

१. ऌकारोपधस्तु न कोऽपि धातुः समुपलभ्यते।
2, 3. Strongforms and Augeements.

गीर्वाणवाण्यां धातुघटकस्वराणां गुणवृद्धिवद् अपरं वैशिष्ट्यं धातूनां द्वित्वरूपं समुपलभ्यते। धातूनां द्वित्वरूपं परोक्षलिट्लकारे जुहोत्यादिगणे सार्वधातुके प्रत्यये परे, सन्यङ्प्रत्यययोर्यङ्लुकि च समुपलभ्यते। उदाहरणार्थं केषाञ्चिद् धातूनां द्वित्वरूपमधस्तात् प्रदर्श्यते—

बुध = बुबोध, भिद = बिभेद, हु = जुहोति।

भोक्तुमिच्छति बुभुक्षति। पुनः पुनरतिशयेन वा भवतीति बोभूयते, बोभवीति, बोभूति इत्यादि।

द्वित्वरूपमापन्नस्य धातोः प्रथमो वर्णः, यः संस्कृतेऽभ्याससंज्ञक उच्यते, स चेत् कवर्गीयो यद्वा हकारः, तर्हि चवर्गादेशं भजति। यथा - कम = चकमे, खन् = चखान, गम = जगाम, घस = जघास, हस = जहास।

यदि द्विहलादिधातोरादिवर्णः सकारः स्यात्तर्हि अभ्यासे स लुप्यते। यथा स्तु = तुष्टाव। स्था = तस्थौ। स्कन्द = चस्कन्द, स्मृ = सस्मार।

धात्वयवभूत-स्वरो यदि दीर्घवृद्धिरूपो वा स्यात्तर्हि द्वित्वे सति प्रथमः स्वरो ह्रस्वमापद्यते। यथा—गाहू = जगाह। क्रीड = चिक्रीड। कूज = चुकूज। सेव = सिषेव। ढौकृ = डुढौक।

जुहोत्यादिगणपठितधातूनां द्वित्वरूपस्योदाहरणं प्रदर्शितम्। क्वचित्तु द्वित्वभूतस्य प्रथमवर्णस्य लोपः। द्वितीयवर्णघटकस्य अकारस्य च एत्वं क्रियते। यथा तन = त तन = तेने। इत्यादिः। धातूनामेवं द्वित्वरूपाणि ग्रीकभाषायामपि समुपलभ्यन्ते। अयं पूर्वमेव प्रतिपादितः। परन्तु ग्रीकभाषायां वर्तमानपरोक्षाद्यतनानद्यतनभविष्यत्कालिकक्रियासु प्रत्येकमवस्थायां धातोर्द्वित्वं समुपलभ्यते। एतावांश्चानयोर्भेदो बोद्धव्यः। तदुदाहरणं यथा—"लेॅलुका = शिथिलं कृतवानस्मि। एॅलेॅलुके = शिथिलं कृतवान् आसम् इत्यादि[1]।

आख्यातान्तनिष्पत्तौ धातुभिः सह प्रत्ययानां तुलनात्मको योजनप्रकारः

एवमुपर्युक्तरीत्या प्रकृतिप्रत्ययादीनां व्याख्यानेनेदमेव समायातं यत् पालि-संस्कृत-ग्रीकभाषासु प्रकृतिप्रत्ययविकरणागमैराख्याता निष्पाद्यन्ते, अतः पूर्वं प्रकृतिप्रत्ययाः पृथक् पृथक् व्याख्याताः। अत्र तु तेषां धातुभिः सह संयोजनप्रकारस्योदाहरणमात्रं प्रदर्श्यते।

1. A School Greek Grammar, . P. 65.

वर्तमानकालः = लट्लकारः (प्रजेन्ट टेन्स)

	प्रकृतिः	विकरणः	प्रत्ययः	धातुप्रत्यययोरादेशादिरूपम्	निष्पन्नं रूपम्
संस्कृतम्	भू	(अ[1] शप्)	ति (थिप्)	भो[2] + अ + ति भव + ,, ,,	भवति ,,
पालिः	,,	,,	,,	,,	,,
प्राकृतम्	भू		ति	हो[3], हुव + इ	होइ, हुवइ
ग्रीक	लु	—	ओ	—	लुओ[4]

परोक्षभूतकालः = लिट् लकारः (प्लू परफेक्ट)

संस्कृतम्	भू	—	ति (तिप्)	बभूव + अ	बभूव
पालि	,,	—	,,	,,	,,
प्राकृत	भू	—	ति (तिप)	हो + हीअ	होहीअ[5]
ग्रीक	लु	—	के	एॅलेॅलु + के	एॅलेॅलुके[6]

अनद्यतनभविष्यत्कालः = लुट्लकारः
(फ्यूचर परफक्ट)

संस्कृतम्	भू	—	ति	भो + इता,	भविता
पालिः[7]	—	—	—	भव + इता	—
प्राकृतम्	भू	हि	ति	हो + हि[8] + इ	हो हि इ[9]

१. "कर्तरि शप्" (३।१।६८ पा० सू०) "एचोऽयवायावः" (६।१।७८ पा० सू०)।
२. "भुवो हो हुवो" (८।१) वररुचिकृतप्राकृतप्रकाशः।
३. "ततिपोरिदैतो" (७।१) ,, ,, ,, ।
४. "ए स्कूल ग्रीक ग्रामर" रीटेन बाई विलियम डब्लू, गूडवीन, पृ० ६४। श्लथयामीत्यर्थः।
५ लिट् लुङ् लङ् इति लकारत्रयार्थे प्रयुज्यते।
६. अहं लिखितवान् आसम् इति तदर्थः।
७. पालिभाषायां लुट्लकारस्य रूपं नोपलभ्यते।
८. "धातोर्भविष्यति हिः" (७।२२) वररुचिकृते प्राकृतप्रकाशे।
९. भविष्यति काले यावन्तो लकारा विधीयन्ते, यद्वा भविष्यत्कालस्य यावन्तो भेदाः "तदर्थे हो हि इ" इत्यादिवद् एकमेव रूपं क्रियाणां समुपलभ्यते। "हो हि इ" इत्यस्य च भविता, भविष्यति, भवेत् इत्यादयोऽर्था बोद्धव्याः।

ग्रीक	लु०	सोँमॉई (सोँमे) लेँलु—सोँमाई लेँलुसोँमाई[1] (लेँलसोँमे)			

सामान्यभविष्यत्कालः = लृट्लकारः (फ्यूचर)

संस्कृतम्	भू	—	ति	भो + इष्यति =भव + ,,	भविष्यति
पालिः	भू		स्सति	भो + इस्सति भव + इस्सति	भविस्सति
ग्रीक	लु		सो	—	लुसो[2]

लोट्लकारः (= इम्परेटिव)

संस्कृतम्	भू	अ (शप्)	ति (तिप)	भो + अ + तु, तात् भव + ,, ,, ,,	भवतु, भवतात्
पालिः	,,	,,	,,	,, ,,	,,
प्राकृतम्	भू	—	ति	हो + उ	होउ
ग्रीक	लु	—	एँ	—	लुएँ[3]

अनद्यतनभूतकालः लङ्लकारः (इम्परफेक्ट)

संस्कृतम्	भू	अप (शप्)	ति	अभो—अ + अ =अभव + अत	अभवत्
पालिः	भू	—	आ	अभो + आ = अभव + आ	अभवा[4]
	गम	—	आ	अगम + आ	अगमा[5]
ग्रीक	लु	अ (ओँ)	न्	एलु + अ + न्	एँलुअन्[6]

---

१. श्लथयिता ।
२. श्लथयिष्यामि ।
३. श्लथयतु ।
४. भूधातोरन्यपुरुषस्यैकवचनम् ।
५. गम ,, ,, ,,
६. अहं श्लथयन् आसम् । यद्वा अहमश्लथयम् । आइ वाज् लूजिंग ।

विधिनिमन्त्रणाद्यर्थको लिङ्लकारः (= आपटेटिव)

	१	२	३	४	५
संस्कृतम्	भू	अ	ति	भू + अ + या + त् = भव + अ + इत्	भवेत्
	भू	—	ति	भू + तात्	भूयात्
पालिः	कर	—	एय्यामि	—	करेय्यामि
ग्रीक	लु	ओँ	इमि	—	लुओँइमि[1]

सामान्यभूतकालः = लुङ्लकारः (अओरिष्ट)

संस्कृतम्	भू	—	ति	अभू + स + त्	अभूत्
	अत	—	तस्	आ + अत + इ + स्ताम्	आतिष्टाम्
पालिः	गम्	—	ई	अगम् + ई	अगमी
प्राकृतम्	गम्	—	ईअ	—	गमीअ
ग्रीक	लु	—	सा	एँलु + सा	एँलुसा[2]

सम्भावनार्थको लृङ्लकारः

संस्कृतम्	भू	—	ति	अभो + इष्यत् = अभव + इष्यत्	अभविष्यत्
पालिः	गम्	—	इस्सा	अगच्छ + इस्सा	अगच्छिस्सा
ग्रीक	लु	—	ओ	—	लुओ

एवमात्मनेपदेष्वपि पूर्वनिर्दिष्टास्तकारादिप्रत्यया धातुभ्यः परं प्रयुक्ताः, लडादिलकारेषु एशादिरूपेण आदिष्टाः, "एधते, अनुबभूवे" इत्यादि क्रियारूपं निष्पादयन्ति ।

एवमुपर्युक्तानाम् आख्यातान्तरूपाणां समीक्षयेदमेव समायाति—यथा गीर्वाण-वाण्यां धातुभ्यः प्रत्ययविकरणाडाद्यागमान् विधाय आख्यातान्ता निष्पाद्यन्ते, तथैव ग्रीकभाषायाम्, अथ च पालिभाषायामपि । किञ्च, उदाहरणार्थं प्रदर्शितेष्वाख्या-तेषु न केवलं प्रक्रियासाम्यम्, अपितु क्वचिद् ध्वनिसाम्यमपि परिलक्ष्यते । गीर्वाण-वाण्यां यथा लिङ्लकारे उत्तमपुरुषस्यैकवचने "पठेयम्" इत्यादिषु एकार-मकारयोः, लुङ् लकारे "अनैषीत्" इत्यादिषु च सकारस्य श्रुतिर्जायते, तथैव

---

१. अहं श्लथेयम् ।
२. अहमश्लाथिषम् ।

ग्रीकभाषायामपि वर्तमानकालिके लिङ्लकारे[१] लुङ्लकारे च ते पूर्वोक्ता एकारादयो वर्णाः श्रूयन्ते। यथा लिङ्लकारे उत्तमपुरुषस्यैकवचने "लुओँइमि" इत्यत्र इकारमकारयोः, "एलुसो" इत्यत्र च सकारस्यास्तित्वं दृष्टिपथं समवतरति। भाषाविज्ञानदृष्टचा अ + इ = ए—इत्यनयोर्नकोऽपि भेदो विद्यते।

परन्तूभयोर्मध्ये कश्चिद् भेदोऽपि दृष्टिपथं समायाति। गीर्वाणवाण्यां कालत्रये लिङ्लोट्लकारयोर्निष्पन्नानि क्रियारूपाणि समानानि दृश्यन्ते, किन्तु ग्रीकभाषायामेतद्विपरीतमेव दृश्यते। वर्तमानकालिकलिङ्लकारे लु धातोः "लुओँइमि" इति रूपम्, भविष्यत्कालिके लिङ्लकारे च "लुसाइमि" इति, परोक्षभूतकालिके लिङ्लकारे "लेलुकोसो" इत्येवं विविधरूपं परिलक्ष्यते। परन्तु गीर्वाणवाण्या लिङ्लकारे निष्पन्नस्याख्यातान्तस्य कालत्रये "श्लुथेयम्" इत्येकमेव रूपं[२] निष्पद्यते। भविष्यद्-वर्तमानकालिकयोर्लोट्लकारे लु धातोः "लुए" इति, अद्यतनभूतकालिके च लोट्लकारे "लूसन" इति, परोक्षभूतकालिके लोट्लकारे च "लेलुका" इति रूपाणि निष्पद्यन्ते। परन्तु गीर्वाणवाण्यां कालत्रये "चारय[३], पठानि"[४] इत्याद्येकमेव रूपम्। भवतु नाम अयं भेद उभयोर्भाषयोः, परन्तु प्रकृतिप्रत्ययाभ्याम् आख्यातान्तनिष्पत्तिविधिः (आख्यातान्ता धातु-प्रत्ययाभ्यामेव निष्पाद्यन्ते इति) समानो दृश्यते।

एवमत्र पर्यन्तम् आख्यातनामकं द्वितीयं पदजातं यथामति व्याख्यातम्। अग्रे तृतीयं चतुर्थञ्च पदजाते व्याख्यास्येते।

1. Into the optative and aorist mood of the present tenset.

२. यथा वाल्मीकिरामायणस्य सुन्दरकाण्डे प्रथमसर्गे—

"कायवृद्धिं प्रवेगञ्च मम दृष्ट्वैव राक्षसाः।
मयि कौतूहलं कुर्युरिति मेने महामतिः॥" (श्लोक २०८)।

अत्र कृधातोः "कुर्युः" इति भूतकालिकलिङ्लकारेऽन्यपुरुषस्य बहुवचनम्। किञ्च पाणिनिनाऽपि "विभाषा कथमि लिङ् च" (३।३।१४३) इत्यादिभिः सूत्रैः "कथं धर्मं त्यजेस्त्यजसि वा" इत्यादिषु कालत्रये लिङ्लकारं प्रयोक्तुमादिष्टम्।

३–४. "कृष्णश्चेद् भुङ्क्ते भोक्ष्यते वा त्वं गाश्चारय" अत्र चारयेति भविष्यत्कालिको भविष्यदर्थकेन लट्लकारे लृट्लकारे वा निष्पन्नक्रियया सह प्रयोगाद्। इदं वाक्यं भट्टोजीदीक्षितकृतवैयाकरणसिद्धान्तकौमुद्यां लकारार्थप्रक्रियायाम् "लोडर्थलक्षणे" (३।३।८) इति सूत्रे समुदाहृतम्।

३, ४. उपसर्गा निपाताश्च

उपसर्गाणां निपातेष्वन्तर्भावः

पदजातस्य तृतीयश्च चतुर्थश्च प्रकारौ विद्येते—उपसर्गा निपाताश्च इति। वस्तुतस्तु पदजातस्य त्रय एव भेदाः; उपसर्गाणाम् "प्रादयः" (१।४।५८) इति पाणिनीयसूत्रेण निपातसंज्ञाकरणात् तत्रैवान्तर्भावात्। महाभाष्यस्य पस्पशाह्निके "चत्वारि शृङ्गा त्रयो अस्य पादाः" इत्येतन्मन्त्रघटकस्य "चत्वारि" इत्यस्य व्याख्यायां "चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्च" इत्यत्रोपसर्गस्य पृथग्ग्रहणं तु गोबलीवर्दन्यायेन। उक्तञ्च नागेशेन—"उपसर्गनिपातयोः पृथगुपादानं गोबलीवर्दन्यायेन" इति। निपाता अव्ययेत्यपरनाम्नाऽप्यभिधीयन्ते। उक्तञ्च पाणिनिना "स्वरादिनिपातमव्ययम्" (१।१।३७) इति।

निपातस्य भागाः

यथा ग्रीकादिभाषासु नामिकशब्दानां संज्ञा-सर्वनाम-विशेषणभेदेन त्रीन् भागान् कृतवन्तः, एवं निपातस्यापि चत्वारो भागा एतैः प्रकल्पिताः। ते यथा—

(१) क्रियाविशेषणम्, (२) पूर्वसर्गः, (३) समुच्चयबोधकः, (४) विस्मयादिबोधकश्च।

उपसर्गाणां तुलनात्मकं विवेचनम्

निपातान्तर्गता उपसर्गसंज्ञकाः प्रादयो धात्वर्थं परिवर्तयितुं प्रयुज्यन्ते। उक्तञ्च—

उपसर्गेण[१] धात्वर्थो बलादन्यत्र नीयते।
प्रहाराहारसंहारविहारपरिहारवत् ॥ इति ॥

किञ्च, उपसर्गसंज्ञकाः प्रादयो न केवलं धात्वर्थमेव परिवर्तयन्ति, अपि तु क्वचिद्धात्वर्थस्य वैशिष्टचम्, क्वचिच्च धात्वर्थमेवानुवर्तन्ते। तदुक्तम्—

"धात्वर्थं बाधते कश्चित्, कश्चित्तमनुवर्तते।
तमेव विशिनष्टचन्यः उपसर्गगतिस्त्रिधा॥ इति॥

भट्टोजीदीक्षितकृतवैयाकरणसिद्धान्तकौमुद्यां "गतिश्च" (१।४।५ पा० सू० इति सूत्रे प्रादयो निर्दिष्टाः। ते यथा—

१. आप्टे-कृताद् इंगलिश संस्कृत, कोशादयंश्लोकः समुद्धृतः।

प्र, परा, अप, सम, अनु, अव, निस्, निर्, दुस्, दुर्, वि, आङ्, नि, अधि, अपि, अति, सु, उत, अभि, प्रति, परि, उप। एते प्रादयः।

धात्वर्थेषु वैशिष्ट्यादिकमानेतुं पालिभाषायामथ ग्रीकाद्यन्यासु वैदेशिकभाषास्वपि उपसर्गा उपयुज्यन्ते। तद्यथा पालिभाषायाम्—"पहारो, विहारो, उपहारो"। अत्र हृधातोः पूर्वं प्राद्युपसर्गाणां प्रयोगाद् हरणार्थकस्य एकस्यैव हृधातोः प्रहाराद्यर्था भिद्यन्ते।

ग्रीकभाषायामपि संस्कृतभाषायामिव पदात् (शब्दात्) पूर्वमुपसर्गाः प्रयुज्यन्ते। यथा—

निरुपसर्गाः शब्दाः	उपसर्गयुताः शब्दाः
आर्हों स[1] = कार्यकर्ता	उपार्हों स=सहायक कार्यकर्ता
गों नों स = पिता	प्रों गों नों स = प्रपिता
थें ओं स = उत्साहरहितः	एं नथें ओं स = उत्साहः

एषूदाहरणेषूपसर्गवशाद् एकस्यैव शब्दस्य स्ववाच्यार्थभिन्नोऽर्थो दृश्यते। अपरेऽपि "उपावुलास, एपि चाल्कास, दुस-मेनेस, यु-मेनेस" इत्यादयो बहवः सोपसर्गाः शब्दा ग्रीकभाषायां दृश्यन्ते। एषु शब्देषु "उप, प्र, एं न, उपा, एपि, दुस, यु" इत्येते उपसर्गाः विद्यन्ते। पालिसंस्कृतग्रीकभाषात्रये ये प्रादय उपसर्गा दृश्यन्ते, तेषु परस्परं सामान्येन ध्वनिसाम्यं परिलक्ष्यते। यथा—"पहारो, प्रों-गों नों स, प्रहारः" इत्यत्र पालिग्रीकसंस्कृतभाषीयशब्देषु प्रथमो ध्वनिः पकारः श्रूयते, स च प्राद्युपसर्गाणामवयवीभूतः। यथा दैव्यां गिरि निष्कौशाम्बिः,[2] प्राचार्यः,[3] अतिमालः,[4] अवकोकिलः[5] इत्यादिषु कोशाम्बीत्यादिशब्देभ्यः पूर्वं निराद्युपसर्गाणां प्रयोगस्तन्माहात्म्येन च अर्थभेदो दृश्यते। तथैव ग्रीकभाषायाम् "उपा-वुलास" इत्यादिषु वुलासशब्देभ्यः पूर्वमुपाद्युपसर्गाणां प्रयोगो बोध्यः।

उपसर्गाणां प्रयोगः सर्वत्र पदेभ्यः (सार्थकशब्देभ्यः) पूर्वं क्रियते। परन्तु वेदेषु, वेदतुल्येषु पुराणेषु च वैदिकभाषया सह साम्यं भजमानायाम् अवेस्ताभाषायाञ्च क्वचित् क्रियाभ्योऽन्यत्र प्रयुज्यन्ते, तेषामन्वयश्च ताभिः सह क्रियते। यथा श्रीमद्भागवते—

1. "A Comparative Grammar of Greek and Lattin" written by Carldarling Buck p. 354, 358.
२. "निरादयः क्रान्ताद्यर्थे पञ्चम्याः" (वार्त्तिकम्) इति समासः।
३. "प्रादयो गत्याद्यर्थे प्रथमया" (वार्तिकम्) ,,
४. "अत्यादयः क्रान्ताद्यर्थे द्वितीया" ,, ,,
५. "अवादयः क्रुष्टाद्यर्थे तृतीयया" ,, ,,

"तव परि ये चरन्त्यखिलसत्त्वनिकेततया"। (१०।८७।२७)

अत्र परीत्युपसर्गस्य ये शब्दात् पूर्वं प्रयोगाः, परन्तु तस्यान्वयश्चरन्ति क्रियया सह क्रियते। इत्थं प्रयोगोऽवेस्ताभाषायामपि समुपलभ्यते। यथा "अ ओ इ माम् स्त ओ मइने—स्तूइदि"। अत्र "माम्" शब्दात् पूर्वं "अ ओ इ" इत्युपसर्गस्य प्रयोगः अन्वयश्च स्तुत्यर्थकया "स्तूइद" क्रियया सह क्रियते।

क्रियाविशेषणीभूतनिपाताः

एवमुपसर्गसंज्ञका ये निपाताः क्रियास्वर्थवैशिष्ट्यमानेतुं प्रयुज्यन्ते, तेषां तुलनात्मकं व्याख्यानं सम्पादितम्। उपसर्गातिरिक्ता अन्येऽपि निपाताः सन्ति, ये क्रियाविशेषणादिरूपेण प्रयुज्यन्ते। एतेषां मध्ये केचिन्निपाता व्युत्पन्नाः केचिच्च तद्भिन्नाः। यथा ब्राह्मणवत्, क्षत्रियवद् इत्यादयो व्युत्पन्नाश्च। "च, वा" इत्यादयः तद्भिन्नाः। नामिकशब्दानां निरूपणावसरे गुणशब्दस्य व्याख्यानं कुर्वता केचित् क्रियाविशेषणशब्दा व्याख्याताः केचिद् भाषावैज्ञानिकाः। क्रियाविशेणशब्दान् सविभक्तिकसप्रत्ययभेदेन भागद्वये विभक्तवन्तः[1]। सविभक्तिकानि क्रियाविशेषणानि षोढा विभक्तानि। यथा—

१. (क) द्वितीयविभक्त्यन्तानि क्रियाविशेणानि—कामम्, समकालम्, अहर्निशम्, मुखम्, रहः इत्यादि।

विशेषणप्रकृतिकानि क्रियाविशेषणानि यथा—अनन्तरम्, चिरम्, नित्यम् प्रत्यक्षम्, बाह्यम्, साम्प्रतम्, आशु।

सर्वनामप्रकृतिकान्यपि क्रियाविशेषणानि भवन्ति। यथा—यत्, तत्, किम्, यावत्, तावद् इत्यादि।

एवं ग्रीकभाषायामपि द्वितीयविभक्त्यन्तक्रियाविशेषणानामुपलब्धिर्दृश्यते। यथा —दिकेन खरिन, मकान। अस्यामपि भाषायां कानिचद् विशेषणप्रकृतिकानि क्रियाविशेषणानि दृष्टिगोचरीभवन्ति। यथा—

फिलोस = स्पष्टतया, अस्य प्रकृतिः फिलां स
सों फोस = बुद्धिमत्ता ,, सों फां स

१. (ख) तृतीयविभक्त्यन्तानि क्रियाविशेषणानि यथा—क्षणेन, दिष्टचा, सहसा, दूरेण, दूरतरेण, तिरश्चा, उच्चैः, प्रोच्चैः, शनैः।

१. (ग)—चतुर्थविभक्त्यन्तं केवलम् "अर्थाय" इत्येकमेव क्रियाविशेषणम्।

१. यथा भोलाशङ्करव्यासकृते "संस्कृत का भाषाशास्त्रीय अध्ययन", पृ० सं २४१ इत्याख्ये ग्रन्थे मूलोक्तप्रकारेण निपाता विभक्ताः।

१ (घ)—पञ्चमविभक्त्यन्तानि—यथा—बलात्, संक्षेपात्, अचिराद्, दूरात्, कृच्छ्रात्, साक्षात्, कस्माद् इत्यादि। एवं ग्रीकलैतिनभाषयोरपि पञ्चम्यन्ताः क्रियाविशेषणशब्दाः समुपलभ्यन्ते। यथा होस (=संस्कृते-तात्) हों पोस (संस्कृते कस्मात्) लैतिन भाषायां रक्तेद, फकिलूभेद इत्यादि।

गीर्वाणवाण्यां निपातसंज्ञकानां षष्ठविभक्त्यन्तक्रियाविशेषणशब्दानां नितरामभावः। परन्तु ग्रीकभाषायां प्रायेण यत्र कुत्रचित् समुपलभ्यन्ते। यथा—होउ[1] (=संस्कृते तस्य), हपाउ=कस्य।

१ (ङ)–सप्तमविभक्त्यन्तम्[2]–यथा अर्थे, ऋते, अग्रे इत्यादि, ग्रीकभाषायाम् अथ लैतिनभाषायामपि सप्तमविभक्त्यन्तानि क्रियाविशेषणानि समुपलभ्यन्ते। तद्यथा ग्रीकभाषायाम्—

हों इ=तत्र, पों इ=कस्मिन् अथवा कुत्र। लैतिनभाषायाम्—उवि=तत्र, इबि=अत्र।

२—निपातसंज्ञकस्य क्रियाविशेषणीभूतस्य द्वितीयो भागो विद्यते सप्रत्ययः–प्रकृतिप्रत्ययाभ्यां निष्पन्नं क्रियाविशेषणम्। अस्योदाहरणानि पूर्वं गुणशब्दस्य व्याख्यावसरे प्रदर्शितानि। अत्र च ततोऽन्यान्यपि प्रदर्श्यन्ते। यथा—

वत्प्रत्ययान्तं क्रियाविशेषणम्—खगवत् पश्यति, पुत्रवद् आचरितम्। अनयोर्वाक्ययोः "खगवत्, पुत्रवत्" इति क्रियाविशेषणम्।

तः (तसिल्) प्रत्ययान्तः—अतः, इतः, यतः, ततः। ग्रीकभाषायाञ्च एन्तास, एक्तास इति। अत्र तसिल्प्रत्ययान्ततुल्यं क्रियाविशेषणं प्रयुज्यते।

त्र (त्रल्) प्रत्ययान्तः—अत्र, कुत्र, यत्र, तत्र। वैदिकभाषायामस्य प्रत्ययस्य "यत्रा"[3] इत्यादि शब्देषु "त्रा" इति रूपं समुपलभ्यते।

शस्प्रत्ययान्तम्—खण्डशः, गणशः, शतशः, भागशः—इत्यादि। प्राकृत-ग्रीकभाषायामयं प्रत्ययः खसूरूपेण समुपलभ्यते। यथा—अन्द्राखस्।

हकारान्ताः—इह, कुह।[4] अयं हकारः प्राकृतभाषायां घरूपेण समुपलभ्यते। यथा—इघ इति। भाषाशास्त्रिणोऽस्य प्रत्ययस्य ग्रीकभाषीयथप्रत्ययेन, लैतिनभाषीय 'द' प्रत्ययेन च तुलनां विदधति। यथा ग्रीकभाषायाम्—पाथि, प्रास्थन, एन्थ। लैतिनभाषायां तु इन्दा इत्यादि।

---

१. इमानि क्रियाविशेषणानि जिनेटिव नाम्ना व्यपदिश्यन्ते।
२. लोकेटिव।
३. छान्दसोऽयं प्रयोगः।
४. छान्दसोऽयं प्रयोगः।

उपर्युक्तेषु क्रियाविशेषणाख्येषु निपातेषु केचिन्निपाताः क्रियायाः समय-स्थान-संख्या-विधिकारण-परिमाण-निषेधार्थान् अवबोधयन्ति। यथा—

समयः—अधुना आगमिष्यति। पुनरागतोऽसि। विधिः—स्पष्टतया अधीते।

कारणम्—त्वं ध्वनिं करोसि अतो गच्छ।

परिमाणम्—इयद्दूरं गच्छसि।

निषेधः—मा गच्छ, मा रुद इत्यादि।

कानिचित् निपातसंज्ञकानि क्रियाविशेषणानि तु सम्बन्धमवद्योतयन्ति।

यथा—यत्त्वया प्रोक्तम् तत्सर्वथा सत्यम्।

अत्र "यत्तत्" निपाताभ्यां द्वयोर्वाक्ययोः समुच्चयः प्रतीयते।

कुत्र, कदा, कथमित्यादयस्तु प्रश्नवाचकाः। यथा—

१—कदा गच्छसि, कथमागतोऽसि? कुत्र गच्छसि?

किम्बुक्तं त्वया इत्यादि।

अत्र क्रियाविशेषणाख्यनिपातार्थनिर्णयो निःशेषतया कर्तुं न शक्यते। प्रतिपाद्यविषयबाह्यत्वाद् वाक्यपदयोः स्वरूपस्यैवात्र व्याख्यानात्। यद्वा प्रकृतिप्रत्ययाभ्यां शब्दनिष्पत्तिप्रक्रियायाः एवात्र प्रतिपादनात्।

एवमांग्लवैयाकरणैः शब्दस्य यः क्रियाविशेषणाख्यः पञ्चमो भागः परिकल्पितः स देवभाषायां शब्दस्य यो निपाताख्यो भागस्तस्मिन्नन्तर्भूतः। विशेषणं तु नामिकशब्दस्य यो गुणाख्यो भागस्तत्राऽन्तर्भूतः। येषां क्रियाविशेषणानां निपातेष्वन्तर्भावोऽसम्भवस्तेषामप्यत्रान्तर्भावो बोद्धव्यः।

यथा—स्पष्टतया वदसि।

अत्र स्पष्टताशब्दस्य सर्वासु विभक्तिषु, सर्वेषु वचनेषु समरूपत्वाभावान् निपातेषु गणनासम्भवा। अतः स्पष्टताशब्दो गुणशब्दः।

क्वचिन्निपाता अपि विशेषणरूपेण प्रयुज्यन्ते।

यथा—तत्र शालायाम् इति। अत्र तत्रेति निपातः "शालाम्" इत्यस्य विशेषणम्।

पूर्वसर्गाख्यनिपाताः

आंग्लादिभाषावैयाकरणैः पूर्वसर्गाख्यः (प्रिपोजीसन) यः शब्दस्य षष्ठो भागः परिकल्पितः, सोऽपि निपातेष्वन्तर्भूताहः। उपसर्गातिरिक्ता अन्ये निपाता यदा समासनिष्पन्नशब्देभ्यः पूर्वं प्रयुज्यन्ते, तदा एतन्नाम्ना व्यपदेष्टुं शक्यन्ते। यथा—"अन्तर्वत्नी, अन्तर्गृहम्, अन्तःप्रविश्य, अर्धपिप्पली" इत्यादिष्वन्तर् इति निपातः पूर्वं प्रयुज्यते।

द्वितीयविभक्त्यन्तशब्दैः सह प्रयुज्यमाना निपाता अपि अस्मिन् भागे सन्निवेष्टुमर्हाः। यथा—उभयतः कृष्णं[1] गोपाः। सर्वतः कृष्णम्, धिक् कृष्णा भक्तम् ।

अत्र एषु वाक्येषु "उभयतः" इत्यादयो निपाताः कृष्णादिशब्देभ्यः पूर्वं प्रयुक्ताः। एषु वाक्येषु यद्यपि "कृष्णमुभयतो गोपाः" इत्यत्र कृष्णादिशब्देभ्यः परं "उभयतः" इत्यादयो निपाताः प्रयोक्तुं शक्यन्ते, तथाऽपि तेभ्यः पूर्वं प्रयोग एव समीचीनः।

ग्रीकभाषायामपि "आपो" इत्यादयो निपाताः पूर्वं प्रयुज्यन्ते। यथा—

आफ अप्पू माहेस्थाइ = घोटकपृष्ठाद् युद्धकरणम् ।

आपों तू तू ह्लों नू = अस्मात् समयात् ।

प्रॉं थुरोन = द्वारस्य पुरः सरसि ।

अत्र प्रथमवाक्ये अप्पू शब्दात्, द्वितीयवाक्ये "तू तू" शब्दात् पूर्वं तृतीयवाक्ये "थुरोन" शब्दाच्च पूर्वं क्रमशः, आफॅ, आपों प्रों इति पूर्वसर्गाख्य निपातानां प्रयोगः परिलक्ष्यते ।

वस्तुतस्तु पूर्वसर्गाणाम् दैव्यां गिरि सुप्तिबादिविभक्त्यन्तेभ्यः शब्देभ्यः पूर्वप्रयोगाद् उपसर्गसंज्ञका प्रादय एव पूर्वसर्गनाम्ना व्यपदेष्टुमर्हाः। ग्रीकभाषायां पूर्वोक्तोदाहरणेषु "तू तू" शब्दादिभ्यः पूर्वं "आपो" इत्यादयोऽपि उपसर्गनामार्हाः, संस्कृतभाषीयोपाद्युपसर्गैः सह ध्वनिसाम्यात् । उभयोरिदमेवान्तरं यद् ग्रीकभाषायां पूर्वसर्गाख्या निपाता विभक्त्यन्ताः प्रयुज्यन्ते । यथा 'अम्फि आनी अपी'' इत्यादयः। परन्तु गीर्वाणवाण्यां तु निर्विभक्तिका एव प्रयुज्यन्ते । अतएव "निष्कौशाम्बिः" इत्यादिशब्दानां निष्पत्तये "कौशाम्बी ङस् निर्" इत्यलौकिकविग्रहः क्रियते। उपसर्गस्य सविभक्तिकत्वे तु "कौशाम्बी ङस् निर् सु" इति युज्यते । एवमुपसर्गातिरिक्ताः "अन्तरेण, उच्चैः, नीचैः" इत्यादयः सर्वे निपाता निर्विभक्तिकाः, निपातानामव्ययरूपत्वात् तेभ्यः परं सुपो लोपात् । "स्वरादिनिपातमव्ययम्" (१।१।३७) अत्र सूत्रे "निपातानामव्ययम्" इति महासंज्ञाकरणमन्वर्थसंज्ञाविधानार्थम्। न व्येति = विविधं विकारं न गच्छति, सत्त्वधर्मान् लिङ्गसंख्यादीन् न गृह्णातीति यावत्। अत्र विषये निम्नोक्ता श्रुतिरपि प्रमाणम्—

सदृशं[2] त्रिषु लिंगेषु सर्वासु च विभक्तिषु ।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् ॥

१. उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु ।
द्वितीयाम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते ॥ इति द्वितीया ।

२. द्र० भट्टोजीदीक्षितकृता वैयाकरणसिद्धान्तकौमुदी, अव्ययप्रकरणम् ।

वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः ।
आपं चैव हलन्तानां यथा वाचा निशा दिशा ॥ इति ॥

"अल्लोपो यथा—वगाहः, पिधानम्" इत्यनयोर्भागुरिमतेऽल्लोपो दृश्यते । अन्येषां मते तु "अवगाहः, अपिधानम्" इति ।

यत्तु पूर्वं क्रियाविशेषणस्य निरूपणावसरे अन्तरेण, उच्चैः, नीचैः, ऋते इत्यादयो निपातास्तृतीयादिविभक्त्या प्रतिपादिताः, तत्तु भाषाविज्ञानस्य मतानुसारेण । भाषावैज्ञानिकाः "रामेण" इत्यादौ अदन्तशब्दात् परं टाविभक्तेः "एण" इत्यादि रूपं दृष्ट्वा "अन्तरेण" इत्यादिनिपातानपि तृतीयविभक्त्यन्तान् मन्यन्ते । वस्तुतस्तु "अन्तरेण" इत्यादयो निपाता न विभक्त्यन्ताः, अपि तु निर्विभक्तिकाः। यस्यादन्तप्रातिपदिकस्य "अव्ययीभावश्च" (१।१।४१) इति सूत्रेणाव्ययसंज्ञा क्रियते, ततः परमेव विभक्तेरलुक्, [1]तृतीयसप्तमविभक्ती: विहाय अन्यासां नित्यममादेशः, पक्षान्तरे च तृतीयसप्तम्योः क्रमशः "एन, स्मिन्" इत्यादेशः क्रियते। यथा दिशयोर्मध्ये अपदिशम्, अपदिशेन, अपदिशे इति । तद्धितादिप्रत्ययनिष्पन्ना अन्ये निपातास्तु असर्वविभक्तिकाः। उक्तञ्च पाणिनिना अष्टाध्याय्यां "तद्धितश्चासर्वविभक्तिः" (१।१।३८) इति । यस्मात् सर्वा विभक्तिर्नोत्पद्यते स तद्धितान्तोऽव्ययं स्यात् । परिगणनं कर्तव्यम्—तसिलादयः[2] प्राक् पाशपः, शस्प्रभृतयः प्राक् समासान्तेभ्यः, अम्, आम्, कृत्वोऽर्थाः, तसिवती, नानाञाविति । तेनेह न—पचतिरूपम्, पचतिकल्पम् ।

येऽदन्ताः सविभक्तिका अव्ययीभावा अव्ययसंज्ञया व्यपदिष्टास्ते ग्रीकभाषीयैः सविभक्तिकैः निपातैः सह साम्यं भजन्ति ।

समुच्चयबोधकः (कंजक्शन)

आधुनिकैः परिकल्पितो यः समुच्चयबोधकाख्यः शब्दस्य विभागः, सोऽपि निपातेष्वन्तर्भूतः । समुच्चयबोधकाश्च केचिदव्ययाः पूर्वं निर्दिष्टाः, यथा—यत्र, तत्र, यर्हि, तर्हि इत्यादयः। एतदतिरिक्ताः "च, अपि" इत्यादयोऽपि निपाताः समुच्चायकाः "रामं कृष्णञ्च आनय" इत्यत्र "च" निपातो रामकृष्णयोः समुच्चयं निष्पादयति । समुच्चयद्योतकस्य "च" इति निपातस्य प्रयोगो विशेषरूपेण वाक्यपदयोरन्ते क्रियते। यथा "देवदत्तं यज्ञदत्तञ्च आजुहाव" इति । समासस्थले विग्रहवाक्ये तु प्रत्येकं पदेन सह प्रयुज्यते । यथा—रामश्च कृष्णश्चेति रामकृष्णौ । अयं चकारो न केवलं पदयोरेव समुच्चायकः, अपि तु वाक्ययोरपि । यथा—अहं तत्र गच्छामि, त्वञ्चेदं कार्यं कुरु ।

१. नाव्ययीभावादतोऽम्त्वपञ्चम्याः (२।४।८३ पाणिनीयसूत्रम्) ।

२. भट्टोजीदीक्षितकृता वैयाकरणसिद्धान्तकौमुदी, अव्ययप्रकरणम् ।

ग्रीकभाषायां तु चकारार्थकस्य "काइ" (के) इति निपातस्य पदानां मध्ये, आदौ च प्रयोगः क्रियते । यथा—

काइ[1] काता गैन काइ काता थाला सों न् = पृथ्व्या च जलेन च । निपात-संख्यादृष्टया ग्रीकसंस्कृतयोः परस्परं समीक्षया ग्रीकभाषा संस्कृतादतिरिच्यते । अस्यां भाषायां गद्यात्मकवाक्येषु चकारार्थे "काइ, (के) ते" इति निपातौ, साहित्ये च एदें इदें इति निपातौ प्रयुज्येते । एवमस्यां भाषायां चकारार्थे काइ, ते, एदें, इदें—इति चत्वारो निपाताः समुपलभ्यन्ते । संस्कृते तु केवलं "च" इत्येक एव निपातस्तदर्थे समुपलभ्यते ।

विस्मयबोधकः (इन्टरजंक्शन)

पदानां (शब्दानाम्) यो विस्मयबोधकाख्योऽष्टमो विभागः, सोऽपि अव्यय-संज्ञकेषु निपातेष्वन्तर्भूतः । विस्मयबोधकाश्च अव्ययाः – आ, अह, ह, हा इत्यादयः । एषां प्रयोगो यथा—

आ एवं नु मन्यसे । आ एवं किल तत् । अहह जन्म गतं निरर्थकम् । हा तात— इत्यादि । एवं ग्रीकभाषायामपि विस्मयकारीण्यव्ययानि समुपलभ्यन्ते । यथा— "हों स, अफ" इत्यादयः ।

इत्थं निपातानां तुलनात्मकसमीक्षयेदमेव निश्चप्रचं जातं यद् आधुनिकैर्ये क्रियाविशेषणादिभेदेन चत्वारो भागाः परिकल्पितास्ते सर्वे पाणिनीयवैयाकरण-मतानुसारेण निपातेष्वन्तर्भूताः, यद्वा पाणिनीयवैयाकरणैर्यः पदजातस्य निपाताख्यो विभागः कृतः, तस्य आधुनिकमतानुसारेण क्रियाविशेषणादिभेदेन चत्वारो भागा कर्तुं शक्यन्ते इति ।

यत्तच्छब्दयोर्निपातानिपातत्वविचारः

भाषाशास्त्रमतानुसारेण संस्कृतभाषायामुपलभ्यमानाः यत्, तत्, यदि, तर्हि—इत्येते निपाताः सर्वनामात्मकाः । पुराकाले एतेषां सर्वादिशब्दवत् निपाता-द्भिन्ना सत्ता आसीत् । यथा रामादिशब्दाः कस्यचित् सत्त्वविशेषस्य वाचकाः, तथा एतेऽप्यासन् । किन्तु कालान्तरे एतेषां सत्त्ववाचकता प्रणष्टा, समुच्चय-बोधकाव्ययरूपेण च प्रयोगः प्रारब्धः[2] ।

---

१. वाई लैण्ड एण्ड वाटर ।

२. "संस्कृत के सर्वाधिक सामान्य समुच्चयबोधक यत्, तत्, यदि, तर्हि मूलरूप में सर्वनाम (सम्बन्धवाची) इत्यादि हैं । ऐसे ही लैटिन ut, me, quominasquin और ग्रीक os हैं । ये सभी किसी समय पूर्ण शब्द थे । इनका अपना शब्दरूप था और अपनी अर्थसूचकता थी । किन्तु इनके ये गुण बाद में लुप्त हो गए और सर्वनाम को समुच्चयबोधक समझा जाने लगा" । लेखक—डॉ० पी० डी० गुणे, अनुवादक डॉ० भोलानाथ तिवारी, एम० ए०, डी० फिल, "तुलनात्मक भाषाविज्ञान" पृ० सं० ७० ।

वस्तुतस्तु एतेषां मध्ये "यत्, तत्" इत्यनयोः सर्वनामनिपातेत्युभयरूप-मधुनाऽपि गीर्वाणवाण्यां समुपलभ्यते[1] । सर्वादिगणे पठितौ "यत्, तत्" इत्युभौ निपातगणपठितयत्-तच्छब्दाभ्यां भिन्नौ ।

सामान्यदृष्ट्या ग्रीकसंस्कृतयोस्तुलना

स्वरव्यञ्जनदृष्ट्या ग्रीकसंस्कृतयोः वैषम्यं प्रतिभाति । ग्रीकभाषायां पदेषु (सार्थकशब्देषु) व्यञ्जनापेक्षया स्वराः प्रचुररूपेण प्रयुज्यन्ते ।

किन्तु देवभाषायां स्वरापेक्षया व्यञ्जनानि पदेषु प्रचुररूपेण समुपलभ्यन्ते । अयं विषयः पूर्वमुद्धृतैरुभयभाषीयैरुदाहरणैः स्पष्टतां भजति । ग्रीकभाषीयशब्देषु स्वराणां प्रचुररूपेण समुपलब्धेः सत्त्वाद् भाषाशास्त्रिणो भारोपीयभाषासूपलभ्य-मानानां स्वराणां मूलस्वरूपं ग्रीकभाषायां सम्यक्तया सुरक्षितं मन्यन्ते । देवभाषा-याश्च शब्देषु व्यञ्जनानां प्राचुर्यात् तेषां मूलस्वरूपमियमेव भाषा रक्षितवतीति विश्वसन्ति ।

शब्दनिष्पत्तिप्रक्रियादृष्ट्या यद्यप्युभे अपि भाषे संहितप्रधाने (प्रकृति-प्रत्ययनिष्पन्नशब्दप्रचुरे) । तथाऽपि गीर्वाणवाण्यां संज्ञा-सर्वनाम-शब्दाना-माधिक्यम्, देवभाषायामिव ग्रीकभाषायामपि परस्मैपदम्, आत्मनेपदमिति द्विविधं क्रियारूपम्, उभयत्र वचनत्रयम्, समासप्रक्रियया शब्दनिष्पादनस्य शक्तिश्च समुप-लभ्यन्ते । उभयोर्भाषयोर्वाक्येषु पदानां सन्निवेशप्रकारोऽपि समानः । अन्यासु भाषासु पदन्यासस्य व्यत्यये सति वाक्यार्थो भिद्यते । परन्तु ग्रीकसंस्कृतयोः पाल्यादि-भाषासु च वाक्येषु पदानि क्वापि विन्यसेत्, सर्वास्ववस्थासु एक एव वाच्यार्थोऽ-वगम्यते । यथा ग्रीकभाषायाम्—

हों अन्थ्रोपों स तान् कुन् एँपताजें न = स पुरुषस्तं श्वानम् अताडयत् । परन्तु अस्मिन् वाक्ये—

तान् कुन एपताजें न हों अन्थ्रोपों स = तं श्वानम् अताडयत् स पुरुषः इत्येवं व्यत्ययरूपेण पदन्यासे सति पूर्ववदेव वाच्यार्थोऽवगम्यते । अनयोर्विभक्ति-प्रधानभाषयोर्वाक्येषु प्रक्रियादृष्ट्या पदानि (शब्दाः) प्रथमादिविभक्तिद्वारा परस्परमेवं सम्बद्धाः, यद्वा अन्विता यथा पदार्थेषु प्रत्येकं परमाणवः धन-ऋण-विद्युद्भ्यां परस्परं संश्लिष्टाः । असाधु शब्दानां साधुशब्दैः सह अनया दिशा विचारः कर्तव्यः ।

---

१. भट्टोजीदीक्षितविरचित वै० सि० कौमुद्यां सर्वादीनीति पाणिनीयसूत्रे सर्वादिगणे यत्तच्छब्दौ पठितदौ ।
तिलककृते "निपाताव्ययोपसर्गवृत्तिः" इत्याख्ये ग्रन्थे निपातेऽपीमौ गणितौ ।

अथानन्ताः शब्दाः अनन्ताश्च भाषाः स्वमूलस्वरूपाच्छब्दतत्त्वाद् ब्रह्माण्डे आविर्भवन्ति तत्रैव च तिरोभवन्ति। कल्पायुषोऽपि व्याख्यातुमप्रभवाः। अस्मिंश्च ग्रन्थे शब्दस्य विशुद्धं स्वरूपं पातञ्जलमहाभाष्यादिकमनुसृत्य स्वलेखन्या यथामति विशदीकृतम्। इतोऽप्यधिकमस्ति शब्दतत्त्वम्।

यस्तु प्रयुङ्क्ते कुशलो विशेषे
शब्दान् यथावद् व्यवहारकाले।
सोऽनन्तमाप्नोति जयं परत्र
वाग्योगविद् दुष्यति चापशब्दैः॥ इति॥

इति शं परिपूर्णमस्य लेखनम्॥

परिशिष्टोंऽशः

परिशिष्टम्—१

शोधप्रबन्धे समागताः केचित् संज्ञाशब्दाः

चतस्रो वाचः—१— परा २— पश्यन्ती ३— मध्यमा । ४—वैखरी ।

चत्वारि पदजातानि–१. नाम, २. आख्यातम्, ३. उपसर्गः, ४. निपातश्चेति ।

गुहास्तिस्रः—१— मूलाधारः । २— नाभिः । ३—उरः ।

केचित्कण्ठमपि वाचो गुहां मन्यन्ते । तन्मते चतस्रो वाचो गुहाः ।

चत्वारो मात्राकालाः—१—अर्द्धमात्रिकम् = व्यञ्जनम् । २—एकमात्रिकः = ह्रस्वः स्वरः । ३—द्विमात्रिकः = दीर्घः स्वरः । ४—त्रिमात्रिकः = स्वरितस्वरः ।

त्रयः स्वराः— १—उदात्तः । २—अनुदात्तः । ३— स्वरितश्च ।

द्वौ प्रयत्नौ—१—आभ्यन्तरः । २—बाह्यश्च ।

आभ्यन्तरप्रयत्नस्य पञ्च भेदाः—

१—स्पृष्टम् । २—ईषत्स्पृष्टम् । ३ —ईषद्विवृतम् । ४—विवृतम् । ५—सम्वृतम् ।

बाह्यस्याष्टौ भेदाः—१— विवारः । २—संवारः । ३—श्वासः । ४—नादः । ५—घोषः । ६—अघोषः । ७—अल्पप्राणः । ८—महाप्राणः ।

प्रकृतिः । प्रत्ययः । विकरणम् । स्वरः = अच् । व्यञ्जनम् = हल् । समानाक्षरम् । सन्ध्यक्षरम् ।

वर्णानां संज्ञा = स्पर्शः । अन्तःस्थः । ऊष्मा । विसर्गः । जिह्वामूलीयः । उपध्मानीयः । यमः । अयोगवाहः इति निर्दोषवर्णानां संज्ञा ।

भाषाविज्ञानानुसारं वर्णभेदाः—

१—स्वरभेदाः— अर्द्धविवृतमध्यस्वरः । विवृतदीर्घपश्चात्स्वरः । अर्द्धविवृतह्रस्वपश्चात्स्वरः । अर्द्धविवृतदीर्घपश्चात्स्वरः । अर्द्धसम्वृतह्रस्वपश्चात्स्वरः । अर्द्धसम्वृतदीर्घपश्चात्स्वरः । सम्वृतह्रस्वपश्चात्स्वरः । सम्वृतदीर्घाग्रस्वरः । सम्वृतह्रस्वाग्रंस्वरः । जपितसम्वृतह्रस्वाग्रस्वरः । अर्द्धसम्वृतदीर्घाग्रस्वरः । अर्द्धसम्वृतह्रस्वाग्रस्वरः । अर्द्धविवृतमध्यह्रस्वार्द्धस्वरः । ध्वनियुग्मः ।

व्यञ्जनभेदाः— स्पर्शः । स्पर्शसङ्घर्षी । प्रतिवेष्टितः । अनुनासिकः । पार्श्विकः । लुण्ठितः । उत्क्षिप्तः । संघर्षी । अर्द्धस्वरः ।

चवर्गस्य चत्वार उच्चारणकालाः—१—भारोपीयकालः । २—भारतीयशुद्धतालव्यकालः । ३ घर्षस्पर्शतालव्यकालः । ४—दन्त्यतालव्यो घर्षस्पर्शकालः । कवर्गस्य—१—कण्ठ्यः । २—कण्ठ्योष्ठ्यः ।

वर्णदोषाः—संवृतः। कलः। ध्मातः। एणीकृतः। अम्बूकृतः। अर्द्धकः। ग्रस्तः। निरस्तः। प्रगीतः। उपगीतः। क्ष्विण्णः। रोमशः। अयथामात्रम्। ग्रासः। व्यासः। पीलनम् (पीडनम्)। निरासः। अतिस्पर्शः। बर्बरता। अघोषनिभता। अदेशः।

तथा चोक्तम्—

ग्रस्तं निरस्तमवलम्बितं निर्हतमम्बूकृतं ध्मातमथो विकम्पितम्।
सन्दष्टमेणीकृतमर्द्धकं द्रुतं विकीर्णमेताः स्वरदोषभावनाः॥

—पातञ्जलं महाभाष्यम्, पस्पशाह्निकम्।

परिशिष्टम्—२

भौतिकवैज्ञानिकशब्दाः

१. नाभिकम्, २. ऋणविद्युताविष्टग्रहकणः, ३. धनविद्युत्कणः, ४. निर्विद्युत्कणः, ५–प्रणाली, ६–द्रुहणः, ७–स्थूणः, ८–रिकावी, ९–अण्डाकृतिको गवाक्षः, १०–वर्तुलाकारो गवाक्षः, ११–अर्धवृत्तात्मककुल्ली, १२ सम्बूकवत् कुण्डली, १३–उद्जनम्, १४–ओषजः, १५–स्फटीमयः, १६–सिन्दूरवृक्षकाष्ठः, १७–दारुगन्धा, १८–भारतीयतरलद्रव्यम्, १९–सिक्थकः, २०–विद्युद्वाहकबलम्, २१–ध्वनिप्रेषकयन्त्रम्, २२–ध्वनिसञ्चारः, २३–कुतुपः, २४–सूक्ष्मतन्तुः, २५–ऋजुधारा, २६–प्रत्यावर्तितधारा, २७–निद्वारः, २८–विद्युच्चुम्बकीयतरङ्गाः। २९–अर्धकोशम्, (क्रोशार्धम्), ३०–वायवीयम्, ३१–फलकम्, ३२–परिकम्पनम्, ३३–ध्वनिग्राहकयन्त्रम्, ३४–वाञ्छितकेन्द्रस्य चायकः, ३५–केन्द्रस्य शक्तिवर्द्धकः, ३६–ध्वनिवर्धकः, ३७–ध्वनिविद्युद्ध्वनितरङ्गयोः पृथक्कर्ता, ३८–ध्वन्यभिलेखनयन्त्रम्, (ध्वनेः पुनरुत्पादनयन्त्रम्), ३९–मण्डलकम्।

---

1. Nucleus, 2. Electron; 3. Proton, 4. Neutron,
5. Eustachian Tude. 6. Hammer. 7.
8. Dish. 9.Odal window. 10. Round window.
11. Semi-circular canals. 12. Cochlea. 13. Hydrogen.
14. Oxygen. 15. Alumian. 16. Oak. 17. Pine. 18. Rubber.
19. Glass. 20. Electromotive Force. 21. Transmitter.
22. Brodcasting. 23. Bnlb. 24. Filament.
25. Dlrect current. 26. Alternative current. 27. Cathode.
28. Electromagnatic. 29, mile. 30. Ariar. 31. Plate. 32. Oscillation.
33. Receiving instrument of sound or radio.
34. Selector. 35. Radio frequency amflefier.
36. Loud SPeaker. 37. Detecter. 38. Gramophon, phonograph.
39. Record.

परिशिष्टम्—३

सहायकग्रन्थनामावली

सूचना—अत्र संस्कृतेतरग्रन्था अपि अङ्किताः। अतो येषां ग्रन्थानां तल्लेखकानाञ्च अङ्कितानि नामानि विभक्तिरहितानि, तानि संस्कृतेतराणि बोध्यानि।

ग्रन्थनाम	लेखकनाम
१. पाणिनीयसूत्रम् (पाणिनीयाष्टाध्यायी)	महर्षिः पाणिनिः
२. महाभाष्यम्	महर्षिः पतञ्जलिः
३. वैयाकरणभूषणसारः	कौण्डभट्टः
४. वाक्यपदीयम्	श्रीभर्तृहरिः
५. वैयाकरणसिद्धान्तकौमुदी	श्रीभट्टोजीदीक्षितः
६. लघुशब्देन्दुशेखरः	श्रीनागेशवट्टः
७. वैयाकरणलघुसिद्धान्तमञ्जूषा	„ „
८. श्रीभाष्यम्	श्रीरामानुजाचार्यः
९. पाणिनीयशिक्षा	महर्षिः, पाणिनिः
१०. सूत्रात्मकपाणिनीयशिक्षा	„ „
११. वर्णरत्नप्रदीपिका	अमरेशः
१२. नारदशिक्षा	नारदः
१३. याज्ञवल्क्यशिक्षा	याज्ञवल्क्यः
१४. ऋग्वेदप्रातिशाख्यम्	शौनकः
१५. शुक्लयजुः प्रातिशाख्यम्	कात्यायनिः
१६. तैत्तिरीयप्रातिशाख्यम्	तित्तिरिमुनिः
१७. अथर्वप्रातिशाख्यम्	अथर्वा मुनिः
१८. ऋग्वेदः	अपौरुषेयः
१९. प्राकृतप्रकाशः	वररुचिः
२०. कच्चायनव्याकरणम्	कच्चायनः
२१. निपाताव्ययोपसर्गवृत्ति	तिलकः
२२. योगदर्शनम्	श्रीपतञ्जलिः
२३. श्रीमद्भगवद्गीता	वेदव्यासः
२४. परसार्थसारः	श्रीपतञ्जलिः
२५. कारिकावली	श्रीविश्वनाथभट्टाचार्यः
२६. पञ्चसारतन्त्रम्	शंकराचार्यः
२७. श्रीमद्भागवतम्	वेदव्यासः

२८. पदार्थादर्शः	कपिलमुनिः
२९. सांख्यदर्शनम्	
३०. श्रीरामपटलः	श्रीसरयूदासः
३१. संक्षेपशारीरकम्	सर्वज्ञातमुनिः
३२. मनुस्मृतिः	मनुः
३३. भक्तिरसायनम्	श्रीमधुसूदनाचार्यः (श्रीमधुसूदनसरस्वती)
३४. श्रीमद्वाल्मीकीयरामायणम्	श्रीमद्वाल्मीकिः
३५. महाभारतम् (आदिपर्व)	श्रीवेदव्यासः
३६. योगदर्शनम्	श्रीपतञ्जलिः

परिशिष्टम्—४

आंग्लभाषीया ग्रन्थाः, तल्लेखकाश्च

1. The Structure of Language	Jerry A Fodor Jerrold
2. Language and thought of the Child.	Paged Jean.
3. Linguistic and Your Language	Robert A Halljr.
4. A Sanskrit Grammar for Student.	Arthur A Macdonell.
5. A School Greek Grammar	William W. Goodwin LL. DD. Cl.
6. A comparative Grammar of Greek and Latin.	Carl Darling Buck.

परिशिष्टम्–५

हिन्दीभाषीया ग्रन्थाः, तल्लेखकाश्च

१. वाक्यपदीय और भाषातत्त्व	डॉ० सत्यकामवर्मा
२. माध्यमिक भौतिक विज्ञान (भाग २)	डॉ० बी० एस० दूबे, एम० एस० सी०, पी-एच०, डी० एवं एच० पी० शर्मा०, एम० एस० सी०
३. परमाणु शक्ति (क्यों और कैसे ?)	ले० डोनाल्डवार, अनुवादक श्री रामचन्द्र तिवारी
४. ध्वनिविज्ञान	श्री ललितकिशोरसिंह
५. मानव शरीर की वैज्ञानिक पुस्तक	एडिथ ई० स्प्राउल एम० डी०
६. प्रकाशिकी	श्री धन्वन्तर किशोर गुप्त तथा श्री जयनारायणराय
७. रेडियो सर्विसिंग	श्री रमेशचन्द्रविजय
८. आपेक्षिकता का सिद्धान्त	डॉ० निहालकरण सेठी
९. श्रीरामचरितमानस	श्रीमद्गोस्वामी तुलसीदास
१०. अरस्तू	श्री शिवानन्द शर्मा
११. भाषारहस्य	श्री श्यामसुन्दर दास
१२. भाषालोचन	श्री सीताराम चतुर्वेदी
१३. सामान्य भाषाविज्ञान	श्री बाबूराम सक्सेना
१४. संस्कृत साहित्य का संक्षिप्त इतिहास	श्रीवाचस्पति गैरोला
१५. ध्वनिविज्ञान	गोलोकविहारी धल
१६. संस्कृत का भाषाशास्त्रीय अध्ययन	श्री भोलाशंकर व्यास
१७. कवितावली	श्रीमद्गोस्वामी तुलसीदास
१८. हिन्दी भाषा का इतिहास	धीरेन्द्र वर्मा एम० ए०
१९. भारतीय आर्यभाषा	ज्यूल्लाख अनुवादक श्रीलक्ष्मी शंकर वार्ष्णेय
२०. जापानी स्वयं शिक्षक	श्री गौरीशंकर द्विवेदी
२१. तुलनात्मक भाषाविज्ञान	पाण्डुरंग दामोदर गुणे, अनुवादक—डॉ० भोलानाथ तिवारी

तृतीयपरिच्छेदे प्रयुक्तानां केषाञ्चिद् वैदेशिकानां शब्दानां व्याख्यानाञ्च पृष्ठसंख्यासूची

पृष्ठसंख्या	पंक्तिसंख्या
२३७	समग्रं पृष्ठम्
२३८	,, ,,
२३९	,, ,,
२४०	६, २१, २२
२४१	६, ७, ८, ११, २२, ३०
२४२	समग्रं पृष्ठम्
२४३	३, ६, ८, २४, २६
२४४	४, १५-२३
२४९	७-१०
२५४	११, १२, १५-१८, २६, २७
२५५	१-२, ९-१६, २०, २१, २४, २७
२५७	१८-२७
२५८	३, २३-२६
२५९	२३, २४, २५, २६
२६०	१०-११, १४
२६३	९-१२, १६, १९
२६४	११, १३, १६
२६५	१, १०
२७१	३, १२, २०, २३, २५, २८
२७२	२, ४, ६, ११, १२, २७
२८०	३, ४, ५, २१-२५
२८१	समग्रं पृष्ठम्
२८२	,, ,,
२८३	४-१३, १७, १९, २०, २१
२८४	१८-२१, २४-२६
२८५	४
२८६	१४, १५, १९, २३, २७

पृष्ठसंख्या	पंक्तिसंख्या
२८८	१, २, १०-१३
२९३	१६,
२९४	२१, २२
२९६	१,
२९८	२, ३, ७, ८, १२, १३
३००	१०-१२, १४, १५, १५, १७, १८, २२
३०१	३-४, ५, २२, २४, २५
३०२	३, ४, ६, ७, ११, १९, २३, २६, २७
३०४	९-११, १७, १९
३०६	३, ५, ६, १५
३०७	२१,

परिशिष्टम्–६

शोधनपत्रम्

पृ० सं०	पंक्तिः	अशुद्धपाठः	शुद्धपाठः
१२	१	नाभिकम्	नाभिकम् अभितः
१३	११	परमाणरूपेण	परमाणुरूपेण
१५	१६	समवग तव्यम्	समवगन्तव्यम्
१६	१०	उद्धरणे ह्य शा	ह्यासन्
१८	५	ध्वनिमात्रम्	ध्वनिज्ञानम्
२०	१४	स्वस्यातिशयेन	स्त्वस्यातिशयेन
२०	२८	तत्तत्सम्बद्धातः	तत्तत्सम्बद्धान्तः
२७	२५	वक्तुः सुकरम्	वक्तुमसुकरम्
२८	१८	Sund	Sound
२९	२४	प्राप्तिमत्त्वात्	व्याप्तिमत्त्वात्
३१	२४	प्रथमाविभक्तः	प्रथमो विभक्तः
३१	३३	क ला	कालो
३३	११	परिक्रामति	परिक्रामन्ति
३३	१८ २४	विद्यत्त०	विद्युत्त०
३४	१	वैयाकरण	वैयाकरणैः
३४	१५	शक्तियतस्य	शक्तियुतस्य
३५	१३	ऋजुधाराया	ऋजुधारया
३६	१	०तस्मादण०	०तस्मादणु०
३७	१४	चतुरङ्गानि	चतुरङ्गाणि
३८	२५	प्रकाशे	प्रकाशते
४१	२४	श्रोत्रन्द्रियेण	श्रोत्रेन्द्रियेण
४२	७	सजीवस्यैव	सबीजस्यैव
४३	१०	ध्वनि	ध्वनि
४३	१६	यथासख्यम्	यथासंख्यम्
४४	१३	प्रोक्तन्	प्रोक्तम्
४५	२३	आमनति	आमन्नोति
४८	१४	०भाषायां स्पष्टा०	०भाषायामस्पष्टा०
५४	३०	ये अपर०	अपरं०
५५	१५	एतत्सर्वंशब्दानाम प्र०	शब्दानां प्र०
५९	१८	पद य	पदस्य

पृ० सं०	पंक्तिः	अशुद्धपाठः	शुद्धपाठः
६३	९	चिवृत्तिः	चित्तवृत्तिः
७१	३४	भतानां	भूतानां
७२	२४	भावा चित्त०	भावाच्चित्त०
७३	२३	प्रत्ययाहेतुः	प्रत्ययो हेतुः
७४	३३	नकत्रास्ते	नैकत्रास्ते
८६	१५	सेण्टशब्दे	सेण्टरशब्दे
८९	९	बाराङ्गना	वाराङ्गना
८९	१४	शवनोति	शक्नोति
९१	२८	तया	तथा
९९	६	श ह ष	ह श ष
९९	१७	सन्निविविशे	सन्निविवेशे
१००	३२	तद्धनं	यद्धनं
१०१	७	वर्णमालमा०	वर्णमालामा०
१०६	१७	ख ग	ख घ
१०९	१०	दीर्घाकारैकारौ	दीर्घाकारेकारो
११४	१०	दन्त्यौष्ठ	दन्त्यौष्ठ्य
११५	२१	आकाराद्यौ०	अकाराद्यौ०
१२१	२६	इ	इ ०
१२७	१३	समुदीयते	समुदीर्यते
१३०	५	कटकुण्डलादि	कटककुण्डलादि
१३३	१६	वाक्यषदीयस्य	उक्तं च वाक्य०
१३५	१६	विवणश्च	विवरणश्च
१४९	२६	जिह्वामलान्त०	जिह्वामूलान्त०
१५०	१०	यन्त्र प्रकम्प्य	यन्त्रं च प्रकम्प्य
१५७	१२	दुग	दुर्गे
१५९	१५	स्पर्शान्ते	स्पर्शास्ते
१७५	११	वेदितव्यः	वेदितव्यौ
१७६	९	क्रियने	क्रियते
१७७	४	उत्तिष्ठते	उत्तिष्ठति
१७९	२०	ङकारजकारो	ङकारञकारौ
१८२	२७	स्वरोकारो	स्वरोऽकारो
१[illegible]७	१७	ओदिभिः	ओद्रिभिः
१८५	६	उतत्व	उतत्वः
१९४	६	विपक्षित—	विवक्षित—

पृ० सं०	पंक्तिः	अशुद्धपाठः	शुद्धपाठः
१९५	१३	०घटकयकारस्य	०घटकसकारस्य
१९५	२१	सर्वर्क्षत्यादयः	सर्वर्क्षेत्यादयः
१९५	२२	मे ऋद्धिश्च	म ऋद्धिश्च
२२१	२	भाषा समागतासु	समागतासु
२३७	१९	ओ ऍ किओन	ओॅइकिओन
२४०	११	घटकसब्दानां	घटकशब्दानां
२४१	६; ७	ऑएन्	ओॅएन्
२४१	१२	पू ऊनताए	पोॅइऊनताए
२४१	२३	आफ्थालम्बॉएस	आपथालमोॅइस
२४१	३०	मा एस	मोइस
२४१	३०	चतुर्ध०	चतुर्थ०
२४२	३	काकाएस	काकोॅएस
२४२	२४	आर्गीज्देस्थे	आर्गीज्देस्थेॅ
२४२	२४	तोॅइस	तोॅएस
२४३	४	पॉतृस	पोॅतृस
२५०	१५	अस्थां	अस्यां
२५२	१७	इस्सर	इस्सरो
२५४	१९	अव्युत्पन्ग्र	अव्युत्पन्न
२५९	२०	समासक्रियाभ्यां	समासप्रक्रियाभ्यां
२५९	४	समुपलभ्यते	समुपलभ्यन्ते
२६१	१	आख्यातः	आख्यातान्तः
२६१	६	धातोर्वार्वियौ	धातोर्वाच्यौ
२६१	१३	व्यभजनम्	व्यभजम्
२६१	१५	विचारयिस्यते	विचारयिष्यते
२६१	१८	०मेवानुसति	०मेवानुसरति
२६४	११	एजन	एअन
२६४	१४	एफावेता	ऍ फॉवेतोॅ
२७९	२१	आख्यात	आख्यातान्त
२८१	३	ग्रीकभासा	ग्रीकभाषा
२८२	१५	न्तो, न्त	न्ताई, न्ते, न्तो (न्त)
२८५	४	लुमेन	लुओॅमेन
२८६	१९	फोॅरो	फेरोॅ
२८८	१२	कारयकारयो	इकारयकारयोः

पृ० सं०	पंक्तिः	अशुद्धपाठः	शुद्धपाठः
२९३	१८	पूर्वंगमा	पूर्वांगमा
२९६	१५	एलु + अ + न्	एँलुअन्
३००	१८	ध्वनिः	ध्वनिः
३०१	११	नामिक	नाम
३०१	१२	व्याख्याताः	व्याख्याताः।
३०१	१२	भाषावैसानिकाः।	भाषावैज्ञानिकाः
३०५	१	रुषसर्गयोः	रुयसर्गयोः

SREE SANKARACHARYA UNIVERSITY OF SANSKRIT KALADY
LIBRARY
1750